आचार्यमम्मटप्रणीतः

काव्यप्रकाशः

भट्टकमलाकरप्रणीतया कमलाकरीव्याख्ययाऽनुगतः

प्रस्तावना-पाठान्तर-टिप्पण्यनुक्रमणिकादिभिः समन्वितः

सम्पादकः

आचार्य बाबूलाल शुक्ल

NAG PUBLISHERS

नाग प्रकाशक

'Kavyaprakash' written by Acharya Mammata, is considered as an authentic and highly valuable work in Indian classic literature. The work was so great and important that many well-known scholars from far and wide wrote commentaries on it from different angles. Among them was Bhatt Kamalakar, a great and authentic scholar whose commentary on the book established him as a great Sanskrit scholar. For over two centuries now, this commentary has become a literary tradition among the scholars and students of classic literature. Since it was not published, this great work was not available to all the scholars and students. Acharya Shukla has done a great and remarkable service by edit it and making it available to those interested in classics.

आचार्यमम्मटप्रणीतः

काव्यप्रकाशः

भट्टकमलाकर प्रणीतया कमलाकरीव्याख्यया ऽनुगतः

प्रस्तावना-पाठान्तर-टिप्पण्यनुक्रमणिकादिभिः समन्वितः ।

आचार्यमम्मटप्रणीतः

काव्यप्रकाशः

भट्टकमलाकरप्रणीतया कमलाकरीव्याख्ययाऽनुगतः

प्रस्तावना-पाठान्तर-टिप्पण्यनुक्रमणिकादिभिः समन्वितः ।

सम्पादकः

आचार्यबाबूलालशुक्लः, शास्त्री

मध्यप्रदेशशासन-साहित्यपरिषद्-सम्मानितः

अनुसन्धानाचार्यः कालिदास अकादेमी,

उज्जैन (म० प्र०)

NAG PUBLISHERS

नाग प्रकाशक

११ ए. यू ए. जवाहर नगर दिल्ली-११० ००७

THIS PUBLICATION HAS BEEN BROUGHT OUT WITH THE FINANCIAL ASSISTANCE FROM RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI.

NAG PUBLISHERS
(i) 11A/U.A. (Post Office Building), Jawahar Nagar, Delhi 110 007.
(ii) Sanskrit Bhawan, 12,15, Sanskrit Nagar, Plot No. 3, Sector-14, Rohini, New Delhi - 110 085
(iii) Jalalpur Mafi, Chunar, Dist. Mirzapur, U. P.

ISBN 81-7081-300-X

FIRST EDITION : 1995

Price : Rs. 91.00

PRINTED IN INDIA

Published by Surendra Pratap for Nag Publishers, 11A/U.A., Jawahar Nagar, Delhi-110007 and printed at G. Print Process, 308/2, Shahzada Bagh, Dayabasti, Delhi-110035.

Laser Typesetting By:
Compu-Media-The D.T.P. People,
43, Bunglow Road, Kamla Nagar, Delhi-110 007
Phone : 2911869

INTRODUCTION

I have great pleasure to submit for the first time KAVYAPRAKASHA of Mammata with the commentary of Kamalakara Bhatta in the hands of learned scholars of Sanskrit literature. Kavya Prakasha is highly placed in Sanskrit Poetical literature and many experts and excellent scholars all over India in this field have written commentaries on it and such enterprises are still going on. The important point in view is that this Commentary of Kamalakar Bhatt has not yet been printed and published, yet it was held in high regard and was being taught in Kashi traditional schools for centuries. And, therefore, I have edited it for the studies of learned students. The basis of this edition are the following manuscripts :-

1. Kamalakari Commentary - Ms. No. 429 (1875-1902) preserved in Bhandarkar Oriental Research Institute, Pune, No. Folios - 225, complete and written in Devanagari script. I designated it as 'अ'

2. One Lithoprinted very old copy, Varanasi - Folios-108 Complete - designated as 'च'

3. One Ms. preserved in my parential collection, Ujjain incomplete. Folios 198 and ullasa Seventh. From the eighth chapter to its end are missing. It's designation is 'स'

4 & 5. Two manuscripts preserved in Saraswati Bhawan Ms. Library of Varanaseya Sanskrit University, Varanasi; both the manuscripts are complete and similar to manuscripts No. 1-2 respectively.

On the basis of these Mss the text of the Commentary of Kamalakara Bhatta has been edited with various readings. The authorities of the abovesaid Institutions have obliged me and I thank them for their cooperation in this regard.

KAMALAKARA BHATT - THE COMMENTATOR OF KAVYA PRAKASHA HIS GENEOLOGY AND WORKS

Centuries back, Govind Bhatt, a Deshastha Brahmin, lived in Paithanpur town (Pratishtanapur) of Maharashtra. He had

a son, Rameshwara Bhatt, who was a great scholar of his time. He travelled through the Central India and finally settled in Kashi. He lived among great scholars and saints of Kashi and was himself an acknowledged scholar. In his middle age, he was blessed with a son who was named Narayana Bhatt. Like his father, Narayana Bhatt also earned great name and fame and was a great devotee of Lord Vishwanath. It is said that once the area faced acute monsoon acarcity. Narayana Bhatt worshipped Lord Vishwanath and prayed for rains. The area received wide-spread rains and Narayana Bhatt was given the title of Jagadguru by the scholars and the people of Kashi. He wrote two great classics 'Narayana Bhatt' and 'Tristhati Setu' which are highly acknowledged and admired works even today.

This great scholar had two sons, Ramakrishna Bhatt and Shankar Bhatt. Like his father, Rama Krishna Bhatt also was a great scholar and some of his works, particularly his commentary on Meemansa Shastra and Dharmashastra, are accepted as authentic. Shankara Bhatt had three sons, - Dinakar Bhatt, Kamalakar Bhatt and Laxmana Bhatt. All these three brothers were great scholars. The eldest of the three - Dinakar Bhatt - wrote famous 'Dinakari' Teeka on Nyayashastra. He was also known as Diwakara Bhatt. He had a son named Vishweshwara Bhatt, also known as Gaga Bhatt. He was a highly acknowledged scholar of Kashi and was specially invited to conduct the Coronation cereemony of Chhatrapati Shivaji. The coronation ceremony of Chhatrapati Shivaji was accomplished at Raigarh by this great scholar. He wrote many books including Kayastha Dharmadeepa and Gaga Bhatti.

Kamalakar Bhatt was the second son of Rama Krishna Bhatt. Kamalakara was an authentic scholar of Vyakarana, Jyotisha, Dharmashastra, Nyaya and Vedanta. He wrote many great books. His great work Nirnaya Sindhu is supposed to be an authentic work even today. His other books are poorta Kamalakar, Ram Kamalakara, Shanti-Kamalakara, Aahnika Kamalakara and Shoodra Kamalakara. He also wrote Shidhhanta-Tattva Viveka - Grantha on Jyotisha. Vivada Kamalakar is another great work on Dharmashāstra. He also wrote Kavya-Prakasha Kamalakari on Poctics. This became an authentic work on Kavyashastra. Another work Nirnaya

Sindhu, written in Vikram Samwat 1668 was acknowledged as a great work. Kamalakar Bhatt wrote Kamalakari Teeka on Kavya-Prakasha which was greatly admired work.

Acknowledgements and expression of gratitude with thanks :

In editing and publishing this authentic and unpublished commentary of Kamalakar Bhatta on the text of KAVYA PRAKASHA of Mammata I have receeived cooperation, inspiration and help from many sources. First of all I am highly obliged to Dr. Madhusudan Mishra, Deputy Director, Rashtriya Sanskrit Samsthan, Ministry of Human Resource Development, Government of India, New Delhi, who made publication possible by awarding financial grants. I express my gratitude and thanks to Shri Surendra Prakash, the Manager of Nag Prakashan, who attended and cared for the correct printing of this book. I am also grateful to Prof. Dr. S.P. Narang, Delhi University for his kind cooperation in this work.

I feel indebted to Professor Shriniwas Rath, Director, Kalidasa Akademi, for his keen interest in the editing and publishing of this eminent traditional commentory. I extend my hearty congratulations to Dr. Jagadish Sharma, Deputy Director, Kalidasa Akademi, Shri P.S. Yadav, Administrative Officer and the staff of the Kalidasa Akademi, for their assistance and necessary help with special mention for Shri R.J. Panadiwal for his best cooperation and correct typing. Similarly my friend Dr. Rudradeo Tripathi of Birla Shodha Samsthan, Dr. Sheetanshu Rath of Scindhia Oriental Institute, Ujjain also deserve thanks for their kind cooperation. I am thankful to Dr. B.L. Kulmi also of the Govt. Girls Postgraduate College, Ujjain for the design of the wrapper. I close my humble expression with a bow to Lord Mahakal Des and Goddeess Harsiddhi respectiveely. With regards

Kalidasa Akademi — **BABULAL SHUKLA 'SHASTRI'**
UJJAIN
2051 Vikram, 1994 AD.

कमलाकरी व्याख्या सनाथस्य काव्यप्रकाशस्य

विषयानुक्रमणिका

श्रीमम्मट-भट्टप्रणीतः

काव्यप्रकाश

।। श्रीकमलाकरभट्टप्रणीतया कमलाकरीव्याख्ययाऽनुगतः ।।

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति-

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।१।।

कमलाकरी

नत्वा गणेशं वाग्देवीं साम्बं शम्भुञ्च राघवम् ।
श्रीरामकृष्णपितरं नत्वोमाख्याञ्च मातरम् ।। १ ।।
नारायणात्मजः श्रीमद्रामकृष्णात्मजः कृती ।
काव्यप्रकाशगां व्याख्यां तनोति कमलाकरः ।। २ ।।
काव्यप्रकाशे टिप्पण्यः सहस्रं सन्ति यद्यपि ।
ताभ्यस्त्वस्या विशेषो यः पण्डितैःसोऽवधार्यताम् ।। ३ ।।

स्वकृतकारिकां व्याचिख्यासुराद्यर्भोकस्यावतारिकामाह-ग्रन्थेति । एकार्थको वाक्यसन्दर्भो ग्रन्थः । परमानन्दस्तु सम्बन्धप्रयोजनज्ञानाहितशुश्रूषाजन्यश्रुतिविषयः शब्दसन्दर्भो ग्रन्थः। सम्बन्धो वाच्यवाचकभावादिस्तस्य प्रयोजनस्य च ज्ञानेन शुश्रूषा ततो ग्रन्थश्रवणमित्याहुस्तन्न घटमानयेत्यादिवाक्येऽतिव्याप्तेः। पूर्वोत्तरपक्षादि पञ्चाङ्गकं वाक्यं ग्रन्थ इति श्रीवत्सलाञ्छनः । तत्तुच्छं भारतादावव्याप्तेस्तेन पूर्वोक्तमेव साधु । ग्रन्थो महावाक्यम् । महत्वञ्च विवक्षितार्थपरानपेक्षत्वमिति देवनाथः । आरम्भ आद्या कृतिः । यत्तु आरभ्यतेऽस्मिन्नित्यारम्भः प्राक्काल इति स एवाह तन्न । नहि 'दर्शपूर्णमासावारभ्यमान' इत्यादौ कालाङ्गत्वमिष्टः, आद्यकृतौ रूढेर्योगादबलवत्वाच्च । एतेन आद्यावयव आरम्भ इत्यपास्तम् । कर्मणो निरवयवत्वाद् द्वितीयादिप्रयोगे तदापत्तेश्च । आगमे तत्प्राक्काले इति केचित् तन्न लक्षणापत्तेः । अत[1] आरम्भे निमित्तसप्तमी 'चर्मणि द्वीपिनं हन्ती'त्यादिवत् । तन्निश्चयवाँश्चाधिकारी तेनाद्यप्रकृतेः कथमाधारत्वमित्यपास्तम् । विघ्नेति । विशिष्टो घातो ध्वंसः। वैशिष्ट्यञ्च समादन्ययोगव्यवच्छेदः । समाप्तौ मङ्गलस्यान्वयतिरेकाभ्यां व्यभिचारादन्यथासिद्धेश्च विघ्नध्वंसस्यैव फलत्वमिति भावः ।

---

१. नत - अ० ।

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारकारणपरतन्त्रा षड्रसा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मितिर्निर्माणम् एतद्विलक्षणा तु कविवाङ्निर्मितिः । अत एव जयति । जयत्यर्थेन नमस्कार

कमलाकरी

वाङ्मयग्रन्थस्य तदेवसाध्यत्वात् । समुचितां योग्यामिष्टामाराध्यां भारतीरूपां परामृशति स्तौतीति लाटभास्करः । नमस्कारत्वेन स्मरतीति नमस्कार्यत्वेन स्मरतीति मधुमतीकार-सबुद्धिमिश्रौ । सर्वोत्कृष्टत्वेन प्रतिसन्धत्ते इति परमानन्द-देवनाथौ ।

नियतीति - । कवेर्भारती जयति सर्वोत्कर्षेण वर्तते न तु वर्ततामित्यर्थः । उत्कर्षस्यासिद्धत्वेन निकृष्टतापत्तेः । यद्यपि भारतीपदं देवतापरं न च शब्ददेवतोभयशक्तं, शब्दे गौणत्वाद् वृत्तिद्वयविरोधात् । नाप्यधिष्ठातरि लक्षणा । अत्र कविपदसन्निधानात् तु शब्दपरं कविपदवैयर्थ्यात् कोशादौ देवतायां शक्तत्वेन लक्षणायोगाच्च । न च कवेर्निर्मितिमादधतीत्यन्वयः एतद्विलक्षणा तु कविवाङ्निर्मितिरिति व्याख्याविरोधात् । तदापि प्रतिमादौ विष्ण्वादिपदवदधिष्ठातुरभेदात्तथा व्यपदेशः। यद्वा कवेर्निर्मितिरिति सम्बन्धः । सप्तम्यर्थे वा षष्ठी । निर्मीयत इति निर्मितिः काव्यम् । कवौ तन्निक्षिपतीत्यर्थः । आदधती प्रकाशयतीति श्रीवत्सलाञ्छनः । यद्वा निर्मीयत काव्यमनयेति निर्मितिः शक्तिस्तां कवौ निक्षिपन्ती । देवताप्रसादेन हि काव्यबीजभूता शक्तिराधीयते । ब्रह्मसृष्ट्यपेक्षयोत्कर्षहेतूनाह - नियतीति-नियम्यते सौरभादीन्यनयेति नियतिरसाधारणो धर्मः पद्मत्वादिस्तत्कृतो नियमः । यत्र पद्मत्वं तत्र सौरभविशेष इति व्याप्तिस्तद्रहितां तेन विनापि कान्तामुखे तत्सत्त्वात् । यद्वा नियम्यतेऽनयेति नियतिः कारणतानियामिका शक्तिः यद्वा नियम्यते कार्यमनयेति नियतिः कारणं तद्रहिताम् । तां विनापि मुखे पद्मत्वावभासात् । यद्वा नियतिर्विधिरीश्वरस्तत्कृतो नियमः शब्दार्थयोर्वाच्यवाचकत्वादिः। पद्मादिपदात् केसरपत्रादिमानर्थः प्रत्येतव्य इत्येवं विधेरीश्वरेच्छैव शक्तिः तद्रहितां, काव्ये पत्रादिकं विनापि मुखे पद्मत्वादिप्रयोगात् । यद्वा नियतिर्विधिरदृष्टं वा तत्कृतो नियमोऽयं दुःखी सुखीति । तद्रहिताम् । अत्र सर्वस्य सुखोत्पत्तेः[१] ह्लादेति ह्लादेन

१. सर्वसुखो - अ. ।

आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते ।

इहाभिधेयं सप्रयोजनमित्याह–

कमलाकरी

सुखैकमयीमेकस्वभावाम् । एकशब्दे मात्रार्थे स्वार्थे मयट् । लक्षणया सुखमात्रजनिकां तत्स्वभावां वेत्यर्थः । अन्ये भावाः सुख- खमोहात्मकाः त्रिगुणा भावा इति हि सांख्याः । प्राचुर्ये वा मयट् । ह्लादैकप्रचुरामित्यर्थः । यत्तु देवनाथेन विशेषणत्वे कामचारात् ह्लादान्वयोऽपि साधुरित्युक्तं तन्न 'पूर्वकाले (अष्टा. २।१।४९) त्यादिनैक-शब्दस्य पूर्वनिपातापत्तेः । अन्यस्य भारतीभिन्नस्य समवाया-समवायिनिमित्तकारणादेः परतन्त्राधीनेत्यर्थः । परतन्त्र पराधीनः (अम. ३।१।१६) इति कोशात् पराधीने रूढोऽयम् । तेंनान्यपरशब्दयोः पौनरुक्त्यशङ्का परास्ता । तत्त्वन्तु विशिष्टवाचकानां पदानां विशेषणसन्निधाने 'स कीचकैर्मारुतपूर्णरन्ध्रै (रघु. २।१२) रित्यादिवद्विशेष्यमात्रपरत्वादधीनत्वमात्रं परतन्त्रशब्दार्थ अतो न पौनरुक्त्यमिति वयम् । यत्तु नास्त्यन्यः परः श्रेष्ठो यस्मात् सोऽन्यपरः तत्तन्त्रामिति । यच्च देवनाथ अन्यपरो भारतीविमुखचित्तस्तदन्योऽनन्य-परस्तत्तन्त्रामिति तन्न उपादानेत्यादिव्याख्याविरोधात् । नवेति । नवरसा चासौ रुचिरा चेति । कर्मधारयः । नवरसैः रुचिरेति केचित् । तत्र 'दिक्संख्ये संज्ञायाम्' (अष्टा. २।१।५०) इति संज्ञायामेव समासात् नवरसपदे च तदभावात् । केचित्तु बहुव्रीहिगर्भद्वन्द्वोऽयम् नीलघटयो रभेद इतिवत् पदार्थतावच्छेदकभेदादित्याहुः । तन्न द्विवचनापत्तेः । एकवद्भावे रुचिरमित्यापत्तेश्च । न च द्विगुः ।[१] नवरसीरुचिरामित्यापत्तेश्च । यद्वा नवभी रसै रुचिरामिति तृतीयातत्पुरुषः 'त्रिगुणसचिव' इतिवत् ' त्रिलोकनाथेन सतां मखद्विषः ' (रघु. ३.४५) इतिवच्च समाहारस्याविवक्षणात् । यद्यपि 'दिक्संख्ये संज्ञायाम् " (अष्टा. २।१।५१) इति संज्ञायामेव समासविधानं तथाप्यनित्यमेतत् 'तद्धितार्थोत्तरपद' (अष्टा. २।१।५१) इत्यत्र संज्ञाभावेऽपि विधानादित्यन्यो तन्मन्दम् । उत्तरपद इत्यस्य बहुव्रीहिरूपसमासावयवपरत्वादत्र च

१. तत्र उपादानेत्यादिव्याख्याविरोधात् । नवेति- नवरसा चासौ रुचिरेति कर्मधारयः । नवरसैः रुचिरेति केचित् । तत्र दिक्संख्ये संज्ञायामिति संज्ञायामेव समासान्नवरसपदे च तदभावात् । केचित्तु बहुव्रीहिगर्भः द्वन्द्वोऽयम् । नीलघटयोरभेद इतिवत् पदार्थतावच्छेदकभेदादित्याहुस्तन्न द्विवचनापत्तेः एकवद्भावे रुचिरमित्यापत्तेश्च- ब. ।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ २ ॥

कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम् । सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम् , प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणा-

कमलाकरी

तदभावात् । तेन नवविधो रसो नवरसः । एवं त्रिगुणेत्यादौ शाकपार्थिवादित्वान्मध्यमपदलोप इत्यपरे । नवरसा यस्यां सा चासौ रुचिरेति तु वयम् । कविनिर्मितेरुत्कर्षस्य प्रतियोग्यपेक्षायां ब्रह्मसृष्टिस्वरूपं व्यतिरेकमुखेन विवृण्वन् श्लोकं व्याचष्टे नियतिशक्त्येति । नियतिः कारणं तस्य नियामिका कारणत्वशक्तिः सङ्केतरूपा चोक्ता सुखदुःखमोहरूपसत्त्वरजस्तमोमयप्रकृतिविकारत्वात् तदात्मिकाम् । अत एवैका कामिनी कञ्चित् प्रति सुखरूपाऽन्यस्य दुःखरूपा । साङ्ख्यमते चैतत् । अन्यमते तु सुखदुःखमोहानां स्वस्मिन् भाव उत्पत्तिर्यस्यामित्यर्थः। परमाण्विति परमाण्वाद्युपादानं समवायिकारणं कर्मचलनम् आदिशब्दाद् अदृष्टं निमित्तम् । सहकारि असमवायिकारणम् कारणपदस्य प्रत्येकमन्वयः । मधुरादि षड् रसाः कविनिर्मितिस्तु । नवरसेति भावः । यद्यपि कविनिर्मितौ शब्दरूपत्वाद्युपादानाद्यपेक्षाऽस्त्येव तथापि सौरभादेः पद्माद्युपादानानपेक्षत्वं मुखेऽपि तन्निर्माणादित्यर्थः । तैः रसैः हृद्या मनोहरैव न किन्तु दुःखरूपापि । अहृद्यत्वायोगव्यवच्छेद एवकारार्थः । हृद्यैवेति तु पाठः साधुः । कविवाक् कविभारती तस्या निर्मितिर्निर्माणं काव्यम् । कर्मणि क्तिन् । यद्वा कविवाग्[1] रूपनिर्मितिः । अत एवेति । यतो विलक्षणां निर्मितिं करोति अत एवेत्यर्थः । एवकारोऽप्यर्थ[2] इति केचित् । जगत्येवेत्यन्वयादुत्कर्षायोगव्यवच्छेदार्थ इत्यन्ये । अत्र ब्रह्मतन्निर्मित्यपेक्षया भारतीतन्निर्मित्योराधिक्याद् व्यतिरेकालङ्कारः । तदुक्तम् -

---

१. वाग्रूपा मिर्मितिः -व.
२ कारो व्यर्थः - ब. ।

दीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवदित्युपदेशञ्च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।

कमलाकरी

केनचिद् यत्र धर्मेण द्वयोस्संसिद्धसाम्ययोः।
भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ।। इति।

भारतीविषया रतिर्व्यङ्ग्या स्पष्टैव।

ननु मङ्गलापेक्षायां नतिः किं न कृता तत्राह जयत्यर्थेनेति। आक्षिप्यते व्यज्यते। न च नत्या स्तुतिसिद्धे वैंपरीत्यं शक्यं तस्यास्तदव्याप्तेः। अयं भावः जयत्यर्थ उत्कर्षः, स च भारत्यामविशेषात् सर्वप्रतियोगिक इति तदन्यस्य सर्वस्यापकर्षभानात्[१]। ननु तर्हि सर्वः प्रणत इति स्यान्न त्वहं प्रणत इति तत्राह - तां प्रतीति। तत्रापि व्यञ्जनेवैत्यर्थः। सर्वान्तःपातिनः स्वस्यापि अपकर्षज्ञानात्। सैव नतिरिति भावः। इहेति - इह ग्रन्थे। अभिधेयफलेनैव ग्रन्थस्य फलवत्वात् प्रवृत्तिर्युक्तेत्यर्थः। ग्रन्थस्य प्रेक्षावत्प्रवृत्त्यर्थं काव्यफलेन फलवत्त्वं वक्तुं काव्यफलमाह - काव्यमिति। यशसे इत्याद्यास्तादर्थ्यचतुर्थ्यः। कृते विदे युजे इत्येते भावे क्विबन्ताः। कृते करणाय। कृते इत्यव्ययं चतुर्थीप्रतिरूपकम् मत्कृते दीनासीतिवत्। तेनार्थामिति वा। विदे वेदनाय। शिवेतरं दुःखं तस्य क्षतिर्नाशः ननूपदेशार्थं नीतिशास्त्राणि सन्ति किं काव्येन तत्राह। कान्तेति। त्रिविधो हि शब्दः प्रभुसम्मितः सुहृत्सम्मितः कान्तासम्मितश्चेति। आद्यो वेदादिः। द्वितीयः पुराणेतिहासादिः। स हि एवं कृते इदमिष्टमनिष्टमिति सुहृदिवाह। तृतीयः काव्यरूपः। स हि नीतिशास्त्रविमुखान् सुकुमारमतीन् राजकुमारादीनपि कान्तेव सरसतामापाद्योपदेशं ग्राहयति। गुडजिह्विकान्यायेनेत्यर्थः। कान्तासम्मिततया रमणीयतयोपदेशस्य युजे योगाय गुणोपदेशायेति व्यत्यासो ज्ञेयः। विशेषणत्वे कामचारात्। यद्वा कान्तासम्मिततयेति परनिर्वृत्याद्यैरपि यथायोगमन्वयः।

---

१. सर्वस्यापकर्षभानम्। ब.।

एवमस्य प्रयोजनमुक्त्वा कारणमाह-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।। ३ ।।

शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात् । लोकस्य

कमलाकरी

काव्यस्य यश आदिहेतुत्वे मानाभावमाशङ्क्य हेतुताग्राहकमाह- कालिदासेति । लोकोत्तरवर्णनारूपं निपुणकविकर्मरूपं यत् काव्यं तत् कालिदासादीनामिव यशो धनमानन्दश्च कवेः करोति । उपदेशमानन्दश्च सहृदयस्य यथायोगं करोत्यतः सर्वथा तज्ज्ञाने तन्निर्माणे च यतनीयमित्यन्वयः । श्रीहर्षादेरिति पञ्चमी । धावकनामा कविः रत्नावलीनाटिकां श्रीहर्षसंज्ञे राज्ञि विक्रीय धनमवापेति जनप्रथा । व्यवहारपदार्थमाह - राजादीति । आदिपदान्मुनिदेवतादिग्रहणम् । उचितेत्यनुचिताचारनिवृत्त्यर्थम् । आदित्यादेरिति पञ्चमी । मयूरनाम्नो हि कवेः सूर्यशतकेन कुष्ठनाशः प्रसिद्धः । एतेनादृष्टफलार्थत्वमुक्तम् । एवं हरिवर्णनादीनां मुक्त्यर्थत्वं बोध्यम् । अनर्थपदेन सर्वथा[१]नर्थव्रातनिदानमिथ्याज्ञानोक्तेः । तदुक्तम् - "सवाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि" (श्री.भा. १२।१२।५१) इति । तथा "हृद्वागवपुभिर्विदधन्नमस्ते लभेत यो मुक्तिपदे स दायभाग्" (1...) इति (च) । निर्वृतेः परत्वमाह सकलेति । निरुपाधीच्छाविषयमित्यर्थः । समनन्तरमिति । सद्यः पदार्थमाह - न कालान्तरे देहान्तरे वा किन्तु काव्यश्रवणान्तरमेवेत्यर्थः । रसेति । रस्यत इति रसो भावः । आस्वाद्यत इति आस्वादनम् । आस्वाद्यमानं यथा वक्ष्यति चर्व्यमाणतैकप्राण इति । समुद्भूतं सम्यगुद्भूतं स्वप्रकाशमिति यावत् । ततः कर्मधारयः स्वप्रकाशज्ञानात्मकमित्यर्थः । यत्तु रसस्यास्वादो ज्ञानं तस्मात् समुद्भूतमिति तन्न आस्वाद्यमानस्यैव रसत्वात् रसस्यैवानन्दत्वात् अजन्यत्वाच्च । विगलितं निरस्तं वेद्यान्तरं स्वातिरिक्तविषयान्तरं यत्र । स्वमेव विषयो विषयी च । न तु घट[२] इव ज्ञानस्यान्यो विषय इत्यर्थः । तेन सर्वं ज्ञानं स्वविषयातिरिक्तविषयहीनमिति कोऽत्र विशेष इति शङ्का परास्ता ।

---

१. सर्वानर्थव्रातनिदानमिथ्या - ब. ।
२. घटा इव - अ. ।

स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधान-कोशकलाचतुर्वर्गगजतुरगखड्गासङ्गदिलक्षणग्रन्थानाम् । काव्यानाञ्च महाकविसम्बन्धिनाम् । आदिग्रहणादितिहासादीनाञ्च विमर्शनाद् व्युत्पत्तिः । काव्यं कर्तुं

कमलाकरी

कान्तासम्मितत्वं विवृणोति । प्रभ्विति । सम्मितानि तुल्यानि शब्दप्रधानानि शासनप्रधानानि विधिरूपाणि । यद्वशादिष्टहेतुतामनालोच्य निष्फलेऽपि नित्ये नैमित्तिके सन्ध्यादौ प्रवर्तते । आदिशब्दात् स्मृतयः । एतच्च गुरुमते ज्ञेयम् । तेषां नित्यादौ नियोगसिद्धेरेव फलत्वात् । अन्यमते तु प्रत्यवायपरिहारस्य भाव्यत्वान्नेदम् । मधुमतीकारस्तु - शब्दप्रधानत्वं शब्दपरिवृत्यसहत्वम् । न ह्यग्निमीले इत्यत्र वह्निमीले ईळेऽग्निमिति वा फलदमित्याह तन्न पुराणादावपि सत्त्वात् । वस्तुतस्तु वेदादीत्यादिशब्देन पुराणादेग्रहणम् पुराणेतिहासेभ्य इति पुराणानां पुरातनानां ये इतिहासाः भारतादयः । यद्वा कर्मधारय इति युक्तम् । अर्थप्रधानत्वमर्थतात्पर्यवत्वम् । एवं कृते एवं भवतीत्युपदेश एव । सुहृद्व्यापारस्त्रिविधः शब्दः । तत्र प्रभुसुहृत्- सम्मिताभ्यां विलक्षणं यत् काव्यमित्यन्वयः । वैलक्षण्ये हेतुमाह-शब्दार्थयोरिति । रसाङ्गभूतो रसाभिव्यक्तिहेतुर्व्यापारः । शब्दार्थयोर्व्यञ्जनात् तत्प्रवणत्वं तदर्थप्रयुक्तत्वम् । प्रवणतया गुण- भावाद्विलक्षणत्वमित्यर्थः । यद्वा प्रवणतयेति । कान्तेवेत्यन्वयः । काव्यपदमाचष्टे लोकोत्तरेति । लोकोत्तरा शब्दान्तरासाध्या वर्णना विभावादिप्रत्यायनं तस्यां निपुणस्य कवेः कर्मेति[१] केचित् तन्न स्थपत्यधिकरणन्यायेन तत्पुरुषस्य दुर्बलत्वात् कवेर्भोजनोत्थानादिकर्मण्यतिव्याप्तेश्च । तेन लोकोत्तरवर्णनारूपं यन्निपुणं कविकर्मेत्यर्थः । रामादिवदिति - नीतिशास्त्रविमुखान् राजकुमारादीनपि रमणीयार्थकथनेन कटाक्षादिभिः कान्तेव सरसतामापाद्य रामादिवर्णनव्याजेन नीतिशास्त्रार्थे उपदेशे प्रवर्तयतीत्यर्थः । यथायोगमिति कवेः यश आदिकं सहृदयस्योपदेशमनर्थनाशिनामानन्दादि तूभयोरित्यर्थः । फलितमाह-इति सर्वथेति । काव्यफलेनैव लक्षणस्य

१. कर्मेत्यर्थ इति तन्न - अ. ।

विचारयितुञ्च ये जानन्ति ,तदपुदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्तास्तस्य काव्यस्योल्लासे समुल्लासे च हेतुर्न तु हेतवः ।

एवमस्य कारणमुक्त्वा स्वरूपमाह-

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

दोषगुणालङ्काराः वक्ष्यन्ते । क्वापीत्यनेनैतदाह यत् सर्वत्र

कमलाकरी

फलवत्त्वादित्यर्थः । ननु तत्र यतनीयमित्युक्तं तन्न युक्तम् उपायाज्ञानात् कृतिसाध्यताज्ञानस्य प्रवर्तकत्वादत आह - अस्येति । अस्य काव्यस्य । कारणमिति । जातिपरं सामग्रीपरं वा । शक्तिर्देवताप्रसादजन्यमदृष्टम् । लोकस्तद्वृत्तम् । शास्त्रं छन्दःशास्त्रादि काव्यं रघुवंशादि । आदिपदादितिहासादि । अवेक्षणं विमर्शः । तस्मान्निपुणता काव्याभ्यासश्चेति त्रितयं तदुद्भवे हेतुः । फलोपहितञ्च कारणम् । स्वरूपयोग्यता तु प्रत्येकमेव । कवित्वबीजेति - देवताप्रसादजन्यमदृष्टं न तु पदार्थस्मृतिहेतुर्भावनाख्यस्संस्कारस्तस्य साधारणत्वाद्देवता प्रसादाजन्यत्वाच्च प्रतिभारूपो गुण इति केचित् तन्न तस्य व्यङ्ग्यधीहेतुत्वात् प्रतिभाजुषामित्यग्रेऽभिधानात् । तस्याः कारणोपपत्तिमाह - यां विनेति । अत्र शक्तिं विना जनितस्य व्यभिचारादुपहसनीयस्य चमत्कारकारित्वाभावाच्च काव्यत्वाभावेऽपि काव्यपदं शब्दरचनापरम् । प्रसृतमुद्भूतम् । वाशब्दोऽप्यर्थे । प्रसृतमपीत्यर्थः । अनास्थायां वा वाशब्दः । किं वा तेन सुतेनास्येति-वत् । यद्वा यां विना कर्तरि न प्रसरेत् । शक्त्या प्रसृतमपि श्रोतर्युपहसनीयं समुल्लासकारि न स्यादिति । निर्माणे समुल्लासे च शक्तेर्हेतुत्वमुक्तम् । द्वितीय हेतुर्व्याचष्टे-लोकस्येति । धर्मिमात्रज्ञानस्याहेतुत्वादाह-लोकवृत्तस्येति । लोक्यत इति व्युत्पत्तेरित्यर्थः । वृत्ते लक्षणा त्वयुक्तैव । अभिधानं निघण्टुनिरुक्तादिः । कोशोऽमरसिंहादिः । यद्वाभिधानानां नाम्नां कोशः सङ्ग्रहः । कोशो धनं तद्ग्रन्थोऽर्थशास्त्रमिति वा । कला गीतनृत्यचुम्बनादि तद् ग्रन्थस्तद्वर्णनं कामशास्त्रञ्च । चतुर्वर्गो धर्मार्थकाममोक्षाः । ग्रन्थपदस्य प्रत्येकमन्वयः । आदिपदार्थमाह इतिहासादीनामिति । तत्रादिपदार्थमाहोपदेशेनेति । करणे निर्माणे योजने व्याखाने विभावादियोजने वा । त्रयः शक्तिनिपुणताभ्यासाः समुदिताः

सालङ्कारौ कचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः । यथा

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापार-लीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।। १ ।।

अत्र स्फुटो न कश्चिदलङ्कारः । रसस्य च प्राधान्यान्नालङ्कारता ।

कमलाकरी

दण्डचक्रादिवत् परस्परसापेक्षाः न तु व्यस्तास्तृणारणिमणिवत् प्रत्येकमित्त्यर्थः । समुल्लासे चमत्कारे । हेतुरिति-हेतुः सामग्रीफलोपहिता न तु हेतवः प्रत्येकं स्वरूपयोग्या इत्यर्थः । यतो हेतुरित्येकवचनं मूले इति परमानन्दस्तन्न लक्षणापत्तेः स्वरूप योग्यपरत्वे हेतव एव न तु हेतुरिति वाक्यार्थभेदो वा । यद्यपि निपुणताभ्यासौ विनापि शक्तिमात्राद् बालादौ काव्योत्पत्ति द्रश्यते तथापि तत्र जन्मान्तरीययोस्तयोः कल्पनम् । तत्र कार्यता वच्छेदकमेकं पृथक् वास्तु । जन्यप्रमात्ववत् काव्यत्वम् । विशिष्टं वाऽवच्छेदकमिति तर्कपञ्चाननादयः । काव्यरचने शक्तिश्चारुत्वे व्युत्पत्तिः अभिवृद्धौ वाभ्यास इत्यर्थसमाजात् समुदितानां विशिष्टकार्यहेतुता नीलं घटत्ववत् इत्याशयेनोक्तं समुदिता हेतुरिति ।

तदुक्तम् "कवित्वं जायते शक्तेर्वर्द्धतेऽभ्यासयोगतः ।
अस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसी ।। " इति प्राञ्चः ।

नव्यास्तु - न बालकेन प्राग्भवीययोस्तयोः कल्पनमन्योन्याश्रयात् सिद्धे हि तयोः कल्पने कारणत्वम् । कारणत्वाच्च तत्कल्पनमिति । नाप्यार्थः समाजः विनिगमनाभावात् । अतः कारणमाह-हेतुः कारणमुक्त्वा स्वरूपमाहेत्येकत्वश्रवणाच्छलिरेव कारणात्वं नेतरौ अतएवशक्तौ कवित्वबीजरूप इत्युक्तं नेतरयोरित्याहुः । स्वरूपमसाधारणो धर्मः लक्षणमाहेत्त्यर्थः । तददोषाविति-अर्थज्ञानस्य शब्दायत्तत्वात् कविसरम्भगोचरत्वाच्च शब्दस्य पूर्व निर्देशः । अत्र देवनाथादयः कविकृतिगोचरत्वात् काव्यं पठति काव्यं श्रृणोतीत्यादि-प्रयोगाच्च आस्वादजीवातुः शब्द एव काव्यमित्याहुः । अन्ये त्वास्वादजनकत्वं शब्दवदर्थेऽपि तुल्यं, तत्रापि रसव्यञ्जकत्वे

तद्भेदान्क्रमेणाह-

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्
ध्वनिर्बुधैः कथितः ॥४॥

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य

कमलाकरी

नास्वाढहेतुत्वात् अर्थे कविकृतिसाध्यत्वेन काव्यत्वं न तु तद्गोचरशब्दप्रकाश्यत्वाद् मावक्तम्-शब्दनित्यातावोद शब्दस्य काव्यत्ववत्-शब्दनित्यतावादे शब्दस्य काव्यत्ववत् । काव्यं पठतीत्याद्यपि विशेष्ये बाधाच्छब्दमात्रत्वम् । तेन शब्दार्थाविति द्वन्द्वे साहित्यादुंभौ काव्यम् । तत्वञ्च प्रमेयत्वोपाधिरित्यन्ये[१] पर । गोत्ववदनेकावयवसाध्यव्यक्ति-वृत्तिर्जातिरित्यन्ये । तेन काव्यत्वस्य संयोगवद् व्यासज्यवृत्तित्वे जातित्वबाँधः प्रत्येकवृत्तित्वे प्रत्येकं काव्यत्वापत्तिरिति गौडदूषणं परास्तम् ।

अदोषाविति - अत्र यत्किञ्चिद्दोषाभावो वा यावद्दोषाभावो वा । नाद्यः दुष्टकाव्येऽपि सत्वात् , नान्त्यः असम्भवात् लक्षणस्य विरलविपयत्वापत्तेः दुष्टेऽपि काव्यपदप्रयोगाच्चेति चेद् अत्र चण्डीदासादय रसदोपस्याप्यविमृष्टविधेयांशस्य 'न्यक्कारो ह्ययमेवे' त्यादेः काव्यत्वमस्त्येव । अन्यथा दुष्टकाव्यमिति प्रयोगायोगात् तेन रसवद्वाक्यत्वमेव काव्यलक्षणम् इति । तदुक्तम् -

"कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥ " (सा.द.) इति ।

सुबुद्धिमिश्रास्तु-अदोषत्वं स्फुटदोषशून्यत्वम्। स्फुटत्वञ्च कवि प्रतिभया तिरोधानाभाव इत्याहुः । देवनाथस्तु विरलविषयत्वमिष्टमेव । दुष्टं काव्यमिति प्रयोगस्तु दुष्टो हेतुरितिवत् ज्ञेयः हेयश्च । तेन दोपसामान्याभावोऽत्र विवक्षितः । न चैवं 'न्यक्कारो ह्ययमेवे' त्यादेतत्वापत्तिः वीररससञ्चारिणोऽसूयाख्यभावस्यास्वादे दोर्षविशेषदर्शनेऽपि दर्पणे मुखमितिवद् भ्रमसम्भवात् । यद्वाऽस्तु स्फुटदोषशून्यत्वम् । नन्वेवं पुरुषमतिभेदेनैकस्यैव काव्यत्वमकाव्यत्वञ्च स्यादिति चेन्न इष्टापत्तेः काव्यत्वस्योपाधित्वेन तत्सङ्करस्यादोषत्वात् । जातावेव हि सः । अतएव वक्ष्यति

---

१. रित्येके - ब.।

व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः । ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनशब्दस्य शब्दार्थयुगलस्य । यथा -

कमलाकरी

'वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः' इत्याह । नव्यास्तु-दुष्टेऽपि यदंशे दोषसंदेहे माऽऽस्तु काव्यत्वं यदंशे दोषाभावस्तदंशे काव्यत्वमेव । तेनैकस्यापि पद्यस्यैकज्ञानस्य भ्रमत्वप्रमात्ववत् काव्यत्वमकाव्यत्वञ्च । सङ्करस्तूपाधित्वाददोषः । तेन दोषसामान्याभावोऽत्र विवक्षित इत्याहुः सगुणाविति- गुणस्य रसैकनिष्ठत्वे ऽपि परम्परया तदभिव्यञ्जक-शब्दार्थनिष्ठत्वम् । अनलङ्कृतीति । अत्र नञीषदर्थे ' अलवणा यवागू ' अनुदरा कन्येतिवत् । तत्वञ्चास्फुटत्वम् । तेन वस्तुतः सालङ्कारत्वमर्थः । अन्यथा क्वापीत्युक्तेरननुगमः स्यात् । केचित् तु 'सरसं वाक्यं काव्य' माहुः । ननु दोषाद्यभावे कथमिदं ज्ञेयं तत्राह-दोपेति । क्वचिदिति रसवतीत्यर्थः ।

स्फुटालङ्काराभावे काव्यत्वमुदाहरति - यः कौमारेति । काचिद् रेवातीरे परपुंसा कृतसङ्केता तद्रतिं गोपायती सखीं प्राह । कौमारं नवयौवनं बाल्यं वा सङ्कुचितयोनित्वं सम्भोगेन यो हृतवान् । हि शब्दो यद्यपीत्यर्थे । एवकार-हिकारौ अन्ययोगायोगव्यवच्छेदपरावित्यन्ये । क्षपा रात्रयः। मालती वासन्ती न जातिः । प्रौढा रत्युद्दीपकाः । कदम्बो धूलिकदम्बः कदम्बाकारोऽनिल इत्यन्ये । अस्मीत्यहमर्थे ऽव्ययम् । सैवचाहमित्यन्वयः । तत्रेत्यस्य लीलाविधि- रेवारोधो-वेतसीतरुतले स्त्रिभिरप्यन्वयः । अत्र स्फुटोनेति -नन्वलङ्कारान्तराभावेऽपि कारणाभावे कार्योत्पत्तिर्विभावना कारणसत्वे कार्याभावरूपाऽतिशयोक्तिश्चास्ति । तथा हि- पतिसान्निध्याभावो ह्युत्कण्ठाकारणम् । इह च पतिसान्निध्याभावाभावेऽपि उत्कण्ठेति विभावना । एवं पतिसान्निध्ये कारणे सति अनुत्कण्ठारूपं कार्यं न किन्तूत्कण्ठेवेत्यशयोक्तिश्चास्ति इति चेदत्राहुः-पतिसन्निध्याभावा[1]भावस्य तत्वेन नात्राभिधानं किन्तु पति सान्निध्येन । एवमनुत्कण्ठाभावत्वेन नाभिधानम् । यदि हि उत्कण्ठते[2] चेतः इत्युच्येत तदातिशयोक्तिः स्यात् । न चैवं , किन्तु उत्कण्ठात्वेन,

१. भावाभावत्वेनात्र नाभिधानम् - ब. ।
२. कण्ठते कण्ठते न चेतः-ब. ।

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः
नेत्रेदूरमनञ्चने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम ।। २ ।।

कमलाकरी

अतस्तयोरस्फुटत्वे । ननु स एवेत्येवकारेण पतिसान्निध्यायोगव्य-वच्छेदोक्तेस्तत्वाभावाभावत्वेनोक्तिरस्तीति विभावना स्फुटैवेति चेत् । अत्र अत्र काव्यप्रदीपः - अयोगो ह्यसम्वन्धस्तद्व्यवच्छेदेऽ पि न तदभावाभावः शाब्दः सिद्धयति किन्तु अर्थात् सम्वन्धाभावेन सम्वन्ध्यभावासिद्धेः । न चाभावाभाव एव तच्छक्यः । अभावाभावस्य भावत्वेन पाण्डुरादिपदे पौनरुक्त्यापत्तेरित्यूचे । काव्यलिङ्गं न स्फुटं सौरभे प्रौढत्वे च हेतुत्वानुक्तेः । अनुप्रासो न स्फुटः । अन्ये तु विभावना[1]तिशयोक्तयोः सङ्करादेकस्याप्यस्फुटत्वमित्याहुः । अन्ये तु सखीं प्रत्युक्तेर्वरसान्निध्याभाव एवात्रेत्याहुः । वयन्तु समुत्कण्ठया विप्रलम्भशृङ्गारस्य प्राधान्येन गुणत्वाभावान्नालङ्कारताऽत्रेति ब्रूमः । ननु चमत्कारकारित्वे रस एवालङ्कारोऽस्तु इति दण्डिमतमाशङ्क्याह- रसस्य चेति । इह श्रृङ्गाररूपो रसः प्रधानम् । रसस्य गुणत्वेऽलङ्कारतेष्टा न प्रधान्ये इत्यर्थः । रसो विप्रलम्भ इत्यन्ये । पतिसान्निध्येऽ पि गुरुसन्निधौ सुरतप्रतिबन्धे तत्सम्भवात् ।

तद्भेदानिति - । भेदनं भेदो विभागः । भिद्यतेऽनेनेति भेदो विशेषलक्षणं वेत्यर्थः । इदमिति । वाच्यात् पदार्थाद्वाक्यार्थाच्च । गुरुमतेऽन्विताभिधानेन संसर्गस्यापि शक्यत्वात् । अत्र लक्ष्यादित्यापि द्रष्टव्यम् । साक्षात् परम्परया वा शक्तिजन्यज्ञानविषयत्वं वाच्यत्वम् । तेनोभयोः सङ्ग्रहः इत्यन्ये ।

इदं काव्यम् । वाच्याद् व्यङ्ग्येऽतिशायिनि चमत्कारकारिणि सत्युत्तमम् । स एव वुधैर्ध्वनिरित्युच्यत इत्यर्थः नन्विदमित्यस्य प्रक्रम्यमाणध्वनिपरत्वे नपुंसकत्वायोगस्तत्राह-काव्यमिति । स्फोटरूपेति । आशुतरविनाशिनां क्रमवतामानुपूर्वीरहितानां वर्णानां पदानाञ्च पदार्थवाक्यार्थ[2]धीहेतुता न युक्ता मेलकाभावात् । अतः पूर्व पूर्ववर्णानुभवजनितसंस्काररहितान्त्यवर्णानुभवेन ध्वन्यात्मको

१. नातिशययोऽसङ्करादिकस्याप्य - व.।
२. वाक्यार्थधीर्न युक्ता- अ. ।

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्जते ।

अतादृशि गुणीभूतंव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

कमलाकरी

नित्यब्रह्मरूपः सकलार्थप्रत्यायनक्षमः शब्दः स्फोटसंज्ञो व्यज्यते, वर्णाश्च तद्व्यञ्जकाः । वृत्तिश्च व्यञ्जना । तद्व्यञ्जक शब्दो ध्वनिर्व्यवह्रियते । तदुक्तम् –

"एकैकवर्णसामर्थ्यान्मेलकानुपपत्तितः ।
एकं बुद्धेर्नदीदीनतौल्यात् स्फोटः स च द्विधा ।। " इति ।

यथा तैः स्फोटव्यन्जकशब्दस्य ध्वनिरिति व्यवहारः कृतस्तथा ऽन्यैरप्यालङ्कारिकैर्न्यग्भावितं गुणीकृतं वाच्यं यत्र तादृशंच्यङ्ग्यव्यञ्जकस्य शब्दार्थयुगलस्य ध्वनिरिति व्यवहारः कृत इत्युनुषङ्गः ।

निश्शेषेति – नायकानयनाय प्रेषितां तं सम्भुज्य स्नानापदेशेनागतां दूतीं प्रति नायिकारोषोक्तिरियम् । दूती न तु सखी तेन मिथ्यावादो युक्तः अधमपदे रतेर्व्यङ्ग्ये इतरपदानां सहकारित्वम् । निश्शेषं च्युतं नत्वीषत् तव स्तनयोस्तटं न तु सन्धिः चूचुकं वा । तत्रैव मर्दनाधिक्यात् । नितरां मृष्टो गतो रागो यत्र । अधरो न तु पूर्वौष्ठः, तत्रैव चुम्बनाधिक्यात् । नेत्रे दूरमत्यर्थम् । "दूरं शिरः सा नमयाञ्चकार" (नै.) इति नैषधोक्तेः । दूरे बहिः न तु मध्ये इत्यन्ये । तत्वन्तु स्तनयोः कञ्चुलिकापसरणं चन्दनलेपो मर्दनात्तदपगमश्चेति स्पष्टं सुरतकार्यम् । नितरां मृष्टो मधुरो रागस्ताम्बूलरक्तिमा यस्येदृशोऽधरः । नेत्रे परिधानीयोत्तरीये । वक्त्रे दूरमत्यर्थमनञ्जने निर्मले । अञ्जनं गौण्यामलः । अन्यथा सुरते कज्जलापगमायोगादयुक्ततापत्तेः । तदुक्तम् –

अधरे नववीटिकानुरागो नयने कज्जलमुज्ज्वलं दुकूलम् ।
इयदेव विभूषणं वधूनामितरद्धूषणमङ्गदूषणाय ।। (भा.वि...)।।

तेनोज्ज्वलवस्त्रताम्बूलरागादिमहत्सुखं लिङ्गम् । तेन स्नानायोगात त्वं मिथ्या वदसीति वयम् । 'नेत्रं मेधागुणो वस्त्रे तरुमूले विलोचने" इति विश्वः । तन्वी कृशा म्लाना वा । तनुः पुलकिता रोमाञ्चिता

अतादृशि वाच्यादनतिशायिनि । यथा-

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।। ३ ।।

कमलाकरी

सुरतस्मरणात् तवेत्यस्य स्तनतटादिभिस्सर्वैरप्यन्वयः । बान्धवजनस्य मद्रूपस्याज्ञातपीडापीडागमे अज्ञातपीडासम्बन्धे[१] । अन्यथा कथं मत्कान्तं रमयेः । तस्य बहुधाक्षान्तापराधस्याधमस्य दूतीसम्भोगरूपनीचकर्मकर्तृत्वान्नीचस्य समीपे काक्वा न गतासी अपि तु गतास्येव । न च काक्वाक्षिप्तत्वान्मध्यमत्वम् । झटित्यबोधात् । न हि तत्समीपगमनमात्रादपराधः किन्तु सुरतादिति विरुद्धलक्षणया गमनम् । तेन रतं व्यङ्ग्यम् । अतएव रन्तुमिति तुमुन् । तेन लक्षणामूल गूढ़व्यङ्ग्यमिदम् । अत्रैकेतादृशचन्दनच्यवनादीनां रतैकसाध्यत्वेन स्नानकार्यत्वबाधात् स्नातुं गतासीत्यत्र विपरीतलक्षणया न गतासीति लक्ष्यम् । गतासीत्यत्र गतासीति विधिर्लक्ष्यः । नन्वेवम् । 'उपकृतं बहु तत्र' 'साहेन्ती सहि' इत्यादिवच्च तदन्तिकं गतासीति लक्ष्यमेव न तु व्यङ्ग्यम् । अन्यथा तत्रापि लक्षणामूलव्यङ्ग्ये विपरीतलक्षणा न स्यादिति चेत् सत्यम् अत्र विपरीतलक्षणैव । ग्रन्थे गतासीति लक्ष्यते इति शेषः । व्यज्यत इति तु रन्तुमित्यनेननान्वीयते । अधमपदेन तद्व्यञ्जनादित्याहुः- काव्यप्रदीपादयस्तु न मुख्यार्थबाधादि स्वरूपं सल्लक्षणाबीजं किन्तु ज्ञातम् । तेन दूत्याः यत्र कान्तसङ्गमो मानान्तरेण ज्ञातस्तत्र न गतासीत्यस्य मुख्यार्थबाधादस्तु लक्षणा 'उपकृतं बहु तत्रेति' वत् । यदा तु मानान्तरेण न ज्ञातस्तदा' बाधा[२]भावान्न लक्षणा किन्तु अधमपदाद् व्यञ्जनयैव तद्धीः देवनाथस्तु गतासि न गतासीत्यत्र नैकं लक्षकमननुगमागौरवादन्यतरेणान्यरासिद्धेश्च । तेन स्नातुं गतासि न तदन्तिकमितिस्नानविशिष्टतदन्तिगमनाभावस्य विशिष्टस्याभावो लक्ष्यो वाच्यः । न च तद्युक्तम् लक्षणायाः पदवृत्तित्वात् । तेन सिद्धा तदन्तिकगमने व्यञ्जनैवेत्याह । अर्थवादे प्राशस्त्यलक्षणावत् वाक्य एव लक्षणेति केचित् । तदा माऽस्तु व्यञ्जनेत्यन्ये । तत्राधमपदेन रतिव्यङ्ग्यप्रतीतेः ।

१. सम्बन्धा- ब. ।
२. बाध्यायोगान्न अ. ।

अत्र वञ्जुललतागृहे कृतसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात्।

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मतम्।। ५।।

चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फु प्रतीयमानार्थरहितम्। अवरम् अधमम्। यथा-

कमलाकरी

अर्वाञ्चस्तु - निश्शेषच्युतेत्यादेर्न सुरतकार्यत्वं स्नानकार्यत्वस्यापि सम्भवात्। अतो वक्तृबोद्धव्यवशादेवात्र व्यञ्जनेति। सुबुद्धिमिश्रास्तु न गतासीत्यत्र काक्वा गतास्येवेति व्यङ्ग्यम्। न च काक्काक्षिप्तं झटित्यप्रतीतेत्याह। अत्र त्वय्येवं विधायां यदहं विश्वसिमि यच्च दुर्विदग्धे तत्रास्मि तद् युक्तमेवं वचनपात्रत्वमितीर्ष्यया विप्रलम्भस्य निर्वेदरूपसञ्चारिभावध्वनिः। दूतीसम्भोगचन्दनच्यवनादीनां परिरम्भचुम्बनादि-सम्भोगोत्कर्षद्वारा ईर्ष्योत्तेजकत्वमित्यप्याहुः।।

अतादृशीति -। व्यङ्ग्ये वाच्यादनतिशायिनि चमत्काराजनके मध्यमम्। व्यङ्ग्यस्य वाच्यादनतिशयश्च तत्समत्वे गुणत्वे वा।

ग्रामेति-। ग्रामे स एव तरुणो नान्यः येन विश्रान्तिः स्यात् ग्रामस्थस्त्रीसमूहस्य वा तरुणःस्त्रयन्तरसत्वान्न तस्यापेक्षा।

तं पश्यन्त्यास्तरुण्याः लतागृहे दत्तसङ्केताऽहं न गतेति सुरतनिराशाया मुखकान्तिर्नितरां मलिना भवतीत्यर्थः। वाच्यस्यैवेति-। दर्शनं हि मालिन्यं प्रति कारणम्। अत्र पश्यन्त्या इति वर्तमानापदेशात् दर्शनमुखमालिन्ययोर्वर्तमानकालत्वादतिशये वाच्येनैव व्यङ्ग्यादधिकश्चमत्कारो जन्यते इत्यर्थः।

शब्देति -। अव्यङ्ग्यं स्फुटव्यङ्ग्यशून्यम्। अवरमधमं काव्यमित्यर्थः। तच्च व्यङ्ग्याभावे तस्यास्फुटत्वे चेति द्वेधा। चित्रपदार्थमाह-गुणेति। गुणाः माधुर्यादयस्तेषां रसनिष्ठत्वेऽपि तद्व्यञ्जकशब्दार्थपरं यथा वक्ष्यति-' 'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता' (का.प्र. ८-७१) इति। शब्दालङ्कारा अनुप्रासादयः अर्थालङ्कारा उपमादयस्तैर्युक्तम्।

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिद्यादुद्यादुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ।। ४ ।।

कमलाकरी

शब्दचित्रमाह - स्वच्छन्देति । स्वच्छन्दं यथेष्टं स्वेच्छया वा, उच्छलनन्त्योऽच्छा निर्मलाः कच्छकुहरेषु जलप्रायदेशविशेषेषु छातेतराः कृशेतराः पुष्टा इत्यर्थः। 'अमांसो दुर्बलश्छात्रः' (अम. २।६।४४) इत्यमरः । याः अम्बुच्छटा जलोर्मयस्ताभिर्मूर्च्छन्नश्यन् मोहोऽ ज्ञानम् खेद[१] इत्यपव्याख्या अप्रसिद्धेः । येषान्तैर्महर्षिभिर्हर्षेण विहिते स्नानाह्निके यस्यां सा । उद्यन्त उदारा महान्तो दर्दुरा भेका यासु ताश्च ताः कन्दरा स्तासु । दीर्घा विस्तृता दुर्दुरः पर्वतविशेषः । अन्यथा कच्छकुहरेति पौनरुक्त्यापत्तेः। अत्र मन्दाकिनी न गङ्गा दुर्दुरगिरेस्तदसम्बन्धात् । तेन नद्यन्तरमेवेदमिति कश्चित् । तं प्रसिद्धिरेव गलहस्तयतु । दरिद्राः शीर्णमूलाः यद्वा अदरिद्रा महान्तस्ते च ते द्रुमाश्च तेषु द्रोहोद्रेको येषान्ते च तें महोर्मयस्तैर्मेदुरो मांसलो मदो यस्या सा मन्दाकिनी गङ्गा अह्नाय शीघ्रं वो युष्माकं मन्दतां जाड्यं भिन्द्यादित्यन्वयः । यद्यप्यत्रः गङ्गाविषया रतिर्व्यङ्ग्या तीर्थान्तरव्यतिरेकञ्च तथापि तत्र कवेर्न तात्पर्यम् । अनुप्रास्तदिक्षिप्तचित्तत्वात् । यदाहध्वनिकृत्-

"रसभावादिविषय-विवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ।।" (ध्वन्या-)

अर्थचित्रमाह - विनिर्गतमिति । मानं द्यति खण्डयति शत्रूणां मित्राणां मानदम् । यदृच्छया आत्मनगराद्विनिर्गतं यं हयग्रीवसंज्ञं राजानमुपश्रुत्यामरावती भिया निमीलिताक्षीवेत्यर्थः । ननु हयग्रीवस्य प्रतापो वीररसस्तद्गोचरभावश्च व्यङ्ग्योऽ स्तीति कथमव्यङ्ग्यत्वम् । अत्र देवनाथः-यदैकस्य वाक्यस्यावच्छेदकभेदेन ध्वनित्वं मध्यमत्वमधमत्वञ्चास्त्येव । एवमत्रा[२]न्यांशे व्यङ्ग्यसत्वे ऽपि भिया निमीलिताक्षीवेत्यर्थचित्रम् । अव्यङ्ग्यत्वात् , इवोक्तस्योत्प्रेक्षालङ्कारस्य

१. खेद (१) इत्य - अ. ।
२. एवमन्यत्रांशे - अ.।

अर्थचित्रं यथा-

विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयाऽ पि यम् ।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽ मरावती ।।५।।

कमलाकरी

भयस्य च शाब्दत्वेन व्यञ्जनावृत्या गम्यत्वात् । अक्षिनिमीलनाच्च न प्रतापो व्यङ्ग्यः विद्युदादिवद् भयेन तत्सम्भवात् प्रतापाजन्यत्वा-दित्याह । वध्यत्वेन वर्णने 'तज्जयान्नायकोत्कर्षः' (का.दर्श.) इति रसभावादेरनुनयः अलङ्कारमात्रास्तु उदारहरणमित्यन्ये ।

।। इति श्री महामहोपाध्याय-रामेश्वरभट्टसूरि-सूनुनारायण-भट्टात्मज रामकृष्ण-भट्टसूनु-कमलाकरभट्टकृतायां काव्यप्रकाशकमलाकरी व्याख्यायां प्रथमोल्लासः ।।

अथ द्वितीयोल्लासः

क्रमेण शब्दार्थयोः स्वरूपमाह-

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

अत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

वाच्यादयस्तदर्थाःस्युः-वाच्यलक्ष्यव्यङ्ग्याः ।

तात्पर्योर्थोऽपि केषुचित् ।। ६ ।।

कमलाकरी

ननु लोके व्यञ्जकव्यङ्ग्ययोः शब्दार्थयोरभावात् कथं[1] तद्गर्भ उत्तमादिकाव्यविभागो लक्षणञ्चात् आह- क्रमेणेति । काव्यलक्षणोपादानक्रमेण शब्दस्यार्थस्य चेत्यर्थ । स्वरूपं लक्षणम् । सामान्यपरमेकवचनमित्यन्ये[2] । व्यञ्जकत्वं शब्दार्थयोर्निरूपणार्हं न वाच्यत्वादि सर्वत्रतन्त्रसिद्धत्वात्, तदपेक्ष्यैकवचनम् । ननु लोके द्वैविध्यमेव दृष्टं तत्राह-अत्रेति । स्वशास्त्रपरिभाषेयमित्यर्थः । विभागात् त्रित्वे सिद्धेऽपि न्यूनाधिकसंख्याविच्छेदाय त्रिधेत्युक्तम् । तेन ये गौणत्वमौपचारिकत्वं वा विधान्तर-माहुस्ते लाक्षणिकेऽन्तर्भावात् परास्ताः । यद्यपि लाक्षणिकव्यञ्जकयोरपि वाचकत्वमस्ति तथापि वृत्तिभेदाद् विभागः । उपधेयसङ्करेऽपि उपाधीनां विविक्तत्वात् । ननु लक्षणं कुतो नोक्तं तत्राह-एषामिति । स्वरूपं लक्षणम् ।

अर्थान् विभजते -वाच्येति । तेषामर्थास्तदर्थाः । अत्र लक्षणायाः शक्तिपूर्वकत्वाद् व्यञ्जनायाश्च तदुभयमूलत्वाच्छब्दार्थयोरेवं क्रमः । यद्यपि वाच्यस्य[3] वाच्यत्वादित्वाभावाद् बहुवचनानुपपत्तिस्तथापि वाच्य आदिराद्यो येषामिति विशेष्यैकदेशं विशेषणं कृत्वा लम्बकर्णवत् तद्गुणसंविज्ञानो बहुब्रीहिर्ज्ञेयः । 'जन्माद्यस्य यतः' (श्रीभा.१।१।१) इतिवत् । न चैवं लक्षणाया[4] एकलक्ष्यतावच्छेदकप्रकारेणोपस्थितौ विभागानुपपत्तिः । त्रितयान्यान्यतमत्वस्य[5] लक्ष्यतावच्छेदकत्वे तद्घटकतयाऽवान्तरविभाजकोपस्थितेः ।

---

१. कथमेतद् - अ. ।
२. त्येके -ब. ।
३. वाच्यादित्वा- अ. ।
४. चैवं लक्षणयैकलक्ष्य-ब. ।
५. त्रितयान्यान्यत्वस्य - अ. ।

आकाङ्क्षायोग्यतासन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पयार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थ समुल्लसतीति अभिहितान्वयवादिनां मतम्। वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः।

कमलाकरी

विभागस्य न्यूनत्वमाशङ्क्याह। तात्पर्येति। केषुचिद् वाक्यरूपेषु शब्देष्वित्यर्थः। अन्ये तु केषुचिदिति षष्ठ्यर्थे सप्तमीमाहुः। असार्वत्रिकत्वान्न तुल्यवन्निर्देशः। वृत्ति विनातिप्रसङ्गात् संसर्गे तात्पर्याख्या वृत्तिरित्यर्थः। तात्पर्यार्थः तात्पर्यवृत्तिलभ्यः। यद्यपि न वाक्यशक्तिः पदशक्तिभिन्नाऽस्ति तथापि आकाङ्क्षादिसहकारिवशात् पदशक्तिरेव तथोच्यते। इयमेव संसर्गमर्यादेत्युच्यते। विशेषवपुः विशेषात्मा, तस्यैव क्रियान्वयात्। अभिहितानां पदोपस्थितानामन्वयः संसर्ग इतिवादिनां भाट्टवार्किकादीनाम्। गुरुमतमाह- वाच्य एवेति। गामानयेति वाक्यात् प्रवर्तमानं प्रयोज्यं दृष्टवा नूनमनेनास्मादयमर्थो ज्ञात व्युत्पित्सुः कल्पयति। न च शक्ति विना वाक्यात् संसर्गधीर्युज्यते लक्षणादेस्तत्पूर्वकत्वात्। न च संसर्गमयीदया तद्धीः तस्याः शब्दवृत्तित्वाभावात्। शक्तिलक्षणयोरेव तत्वात्। न च शब्दतात्पर्यगोचरत्वं शाब्दत्वम्। तदभावे शुकबालाद्युदीरितेऽबो-धकत्वापत्तेः। न च गामानयाश्वमानयेति व्यभिचारात् संसर्गे न शक्तिरिति वाच्यम्। वाक्यस्यैव प्रयोगार्हत्वेन पूर्वगृहीतसंसर्गशक्त्य बाधेनेतरान्विते स्वार्थे पदानां शक्तिग्रहादित्यन्वितस्य संसर्गविशिष्टस्या- भिधानमिति वादिनो मतमित्युनुपङ्गः। एकवचनात् तुच्छत्वमुक्तम्। तथाहि न संसर्गविशेषेषु शक्तिः। गामानय गां बधानेत्यादौ तेषामानन्त्येन गोपदस्य नानार्थत्वापत्तेः। न च संसर्गसामान्ये सा, विशेषस्यासङ्केतविषयत्वेऽशाब्दत्वापत्तेः। अथाकाङ्क्षादि-सहकारिवशात् पदादेव तद्धीस्तर्हि तस्मादेव सामान्येऽपि तथाऽस्तु धीः किं शक्त्या। इतरान्वितयोर्द्वित्वेन गामानयेत्यत्र वाक्यार्थद्वयधीः स्यात्। संसर्गसामान्ये शक्तौ च सर्ववाक्यानां पर्यायत्वापत्तिः। विशेषस्य सम्बन्धिविशेषादेव सिद्धेर्न वाच्यत्वम्, तत्वे तू[१]क्तदोषाच्च। एतेन संसर्गे वाक्यार्थेऽखण्डस्फोटे

१. अत्र - अ.।

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।

तत्र वाच्यस्य यथा-

माए घरोवजरणं अज्ज हु णत्थित्ति साहिअं तुमए ।
ता भण किं ए करणिज्जं एमेअ ण वासरो ठाई ।। ६ ।।

कमलाकरी

शक्ति वदन्तो वैयाकरणाः परास्ताः । एतच्च पञ्चमोल्लासे व्यक्तीकरिष्यते ।

सर्वेषामिति - यद्यप्युद्देशक्रमात् शब्दव्यञ्जकस्तमादौ वक्तुमर्हस्तथापि स्पष्टत्वात्तदुपेक्ष्यार्थस्यैवोक्तम् । केचित्तु-ननु नार्थे व्यञ्जकत्वं युक्तम शब्दोपस्थितस्यैव तत्वेन तद् व्यञ्जनयैवोपपत्तेः। न चेच्छब्दे सा तर्हि तद्विभागो व्यर्थोऽत आह- सर्वेषामिति । सर्वेषां पर्यायशब्दानां येऽर्थास्तेषामपि प्रायशो बहुधा व्यञ्जकत्वमिष्यते । तेन 'उन्नतपयोधरेत्यादौ 'द्वयं गतं सम्प्रती (कु.सं. ५।५१) त्यादौ च पयोधरादिशब्देनोपस्थितस्यैव व्यञ्जकत्वं न तु मेघादिशब्देन । अतोऽन्वयव्यतिरेकाभ्यां शब्देऽपि व्यञ्जनासिद्धेत्यर्थमाहुः । अन्ये त्वर्थानामपीत्यन्वयः, तेन शब्देऽपि तल्लाभ इत्याहुः । यद्वा व्यञ्जकत्वमपीति वाच्यत्वाद्यत्यागः। वक्तृबोद्धव्याद्यभावे न व्यञ्जनेति प्रायश इत्युक्तम् ।

माए इति । 'मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।
तद्भणं किं करणीयमेवमेव न वासरः स्थायी ।।' इति संस्कृतम् ।

मातरित्यादेशयोग्यत्वम् । अद्य गृहे कापि सामग्री नास्तीति त्वया साधितमुक्तम् । न तु मयेतीङ्गितगोपनम् । तद्वद । दिने गते रात्रौ तवाज्ञामपि कुलाङ्गनया न किन्चिच्छक्यमित्यर्थः । अत्रेति कार्यकरणेन वक्तृवैशिष्ट्याद् बहिर्गमनं व्यङ्ग्यम् । तेन च स्वैरविहारोऽन्यसङ्गमः स च तात्पर्यार्थव्यङ्ग्यः । कथं तर्हि वाच्योदाहरणमेतत् । श्रृणु- पदार्थसंसर्गस्य व्यञ्जकत्वे पदार्थस्यापि व्यञ्जकत्वात् , सम्बन्धिनं विना सम्बन्धायोगात् । वस्तुतस्तु शक्तिप्रयोज्यधीविषत्वं[१] वाच्यत्वं तत्राप्यस्तीति न क्षतिः । गुरुमते- वाक्यार्थस्य वाच्यत्वादेतदुदाहरणम् । तात्पर्यार्थस्य व्यञ्जत्वाभावे सर्वेषां प्रायशः इत्यादिविरोधापत्तेः । शुद्धवाच्यस्य व्यञ्जकत्वं 'जयतीत्यादौ ज्ञेयम् । यद्वा स्वैरार्थिनीयमिति

१. धीविषयत्वं तत्रा- अ. ।

अत्र स्वैरविहारार्थिनीति व्यञ्जते ।

लक्ष्यस्य यथा-

साहेन्ती सहि सुहअं खणे खणे दुम्मिआसि मज्झकए ।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ।। ७ ।।

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम् ।

तेन च कामुकविषयंसातपराधत्वप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा-

उअ णिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअण-परिट्ठिआ संखसुत्ति व्व ।। ८ ।।

कमलाकरी

हेतोर्मातरित्यादिपदे तत्तदर्थो व्यज्यत इत्यर्थः ।

साहेतीति । साधयनती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते ।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ।। इति संस्कृतम् ।

प्रियानुनायार्थं प्रहितां तमुपभुज्यागतां सखीं प्रति नायिकोक्तिरियम् । मत्कृते मदर्थं प्रियं शास[1]यन्तीत्यन्वयः । शासयन्ती शिक्षयन्ती अनुयन्ती वा । सद्भावः साधुत्वम् । तस्य स्नेहस्य च करणीयं कार्यम् । परपुरुषगामित्वेन साधुत्वस्नेहादेर्बाधात् तद्विरुद्धं वैरिणि हृष्टासीत्यादिकं 'सखि दूनासीत्यादिपदेन लक्ष्यम् । तेन भर्तुर्दूतीगामित्वेन सापराधत्वं व्यङ्ग्यमित्यर्थः । अत्र लक्ष्यघटितवाक्यार्थस्य व्यञ्जकत्वाल्लक्ष्यस्य व्यञ्जकत्वं एवं व्यङ्ग्येऽपि वाक्येऽपि लक्षणावादिमते[2] वैतत् ।

ऊएति । पश्य निश्चलनिस्स्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव । इति संस्कृतम् ।

निश्चल निरुद्यमेति सम्बोधनम् । एवन्तु वाच्यसिद्ध्यङ्गत्वापत्तेः निश्चला पृथिवीव निस्स्पन्देति परमानन्दस्तन्न निश्चलपदे ह्रस्वत्वायोगात् तेनांशे मध्यमत्वेऽपि न क्षतिः । शङ्खशुक्तिर्मुक्ताशुक्तिः शङ्खाकारा शुक्तिर्वा शङ्खायुक्ता शुक्तिर्वा । आश्वस्तत्वमभीतत्वम् । तेन विजनत्वं व्यङ्ग्यम् । तेन च सङ्केतस्थानं व्यङ्ग्यम् । अथवेति जनागमाभावेनेत्यर्थः । पूर्वत्र सम्भोगो व्यङ्ग्योऽत्र तु विप्रलम्भः । हे

---

१. शासतीति - अ. ।
२. चैतत् - अ. ।

अत्र निस्स्पन्दत्वेनाश्वस्तत्वं, तेन च जनरहितत्वमतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित्प्रत्युच्यते । अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति च्यज्यते ।

वाचकादीनां क्रमेण स्वरूपमाह-

साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।।७।।

कमलाकरी

निश्चलालस । निश्चेष्टा वराकीति पाठे दीना मत्सखी बिसिनीपत्रे तापात् शयिता राजते । त्वमेव्वागत्य पश्य । शङ्खशुक्तिरित्युपमया पाण्डुत्वं व्यङ्ग्यम् । तेन विप्रलम्भातिशय इति सुबुद्धिमिश्राः । स्वरूपं लक्षणम् । साक्षादिति- यः साक्षादभिधत्ते गमयति स तस्य वाचकः । एवन्तु स्पर्शादिवर्णानां माधुर्यश्शृङ्गारादेः साक्षाद् गमकत्वात् तत्रातिव्याप्तिरतः सङ्केतितमिति[१] । वृक्षो ग्राम' तरुद्वाराव्यवहितसङ्केतगोचरे लाक्षणिके ग्रामे वाक्यार्थे चातिप्रसङ्गोऽतः साक्षादिति । सङ्केतितं सङ्केतविषयतावच्छेदकावच्छिन्नं न तु सङ्केतवन्तम् । सङ्केतस्य सम्बन्ध त्वेन शब्देऽपि सत्वात् । विषयतावच्छेदकन्तु गोशद्वत्वं न तु शब्दत्वम् । अतो न शब्दत्वेन गोशब्दस्य वाच्यता । तत्वन्तु लक्षणैवात्रेति । यत्तु सर्वत्र पदजन्यपदार्थज्ञाने सम्बन्धस्मृतेः सत्वात् सम्बन्धस्य चोभयसम्बन्धिनिरुप्यत्वात् पदस्यापि विषयतेति चेन्न सम्बन्धेन हि पदमर्थं स्मारयति न तु सम्बन्धस्मृतिः मानाभावात् । केचित्तु-यः सङ्केतितमर्थमभिधत्ते स वाचकः, यश्च साक्षादभिधत्ते स वाचकः इति लक्षणद्वयमाह । अभिधा च न्यायनये ईश्वरेच्छा । भाट्टमते पदार्थान्तरम् । तेन एदहमेत्तेत्यादौ अभिनयेऽभिधाभावान्नातिव्याप्तिः । न चापभ्रंशेऽतिव्याप्तिः, तत्र साधुशब्दोपस्थापनेन प्रत्यायकत्वं न तु साक्षात् । तत्र सङ्केतभ्रमः कारणमथवा तस्यापि वाचकत्वाल्लक्ष्यत्वम् । अन्यथा तन्मयभाषाप्रवन्धे काव्यता न स्यादिति सुबुद्धिमिश्राः ।

सङ्केतस्यार्थधीहेतुत्वेऽर्थापत्तिमाह- इहेति । इह लोक व्यवहारेऽगृहीतसङ्केतस्य पुंसः । ननु व्यवहारोपयोमित्वाद् व्यक्तावेव सङ्केतो युक्तः न जातावत आह- यद्यपीति । अर्थ्यते इत्यर्थः प्रयोजनं तद्रूपा क्रिया जलाहरणादिरूपा । यद्वा अर्थो घटादिस्तद्धेतुका क्रिया । किं व्यक्तिषु सर्वासु सङ्केतग्रहः उत कतिपयासु वा,

---

१. वृक्षो- अ. ।

इहागृहीतसङ्केततस्य शब्दस्यार्तप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते सः तस्य वाचकः ।

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव

कमलाकरी

नाद्यःइत्याह-आनन्त्यादिति । सर्वव्यक्तीनामनुपस्थितेः[१] । नान्त्यः. इत्याह-व्यभिचारादिति । अगृहीतसङ्केतासु प्रयोगसङ्केतग्र[२]हाविशेषाद् घटादिपदाद् गवादिबोधापत्तेश्चेत्यर्थः । तत्र व्यक्तौ सङ्केतग्रहः कर्तुं न युज्यते न शक्यते इति हेतोस्तदुपाधावेव सङ्केत इत्यग्रेऽन्वयः । अयं भावः । न च घटादिपदैर्व्यक्तिर्वाच्या[३], तासामानन्त्यात् । न च सामान्यलक्षणया सर्वोपस्थितिः । तत्र मानाभावात् । तदङ्गीकारेऽपि न व्यक्तौ सङ्केतो युक्तः सङ्केतस्य सम्बन्धत्वेन सम्बन्धिनाशे तस्यापि नाशापत्तेः । अतएव शब्दोऽर्थश्च जातिरूपो नित्यः । समवायवदाश्रयनाशेऽपि सत्वादिति चेन्न तत्रापि तुल्यत्वेनासिद्धेः व्यक्तौ सन्देहाच्च । न हि शब्दः संशायकः निश्चयजनकत्वात् तस्य जातिविशिष्टस्य वाच्यत्वेनागृहीत-विशेषणन्यायेन लाघवात् प्राथमिकत्वाच्च जातेरेव वाच्यत्वाच्च । न च शक्यतावच्छेदकाभावात् कथं जातौ शक्तिरिति वाच्यम् । व्यक्तेर्वाच्यत्वे ह्यानत्यव्यभिचारादिदोषादवच्छेदकापेक्षा न जातावेकत्वात् । तत्वन्तु घटत्वस्यैव तत्वमिति । ननु तर्कनये सामान्यलक्षणया भाट्टनये च शक्तिगृहान्वयबोधयोःसमानप्रकारकत्वस्य तन्त्र[४]त्वाद-गृहीतसङ्केतानामप्यन्वयबोधो युक्त इत्यतो दूषणान्तरमाह-तथेति । विषयः प्रवत्तिनिमित्तत्वं तस्य विभागो भेदः तद्भेदाभावे व्यक्तिवाचित्वेन पर्यायत्वात् सहप्रयोगो न स्यात् । जातिगुणादीनामवाच्यत्वे गवादिप्रत्ययानां भिन्नप्रकारत्वमपि न स्यादित्यर्थः । तदुपाधाविति-तस्या व्यक्तेरुपाधौ विशेषणे । एवकारेण विशेषव्यावृत्तिः । उपाधित्वञ्च

१. मुपस्थितेः अ. ।
२. सङ्केतग्रहा - अ. ।
३. घटादपदे - अ. ।
४. तन्त्रवाहगृही- अ.।

तथाप्यानन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते इति गौः शुक्लश्चलोडित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः ।

उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्ध साध्यश्च । सिद्धोऽपि द्विविधः । पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । तत्राद्यो जातिः । उक्तं हि

कमलाकरी

क्रियान्वयात्[१] । तदुक्तं वेदान्तकल्पतरौ- यावत्कार्यभावस्थायिभेदहेतोरुपाधितेति' । वस्तुधर्मो वस्तुनि सन् यदृच्छया स्वेच्छया सन्निवेशितो नियुक्तः । डित्थादि संज्ञाशब्दः । साध्यः साध्यत्वेन विवक्षितः पदार्थस्य घटादेः प्राणनं प्राणो व्यवहारस्तत्प्रदस्तन्निर्वाहकः । सर्वघटवत्तिर्जातिरित्यर्थः । विशेषेति विशेषस्य सजातीयव्यावर्तनस्याधानं प्रत्ययस्तद्धेतुः। जातेः प्राणप्रदत्वे सम्मतिमाह - उक्तं हीति । वाक्यपदीयं भर्तृहरिकृतो ग्रन्थः । गौर्गोपदार्थः स्वरूपेण जातिरहितव्यक्तित्वेन न गौः न गौव्यवहारहेतुः । एवं हि घटेऽपि गौः स्यात् । नाप्यगौः न गोभेदव्यवहारहेतुः। तस्यैव साधर्म्यत्वादित्यर्थः । द्वितीयो विशेषाधानहेतुरित्यर्थः । गुणस्य विशेषाधानहेतुत्वमाह- शुक्लादीति । लब्धसत्ताकं जात्या प्राप्तव्यवहारम् । विशेष्यते सजातीयेभ्यो व्यावर्त्यते । परमानन्दस्तु - लब्धसत्तेति निर्देशात् स्वसमवायात् प्रागाश्रयात् सिद्धिलाभः । उत्पन्नद्रव्यस्य क्षणं निर्गुणत्वाद् गुणे तथा । नैवं जातौ तद्युक्तद्रव्यस्योत्पत्तेः इत्याह । ननु जातेरपि तद्भिन्नेभ्यो व्यावर्तकत्वादतिप्रसङ्ग इति चेन्न सजातीयेभ्यो भेदकत्वाभावात्। यद्यपि शुक्लादेर्गुणस्य नित्यत्वे जातिवत् सर्वयोगित्वं तथापि तत्सम्बन्धः कदाचिदपैति ।[२] जातिस्तु न तथेत्यर्थः । गुणलक्षणवत्वमेव तत्वम् । एवं प्राणप्रदत्वं जातिलक्षणयोगित्वं विवक्षितमित्यन्ये । तन्न एतदप्रतीतेः । साध्य इति । पूर्वापरीभूता अवयवा अधिश्रयणादयो यस्याः सा क्रिया पाकादिस्तद्रूपः प्रयत्नसमुदायो भावनेत्युक्तं भवति । तदुक्तं राणके -

---

१. क्रियानन्वयात् - ब. ।
२. जातेस्तु-ब. ।

वाक्यपदीये- "न हि गौः स्वरूपेण गौर्नाप्यगौ गोत्वाभिसम्बन्धात्तु गौः" इति । द्वितीयोगुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानाम- न्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिर्थेपूपाधित्वेन सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति । गौः शुक्लश्चलोडित्थ इत्यादौ 'चतुष्टयी शब्दानां प्रवृत्ति' रिति महाभाष्यकारः ।

परमाण्वादीनातु गुणमध्यपाठाद् भेद इव लक्ष्यते ।
यथैकस्य मुखस्य खड्गमुंकु रतैलाद्यालम्बनभेदात् ।

कमलाकरी

"प्रयत्नश्च करोत्यर्थस्तदस्यानुपलम्भनात् ।
धात्वर्थव्यतिरिक्तातः प्रयत्नार्थाख्यभावना ॥
यजत्यादिप[१]दाख्यातवाच्येत्येव समञ्जसम् ।" इति ।

तावतः फलजनकत्वेन भावकव्यापारत्वात् । तदुकं वार्तिके-[२]

"तस्मादाद्यपरिस्पन्दात् प्रभृत्याफललाभतः ।
यत्नाः पूर्वापरीभूताः क्रिया सा वर्तते तदा ॥" इति ।

तदुक्तं मण्डनमिश्रैः-

'अन्योत्पादानुकूलात्मा भावना किं प्रदुष्यतीति ।'

वक्तृयत्नच्छया निवेशितमाह- डित्थादीति । अन्त्यं व्यवच्छेद्यं व्यक्तिमात्रं तस्य बुद्धयैव निग्राह्यं न त्वन्यः प्रकारः । तत्संहतक्रमं क्रम शून्यम् । जातिज्ञानोत्तरं व्यक्तिज्ञानादिति क्रमहीनम् । स्वरूपं डित्थादिशब्दः । उपाधित्वेन विशेषणत्वेनार्थे स्थाप्यते न चैवं शद्वान्निर्विकल्पापत्तिः आकाशादिपदे शब्दाश्रयत्वा- देरनुपस्थितेस्तद्वदिष्टापत्तिरिति केचित् तन्न अनुभवस्य समानप्रकारकत्वेन स्मृतिहेतुत्वात् पदस्य च स्मारकत्वेन तस्मान्निर्विकल्पकस्मृत्ययोगात् । न च समानविषयतयैव स्मृतिहेतुता, न समानप्रकारतयेति वाच्यम् । घटत्वप्रकारककानुभवेन घटे घटत्वप्रकारस्मृत्यापत्तेः । [३]अन्ये तु-प्रत्यक्षोपस्थिता संज्ञैव

१. पदाख्यान-ब.,
२. मण्डमिश्रै-ब.।
३. स्मृत्यानापत्तेः -अ.।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यम्। गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि। बालवृद्ध-शुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

कमलाकरी

विशेषणम्। संज्ञाशब्दो हि स्वविशिष्टं धर्मिणं बोधयति। ननु शक्यतावच्छेदकप्रकारग्रहे कथं शक्यत्वग्रहः, न च शब्द एव शक्यतावच्छेदकः प्रकारः। तथा च डित्थशब्दवाच्योऽयमिति उल्लेखोऽपीति वाच्यम्। डित्थपदादेवं प्रत्यये स्वशब्दस्वरूपाभिधेयत्वे आत्माश्रयापत्तेरिति चेन्न कारणतावच्छेदकभेदात्। यथा विशिष्ट ज्ञानस्यांशे विशेषणज्ञानजन्यत्वम् एवमत्रापि विशेषणज्ञानत्वेन कारणता न तु डित्थशब्दज्ञानत्वेन। डित्थशब्दात्तच्छब्दानुपस्थितेः। कथं तर्हि शक्यतावच्छेदकत्वम्। प्रत्यक्षोपस्थितस्यैवेत्यवेहि। न हि विशेषणाभिधानमपि विशिष्टज्ञानसामग्री। तदुक्तं भट्टपादैः- "सर्वत्र ह्यगृहीतविशेषणाविशिष्टे बुद्धिरनिष्टा न तु अनभिहितविशेषणेति"। वह्निमानित्यत्र यथा वह्न्यंऽ नुमितिः, पर्वतांशे प्रत्यक्षमेव। वह्निमनुमिन्लोमि पर्वतं पश्यामि इत्यनुभवात्। अन्यथा वह्निमन्तं पर्वतमनुमिनोमीत्यापत्तेः। तथा संज्ञांशे प्रत्यक्षं सञ्यंशे च शाब्दत्वमिति [१] सङ्करेऽप्यदोष इति हृदयम्। ग्रन्थार्थोऽप्येवं ज्ञेयः। शब्दस्य प्रत्यक्षानन्तरत्वाद् अन्त्यया परया तद्विशिष्टधर्मि-प्रतीत्या निग्रा[२]ह्यां विषयीकृतं जात्यादिशब्देषु पूर्वपूर्वप्रयोगात् परः परप्रयोग इति क्रमः नैवमत्र तत्र हेतुः यद्रच्छयेति। संज्ञाया अवाच्यत्वादेवोपाधित्वेनेत्युक्तम्। तदुक्तम् - 'अनन्वयित्वेन च भेदकानामुपाधिता लक्षणता च सिद्धेति'। अनन्वयोऽशक्यत्वम्। तदेवं प्राणप्रदो जातिः विशेषाधानहेतुर्गुणः साध्यः क्रिया यदृच्छाशब्दो

१. सङ्करो न दोषः इति हृद-ब.।
२. निग्रर्हयाविषयी- अ.।

तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् ।

कमलाकरी

डित्थादिरिति चतुर्धा शब्द उक्तः । सम्मतिमाह गौःशुल्क इति । प्रवृत्तिः स्वरूपम् । तदुक्तं –"शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः. । चातुर्विध्यादमीषाञ्च शब्द उक्तश्चतुर्विधः ।।" इति । यद्यपि चल इत्यादीनां न क्रियात्वमनाख्यातत्वात् तथापि धात्वर्थस्य क्रियारूपवादिमते इदम् । क्रिया शब्दः कर्मपरो वा । ननु परमाणुत्वं न जातिः पृथिवीत्वादीनां सङ्करात् । न गुणः चतुर्विंशतावपाठात्, न क्रिया सिद्धत्वात्, न द्रव्यमनेकव्यक्तिकत्वात् । अतः कथं चातुर्विध्यमत आह–परमाण्वादीनामिति–परमाणुत्वादीनामित्यर्थः । आदिशब्दात् परममहत्वं पारिभाषिकमेव गुणत्वम् वस्तुतो जातित्वमेव । एक जातिसङ्करस्योपाधिसंकरवदविशेषत्वात् । यत्तु परमानन्दः–अणुत्वस्य महत्वादिव्यावर्तकत्वादस्मात् परिभाषयापि सिद्धं गुणत्वम् । एवकारोऽप्यर्थ इति तन्न तत्सम्बन्धात प्रागाश्रयसिद्धत्वाभावात् । यद्वा–ननु न गुणस्य विशेषाधानहेतुत्वं वैशेषिकैर्गुणत्वाभिमतानामणुत्वादीनां नित्यत्वेन विशेषानाधायकत्वादत आह–परमाण्विति– । तेषां वस्तुतो गुणत्वाभावान्नाव्याप्तिरित्यर्थः । ननु शुक्लादीनां प्रतिव्यक्तिभेदात् तत्र तत्र शक्तौ व्यक्तिवदानन्त्यव्यभिचारादिदोषस्तुल्यो जातिवाचित्वे तु गुणशब्दत्वाभावाच्चातुर्विध्यं न स्यादत आह– गुणेति । गुणश्च क्रिया च यदृच्छाशब्दो यस्य डित्थादेरर्थस्य तेषामेषामर्थानां प्रत्यभिज्ञया ऐक्यसिद्धौ भेदधीराश्रयभेदवशान्न परमार्थत इति भावः । औपाधिके भेदे दृष्टान्तमाह– यथेति । आलम्बनभेदाद् भेद इत्यनुषङ्गः । यत्तु यदृच्छाशब्दो स्फोटस्यैक्यं वर्णरूपाश्रयस्य भेद इति तन्न शब्दस्याप्रस्तुतत्वात् । जातिरेवेति व्याचष्टे–हिमेति । परमार्थत इति उत्पत्तिविनाशादिप्रतीतेः शुक्लतरः शुक्लतम इति तारतम्यप्रतीतेश्चाबाधितत्वादन्यथासिद्धत्वाच्च शुक्लादयो नाना । न चोत्पादादिधीःसम्बन्धविषया तदनुल्लेखात् । अतः शुक्लादीनां भेद इत्यर्थः । अभिन्नेति–एकसंज्ञैकाकारप्रत्ययोत्पत्तिर्यद्वशेन तच्छुक्लत्वादिसामान्यमस्तीति भाविनान्वयः । यत्र गुणवृत्तिः जातिः शक्या स गुणशब्द, एवं क्रियादावपि । गुडपाकस्तण्डुलपाक अथ

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥८॥

कमलाकरी

लक्षणा- इत्यादावेकाकारधिया पाकत्वमस्तीत्यन्वयः । बालवृद्धेति- । तारमन्द्रादिस्वरभेदाच्छब्दभेद उक्तः । डित्थादिशब्देषु डित्थशब्दत्वं सामान्यम् । प्रतिक्षणमिति-स्थूलोपाधिपरम् । परिमाणभेदे शरीरे भेदात्तद्वृत्ति चैत्रत्वडित्थत्वाद्यस्तीत्यर्थः । वा शब्दो वादिभेदेन शब्दार्थगत जातिभेदार्थः । वा स्वार्थे । शब्देष्विव भिद्यमानेऽर्थे इत्यन्वयः इत्यन्ये । शब्देषुचेति पाठे चोऽप्यर्थोऽर्थेऽपीत्यग्रेयोज्यम् । उपसंहरति- सर्वेषामिति । अन्ये मीमांसकाः । इदञ्च तन्मते गुणक्रियाणामभेदान्नित्यात्वाच्चैकदेशिमते ज्ञेयम् । आकाशादिपदे कथं जातिर्वाच्येति चेन्न शब्दाश्रयस्य शक्यत्वे तदघटकशब्दवृत्तिशब्दत्वजातेः परम्परासम्बन्धेन शक्यत्वात् । अष्टद्रव्यभिन्नद्रव्यत्वं शब्दाश्रय[१]त्वं वा शक्यमिति केचित् तन्न आकाशोऽष्टद्रव्यभिन्नशब्दाश्रय इति सहप्रयोगानुपपत्तेः । अतो व्यक्तिरेवार्थः । एकत्वाच्च नावच्छेदकापेक्षा । शब्दान्निर्विकल्पकत्वम् । संज्ञैव प्रकारो वेत्यन्यदेतत् । अभावेऽपि अभाववत्वस्याखण्डोपाधेः शक्यत्वम् । जातिपदेन साधारणधर्मोक्तेः । यद्वा एक एवात्यन्ताभावः पूर्वोत्तरकालतादात्म्याद्यवच्छेदकभेदात् प्रतियोगितामात्रं भिन्नं लाघवात् न तु प्रागभावादयो भिन्नाः । ननु जातेर्वाच्यत्वे शब्दान्निर्विकल्पकापत्तिः। न च व्यक्तिरेव प्रकारः तस्याः प्राधान्यात् अत आह- तद्वानिति । तद्वान् जातिमान् शब्दार्थः कैश्चिदुक्तस्तार्किकादिभिरित्यर्थः । अयं भावः- न व्यक्तिमात्रे शक्तिरानन्त्यात्व्यभिचाराच्च । न जातिमात्रे व्यक्तिप्रतीत्य- भावप्रसङ्गात् । न चाक्षेपात्तद्धीः शाब्द[२]बोधपदोपस्थितस्यैव भानात् । न चानन्त्याद्व्यभिचाराच्च न विशिष्टे शक्तिरिति वाच्यम् सामान्यलक्षणया सर्वव्यक्तीनामुपस्थितौ शक्तिग्रहसम्भवात् । तेन जातिविशिष्टा व्यक्तिर्वाच्या । अपोहोऽतद्व्यावृत्तिरेव शब्दार्थो

१. त्वञ्च शक्य- अ.।
२. शाब्दबोधोपस्थित अ.।

सः इति साक्षात् सङ्केतितः, अस्येति शब्दस्य ।

अथ लक्षणा-

कमलाकरी

वैभाषिकैरुक्तः । तेषां मते जातेरभावादगोव्यावृत्यैव अनुगत गोव्यवहारः । कथं तर्हि जातिमात्रे शक्तिरुक्ताऽतआहः-प्रकृतेति ।[1] जातेर्वाच्यत्त्वे व्यक्तेराक्षे[2] पादिवदव्यञ्जनयाऽपि भानमिति प्रकृतोपयोगः । विशिष्टशक्ति वादे तु न व्यञ्जनेति । प्रकृतानुपयोगान्नोक्तमि त्यर्थः । नचोक्तदूषणाग्रासासादयुक्त एव व्यञ्जनोपयोगी जातिपक्ष इति वाच्यम् । आनन्त्याद् व्यभिचाराच्च विशिष्ठाभिधानस्य पूर्वं निरस्तत्वात्, सामान्यलक्षणायाश्चायुक्तत्वात् । विस्तरेण चैतद् भाट्टकुतूहलेऽस्माभिरुक्तमिति नात्रोच्यते । न च शक्यतावच्छेदकाभावान्न जातौ शक्तिः । वाक्यैकत्वेनानन्त्यव्यभिचारादिदोषाभावेन तदनपेक्षणात् ।

तच्च प्रकारं विना पदात् कथं निर्विकल्पा स्मृतिरिति वाच्यम्, शब्दस्यैव प्रकारत्वात्, व्यक्तौ सन्दे[3] हाच्च । व्यक्तेश्चरमोपस्थितत्वात् चित्रबुद्धेरभावाद्गौरवाच्च न वाच्यत्वम् । नहि प्रतीतिमात्राद् व्यक्तेर्वाच्यत्वं, लक्षणोच्छेदापत्तेः । अनन्यलभ्यो हि शब्दार्थः । न च व्यक्तेर्लक्षणया भानसम्भवे वाच्यत्वं युक्तम् । न च लक्ष्यतावच्छेदकासम्भवः, जातेरेव तत्वात् । क्वचिदाक्षेपात् तद्धीसम्भवाच्च । न चाक्षेपे कथं व्यक्तौ बहुत्वादिसंख्यान्वयः । तस्या अशाब्दत्वात् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थवाचित्वादिति वाच्यम्, अभेदेन प्रकृत्यर्थत्वात् । यत्र हि 'व्रीहीनवहन्ति' इत्यादावन्ययानुपत्तिः न हि कर्मत्वादिकं व्यापारवत्वं येन व्यक्तिद्वारा स्यात् । तत्र व्यक्तौ लक्षणैव । यत्र तु 'व्रीहिभिर्यजेत' इत्यादौ जातेरमूर्ताया अप्यारुण्यवत् द्रव्यपरिच्छेदद्वाराकरणत्वसम्भते व्यापारवत्वस्य तत्वात् तत्राक्षेपादेव व्यक्तिधीः । आक्षेपश्चार्थापत्तिरनुमानं स्मृतिर्वाऽ स्तु न तु शाब्दबोधविषयतेति दिक् । सर्वत्राशब्दव्यक्तौ संख्याद्यन्वयायोगाल्लक्षणेवैति तु त[4]त्वम् । अतएव कैश्चिदित्यनेन

---

१. जातिर्वाच्य - अ. ।
२. पादिवदव्यञ्जनयाऽपि - अ. ।
३. सन्देहात् - अ.।
४. युक्तम् - अ.।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥९॥

कमलाकरी

तुच्छत्वमुक्तम्। ननु वाच्यादिभिस्त्रिविधोऽर्थः पूर्वमुक्तस्तदयुक्तम् मुख्यार्थस्यापि सत्वादत आह- स इति। स वाच्य एव मुख्य इत्यर्थः।

एवं वाच्यार्थमुक्त्वा तद्बोधकं वाचकं शब्दमाह-तत्रेति। तत्र मुख्येऽर्थेऽस्य शब्दस्याभिधारूपो व्यापारो मुख्य आदौभवः यत उच्यते। पदज्ञा हि सम्बन्धस्मरणे सति पदार्थस्मरणं तेन व्यापाररूपसम्बन्धज्ञानविषयत्वात् सम्बन्धो व्यापारः। तेनार्थस्य मुख्यत्वं शब्दस्य च वाच्चकत्वं युक्तमिति भावः।

वाचकमुक्त्वा लाक्षणिकं वक्तुं लक्षणामाह-मुख्यार्थेति। मुख्यार्थस्यानन्यपदार्थसंसर्ग एव बाधः। शुद्धमुख्यार्थस्य कापि बाधायोगात्। यद्यपि 'काकेभ्यो दधि रक्ष्यताम्' 'छत्रिणो यान्ति' इत्यादौ च न मुख्यार्थस्य बाधस्तथापि तात्पर्यार्थविषकवाक्यार्थबोधाभावोऽभिप्रेतः। आद्ये उपघातकस्यान्वयप्रतियोगित्वे तात्पर्यादन्त्ये चैकसार्थप्रवृत्तत्वेनान्वयोऽतो नाव्याप्तिः। यत्र तु न तात्पर्यं काकमात्रे च तात्पर्यं तत्र नैव लक्षणा। एतेन तात्पर्यधीरेव लक्षणाबीजं नान्वयानुपत्तिरिति सूचितम्। यद्यपि 'यष्टीः प्रवेशय' 'गङ्गायां घोषः' इत्यादावुभयापेक्षादर्शनाद् विनिगमनाविरहस्तथापि 'गङ्गायां घोषः' इत्यत्र तात्पर्याभावे जघन्ये घोषपदे एव मीने लक्षणा किं न स्यात्। कुतश्च गङ्गापदेऽपि स्वार्थसम्बन्धि नौकादौ न लक्षणा। तावताऽपि अन्वयानुपत्तिशान्तेः। अतस्तात्पर्यधीरेव बीजम्। न चैवं सैन्धवादिपदे लक्षणापत्तिः। वृत्तिमात्रे तात्पर्यपेक्षया लक्षणाबीजत्वासम्भवश्चेति वाच्यम्। प्रकरणादौ सति तदप्रसङ्गात् सा तात्पर्यविशेषस्य हेतुत्वादन्यथोक्तदूषणाग्रासतिदिति दिक्। असम्बद्धलक्षणाया- मतिप्रसङ्गोऽतस्तद्योग इत्युक्तमिति केचित् तन्न सिद्धयसिद्धिव्याघातात् तादृश्या असिद्धेः। सिद्धौ वा सम्बन्धस्यापि कथञ्चित् सत्वात्। परमानन्दस्तु-योगपदं प्रमाणान्तरानुत्थापकयोगपरम्। तेन धूमपदाद् व्याप्तिज्ञानद्वारा बहिर्बोधे[१]

१. बोधे न प्रसङ्गः ब.।

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगात् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात् मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे रूढ़ितः प्रसिद्धेः तथा गङ्गातटे

कमलाकरी

तदप्रसङ्गः, तस्यानुमानोपजीव्यत्वादित्याह । आद्यं विशेषणद्वयं सर्वलक्षणा-साधारणम् । रूढि प्रवाहः। अथेति विकल्पे । प्रयोजनमुद्दिश्येति ल्यब्योगे पञ्चमी । न च हेतुद्वैधेऽननुगमः अन्यतरत्वेनानुगमात् । तेन बाधो योगः रूढिप्रयोजनांन्यतरत्वञ्चेति हेतुत्रयम् । अतएव वक्ष्यति 'मुख्यार्थबाधादित्रयं हेतुरिति सुबुद्धिमिश्र काव्यप्रदीपादयः । परमानन्दस्तु- रुढचभावसहकृतप्रयोज- नाभावस्य लक्षणत्वान्नानुगमः । पक्षस्य सिषाधयिषाविरहसिद्धच-भावरूपलक्षणवत् यत् यतः यस्माच्छब्दव्यापारादन्यो शक्योऽर्थो लक्ष्यते प्रतीयते सः शक्यसम्बन्ध । शक्यसम्बन्धो स्मरणरूपो व्यापारः । लक्षणायाः सम्बन्धरूपत्वेन सम्बन्धाहेतुकत्वात् तस्य शब्दव्यापारत्वाभावाच्च । तस्य व्यापारत्वोक्तिर्व्यापारभूतज्ञानविषयत्वादेव । सा क्रियालक्षणा । क्रियापदं व्यापारपरम् । शक्यसम्बन्धेनाशक्यार्थप्रतीतिर्लक्षणेति प्राचां मतेनेदं लक्षणमिति केचित् तन्न, वृत्तिर्हि प्रतीतिहेतुर्नतु प्रतीतिरेव तेन स्मर्यमाणः शक्यसम्बन्धः एव लक्ष्यधीहेतुत्वाल्लक्षणेति तत्वम् । तद्योगे इति- प्रतीतिं प्रत्येव हेतुत्वं न शक्यसम्बन्धरूपलक्षणां प्रति , सम्बन्धस्य सम्बन्धान्तराहेतुत्वात् । यदिति-क्रियाविशेषणं वा । यत्वत्र देवनाथेन दूषणमुक्तं तच्चिन्त्यम् । अत्र केचित्-लक्षणनिष्ठार्थवृत्तिर्बाधितेन तेन स्वसम्बन्धितीर-बोधनात् न [१] पदे तस्य शक्यत्वाभावात् पदस्य लक्ष्यसम्बन्धाभावाच्च । लाक्षणिकार्थबोधकत्वादेव शब्दे लक्षणाऽऽरोप्यते, अतएवोक्तं मूले आरोपितेत्याहुः तन्न शब्दभेदस्य प्रक्रमात् आरोपेण वस्त्वसिद्धेः । गङ्गापदात् सप्तम्ययोगात् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् तीरस्य च प्रकृत्यर्थत्वाभावात् परेच तब्दाधात् । शब्दवृत्तौ लक्षणायां तीरस्यापि लक्षणया प्रकृत्यर्थत्वादाधारत्वं युज्यते । तेनैवं मूलार्थः मुख्यार्थधीपूर्वकत्वाद् व्यवहितार्थनिष्ठापि मुख्यसम्बन्धितीरविषयत्वाद् वृत्तेर्विषयतासम्बन्धेन

---

१. न पदात्तस्य - अ. ।

घोष इत्यादेः प्रयोगात् येषां, न तथा प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मन प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

कमलाकरी

शब्दनिष्ठेत्यर्थः। रूढौ मुख्यबाधमाह- कर्मणीति । कुशान् लात्यादत्ते इति दर्भग्रहीतुर्मुख्यार्थस्य बाधाच्चतुरे लक्षणा । प्रयोजनवत्यां मुख्यार्थबाधमाह- गङ्गायामिति । तद्योगमाह- विवेचकेति । कुशले विवेचकत्वं सम्बन्धः । गङ्गायां सामीप्यसम्बन्धः । रूढितः इत्यस्यार्थः प्रसिद्धेरिति प्रसिद्धेर्हेतोः । प्रयोजनमाह - तथेति । प्रयोजन लक्षणायां गङ्गातटे इत्यादि प्रयोगाद् व्यवहाराद् मुख्योऽर्थो यल्लक्ष्यते सः शब्दव्यापारो लक्षणेत्यन्वयः । येषां न तटादिधीस्तेषां पावनत्वादि बोधनरूपप्रयोजनादमुख्योऽर्थो यल्लक्ष्यते यत् येन स व्यापारः इत्यर्थः । क्रियेत्यस्यार्थमाह - व्यापार इति । आरोपितपदार्थ इत्यर्थः । सान्तरार्थेति- अन्तरं मुख्येन व्यवधानं तेन सहितो योऽर्थस्तीरादिस्तन्निष्ठः स्वनिरूपितसम्बन्धस्य स्वावृत्तित्वाल्ल-क्ष्यनिष्ठः । प्रतीतिपक्षे विषयतासम्बन्धेन शब्दनिष्ठः । स्वाश्रयवाचकसम्बन्धेन शब्दवृत्तिः, संयोगरूपेण तीरार्थवृत्तिः संयोगरूपो व्यापारो लक्षणेत्यर्थः । केचित् तु कुशलपदे दक्षे न लक्षणा । तस्याश्वकर्णे वृक्षवत् रूढ्या प्रतीतेः । योगस्तु तद्वदेव न विवक्षितः किन्तु साधुत्वमात्रार्थः न लक्षणायां प्रयोजकः किन्तु स्वरे पङ्कजपदे रूढौ लक्षणापत्तेरतिव्याप्तेः । मण्डपपदे गृहे योगासम्भवात् सार्षपस्नेहे योगाभावेऽपि लक्षणयाऽव्याप्तेश्च । किं बहुना 'गौः शेते' इत्यत्र गमेर्डोप्रत्ययेन शयनकाले गमिकर्तृत्वबाधाल्लक्षणापत्तिः। पङ्क[१]जादिपदे च तदापत्तिस्तेन ' कलिङ्गशूरः गर्गः पण्डित' इत्याद्युदाहार्यमित्याह । अन्ये तु- पङ्कजपदे योगमात्रे कुमुदभेकादौ धीप्रयोगापत्तेः शक्तिः 'कर्मणि कुशलः''मण्डेपे शेते' इत्यादौ योगार्थबाधाल्लक्षणैव । 'कुशलमासनय' 'मण्डपं भोजय' इत्यादौ तु तदभावान्न लक्षणा इत्याहुस्तन्न 'पङ्कजमानयेत्यत्र' कुमुदे योगार्था[२]बाधात् न लक्षणा स्यात् । अन्ये तु कुशलपदेऽन्यप्रसक्त्याभावाल्लक्षणैवेत्याहुः । ननु गङ्गापदे लक्षणा न

---

१. पङ्कजाति (१) पदे -अ.।
२. योगार्थवाधात् - अ.।

स्वसिद्धये पराक्षेपः पदार्थं स्वसमर्पणम् ।
उपादानं लक्षणञ्चेत्युक्ता शुद्धैव सा द्विधा ।।१०।।

कमलाकरी

युक्ता लक्ष्यतावच्छेदकाभावात् । तथाहि न तावद् गङ्गातीरत्वेन तीरधीः गङ्गांशे लक्षणायोगात् । स्वस्य स्वावृत्तित्वेन गङ्गानिरूपितसम्बन्धस्य गङ्गायामसत्वात् तीरमात्रबोधस्य च निर्विकल्पकापत्तेः । न च शक्त्या पूरस्य लक्षणया तीरमात्रस्यासंसर्गमर्यादया च संसर्गधीः । विशिष्टधीरार्थसमाजात् शब्दप्रयोज्यधीविषयत्वाच्च शाब्दत्वं वाक्यार्थवदिति वाच्यम् । लक्षणया निर्विकल्पकापत्तेः युगपदवृत्तिद्वयविरोधाच्च । ननु सः न दूषणमिति मणिकारादयः। न हि वृत्तिमात्रद्वयं विरुद्धं नानार्थे सैन्धवादिपदेऽनेकशक्त्यङ्गीकारात् । न चानेकार्थानुकूलैकशक्तिः पुष्पदन्तपदवदिति वाच्यम् । भोजने[१] ऽश्वविषये शक्तेर्बाधेऽन्यत्रापि बाधापत्तेः । शक्तेरेकत्वात् । पुष्पदन्ताविति त्वेकमात्रे प्रयोगाभावात् उभयत्रैका शक्तिः अश्विपदवत् । इहं तु प्रत्येकं प्रयोगाभावाद् भिन्नैव शक्तिः । एतेना योग्यत्वान्नेतरधीरित्यपास्तम् । तस्माद्विजातीयवृत्तिद्वयविरोधो दूषणं वाच्यः । न च तद्युक्तम् । गङ्गायां मीनघोषावित्यत्र गङ्गापदस्य शक्यलक्षाभ्यां पूरतीराभ्यां साक्षात्परम्परासम्बन्धयोः पूर्वग्रहीतत्वेन तदाहितसंस्कारसत्वात् पदस्य च स्मारकत्वेनोभयबोधे बाधकाभावादिति चेन्न यद्यप्युभाभ्यां सम्बन्धः पूर्वं गृहीतस्तथापि तस्योपस्थापकं गङ्गापदमेव । तच्च साक्षाल्लघुसम्बन्धेन शक्यस्यैवोपस्थापकं न परम्परासम्बन्धेन लक्ष्यस्य किञ्च नाना[२] र्थे सैन्धवादिपदे प्रकरणादिना विशेषधीर्न स्यात् उभयत्र- शक्तिग्रहात् । अथ भोजने सैन्धवपदादश्वबाधा योग्यतयाऽपरशक्तिप्रतिबन्ध इति चेदिहापि तात्पर्यसहकारेण परबाधाल्लक्षणया शक्तिप्रतिबन्ध इति तुल्यम् । किञ्च- लक्षणायां बाधापेक्षा शक्तौ च नेति कथमेकस्यानपेक्षानपेक्षे एकपदात् स्यातां विरोधात् । किञ्च गङ्गायामित्येकत्वानन्वयःप्रत्य[३] यार्थानां प्रकृत्यर्थान्वितत्वात् तस्य च

---

१. भोजने स्वविष-अ. ।
२. नामार्थसैन्ध -अ.।
३. प्रत्ययानां - अ.।

"कुन्ताः प्रविशन्ति" 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्धयर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते। तत उपादानेयं लक्षणा।

कमलाकरी

द्वित्वावच्छिन्नत्वात्। न च प्रत्येकमेकत्वमादाय साधुत्वम् घटमित्यत्रापि प्रत्येकमेकत्वमादाय द्वयोर्बहूनां वा प्रतीत्यापत्तेः। अस्तु तर्हि गङ्गयोर्मीनघोषावित्यत्रोभयधीरितिचेन्न एकशेषेण गङ्गापदद्वये एकत्र शक्तावपरत्र लक्षणायामिष्टापत्तेरेकपदे वृत्तिद्वयाभावात्। गङ्गाविशिष्टतीरे लक्षणया शक्यार्थस्य लक्ष्यं प्रति विशेषणत्वान्मीनान्वये च प्रधानत्वाद्गुणत्वप्रधानत्वविरोधः। सोऽप्यस्तु को दो[१]ष इति चेन्न दण्डिपदे पुरुष[२]विशेषणस्यापि दण्डस्य प्रधानत्वे दण्डदण्डिनाविति प्रतीत्यापत्तेः। गौर्नित्य इति च लक्षणा न स्यात्। गुणभूतेऽपि गोत्वे नित्यत्वान्वयात्। किञ्च युगपदवृत्तिद्वयाङ्गीकारे 'छत्रिणो यान्ति' 'काकेभ्य' इति 'कुन्ताः' इति च शक्त्या छत्रकाककुन्तानां लक्षणया च जहत्स्वार्थया छत्राभाव(?)विडाल-पुरुषाणां धीसम्भवाद् अजहत्स्वार्थोच्छेदः। न च तीरत्वविशिष्टे तीरे लक्षणा अन्यथा तीरत्वप्रकारकधीर्न स्यात् किन्तु गङ्गायामिति धीः स्यादिति पक्षधरमिश्रमतं युक्तमिति वाच्यम्। गङ्गापदात् सिन्धुतीरस्यापि बोधापत्तेः। किञ्च यया लक्षणया तीरधीस्तयैव तीरत्वधीः लक्षणान्तरेण वा, नाद्यः संयोगसंयुक्तसमवाययोः शक्यसम्बन्धयोर्भेदेन लक्षणैक्याभावेन तीरत्व[३]बोधायोगात्। न च विशेष्य एव शक्यसम्बन्धापेक्षा न विशेषणे। वह्नित्वेन सह पृथक्-व्याप्त्यभावेऽपि मानान्तरोपस्थापितस्य व्या[४]पकताच्छेदकत्ववत् तादृशस्यैव लक्ष्यतावच्छेदकत्वसम्भवादिति वाच्यम्। तर्हि तादृशस्य पूरस्यैव तत्वे प्रद्वेषः कुतः लक्षणया निर्विकल्पापत्तेश्च। मानान्तरोपस्थापितस्य शाब्दबोधाविषयत्वात्। नान्त्यः, तीरत्वेन परस्परासम्बन्धेन भिन्नलक्षणायां तत्र तीरत्वस्य लक्षतावच्छेदकत्वे तत्प्रकारकबोधापत्तेः।

---

१. विरोधः-अ.।
२. पुरुषविशेषस्यापि-अ.।
३. तीरबोधा-ब.।
४. व्यापकता वच्छेदकत्ववस्वात् -अ.।

गौरनुबन्ध्यः इत्यादौ श्रुतिचोदितमनुबन्धनं कथंम्मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते । "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति न्यायादित्युपादानलक्षणा तु

कमलाकरी

तत्राप्युक्तदिशा लक्षणांन्तरेऽनवस्थापत्तेश्च । न च तीरे तीरत्वं तीरत्वे च तीरं प्रकारः । द्वयोर्गुणत्वप्रधानत्वविरोधादुभयविशेष्यकबोधापत्ते र्लक्षणाद्वयापत्तेः उभयत्र भिन्नप्रकारापत्तेश्च । न च गोपदे जातिविशिष्टे शक्तिवद्विशिष्टे लक्षणाविशिष्टेनैकसम्बन्धाभावात्, तद् वरं गङ्गापदे शक्तिरेव वृत्यन्तरकल्पने गौरवात् । न चानेक शक्तिकल्पना प्रयोगे नानार्थवदिष्टापत्तेः अन्यथा नानार्थोच्छेदापत्तेः । तत्रापि लक्षणाप्रसङ्गात् । न च बाधाबाधाभ्यां भेदः । भोजनप्रकरणेऽश्वबाधेनैव सैन्धवपदे लक्षणाप्रतीतेरत्रापि बाधस्य तुल्यत्वाद् विशिष्टे च शक्तिः सुलभैवेति नोक्तदोषः स्यात् महत्सङ्कटमेतत् इति । अत्र ब्रूमः–न तावत् तीरे शक्ति, पूरे प्रयोगबाहुल्यात् तीरस्यान्यलभ्यत्वात् तीरसम्बन्धेन गङ्गापदस्य पूरेऽ प्रयोगाच्च । लक्षणायां तीरत्वस्य प्रकारत्वे उक्तदोषात् मानान्तरेण बोधाभावे च प्रकारत्वायोगात् । शक्यस्य चोपस्थितस्य त्यागे हेत्वभावात् विशिष्टस्य चार्थसमाजलभ्यत्वेन शक्यस्य लक्षणावृत्यविषयत्वेऽपि प्रकारत्वोपपत्तेस्तीरस्य च वापीतीरा[१]तिप्रसक्तस्य लक्ष्यतावच्छेदकत्वायोगात् तात्पर्येण बोधसम्भवाद् गङ्गातीरे इत्यनुभवाच्च शक्यस्य प्रकारतया युक्तैव लक्षणा । मूले तु शक्यतावच्छेदकस्यैव लक्ष्यप्रकारत्वमुक्तम् । न च ग ङ्गीयमिति बोधापत्तिः । परमते वापीतीरादिनिवृत्तये तात्पर्येण गङ्गाबोधवत् तीरत्वस्य तेनैव बोधोपपत्तेः । न च लक्ष्यावृत्तेः कथं प्रकाररोति वाच्यम् । आहार्यस्य रक्तः स्फटिक इति [२] वदौपाधिकस्य चोपपत्तेरिति वक्ष्यते । शक्यार्थस्य विशेषणत्वे कथमियं जहत्स्वार्थेति चेद् वाक्यार्थानन्बयादित्यवेहि । रूढि[३]लक्षणाभेदाभावान् प्रयोजनलक्षणाया षड्भेदाद् व्यङ्गस्य गूढागूढत्वविवेकाय श्लोकत्रयेणाह–स्वसिद्धये

---

१. तीरादिप्रस – अ.।
२. पौणाधिकस्य विशेषणत्वे कथ– अ.।
३. रूढ़िलक्षमाया भेदाभा –ब.।

नोदाहर्त्तव्या । न ह्यत्र प्रयोजनमस्ति न वा रूढ़िरियम् । व्यक्त्यविनाभावित्वात् तु जात्या व्यक्तिराक्षिप्यते । यथा क्रियतामित्यत्र कर्ता, कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ च गृहं भक्षयेत्यादि च ।

कमलाकरी

इत्यादि । प्रयोजनवती लक्षणा द्वेधा शुद्धा गौणी च । अन्त्या मिश्राप्युच्यते । आद्यापि द्वेधा- उपादानलक्षणा लक्षणलक्षणा चेति । गौणी च द्वेधा सारोपा साध्यवसाना चेति । साऽपि द्वेधा सादृश्यहेतुका सम्बन्धान्तरहेतुका चेति षोढ़ा । स्वसिद्धये स्वार्थान्वयसिद्ध्यर्थं परस्याशक्यस्योपस्थितिरुपादानं स्वार्था[१]त्यागः । तेन 'काकेभ्यो दधि रक्ष्यतामित्यस्या एव भेदः । परार्थमशक्यान्वयबोधार्थं स्वस्यं स्वार्थस्य समर्पणं त्यागा इति प्राञ्चः । स्वार्थविशेषणीकरमिति वयम् । लक्षणमुपलक्षणम् । एते एवाजहत्स्वार्था जहत्स्वार्था चोच्यते । शुद्धैव द्विधा न तु गौणात्यिर्थः । ननु शुद्धैवेत्ययुक्तं गौण्या अपि तथात्वात् । 'गाव एते सन्तीति यत्र गोवाहीकोभयधीस्तत्रोपादानम्, गौर्वाहीक इत्यत्र स्वार्थे त्यागाल्लक्षणेति चेच्छृणु आद्ये स्वसादृश्यस्य स्वावृत्तितया गौण्यामुंपादानासम्भवात् । गौश्च गौश्च गाव इत्येकशेषेण नानापदेषु शक्यलक्ष्योभयधीः सम्बन्धान्तरे च गौणत्वाभावात् । उपादानलक्षणामुदाहरति - कुन्ता इति । कुन्तादीनामचेतना[२] दाख्यातार्थयत्नान्वयायोग इति स्वार्थबाधः । संयोगिन इति तद्योग उक्तः । ततः हेतोः उपादानेन स्वार्थत्यागो न । परेषमुपादानलक्षणोदाहरणं दूषयितुमुपन्यस्यति-'गौरनुबन्ध्य' इति । श्रुति[३]विहितानुबन्धनक्रिया मे मन गोपदार्थस्य जातेः कथं स्यादिति मुख्यार्थबाधः इति हेतोर्व्यक्तिराक्षिप्यते लक्ष्यते । न चेयं लक्षणलक्षणा जातेः प्रकारत्वात् । सा चोपादानरूपैवेति मण्डनमिश्राः । शक्तिः कुतो न तत्राहु-विशेष्यमिति । अभिधा शक्तिर्विशेष्यं व्यक्ति न गच्छेन्न स्पृशेत् । तत्र हेतुः- विशेषणे जातौ क्षीणशक्तिर्विरतत्व्यापारा । यतः

---

१. स्वार्थत्यागः अ.।
२. रख्यातयत्नान्वमयायोग-अ.।
३. श्रुतिविहितोऽनुबन्धनक्रियान्वयो-व.।

पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् ।

'गङ्गायां घोष' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयतीत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात् ।

कमलाकरी

'अनन्यलभ्यो हि शब्दार्थ,' इति भावः । दूषयति–नोदाहर्त्तव्येति । हेतुमाह नहीति । अनुपलब्धेः प्रयोजनाभावः । अयं भावः– न क्रियान्वयधीस्तथा तस्याविषयत्वेन फलत्वाभावात् । एतच्चाग्रे वक्ष्यति। बाधाच्च, तथाहि–जात्या शुद्धा व्यक्तिर्लक्ष्यते स्वविशिष्टा वा । नाद्यः व्यक्तेर्निर्विकल्पापत्तेः । नान्त्यः विशेषणतया विशे[1]ष्यान्तर्गतजातौ लक्षणायां युगपद्वृत्तिद्वयविरोधात् । न च शक्त्या जातिधीः, लक्षणया व्यक्तिमात्रधीः अर्थसमाजमहिम्ना च विशिष्टधीरिति वाच्यम् । विशिष्टस्याशब्दत्वेन शाब्दक्रियान्वयानुपपत्तेः शब्दान्निर्विकल्पकापत्तेश्चेति । न वेति– निरूढत्वं ह्य [2] नादित्वं सास्त्रादिषु तदभावात् । प्रवाहानादिता च नोपलक्षणं विनेति न लक्षणा । कथं तर्हि व्यक्तिधीरत आह–व्यक्तीति । अविनाभावो गुरुमते जातेर्व्यक्तिदेशत्वम् भट्टमते तादात्म्यम् जातिव्यक्त्योरभेदेनैकाश्रयत्वञ्च । आक्षिप्यतेऽनुमीयते । जातिर्व्यक्त्याश्रिता जातित्वाद् यद्वा इयं गौर्गोत्वादित्यनुमानान्न लक्षणेत्यर्थः । न चानुमिताया व्यक्तेरशाब्दात्वात् कथं शाब्देनान्वयः इति वाच्यम् । अनुमितेः शब्दपरिकरत्वात् । न च वृत्या पदजन्य–धीविषयत्वं शाब्दे तन्त्रम् । लाघवात् पदजन्यत्वस्यैव तन्त्रादित्यर्थाध्याहारवादिगुरुमतेनेदमिति परमानन्दः। आक्षेपे दृष्टान्तमाह – यथेति । कृतिः सकर्तृका सकर्मका च क्रियात्वादिति यथा पच्यते इति कर्मा [3] त्र प्रत्ययेन चैत्रेणेति कर्तुराक्षेपः । कुर्वित्यत्र कर्त्रुत्पन्नेन घटमिति कर्माक्षेपः। तदुक्तम् –"जातिव्यक्त्योरभेदाच्च व्यवहारोपयोगिता' इति ।

---

१. विशिष्टान्तर्गतजातौ –च.।
२. व्यनादित्वं अ. ।
३. कर्त्ताऽत्र – अ ।

अनयोर्ल्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्वप्रतिपत्तौ हि प्रतिपिपादयिषित प्रयोजनसम्प्रत्ययः गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।

कमलाकरी

एवं गुरुमतेऽर्थाक्षेपे दृष्टान्तमुक्त्वा भट्टमते शब्दाक्षेपे दृष्टान्तमाह प्रविशेति । प्रविशेत्यत्र गृहमिति कर्माक्षिप्यते कल्प्यते पिण्डीमिति कर्मपदे भक्षयेति क्रिया यथाक्षिप्यते इति क्रमेणान्वयः । एवं जात्या व्यक्तिरिति दृष्टान्तार्थः । पिण्डी गुडः पिण्याकं वा । केचित्तु-'पीनो देवदत्तो दिवा न भुङ्क्ते' इतिवाक्ये रात्रिभोजनवानिति लक्ष्यते । सेयमुपादानरूपार्थवादे प्राशस्त्यलक्षणावदर्धमन्तर्वेदीतिवच्च वाक्येऽपि लक्षणा साध्वी । पीनत्वेनैव वा सामानाधिकरण्याद् रात्रिभोजनं लक्ष्यत इत्याहुस्तच्छूषयति- पीन इति । कुतो न लक्षणा तत्राह -श्रुतेति । भट्टमते रात्रौ भुङ्क्ते इति शब्दः कल्प्यते गुरुमतेऽर्थ[1] मात्रमित्याह । गङ्गापदेऽपि तीरधीरर्थापत्या किन्न स्यात् तेन लक्षणोच्छेद इति चेन्न । नहि प्रयोजनमात्रं लक्षणाहेतुः किन्तु बाधाद्यपीति । न च दिवाभोजनाभावे पीनत्वं बाधितं येन सा स्यात, योगिरात्रिभोज्यादौ तस्मिन् सत्यपि तद्दर्शनादित्याशयः। यद्वा आक्षिप्यते । यथा पदयोः सर्वत्रानुषङ्गेणैवं योज्यम् । यथा क्रियतामितिकर्त्ता आक्षिप्यते न लक्ष्यते । यथा प्रविशेत्यादौ गृहमित्याक्षिप्यते, पीन इत्यत्र रात्रिभोजनं यथाक्षिप्यते न लक्ष्यते तथा जात्या व्यक्तिर्न लक्ष्यते ।

लक्षणलक्षणामाह - गङ्गायामिति । स्वार्थमर्पयति त्यजति यद्वा स्वार्थं विशेषणीकरोति । पूरविशिष्टे तीरे लक्षणेत्यर्थः । उपादाने शक्यस्यापीतरपदार्थान्वयः इह तु लक्ष्यस्यैवेति भेदः । लक्षणेनोपलक्षणेन। शुद्धैवेति व्याचष्टे-उभयरूपा चेति। उक्तेयं द्विरूपा शुद्धैव न गौणीत्यर्थः । हेतुमाह-उपचारेणेति । सादृश्येन प्रवृत्ति-रुपचारः । तेनामिश्रत्वादसम्बन्धात् । लक्ष्यवाचकपदाभाववती शुद्धा । सादृश्यान्यसम्बन्धवती शुद्धेति देवनाथः । लक्ष्यवाचक पदवती[2] गौणी ।

---

१. मात्रमित्यर्थ-अ.।
२. लक्ष्यलक्षकपदवती-ब.।

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाणः आरोपविषयश्च यत्राह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपां ।

कमलाकरी

यथा सिंहो देवदत्तः । अत्र केचिदाहुः- गौण्यां शक्यलक्ष्ययोः साद्रश्यादिसम्बन्धैरभेदः प्रतीयते, शुद्धायान्तु मुख्यलक्ष्ययोर्भेदः प्रतीयते, तदेव च तटस्थं नाम । इदमेव च शुद्धायाः गौणीतो भेदकं, न तूपचाराभाव इति । तन्मतं निराचष्टे -अनयोरिति । उक्तयोरुपादानलक्षणलक्षणयोः शुद्धभेदयोर्लक्ष्यस्य लक्षकस्य च ताटस्थ्यं भेदेन प्रतीयमानत्वं न भेदरूपम् । भेदो रूप्यते ऽनेनेति भेदरूपं न भेदकमित्यर्थः । कुतो न भेदकमत आह- तटादीनामिति । तत्वप्रतिपत्ताविति निमित्तसप्तमी । गङ्गात्वेन तटस्याभेदबोधार्थं हि तटादीनां गङ्गादिशब्दैः प्रतिपादने बोधने सति प्रतिपादयितुमिष्टस्य शैत्यपावनत्वादेः प्रयोजनस्य प्रतीतिः न तु भेदप्रतीतौ । अभेदबुद्धिं विना प्रयोजनाप्रतीतेः । अतो [1]न ताटस्थ्यं भेदकमित्यर्थः । 'अयंभावः-कौण्डपायिनामयने 'मासमग्निहोत्रम्' इतिवत् अन्यत्रान्यशब्दप्रयोगस्तद्धर्मप्राप्यर्थः' इति तीरे गङ्गाशब्दप्रयोगस्तद्वत्- शैत्यादिप्रतीत्यर्थः । शैत्यादिधीस्तु तीरे गङ्गात्वेन प्रतीतावेव जायते न तु गङ्गासम्बन्धप्रतीत्या न वा तीरमात्रप्रतीत्या । तथा सति 'गङ्गातटे घोषः, इत्यत्रापि सम्बन्धप्रतीतेः शक्यलक्ष्यप्रतीत्योः फलभेदो न स्यात् । तदेततदाह-को भेद इति । शक्त्यैव लक्ष्यप्रतीतेर्लक्षणा निष्फलेत्यर्थः । अतः शुद्धायामप्यभेदप्रतीतेर्न ताटस्थ्यं भेदकमिति । ननु गङ्गापदात् तीरे कथं गङ्गात्वबोधः , कथं वा पूरे घोषान्वयो बाधात् । किञ्च स्वार्थादन्येन रूपेण ज्ञाते[2] भवति लक्षणा । न च पूरत्वेन बोधेऽन्यथा बोधोऽस्ति । न च गङ्गात्वेन तीरानुभवोऽस्ति येन गङ्गापदाल्लाक्षणिकात् तथा स्मृतिःस्यात् । अनुभवस्मृत्योः समानप्रकारकत्वनियमात् । किञ्च-लक्ष्यावृत्तेःपूर[3]त्वस्य लक्ष्यतावच्छेदकत्वे शक्त्या वृत्तेरपि शक्यतावच्छेदकत्वं स्यादिति चेद्-अत्र प्राञ्चः

---

१. अनेन ताटस्थं नभेदक-अ.।
२. ज्ञाने - अ.।
३. पूरस्य- ब.।

विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात्
साध्यवसानिका ।। ११ ।।

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात् ।

भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ गौर्वाहीकः इत्यत्र गौरयम् इत्यत्र च ।

कमलाकरी

-शब्दाल्लक्ष्यप्रतीतौ व्यञ्जनया तीरे पूराभेदबोधाच्छैत्यपावनत्वादिधीः। तत्र बाधस्याप्रतिबन्धकत्वात् व्यङ्ग्यबोधस्यारोपतया तस्या धर्मिग्राहकमानेन बाधितबोधकत्वेनैव सिद्धेरित्याहुः । नव्यास्तु-[१] बाधास्फूर्तिदशायां तद्धीर्बाधेऽपि धर्मिणस्तीरस्य योग्यत्वाद् घोषान्वयः । यच्च स्वार्थादन्येनेत्युक्तं तन्न शक्तिलक्षणयोः न समानप्रकारकत्वेन विरोधः किन्तु समानविषयत्वविशिष्टेन । न[२] तदस्ति । पूरत्वेन तीरस्य विषयत्वात् पूरस्य तदभावात् । न च स्वार्थादन्येनेति नियमः । नीलमानयेत्यत्राभावात् । यद्वा-'अत्यन्ताऽसत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति नीत्याऽयोग्यताधीर्न प्रतिबन्धिका । शक्यलक्ष्ययोरभेद पावनत्वादिज्ञानमाहार्यम् । अतएव बाधेऽ पि 'मुखं चन्द्र' इति चन्द्रत्वेन मुखधीरित्याहुः । परम्परासम्बन्धेन रक्तः स्फटिकः इतिवत् गङ्गात्वेन तीरानुभवो नाहार्य [३] एव गङ्गापदाच्च लक्षणया तादृशी स्मृतिः शाब्दबोधश्चेत्यन्ये । लाक्षणिकमनुभावकमेव न तु न्यायमत[४] इव स्मारकमित्याहुः ।

गौण्या लक्षणान्तर्गत्या भाट्टसम्मतवृत्यन्तरत्वं निराकुर्वन् गौण्या भेदानाह-सारोपेति । तु शब्दो वैलक्षण्ये । शुद्धैव द्वयीत्युक्तम् । अन्या तु शुद्धा गौणी चेत्यर्थ । तथा तेनैवरूपेणेत्यर्थः । यत्रोक्तौ भवत इति शेषः । यद्वा उच्यत इत्युक्तिर्वाक्यम् । यत्र वाक्ये इत्यर्थः । अनपह्नुतभेदौ

---

१. बाधत्स्फूर्ति- अ.।
२. न वांऽत्र -ब. ।
३. नाहार्यवद् गङ्गापदाच्च-अ.।
४. राव स्मार-ब.।

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित् ।

स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयत इत्यन्ये ।

कमलाकरी

ज्ञातवैधर्म्यौ ज्ञाता[१]भेदौ वा । अनपहुतेति पाठेऽगृहीतान्योन्याभावौ । विषयी आरोप्यमाणः विषयः आरोपाधिकरणमित्यर्थः । यथा-गौर्वाहीक इति । अत्र भिन्नविभक्त्यभावात् सामानाधिकरण्यम् । भेदान्तरमाह - विषयीति । निगीर्णे स्ववाचकपदेन भेदेनाज्ञापिते । यत्रारोपमात्रमुच्यते न त्वारोपाधिकरणमित्यर्थः । गौरयमिति यथा । यद्यप्ययमित्यस्त्येवारोपविषयपदं तथापि न तदसाधारणधर्मबोधकम् । इदन्त्वस्य साधारणत्वादित सुबुद्धिमिश्राः । वैधर्म्यस्याज्ञानाद् भेदाज्ञानम् ।

एतौ भेदौ शुद्धायामपि स्तः इति सूचयन् गौणीशुद्धयोः लक्षणमाह-भेदाविमाविति । सादृश्याद् गौणौ सम्बन्धान्तरतः शुद्धावित्यन्वयः । मूलव्याख्यया सारोपाध्यवसानौ गोणीभेदावुदाहरति -इमाविति । गौर्वाहीकः इति सारोपा । वाहीकदेशस्थः पुमान् वाहीकः । गौरयमिति साध्यवसाना । यद्यप्यत्र वाहीकत्वेनेदन्तया वा ज्ञाने सारोपात्वमर्हं तथापीदन्त्वस्यारोप[२]विषयत्वान्न तत्वम् । न चान्वयप्रतियोगिपदाभावादनन्वयः गौः पठतीत्यादौ तल्लाभात् । अयं भाव - गौणी न वृत्यन्तरम्, मानाभावात् । न च सादृश्यादिसम्बन्धस्यात्र प्रकारत्वं, पदान्तरसमभिव्याहारो वा । लक्षणायां च तदभावो भेदकः अध्यारोपे सम्बन्धाभावात् मुख्यबाधादिहेतुत्रयस्य तौल्याच्च, अतो लक्षणैवेयम् । शक्यसम्बन्धस्तु सजातीयगुणत्वम् । स्वसमवेतसमवा[३]यिसमवायित्वरूपः परम्परा न तु साक्षादित्यसदेतत् । सिंहनिष्ठस्य क्रौर्यस्य देवदत्तेऽसत्वेन तद्गुणयोगाख्यगौण्यसम्भवाच्च गुणानां नानात्वात् । भाट्टास्तु[४] - नाध्यारोपितार्थत्वं गौणत्वं खपुष्पं

१. ज्ञानभेदौ-अ.।
२. स्यारोपाविषयत्वा- ब.।
३. समवायित्वरूप, परम्परा-अ.।
४. भट्टास्तु-अ.।

साधारणगुणाश्रयत्वेन पदार्थ एव लक्ष्यत इत्यपरे ।

उक्तञ्चान्यत्र-

"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।

लक्ष्यमाणगुणैर्योमाद् वृत्तेरिष्टा तु गौणता ।।" इति ।

कमलाकरी

भवत् सिद्धान्त इत्यादौ खे पुष्पस्यारोपितत्वेनासत्वेन वारोपासम्भवात् । वाहीकादौ लाङ्गूलादिमत्वाप्रतीतेश्च । गुणानां च स्वगतभेदशून्यत्वेन तद्गुणयोगस्य साद्रश्यस्य सम्भवात् । सम्बन्धस्य प्रकारत्वेनोपपदसमभिव्याहारेण च लक्षणादौ भिन्नत्वाद् गौणी वृत्यन्तरमेव । यद्यप्यग्निरधीते इत्यादौ न पदान्तरसमभिव्याहारस्तथापि साद्दश्यस्य प्रकारकत्वमेव भेदकम् । अन्ये तुं तत्र लक्षितलक्षणैव न तु गौणीत्याहुः । किञ्च सादृश्यं न सम्बन्धःप्रतित्व्यक्तिभिन्नत्वात् । अतो 'लक्षणा तेन षड्विधा' इति ग्रन्थः प्रौढ्या छत्रिन्यायेन वा व्याख्येय इत्याहुः ।

गौण्या स्वरूपे मतभेदानाह- अत्र हीति । स्वार्थो गोत्वं पदार्थो वाहीकः । गोशब्दो हि भिन्नार्थत्वेन वाहीकसमानाधिकरण्यासम्भवाद् बाधितमुख्यार्थः । स्वार्थैकाश्रयगुणालक्षणया तानेव निमित्तीकृत्य तत्सद्रशगुणद्वाराएकाश्रयत्वसम्बन्धाद्वाहीकमुपचारात् प्रतिपादयतीत्यर्थः । केचिदिति तुच्छत्वमुक्तम् । गोपदस्य वाहीके सङ्केताभावेनाभिधाभावात् लक्ष्यतावच्छेदकैर्निमित्तत्वायोगात् शक्यत्वे शक्यवृत्तित्वे स्वभिन्नशक्यावृत्तित्वस्य तत्वात् ।

मतान्तरमाह - स्वार्थेति - अभेदेन साजात्येन गुणत्वं [१] लक्ष्यं न तु गुणी । आक्षेपाद् वाहीकशब्दात् तद्धीसम्भवादित्यर्थः । नन्विति - अन्यलत्र्यत्वादित्यर्थः । इदमप्ययुक्तम् । आक्षेप शाब्दवाहीक सामानाधिकरण्यायोगात् प्रत्ययार्थैकत्वकर्मत्वाद्यनन्वयाच्च । अन्ये लक्ष्यमाणगुणानां वाहीके षष्ट्यादिकं विनाऽनन्वयानुपपत्तेः । अभेदस्यायोग्यत्वात् भेदोपस्थापकविभक्तिं विना भेदान्वयायोगाच्च ।

सिद्धान्तमाह - साधारणेति । सजातीयेत्यर्थः । साद्दश्येन सम्बन्धेन लक्ष्यताच्छेदकेन तल्लक्षणया वाहीकबोधे युज्यते सामानाधिकरण्यम् । साद्रश्यञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वमित्यर्थः । यत्तु

१. गुणमात्रं लक्ष्यं - अ. ।

अविनाभावोऽत्र सम्बन्धमात्रं न तु नान्तरीयकत्वम्। तत्वे हि 'मञ्चाः क्रोशन्तिं इत्यादौ न लक्षणा स्यात् त्। अविनाभावे चाक्षेपैण सिद्धेर्लक्षणाया नोपयोग इत्युक्तम्। आयुर्घृत-मायुरेवेदमित्त्यादौ सादृश्यादन्यत्-कार्यकारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने।

अत्र गौणभ्रेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम्। शुद्धभेदयोस्त्ववैलक्षण्योनाव्यभिचारेण च कार्यकारित्वादि।

कमलाकरी

श्रीवत्सलाञ्छनः 'गौर्वाहीकः' 'गोरयम्' इत्यत्र रूपके सादृश्ये लक्ष्यतावच्छेदके उपमायाः को भेदः स्यात्। भेदाग्रहयुते वा सादृश्ये लक्ष्यतावच्छेदके गौणी। तदुक्तम् 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इति। तन्न सादृश्यस्य वदित्या[1]दिशब्दोपात्तत्वातदनुपात्तत्वाभ्याम् भेदस्य स्पष्टत्वात्। यत्तु काव्यप्रदीपः साधारणं जाधादिलक्ष्यता-वच्छेदकमाश्रित्य वाहीको लक्ष्यते इति तन्न गोपदाज्जडो वाहीक इत्यप्रतीतेः। न परे अपरे स्वीयाःइत्यर्थः। उक्तेऽर्थे भट्टवार्तिक-सम्मतिमाह- उक्तञ्चेति। वोद्ध्यर्थो प्रतीतिरिति करणे क्तिः। तद्धेतुः शक्यसम्बन्ध इत्यर्थः। प्रवृत्तिरिति पाठो मुख्यः। स एवार्थः। शक्य-[2]सम्बन्धित्वेनपतीतौ लक्षणेस्यर्थः। तेन लक्ष्यार्थधीरिव लक्षणेति प्राचां मतेन चैतदिति परमानन्दः। योगादिति ल्यबयोगे[3] पञ्चमी। लक्ष्यमाणाः साधारण्येन दृश्यमानाः। यद्वा लक्ष्यमाणस्य प्रतीयमानस्य गोपदार्थस्य गुणाः जाड्यादयस्तैयोगं लक्ष्यतावच्छेदकमवाप्य वृत्तेर्गौणतेत्यर्थः। न तु लक्षिता गुणास्तैर्योगः प्रतीतिविश्रान्ताद्यलक्षणायोगात् योगपद्ये वृत्तिद्वयविरोधात् क्रमे च शब्दस्य विरम्य व्यापाराभावान्। अतएव न क्वापि लक्षितलक्षणा। किञ्च लक्षितार्थे वा लक्षणा लक्षितशब्दे वा। नाद्यः, लक्ष्यसम्बन्धत्वेन शक्यसम्बन्धाभावात्। न चार्थसम्बन्धमात्रं लक्षणा, अति- प्रसङ्गात्, अर्थवृत्तित्वेन शब्दवृत्तित्वाभावाच्च। नान्त्यः मध्ये शब्दकल्पने मानाभावात् लक्षितशक्तिसम्भवाच्च। एतेन द्विरेफपदे सा निरस्ता।

---

१. वत्यादिशब्दो ब.।
२. सम्बन्धेन प्रती-अ.।
३. लोपे-ब.।

क्वचित् तादर्थ्यादुपचारः यथा-इन्द्रार्थाः स्थूणा इन्द्रः । क्वचित् स्वस्वामिभावाद् यथा राजकीयः पुरुषो राजा । क्वचिदवयवावयविभावाद् यथा 'अग्रहस्त' इत्यत्राग्रमात्रेऽयवे 'हस्त' । कृचित् तात्कर्म्याद् यथा अतक्षा तक्षा ।

लक्षणा तेन षड्विधा ।। १२ ।।

आद्यभेदाभ्यां सह

कमलाकरी

लक्षितशक्त्यापत्तेश्च । न च शक्तिशक्त्यापत्तिः रेफद्वयवत् प्रभाकरादिपदान्तरनिवृत्तये प्रत्ययार्थकर्मत्वैकान्वयार्थञ्च तदावश्यकत्वादिति केचिदर्थमाहुः परम्परासम्बन्धेन लक्षणैव लक्षितलक्षणेत्यप्याहुः । भट्टसोमेश्वरादयस्तु-सिंहपदेन क्रौर्यादयो गुणाः लक्ष्यन्ते तैर्योगाद् वृत्तिर्गौणी । शब्दस्य च विरम्य व्यापारेऽपि बाधकाभावः । 'आपो वै शान्तो इत्यादौ लक्षितलक्षणा वार्तिके स्पष्टैव, तेन सा गौणीतो भिन्नैवैत्यप्याहुः । अन्येतु- द्विरेफादौ लक्षितलक्षणैव उपपदाभावात् । 'सिंहो देवदत्त' इत्यत्र तु सोपपदप्रयोगाद् गौणीत्याहुः । लक्ष्यमाणस्य पदार्थस्य गुणा जाड्यमान्द्यादय इत्यपच्याख्या । लक्ष्यमाणस्य वाहीकस्य गुमानां गवि योगाद् वाहीकशब्दो गौणः स्यान्न तु गोशब्दः । अत्र पूर्वार्द्धे शुद्धोक्ता । उत्तरार्द्धे उपचाराद् गौणीति केचित् । गौणी वृत्यन्तरवादिनां सम्मत्या मूले गौणी वृत्यन्तरमेव सम्मतं लक्ष्यते ।

नन्वविनाभावो व्याप्तिः सा चानुमानोत्थापकत्वाकत्वान्न लक्षणाहेतुरत आह- अविनाभाव इति । अविनाऽसत्वे भावः सम्बन्धोऽभिप्रेतः न तु नान्तरीयकत्वं व्याप्तिरित्यर्थः । तत्वे नान्तरीयकत्वे । मञ्चपुरुषयोरन्वयव्यतिरेकाभावेन दैशिकक्नलिकव्याप्त्याभावादित्यर्थः । ननु कालविशेषे तत्राप्यस्त्येव व्याप्तिरत आह- अविनाभावेनेति । आपेणानुमानेनेत्युक्तम् । स्वसिद्धये पराक्षेप इत्यत्र क्रियतामित्यत्र कर्त्तेत्यत्र चे[१]त्यर्थः । सादृश्याद् गौणीभेदावुक्तो सम्बन्धान्तराच्छुद्धाभेदावाह -आयुरिति । आद्या सारोपा, अन्त्या साध्यवसाना । आयुर्जनकत्वात् घृतमायुःशब्देनोच्यते इत्यर्थः । उपसंहरति-एवमादाविति । कार्यकारणभावादिलक्षणः तत्स्वरूपः पूर्वो

१. चेत्यर्थ, अ.।

सा च-

व्यङ्ग्येन रहिता रूढौ सहिता च प्रयोजने ।
प्रयोज्यं हि व्यञ्जनव्यापारगम्यमेव ।
तच्च गूढमगूढं वा-

तच्चेति व्यङ्ग्यम् ।

कमलाकरी

ययोस्ते । यद्वा कार्यकारणभावादिर्लक्ष्यतेऽनेनेति लक्षणं ज्ञानं तत्पूर्वप्रयोगश्च तत्पूर्वे इत्यर्थः। नहि सम्बन्धान्तरस्य सततामात्रेण शुद्धात्वम् 'गौर्वाहीक' इत्यत्र स्वस्वाभिभावादेः सत्वेन शुद्धात्वापत्तेः । 'आयुर्घृत' मित्यत्र च प्रमेयत्वेन साद्रश्याद् गौणीत्वापत्तेः किन्तु तद्धीपूर्वकप्रयोगात् तच्चात्रापीत्यर्थः ।

उक्तेषु गौणीशुद्धोदाहरणेषु रूढ्यभावात् प्रयोजनविवेकं क्रमेणाह- अत्रेति । गौणभेदयोः सारोपासाध्यवसानयोर्गौर्वाहीकःगौरयमित्यत्र च भेदे वैधर्म्ये भासमानेऽपि ताद्रूप्यं तादात्म्यम् आहार्यम् । सारोपे साध्यवसाने तु सर्वथानाहार्यो भेदावगमः । वाहीकादिपदाप्रयोगात् तद्गत वैधर्म्याप्रतीतेः । सारोपायां धर्मयोरभेदः साध्यवसानायां धर्मिणोर्धर्मयोश्चेत्यर्थः। नन्वभेदस्य धान्येन धनीतिवद् विशेषण-विभक्त्यर्थत्वान्न व्यङ्गत्वम् । एवं ताद्रूप्येऽपि । अन्यथा नीलोत्पलमिति कर्मधारयेऽपि अभेदे लक्षणापत्तेरिति चेन्न पाणिन्याद्यनुशासमाभावेन विशेषणविभक्तेरभेदार्थत्वे मानाभावात् । धान्येन धनीत्यत्र 'इत्थं भूतलक्षणे' (अष्टा.) इति तृतीया । यद्वा धान्यपदेन धन कार्यं लक्ष्यते । क्वचिच्च धर्मधर्मिभावे संसर्गमर्यादया तद्धीः । प्रकृते च तदभावाद् व्यङ्ग्य एवाभेद इत्यर्थः ।

शुद्धभेदयोरायुर्घृतमित्यादौ क्षीरादिवैलक्षण्येन कार्यकारित्वम् । आयुरेवेदमित्यत्र घृतं क्षीरवदायुर्न व्यभिचरतीति तत्कार्यकारित्वं प्रयोजनमित्यनुषङ्गः । इदञ्चावान्तरफलमित्यन्ये । सम्बन्धान्तराच्छुद्धाभेदान् प्रपञ्चयति- क्वचिदिति । उपचारो लक्षणा । इन्द्रार्थाः इन्द्रपूजार्थाः स्थूणाः स्तम्भाः । अग्रहस्त इति अग्रश्च तद्धस्तश्चेति कर्मधारयेऽग्रमात्रे हस्तशब्दो गौणः । यदा तु हस्तस्याग्रमिति विग्रहस्तदा पीता कार्यटिकैर्गङ्गा ' इति गङ्गावयवे गङ्गापदं ज्ञेयम् । तात्कर्म्यात् तत्कर्मकारित्वात् । तक्षा वर्द्धकिः । अत्र क्रमेण

गूढं यथा-

मुखं विकसितस्मितं वशित-वक्रिमप्रेक्षित
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनाततौ तरुणिमोद्गमो मोदते ।। ९ ।।

कमलाकरी

वन्द्यत्वमान्यसामर्थ्य[१]नैपुणानि प्रयोजनानि ।

ननु गौणशुद्धचतुष्के[२] प्रकान्ते कथं षड्विधोक्तिरत आह-आद्येति उपादानलक्षणाभ्यामित्यर्थः । केचित्तु लक्षणैव षड्विधा न गौणी । तेन-'तत्सिद्धिजातिसारूपप्यप्रशंसालिङ्गभूमभिः । षड्भिः सर्वत्रशब्दानां गौणावृत्तिः प्रकल्पिता'' इति भट्टोक्तम् । गौण्याः षड्विधत्वमयुक्तं तत्सिद्धिसारूप्ययोः भूमलिङ्गसमवाययोश्च भेदाभावात् व्यतिरेककारणस्य सम्बन्धविशेषत्वात् सङ्करस्य च लक्ष्यतावच्छेदकत्वेन वृत्तिभेदाप्रयोजकत्वादित्याहुः । फलन्तु उपादान-लक्षणाभ्यामर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवा च्ययोर्गौणीभ्याञ्च रूपकातिशयोक्त्योः शुद्धाभ्याञ्च हेत्वलङ्कारस्य च सिद्धिरिति ।

षड्विभेदस्य व्यङ्ग्यधीफलत्वाद् व्यङ्ग्भेदे भेदमाह- सा चेति । न च षड्विधात्वाहानिः । तत्र प्रयोजन-वृत्या विभागात् । प्रयोजनवत्यां कुतो व्यङ्ग्यत्वमत आह- प्रयोजनं हीति । तच्च वक्ष्याम इति भाव । तत्रापि व्यङ्ग्यभेदात् भेदमाह - तच्चेति । वाशब्दश्चार्थे, तेन षड्विधाऽपि गूढागूढभेदात् द्वादशविधेत्यर्थ । चस्त्वर्थे । गूढं सहृदयमात्रवेद्यम् , अगूढं सहृदयतैरपि वेद्यम् । सहृदयत्वं काव्यवासनापरिपक्व-बुद्धित्वम् ।

मुखमिति- स्मिते पुष्पधर्मविकासबाधात् प्रकाशो लक्ष्य, मनोहारित्वं व्यङ्ग्यम् । वशितः स्वीकृतः वक्रिमा येन, कटाक्ष-युक्तमित्यर्थः । मतिरपास्तसंस्था निरस्तमर्यादा ऽनेकविषयत्वात् । जघनमंसबन्धे आलिङ्गनविशेषे सुखरूपे सङ्घटने निपुणं चतुरं विपुलत्वात् । बन्धो दृशो वा । यथा कुचोच्चतयांसे दृशोर्बन्धस्तथा जघनेऽपीति भावः । प्रकृत्यैवेन्दुवदना तथापि यौवनाङ्कुरस्येदृगुज्जृम्भणे

---

१. नैपुण्यानि -ब.।
२. चतुष्दे-ब.।

अगूढ़ं यथा-

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ।। १० ।।

अत्रोपदिशतीति ।

तदेषा कथिता त्रिधा ।। १३ ।।

अव्यङ्ग्या गूढव्यङ्ग्या अगूढ़व्यङ्ग्या च ।

तद्भूर्लाक्षणिकः ।

शब्द इति सम्बद्ध्यते । तद्भूस्तदाश्रयः ।

तत्र व्यापारो व्यञ्जनात्मकः

कमलाकरी

यूनां पतितोऽनर्थः । परिपाके तु किं स्यादिति बतेतिपदेन सूच्यते । एवं वशिते स्वाधीनत्वं लक्ष्यम् । समुच्छलिते बाहुल्यम् । अंसे जघने च दृष्टेर्निर्बन्धाच्च दृश्यत्वम् । अपास्तेऽधीरत्वं, मुकुलिते काठिन्यं, उद्धुरे रम्यत्वं मोदनेऽनर्गलत्वञ्च लक्ष्यम् । तदतिशयः सम्भोगश्च व्यङ्ग्य सहृदयैर्वैद्यत्वाद् गूढः च ।

श्रीपरिचयादिति - मूर्खा अपि धनसम्बन्धाच्चतुरचेष्टितानां ज्ञातारो भवन्ति । यथा यौवनस्य मदो गर्वस्स्त्रीणां ललितान् विभ्रमान् शिक्षयतीत्यर्थः । कामिनीनामिति चतुर्थ्यर्थे वा षष्ठी । 'विभ्रमं ललितं तथा' (अम.१।७।३१) इत्यमरः । उपदेशों वागव्यापारः अचेतने मदे बाधात् प्रकाशं लक्षयति । अनायासदानञ्च व्यङ्ग्यम् । सर्वजनवेद्यत्वा-दगूढम् । लक्षणामुक्त्वा लाक्षमिकमाह- तद्भूरिति । विशेषापेक्षायामाह-शब्द इति । सम्बन्ध्यते 'स्याद्वाचकः' इत्यतोऽध्याह्रियते, न तु अनुषज्यते 'व्यवायान्नानुषज्यतेति' न्यायविरोधात् । लक्षणातः शब्दोत्पत्तेर्भ्वर्थस्य बाधादाह- तदाश्रय इति । व्यञ्जकं वक्तुं व्यञ्जनामाह-तत्रेति । तत्र प्रयोजनावगमे । मानाभावं शङ्कते कुत इति । इति प्राप्ते आहेत्यर्थः । यद्यपि प्राथम्यादभिधामूला व्यञ्जनादौ वक्तुमर्हा तथापि सन्निधानाल्लक्षणामूलोच्यते । तत्रार्थापत्तिमाहः-यस्येति । यस्य पावनत्वादेः सत्यपि बाधे प्रतीतिं कर्तुं लक्षणा लाक्षणिकः शब्दः समुपास्यते । गङ्गातीरे इति वाचकं विहाय प्रयुज्यते । लाक्षणिक शब्दमात्रगम्ये न त्वनुमानादिगम्ये फले पावनत्वादौ व्यञ्जनं विना अन्यक्रियाव्यापारो नेत्यर्थः । अन्यतो

कुत इत्याह-

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।। १४ ।।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः ।

तथा हि-

नाभिधा समयाभावात् -

गङ्गायां गोषः इत्यादौ ये पावनत्वादयो धर्मास्तदादौ प्रतीयन्ते न तत्र गङ्गादि शब्दाः सङ्केतिताः ।

हेत्वभावान्न लक्षणा ।। १५ ।।

मुख्यार्थबाधादित्रयं हेतुः

कमलाकरी

मानान्तरान्न किन्तु तस्मादेव सप्रयोजन लक्षणाशब्दादित्यर्थः । क्रियापदं व्याचष्टे- अन्यो व्यापार इति । परितोषमाहः-नाभिघेति । समयः सङ्केतस्तद्ग्रहश्चाभिधाख्यशक्तिजन्यः अतो न साध्यसमत्वम् । प्रयोगस्तु-पावनत्वादि न गङ्गापदादभिधाप्रतिपाद्यं तद्गतसङ्केताविषयत्वाद् घटवत् ।

त्रयमिति-मुख्यबाधः योगो रूढिप्रयोजनान्यतरच्चैकमिति त्रयमित्यर्थः । हेतुरिति- फलोपहितपरमेकवचनम् । स्वरूपयोग्यता तु प्रत्येकमेव । हेत्वभावमेवाह-तथा चेति । चो ह्यर्थे । तथाहीति तु युक्तः पाठः । लक्ष्यं तीरं न मुख्यं न शक्यम् । शक्यसम्बन्धो हि लक्षणा न तु लक्ष्यसम्बन्धः । एवं मुख्यबाधो लक्षणाहेतुर्न तु लक्ष्यबाधः । अतो न पावनत्वे लक्षणेत्यर्थः । एतेन लक्षितलक्षणा परास्ता, तस्याः पूर्वनिरस्तत्वाच्च । ननु ज्ञाप्यार्थबाध एव तद्बीजमत आह- नाप्यत्रेति । अत्र लक्ष्ये[१] बाधात् नहि तीरेऽपि घोषान्वयस्य बाधः येन लक्षणा स्यात् । ननु परम्परासम्बन्धेऽपि साऽस्तु अत आह न प्रयोजनमेतस्मिन्निति । एतस्मिन् फले प्रयोजनेऽपि प्रयोजनान्तरोऽ-नवस्थापत्तेरित्यर्थः । ननु

---

१. लक्ष्ये बाधो न नहि - अ.।

तथा च-

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ।। १६ ।।

यथा गङ्गाशब्दः स्त्रोतसि सबाध इति तटं लक्षयति, तद्वद् यदि तटेऽपि सबाधः तत्प्रयोजनं लक्षयेत् । न च तटं मुख्योऽर्थः नाप्यत्र बाधः, न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः । नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम् नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ।

कमलाकरी

मुख्यर्थाबाधादित्रयं विनैव निरूढ़लक्षणावत् निष्फललक्षणास्तु । अत आह- न चेति । पावनत्वे हि तीरपूरधीसमानकालिका लक्षणा, क्रमेण वा । नाद्य, युगपद्वृत्तिद्वयविरोधात् । नान्त्यः, शब्दे विरम्य व्यापाराभावादित्यर्थः । लक्ष्यार्थबाधोऽप्यस्तुलक्षणाहेतुरिति शङ्कानिरासार्थं बाधाभावमादौ व्याचष्टे । यथेति । मुख्याभावमाह न चेति । योगाभावमाह- न चेति न चेति । प्रयोजने पावनत्वे स्खलद्गतित्वाभावमाह-न चेति । समर्थ इति । गङ्गानिष्ठपावनत्वादेस्तीरे बाधान्न गङ्गापदं तीरगतपावनत्वादि बोधयितुं समर्थम् । यद्वा फलस्यान्वयप्रतियोगित्वाभावाद् गङ्गापदं न तत्र समर्थम् । अन्वयानुपपत्तिमूलायां तदावश्यकत्वादित्यर्थः । असमर्थ इति पाठे ननु शक्तिलक्षणयोरभावान्न गङ्गापदं पावनत्वादिबोधकमंत आह-न चेति । गतिर्बोधकत्वं गङ्गापदात्तत्प्रतीतिर्वृत्तिं विना च तदयोगा सिद्धा व्यञ्जनेत्यर्थः । असमर्थ इति पाठे मुख्यार्थबाधाद्यपेक्ष्येति शेषः । समर्थ इति पाठे तु मुख्यार्थबाधादिकं विनेतिशेषः । नन्वस्तु तीरे पावनत्वस्य घोषे पावनत्वं प्रयोजनान्तरमत आह - एवमिति । बीजाङ्कुरवदनवस्था न दोषः इत्याशङ्क्य मूलेत्युक्तम् । तद् व्याचष्टे-प्रकृतेति । पावनत्वं प्रयोजनान्तरसञ्चाराद्यत्राग्रिमलक्षणा- भावस्तत्रोपपाद्यपूर्वप्रयोजना-भावान्न मूललक्षणा स्यात् । उपपादकप्रयोजनपरम्पराज्ञानं विना प्रतीति-विश्रान्तिश्च न क्वापि स्यादित्यर्थः ।

पावनत्वविशिष्टे तीरे लक्षणामाशङ्क्य निराचष्टे- नन्विति । अन्वयप्रतियोगिनि तीरे एव मुख्यार्थबाधाद्यपेक्षा न तु तदवच्छेदके प्रयोजने तीरत्ववदिति शङ्कार्थः । अधिकस्य पावनत्वविशिष्टस्येत्यर्थः ।

एवमप्यनवस्था स्याद् या मूलक्षयकारिणी ।

एवं प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत् ।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते । 'गङ्गायास्तट घोष इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा । तत् किं व्यञ्जनयेत्याह

कमलाकरी

लक्षणीयं लक्षणाजन्यधीविषयः तत्सहितं न युज्यते । हेतुमाह-ज्ञानस्येति । यथा कारणत्वेन विषयो ज्ञानाद्भिन्नस्तथा कार्यत्वात् फलमपि । सिद्धो हि विषयः असिद्धं जन्यञ्च फलमिति कथमैक्यमित्यर्थः । ननु पावनत्वादिधीर्न लक्ष्यप्रतीतेः फलं विशिष्टगोचरत्वात् तस्याः किन्तु शक्यसम्बन्धरूपलक्षणाया इति चेदत्राहुः- अन्वयानुप[१]पत्तौ हि लक्षणान्वयप्रतियोगिनमेव लक्ष्यमादत्ते । न च पावनत्वं तथा । अथानुद्देश्यमपि लक्ष्यधीः फलं विषयीकुर्यात् यथा तापशामकं चन्दनं शैत्यं जनयतीति चेन्न चन्दनस्य सन्निधिमात्रेण शैत्यजनकत्वात्लक्षणा त्वनुपपत्य शामकं[२] कथं विषयीकुर्यात् । न च तात्पर्यानुपपत्या[३] लक्षणा तदनुपस्थितावपि तत्सत्वात् । किञ्च न लक्षणात् पूर्वं तीरे पावनत्वं ज्ञातं सिद्धं वाऽस्ति । येन विशिष्टे सम्बन्धस्मृतेर्विशिष्टे लक्षणा स्यात् । लाक्षणिकधीजन्यत्वेन प्रागसिद्धत्वात । एवं तत्सम्बन्धोऽप्यसिद्धः । शुक्तौ रजतत्वसम्बन्धस्येव तत्सम्बन्धस्य प्रती[४]तिकत्वात् । किञ्च न गङ्गापदशक्यस्य तीरपावनत्वाभ्यामेकः सम्बन्धः । अथः कथमेका विशिष्टे लक्षणा । न च तीरत्वविशिष्टलक्षणातो भिन्नया पावनत्वविशिष्टलक्षणा तद्धीरिति वाच्यम् । यौगपद्ये वृत्तिद्वयविरोधात् । क्रमेण च विरम्य व्यापाराभावादित्युक्तत्वात् लक्षितलक्षणायाश्च निरस्तत्वात् । अस्तु वा सा तथापि बाधितबोधकत्वादिवैधर्म्याद् वृत्यन्तरं व्यञ्जनेति सिद्धम् । केचित्तु मूले ज्ञानपदे करणव्युत्पत्या वाक्यसम्बन्ध उच्यते । तस्य विषय

१. नुपपत्या हि-अ.।
२. शासकं-अ.।
३. पत्या तद्धीः तदनुपस्थि-अ.।
४. प्रातीतिकत्वात् । ख.

प्रयोजनेन सहितं लक्षणीयं न युज्यते ।। १७ ।।

कुत इत्याह-

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिविषयः फलन्तु प्रकटता संवित्तिर्वा ।

विशिष्टे लक्षणा नैवम् ।

व्याख्यातम् ।

कमलाकरी

आश्रयस्तीरं न तु पावनत्वादि । तस्य [१]सम्बन्धाभावेन बोधाभावादिति न तत्फलत्वमित्याहुः । तदज्ञानकृतम् । पावनत्वबोधाभावे व्यञ्जनोच्छेदात् प्रतीतिविरोधात् (च) नीलादिक-विषयफलभेदव्याख्याविरोधाच्च । प्रकटता भाट्टनये ज्ञातता, न्यायनये संवित्तिर्हानादिबुद्धिरनुव्यवसायो वा । वेदान्तिमते आचरणभङ्गार्था वृत्तिरिति पक्षे प्रकटता । सम्बन्धार्थेतिपक्षे वृत्तिविषयावच्छिन्नचैतन्यं फलं संवित्तिरित्यर्थ ।

उपसंहरति - विशिष्टे इति । एवमुक्तरीत्या न तु लक्ष्यधीकाले व्यङ्ग्यस्य धीरुत्तरकाले वा । नाद्यः पदार्थ [२]ज्ञाने व्यञ्जनायोगात् । नान्त्यः शब्दे विरम्य व्यापाराभावादत आह-विशेषाः इति । लक्षणोत्तरमप्या-काङ्क्षानुस्यूतेर्वृत्यन्तरे च विरामदोषाभावादित्यर्थः। यद्वा कथं तर्हि तीरनिष्टतया तद्धीरत आह- विशेषा इति । लक्षिते तीरादौ विशेषाः पावनन्वादयो व्यञ्जनाख्येन व्यापारान्तरेण गम्याः स्युरिति वृत्तिस्थेनान्वयः । वृत्तिप्रतिपाद्यस्यैव शाब्दत्वमिति नियमश्च संसर्गेण पदार्थबोधे न तु तन्निष्ठतीरत्वपावनत्वादावित्यर्थः । ते चेति-शब्दस्यान्वयव्यतिरेकाभ्यां व्यङ्ग्यबोधे कारणत्वम्। न च व्यापारं विना तत्सम्भवति। न चाग्रिमा[३] वा लक्षणा युक्तेत्युक्तम्। नापि तात्पर्याख्या वृत्तिः तस्याः संसर्गमात्रगोचरत्वात् इत्यर्थः ।

.कोऽसौ व्यापारोऽत आह -तच्चेति । अत्रेदं तत्वम् । न व्यङ्ग्ये शक्तिः सङ्केताभावात्। न हि प्रतीतिमात्रे सा लक्षणोच्छदापत्तेः । नापि लक्षणयाऽनुमानाद् वा तद्धीः, बाधिताबोधकत्वेन तद्वैधर्म्यात् ।

---

१. तस्य सम्बन्धाभावेन बोधाभावा -अ.।

२. पदार्थाज्ञाने -अ.।

३. न वाऽग्रिमा - अ० ।

विशेषाः स्युस्तु लक्षिते ।। १८ ।।

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जन-ध्वननद्योत-नादिशब्दवाच्यमवश्यमेषितव्यम् ।

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् ।

अभिधामूलं त्वाह-

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।। १९ ।।

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।।

कमलाकरी

मुख्यार्थबाधाद्यभावे व्याप्त्याद्यप्रतिसन्धाने पक्षतोपरागं विना च प्रतीतेः । 'गतोऽस्तमर्कः, इत्यादौ नियतसम्बन्धतदभावेष्वपि वक्तृवैशिष्ट्यादिवशात् तत्प्रतीतेश्च । किञ्च न व्यङ्ग्ये लक्षणा वाक्यवृत्तिः पदवृत्तिर्वा पदतदेकदेशवृत्तित्वात् । नापि शब्दवृत्तिरर्थस्यापि व्यञ्जकत्वात् । विस्तरेण चैतत् पञ्चमोल्लासे वक्ष्यते । किञ्च यथानुमिनोमीति प्रतीतिबलात् प्रत्यक्षादनुमानं भिन्नं तथाऽनेनेदं व्यञ्जितं न तूक्तमिति प्रतीतेर्व्यञ्जना भिन्ना । अन्ये तु-तद्धीजनकत्वमेकैव व्यञ्जना सर्वत्र शब्दवृत्तिः । शक्तिशरीरघटकतया तस्यावश्यकत्वात् कथं तर्हि अभिधादि[१]व्यवहारः । अनुशासना-दिवशान्नियतरूपायास्तस्याः एवाभिधात्वं मुख्यार्थबाधादिवशाच्च लक्षणात्वम् । ननु धीजनकत्वं फलोपधानं स्वरूपयोग्यता वा । नाद्यः, तस्य पूर्वमज्ञानात्, फलोत्तरं तद्वैयर्थ्याच्च । नान्त्यः योग्यतावच्छेदकं विना तदज्ञानाच्छक्त्यादेरवश्याङ्गीकारात् जनकत्वस्य पदार्थान्तर-त्वाच्चेत्याहुः । किञ्च-व्यञ्जनयाऽ नुमानमेवान्यथासिद्धमिति वैपरीत्यं किन्न स्यादिति दिक् । अनेकेति - संयोगाद्यैरन्यार्थवाचकत्वे नियन्त्रिते प्रतिबद्धे इत्यन्वयः । अवाच्येति । एकार्थधीकाले तात्पर्याग्रहाद-भिधयानुपस्थाप्यत्वादवाच्य इवेत्यर्थः । तद्बोधकृद् व्यापृतिर्व्यापारोऽञ्जनं व्यञ्जनेत्यर्थः । अयं भावः -नानार्थपदस्यनेकार्थेष्वनेकाः शक्तयः शक्त्यभेदे तद्भेदात् । तेन यत्रार्थे तात्पर्यग्राहकं प्रकरणाद्यस्ति तत्रोद्बुद्धया

---

१. व्यापारः-अ.।

सामर्थ्यमौचितिः देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेनवः ।।"
इत्युक्तदिशा
सशङ्खचक्रो हरिः अशङ्खचक्रो हरिः इति अच्युते ।
रामलक्ष्मणाविति दाशरथौ ।
रामार्जुनगतिस्तयोः इति भार्गवकार्तवीर्ययोः ।
स्थाणुं भज भवच्छिदें इति हरे ।
सर्वं जानाति देवं इति युष्मदर्थे ।

कमलाकरी

शक्त्या तद्धीः, अन्यस्याश्च निरोधः [१] निरुद्धया तया बोधयितुमशक्यार्थस्य बोधे प्रभवन्ती वृत्तिर्व्यञ्जना, अन्यथा सुरभिमांसभोजनप्रक्रमे 'सुरभिमांसं भवान् भुङ्क्ते, इत्युक्तौ विदग्धस्य सुरभेर्गोमांसज्ञानाज्जुगुप्सा न स्यात्। न च तत्राभिधाया एव प्रसरणं, प्रकरणादिना तत्प्रतिबन्धात् । यत्र न प्रकरणादिस्तत्राभिधानियन्त्रणाभावादुद्बुद्धस्वस्व- संस्कारेणोभयधीः । यथा ''येन ध्वस्तमनोभवेनेत्यादौ'' । ननु ''भद्रात्मन'' इत्यादौ कथं व्यञ्जना, पदनानार्थत्वज्ञाने तात्पर्यग्राहके सति अभिधानियन्त्रणाभावात् । मैवम्-पदे नानार्थत्वज्ञानस्यार्थज्ञानाधीनत्वेनान्योन्याश्रयत्वापत्तेः । तेनैकार्थबोधे तद् द्वारा तेभ्य एव पदेभ्यो द्वितीयार्थधीस्तेनार्थस्य व्यञ्जकत्वेऽपि शब्दस्य सहकारित्वाद् व्यञ्जनायाः शाब्दत्वम् , यथा वक्ष्यति 'अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः' इति । अन्वयबोधे संस्कारोपनीतभानमित्यन्ये। काव्यप्रदीपस्तु- अर्थभेदेन शब्दभेद इतिमतेऽन्यार्थकशब्दाच्छब्दान्तरं सदृशं तदभेदभ्रमाच्चैकधीः । अतएवोक्तम्। अवाच्येति इत्याह। तन्न अभिधानियन्त्रणाभावात् संयोगे इत्यादि-विप्रयोगः संयोगध्वंसो विभागो च । विरोधः सहानवस्थानम् वध्यघातकत्वञ्च । अर्थः प्रयोजनम् । प्रकरणं बुद्धिस्थलम् । लिङ्गमसाधारणो धर्मः। शब्दस्य सन्निधिः सामानाधिकरण्यम्। सामर्थ्यं कारणत्वम् । औचिती योग्यता । व्यक्तिः स्त्रीनपुंसकादिः । स्वर उदात्तादिः । आदिपदादभिनयः । स्पष्टमन्यत् । एते शब्दार्थस्यानवच्छेदेऽनिश्चये बाहुल्ये वा सन्देहे सति

१. निरुद्धतया बोधयितुं -अ.।

कुपितो मकरध्वजं इति कामे ।

देवस्य पुरारातें इति शम्भौ।

मधुना मत्तः कोकिलं इति वसन्ते ।

पातु वो दयितामुखम् इति साम्मुख्ये ।

'भात्यत्र परमेश्वरं इति राजधानीरूपदेशाद् राजनि ।

चित्रभानुर्विभातिं इति दिने रवौ रात्रौ वह्नौ ।

मित्रं' भातिं इति सुहृदि । मित्रो भातिं इति रवौ ।

इन्द्रशत्रुरित्यादौ वेद एव न काव्ये स्वरो विशेषप्रतीतिकृत । आदिग्रहणात्-एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं ।

कमलाकरी

विशेष[1] विवक्षितार्थाः[2] तज्ज्ञानहेतवः इत्यर्थः । ननु पदार्थज्ञानं विना कथं संयोगधीः संस्कारादिना तद्बोधे पदार्थस्यापि बोधात्, कथं च सन्देहः इत्युच्यते । यावत्स्वार्थेषु शब्दानां प्राक् सम्बन्धोवचधारितस्तावत् स्वान्यविरोधेन स्मृतः सः कुरुते मतिमित्युक्तेर्युगपत् अनेकेष्वर्थेषूपस्थितेषु तात्पर्यसन्देहेऽर्थप्रकरणादिसहकारेण पुनः पुनरनुसंहितात् तस्मादेव पदाद्विशेषार्थधीरित्युत्युक्तदिशा भर्तृहरिप्रोक्तमार्गेणाच्युते विष्णौ हरिपदं नियम्यते इति शेषः । एवमग्रेऽपि सप्तम्यो योज्याः । यद्वाऽच्युते दाशरथावित्यादिसप्तम्यो विशेषप्रतिपत्तिकृदित्यनने योज्याः । विशेषप्रती[3] त्याभिधानियन्त्रण इन्द्राद्यर्थधीर्व्यञ्जनयेति तात्पर्यार्थः। संयोगस्योदाहरणमाह- सशङ्खेति । अत्र हरौ शङ्खचक्रेऽतिव्यत्यासो ज्ञेयः, अन्यथाऽन्यशब्दसामानाधिकरण्येन पौनरुक्त्यं स्यादिति देवनाथ-काव्यप्रदीपौ । विप्रयोगस्याह - अशङ्खेति । संयोगपूर्वकत्वात् तद् ध्वंसस्य विभागस्य् च । तेन विष्णुधीरित्यर्थः । उच्यत इति पाठस्तु अज्ञानकृतोऽसम्बद्धश्च । साहचर्यस्याह- रामेति-लक्ष्मणसाहचर्याद् रामो न भार्गवादिःरामसाहचर्याच्च लक्ष्मणो न सारसः किन्तूभयमपि दाशरथौ वर्तत इत्यर्थः । विरोधस्याह-रामार्जुनेति । अर्जुनविरोधाद् रामो भार्गव तद्वध्यत्वाच्चार्जुनः कार्तवीर्यः । तद्वत् तयोर्योध्द्रोः गतिः प्रकारः ।

---

१. विशेषः विविक्षितार्थः-अ.।
२. तद्ज्ञान- व.।
३. प्रतीत्यभिधा- अ.।

एद्दहमेत्तावत्था एद्दहमैत्तेहिं दिअएहिं ।। ११।।

इत्यादावभिनयादयः ।

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः । न च लक्षणा मुख्यार्थबाधाद्यभावात् । अपि त्वञ्जनं व्यञ्जनमेव व्यापारः ।

कमलाकरी

सहानवस्थाने तु छायातपावित्युदाहार्यम् । अर्थस्याह-स्थाणुमिति । च्छिदे च्छेदाय क्विप् । भवच्छेदस्य फलस्य वृक्षाद्यसाध्यत्वात् स्थाणुपदं शिवपरम् । प्रकरणस्याह- सर्वमिति । राजामररूपनानार्थस्य देवपदस्य राजानं सम्बोध्य कथाप्रवृत्तौ प्रकृतराजपरत्वम् । स एव युष्मदर्थः बुद्धिस्थस्वात् । लिङ्गस्याह-कुपित इति । मकरः ध्वजः चिह्नं केतुर्वा यस्येति समुद्रे राज्ञि वा विरहिकोपस्य बाधात् कामपरं मकरध्वजपदमिति परमानन्दादयः तन्न मकरध्वजपदस्य समुद्रादौ क्वाप्यप्रयोगात् । वस्तुतस्तु कुपितपदात् सर्वकोपवत्तां प्राप्तौ मकरध्वजेन चिह्नेन कुपितपदं कामपरम् । मधुमत्यामप्येवम् । अन्यसन्निधेराह- देवस्येति । अन्यस्य देवपदार्थस्य त्रिपुरभेदाभावाद् देवपदं शम्भुपरम् । यद्यपि भवच्छिदे इत्यत्रान्यशब्दसन्निधिस्तुल्यस्तथापि सामानाधिकरण्याभावादगता- र्थता । सशङ्खचक्र इत्यादौ ऽपि व्यत्यासो ज्ञेय इत्युक्तम् । केचित्तु-पुरारातिपदं न नृपे किन्तु शम्भौ नियम्यत इत्याहुः । सामर्थ्यस्याह-मधुनेति । कोकिलामदहेतुत्वस्यान्यत्राभावात् । मधुर्वसन्त एव न सुरादिः । औचित्यमाह- पात्विति । मुखपदं साम्मुख्यपरं न वदनपरं कामत्राणायोगात् । यद्यपि चुम्बनाद् वदनमपि कामत्रायकं तथापि साम्मुख्यमेव योग्यमन्यथा वैरस्यात् । न च सामर्थ्येन गतत्वम् । तत्र फलोपधानस्यात्र स्वरूपयोग्यतया विवक्षणात् । देशस्याह- भातीति । अत्र राजधानीदेशे परमेश्वरो राजा न विष्णुस्तस्य सर्वगतत्वादत्रेति वैयर्थ्यात् । कालस्याह-चित्रेति । चित्रा भानवः किरणा यस्येत्यविशेषेऽपि दिने रविः रात्रौ वह्निस्तयोस्तत्रैव दीप्त्याधिक्यात् । व्यक्तिः पुंस्त्वादिस्तस्याह- मित्रमिति । 'मित्रं सुहृदि मित्रोऽर्क' इत्याद्यनुशासनात् तत्परत्वं भातीति पदाच्च निर्णयः अन्यथा द्विती

१. इत्यर्थःअ .।

यथा-

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्यानुपप्लवगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ।। १२ ।।

कमलाकरी

यैकवचने पुंस्त्वेऽपि तत्सत्वात् । स्वरस्याह-इन्द्रेति । इन्द्रशत्रुपदे अन्तोदात्ते इन्द्रस्य शत्रुः शातयिता मारयितेति षष्ठीतत्पुरुषार्थः । 'षष्ठी समासान्तस्य' (अ.) इति सूत्रात् आद्युदात्ते तु इन्द्रः शत्रुः शातयिता यस्येति बहुब्रीह्यर्थः । बहुव्रीहौ प्रकृत्या पूर्वपदम् इत्युक्तेः । न काव्य इति-एवं ह्यर्थविशेषावगमे श्लेषभङ्गापत्तेरित्यर्थः । यथा श्लेषे वक्ष्यति -"काव्यमार्गे स्वरो न गण्यत" इति । ननु काव्येऽपि स्वरोऽर्थधीहेतुरस्त्येव । तथाहि ध्वनेः पाठविशेषात् स्वरे विशेषधीः । यथोक्तं " वीरबीभत्सरौद्रेषुं स्वरितोदात्तं कुर्याद्" इति । काकोश्च -'मथ्नामीत्यादिषु व्यञ्जकत्वं वक्ष्यति ।....काकुस्वराच्च रोदनादिधीः'दृष्टे प्रसीदाधुनेति' ति दृष्टे प्लुते मयीति व्यावृतेः । कान्ता दृष्टिर्वाऽर्थः । अतः कथं न काव्ये इत्युक्तम् । अत्र लाटभास्करः - स्वरशब्दे नोदात्तादिरेव विवक्षित इत्याह । अर्वाञ्चस्तु- यथा वेदे बाहुल्येन स्वरादर्थधीर्न तथा काव्ये किन्तु क्वचिदित्याहुः । मधुमतीकारस्तु- अभिधानियामकः स्वरो वेदे एवं अनुशासनात् न काव्ये, तत्र तु काकक्वादिसहकृतादर्थाद् व्यञ्जनयाऽर्थधीर्नाभिधयेत्याहुः ।

मूले आदिपदाद् ग्राह्यमभिनयमाह- एद्दहेति- "एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् । एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः " इति संस्कृतम् । उपलक्षितेति शेषः । परिणामे दहप्रत्ययः । हस्तचेष्टादिना बदरघटाद्याकारेणाल्पस्तनी स्थूलस्तनीति प्रदर्शनमभिनयः । चेष्टया एतावन्मात्रशब्दाः परिमाणविशेषपराः । तेन स्तनादीनां स्थूलता कोशाद्याकारताधीः । सर्वनाम्नाञ्च बुद्धिस्थे शक्तिर्नानार्थता । आदिपदाद्- " इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।' (कु.सं. २।५५) इत्यत्र वक्षोनिहितहस्तादात्मनिर्देशाद् आत्मापदेशोऽभिप्रेतः । एवमञ्जलिना सूर्यमुपतिष्ठते, सक्तूञ्जुहोति इत्यादावूर्द्धाग्रव्याकोशादि । मूलं योजयन्नाह-इत्थमिति । निवारित इति प्रकृतार्थबोधाद-प्रकृतार्थप्रतिबन्धेऽपीत्यर्थः। न लक्षणेति-अन्यार्थे तात्पर्याग्रहात् तात्पर्यविषयीभूतार्थानुपपत्त्यभावान्नानार्थेऽपि लक्षणापत्या तदुच्छेदापत्तेश्चेत्यर्थः ।

तद्युक्तो व्यञ्जकः शब्दः

तद्युक्तो व्यञ्जनयुक्तः ।

यत् सोऽर्थान्तरयुक् तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥२०॥

तथेति व्यञ्जकः ।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयोनाम

द्वितीयोल्लासः ॥

कमलाकरी

भद्रात्मन इति । भद्रः शोभनः गजजातिविशेषवांश्च । 'भद्रो मन्द्रो मृगश्चैव' इत्युक्त्वा 'एतेऽष्टौ गजयोनयः' इत्युक्तेः। आत्मा स्वरूपं यस्य । दुरधिरोहाऽ नाक्रमणीया आरोढुमशक्या च तनुर्यस्य । विशालां वंशस्य कुलस्योत्पत्तिर्महत्वं यस्य । पक्षे- विशालवंशवदुन्नतिरुच्चता यस्याः । कृतः शिलीमुखानां बाणानां सङ्ग्रहो येन । पक्षे शिलीमुखाः भ्रमराः 'अलि-बाणौ शिक्तीमुखौ (अ.को.३।३।१८) इत्यमरः। अनुपप्लुतानभिभाव्यनुत्थिता च गतिर्ज्ञानं गमनञ्च यस्य। परेषां शत्रूणां वारणस्य निवारकस्य गजश्रेष्ठस्य च । करो हस्तः शुण्डा च । दानं वितरणं मदश्च तदम्बुसेकेन सततं सुभगोऽभूदित्यर्थः ॥

अत्र प्रकरणाद् राज्ञि तदन्वये चाभिधानियन्त्रणान्न तया गजधीः, तद्बोधकप्रकरणाद्यभावात् किन्तु व्यञ्जनया । नन्वर्थशेषेऽर्थद्वये शक्तिरत्र व्यञ्जनेति कुतो वैषम्यम्। अत्राहुः-नानार्थेषु यत्र द्वयोस्तात्पर्यं तत्र श्लेषः, यत्रैकत्रैव तत्र च्यञ्जनेति । यत्र क्रमेण तत्रावृत्तिरिति केचित् । शब्दस्य विरम्य व्यापाराभावात् तत्रापि व्यञ्जनेति युक्तम् । तत्वन्तु संयोगाद्यैरभिधानियन्त्रणाभावे श्लेषस्तत्सत्वे व्यञ्जनेति ।

व्यञ्जनमुक्त्वा व्यञ्जकमाह- तद्यक्ते इति । ननूक्तस्थलेऽर्थस्याव्यञ्जकत्वे कथं शब्दार्थरूपध्वनित्वं काव्यञ्च तस्य व्यञ्जकत्वे कथं शब्दे तद् अर्थेनोपक्षयादत आह-यत् सोऽर्थान्तरं इति । एकार्थप्रत्ययेनार्थान्तर-बोधकत्वाद् यच्छब्दाद् व्यतिरेकानुविधानाच्चोभयं युक्तमिति भावः ॥

इति श्री जगद्गुरुमहामहोपाध्यायश्रीमन्नारायणभट्टसूरिसूनु श्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृतायां काव्यप्रकाशकमलाकरी व्याख्यायां द्वितीयोल्लासः समाप्तिमगात् ॥

अथ तृतीयोल्लासः

अर्थाः प्रोक्ताः पुरा तेषाम्

अर्थाः वाच्यलक्ष्यव्यङ्ग्याः ।

तेषां वाचकलाक्षणिकव्यञ्जकानाम् ।

अर्थव्यञ्जकतोच्यते ।

कीदृशीत्याह-

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।। २१ ।।

प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।

योऽर्थस्यान्यार्थधीहेतु र्व्यापारो व्यक्तिरेव सा ।। २२ ।।

बोद्धव्यः प्रतिपाद्यः काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणम् । अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः ।

कमलाकरी

शब्दस्य व्यञ्जकत्वमुक्त्वाऽर्थस्य तदुक्तं पूर्वोक्तं स्मारयति-अर्था इति । पुरा वाच्यादयस्तदर्थाः स्युरित्यत्र, तेषामित्यर्थपरत्वे व्यञ्जकत्वेत्यतिसम्बद्धं तत्राह- वाचकेति । नन्वर्थस्यापि सा उक्ता 'सर्वेषां प्रायशोऽ र्थानां व्यञ्जकत्वमित्यत्रेति पृच्छति -कीदृशीति । यद्वा व्यङ्ग्यस्य व्यञ्जकत्वेऽनवस्थेत्यर्थः इति प्राप्ते आहेत्यर्थः । सहकारिविशेषादपौनरुक्त्यमाह- वक्तेति । वाच्येन पौनरुक्त्यादाह-प्रतिपाद्येति । बोधनीयः पुरुषः इत्यर्थः । अन्तर्भूतो ण्यर्थः । ध्वनेर्विकारः शोकादिजन्य इत्यर्थः । वाक्यवाच्यसहितोऽन्यसन्निधिरित्यर्थः । तेनेतरेतरद्वन्द्वे बहुवचनं समाहारे च नपुंसकं स्यादिति निरस्तम् । तत्वं तु पुँवद्भावे विकल्पात् सन्निधेरित्यपि साधु । अन्यो वक्तृबोद्धव्यभिन्नो लोकः । प्रस्तावः प्रकरणम् । देशो विंजनादिः । कालो वसन्तादि । वैशिष्ट्ययात् सम्बन्धात् वैलक्षण्याद्वेति अस्य वक्तृबोद्धव्याद्यैः इति प्रत्येकमन्वयः । प्रतिभा वासनाविशेषः । तेन श्रोत्रियजडादीनां व्युदासः । प्रतिभावतां याऽन्यार्थस्य धीस्तद्धेतुर्व्यक्तिर्व्यञ्जनैव व्यापारो नान्य इत्यर्थः । अर्थस्य न शब्दस्य । अतीति । अतिपृथुलं जलकुम्भं

क्रमेणोदाहरणानि -

अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरिअम् ।
समसेअसलिलाणीसासणीसहा वीसमामि खणम् ।। १३ ।।

अत्र चौर्यरतगोपनं व्यज्ञते ।

ओणिद्दं दोव्वल्लं चिंता अलसत्तणं सणीससिअम् ।
मह मंदभाइणीए केरं सहि तुहवि अहह परिहवइ ।। १४ ।।

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरु खेदं खिन्ने मयि भजति नाद्यपि कुरुषु ।। १५ ।।

कमलाकरी

गृहीत्वा समागतास्मि सखि त्वरितम् । श्रमस्वेदसलिलनिःश्वासनिस्सहा विश्राम्यामि क्षणम् । इति संस्कृतम् । 'विउल' मितिपाठे विपुलां श्रमजन्याभ्यां व्यायामखेदश्वासाभ्यां निस्सहा असमर्था । सुरतोपभोगं तर्कयन्तीं सखीं प्रति इयमुक्तिः । रतगोपनं जलाहरण श्रमोक्त्या, तत्र[१] ।

पुँश्चलीरूपवक्तृवैशिष्टयात् कुलवधूक्तावेवमप्रतीतेः । तच्च सङ्केत व्याप्त्याद्याद्यभावाद व्यङ्ग्यमेवेत्यर्थः । बोद्धव्यवशादाह-ओणिद्दमिति । औन्निद्रयं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् । मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति ।। इति छाया । निजकान्तोपभुक्तां दूतीं प्रति सक्रोध-नायिकोक्तिरियम् । उन्निद्रत्वादिकं कर्तृ, मदर्थ त्वां क्लिश्नातीत्यर्थः । तुहेति कर्मणि षष्ठीति परमानन्दः । त्वामित्यर्थे तुहेतिनिपातः इत्यन्ये । सखीति सम्बोध्यायाः दुश्शीलात्वात् शत्रुत्वम् तेन कान्तोपभोगो व्यङ्ग्य इत्यर्थः ।

काकुवैशिष्ट्यादाह - तथाभूतामिति । वेण्यां सहदेवं प्रति भीमोक्तिः । गुरुर्युधिष्ठिरः, तथाभूतां रजस्वलामाकृष्टकेशाञ्च दृष्ट्वाऽपि वने उषितमस्माभिरिति शेषः । नृपसदो न तु ग्राम्ययूथम् । पाञ्चालस्य राज्ञः तनयां न तु नीचकन्याम् वने न तु गृहे, व्याधैः न तु राजभिः,

१. तंत्रेत्यारभ्याप्रतीतेरित्यन्तो भागः कपुस्तके नास्ति ।

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्, प्रश्नमात्रेणापि काकोर्विश्रान्तेः।

तइआ मह गंडत्थलरणिमिअं दिहिं ण णेसि अण्णत्तो।
एण्हि सच्चेअ अहं ते अ कवाला ण सा दिट्ठी।। १६।।

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाऽभूत् चलितायां तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते।

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।

कमलाकरी

सुचिरं न तु क्षणमुषितं नोपविष्टम्, वल्कलं न तु दूकूलम्, अनुचितोऽयोग्यः आरम्भः सूदादि[1] विषमवेषः कर्म वा तेन निभृतं गुप्तं यथा तथा विराटस्य राज्ञः सुहृदो नान्यस्यावासे गृहे न परोक्षं स्थितम्। इत्थं खिन्ने म्लाने मयि खेदं खिद्यतेऽनेनेति खेदं मात्सर्यं भजतीत्यर्थमाह परमानन्दः तन्न क्लिष्टत्वापत्तेः। वस्तुतस्तु-तथाभूतां द्रौपदीं दृष्ट्वापि वने वल्कलधरैः व्याधैः सहोषितं मां दृष्ट्वा तथा विराटगृहे स्थितं खिन्नञ्च मां दृष्ट्वा मय्येव खेदं भजसीत्यर्थं वयं प्रतीमः। यद्वा उषितं निवसनं स्थितञ्च मां दृष्ट्वा इत्यन्वयः काक्वापीत्यत्रेत्यर्थः। ननु कुरुषु क्रोधं न करोतीति यत्तदनुचितमिति व्यङ्ग्यमादायैव वाक्यार्थपर्यवसानाद् गुरुमते वाक्यार्थस्य वाच्यसिद्ध्यङ्गमत्र काकुः। न चेष्टापत्ति, व्यङ्ग्यं विना वाक्यार्थसिद्धौ तस्य व्यञ्जकत्वेऽन्योन्याश्रयात्, व्यङ्ग्यसिद्धौ वाक्यार्थसिद्धिस्तत्सिद्धौ च व्यङ्ग्स्येति काकोश्च व्यङ्ग्यस्य गुणीभूतत्वात् मध्यमकाव्यत्वं न तु प्रधानध्वनिरयम्। यद्यपि तत्वेऽपि व्यञ्जकत्वमस्त्येव तथापि काकोरेव तत् स्यान्न तद्विशिष्टार्थस्य अतः कथं काकुविशिष्टार्थस्य व्यञ्जकत्वमत आह-न चेति। उत्तरमाह-प्रश्नेति। काकोः प्रश्नमात्रेण काकुव्यङ्ग्येन प्रश्नमात्रेण। अपिरेवार्थे। तेनैव विश्रान्तेर्वाक्यर्थयेति शेषः - अयं भावः। नञि काकुना प्रश्नो व्यङ्ग्यः स च गुरुर्यदेवं करोति तत्कथमित्येवं रूपः।

---

१. सूदादिविषकर्म- अ.।

किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाताः
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ।। १७ ।।

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

णोल्लेइ अणोल्लमणा अत्ता मं घरभरंमि सअलम्मि ।
खणमेत्तं जइ संझाइ होइ ण वा होइ वीसामो ।। १८ ।।

अत्र सन्ध्यासङ्केतकाल इति तटस्थं प्रति कयाचिद् द्योत्यते ।

कमलाकरी

प्रश्नसाचिव्याच्च वाक्यार्ते पर्यवसिते, तेनानौचित्यं व्यङ्ग्यमतो नान्योन्याश्रयः व्यङ्ग्यञ्च ध्वनिरेव अनौचित्यस्य भीमक्रोधप्रकर्षहेतुत्वात् । अतः सिद्धा काकोर्वैशिष्ट्यादर्थे व्यञ्जनेत्यर्थः ।

वाक्यवैशिष्ट्यादाह – तइण्णेएएति । तदा मम गण्डस्थलनिमग्नां दृष्टि नानैषीरन्यत्र । इदानां सैवाहं तौ च कपोलौ न सा दृष्टिः ।। इति छाया । णिमिअमिति पाठे निमग्नामित्यर्थः । अत्रेति- तदेदानीं पदाभ्या 'तस्मिन् सीदे'तिवत् एकवाक्यतया एवंविधार्थलाभः । अन्या विषण्णेत्यर्थः । अहो इति इयत्कालं न ज्ञातमित्याश्चर्यम् ।

वाच्यवशादाह – उद्देशोऽयमिति । नर्मदा नदी सुखदा च । सरसेत्युद्दीपनम् । कुञ्जानामुत्कर्षो निविडत्वसौगन्ध्यादिस्तेनाङ्कुरिताः प्रादुर्भूता रमणीनां विभ्रमा यत्र । सुरते श्रमापनयनेन सुहृदुपकारकाः । कलितोऽङ्गीकृतोऽकाण्डेऽप्रस्तावे रोषो येनेत्यादिवाच्यवशाद् रतार्थं प्रविशेति व्यङ्ग्यमित्यर्थः ।।

अन्यसन्निधेराह – णोल्लईत्यादि । नुदत्यन्नार्द्रमनाः श्वश्रूर्मां गृहभरे सकले । क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ।। इतिच्छाया । नुदति प्रेरयति । अत्रेति । सखीं प्रत्युक्ते वाक्ये प्रच्छन्नपुरुषं[१] प्रति सन्ध्यासङ्केत इति व्यज्यते । तट्टस्थेऽन्यपुरुषस्तत्सन्निधेरेवं व्यङ्गमित्यर्थः ।।

प्रकरणादाह- सुव्वईति । श्रूयते समागमिष्यति तव वल्लभोऽत्र प्रहरमात्रेण । एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् । इति छाया । एवमेव निरुद्योगम् । करणीयं कार्यम् सज्जस्व योजय । सज्जयेति पाठः स्पष्टः । अत्रेति – उपपतिर्जारस्तस्य प्रकरणादुपस्थितौ तन्निषेधो

१. पुरुषमिति –अ.।

सुव्वउ समागमिस्सदि तुज्झ पिओ अज्ज प्पइरमेत्तेण ।
एमेअ कित्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ।। १९ ।।

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोभि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदताऽयं रचितोऽञ्जलिर्वः ।।२०।।

अत्र विविक्तोऽयं देशः इति प्रच्छन्नकामुकस्त्वयाऽभिसार्यतामित्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिअ किं भणामि तुइ मंदभाइणी अहकम् ।
अज्ज घवासं वच्चसि सअं जेच्च सुणसि करणिज्जम् ।। २१ ।।

अत्राद्य मधुसमये यदि व्रजसि तदाहं तावन्न भवामि, तव तु न जानामि गतिमिति व्यज्यते ।

आदि ग्रहणाच्चेष्टादेः । तत्र चेष्टाया यथा-

कमलाकरी

व्यङ्ग्य इत्यर्थः ।

देशादाह - अन्यत्रेति । अन्यत्रेतो दूरेऽवचायं हस्तप्राप्यं पुष्पग्रहमिति प्रलोभनम् । 'हस्तादाने चेरस्तेय' (अष्टा. ३।३।८०) इति घञ् । अस्मीत्यहमर्थे[१]ऽव्ययः । अत्रेति-सख्योऽन्यत्र सन्ति तेन विजनोऽयं देशः तेन च प्रच्छन्नो गुप्तः कामुकोऽत्र प्रेषणीयमिति विश्वस्तां सखीं प्रत्युच्यते इत्यर्थे देशसन्निधिः प्रतीयते ।। कालसन्निधेराह - गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहम् । अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम् ।। इति छाया । परवशेति परशब्दः शत्रुपरोऽपि । नैते गुरुवः किन्तु शत्रव इत्यर्थः । निस्स्नेहे उपालम्भविषयत्वम् । व्रजेति मन्युना, मा व्रजेति । अद्येति वसन्ते । यत्र प्रवासिनोऽपि गृहमायान्ति । न जानामीति-अहं त्वदेकशरणत्वान्न जीविष्ये, तव तु अन्या अपि सन्तीतियुक्तंजीवनंप्रवासश्चेतिभावः । अत्र अद्यपदोक्तवसन्तकालसन्निधेरेवव्यङ्ग्यंचधीरित्यर्थः ।। मूलस्थादिपदग्राह्यमाह- चेष्टादेरिति । अत्रादिपदमभिनयद्विकादिपरम् । द्वारोपान्ते-इति । निरन्तरे

---

१. मर्थे व्यङ्ग्यम् - (१) अ.।

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।
आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥ २२ ॥

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते। निराकाङ्क्षत्वप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाहियते। वक्त्रादीनां मिथः संयोगे द्विकादिभेदेन। यथा-

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसए पलोएहि।
मा पथिअ रन्तिअंधअ सेज्जाए मह णिमज्जहिसि ॥ २३ ॥

अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम्।

कमलाकरी

सन्निहिते। प्रोल्लास्य प्रसार्येत्यालिङ्गनविशेषे द्योत्यः। आनीतमिति प्रच्छन्न एहीति। तदेतदाह- आकूतविशेष इति ॥

नन्वेकस्मिन् वाक्यवैशिष्ट्याद्युदाहरणे वक्तृबोद्धव्यादीनामपि प्रदर्शयितुं शक्यत्वात् किमर्थं तेषां भेदेनोदाहरणानीत्याह- निराकाङ्क्षेति। असङ्कटार्थं भिन्नोदाहरणेषु क्वचित् साङ्कर्यं न दोषायेत्यर्थ। प्राप्तावसरतयेति - पूर्वपश्चाद्भावित्वेनोपस्थितानां बालव्युत्पत्तये विवक्षितक्रमेणोदाहरणभेद इत्यर्थः। आदिव्यापदग्राह्यमन्यदप्याह वक्तृबोद्धव्यादीनामिति। वक्तृबोद्धव्यादीनां द्वयोर्योगे द्वापरिमाणमस्येति द्विकम्। यथा- 'अपिपिहुलम् इत्यत्र वक्तृबोद्धव्ययो। त्रयाणां योगे त्रिकम्। यथा- 'गुरुअण' इत्यादि। वक्तृबोद्धव्याकालादीनां चतुर्णां योग चतुष्कमित्यादि ज्ञेयम्। अनेनेति - यथा वक्तृवैशिष्ट्यादिना वाच्यार्थस्य व्यञ्जकत्वमुक्तमेवं लक्ष्यव्यङ्ग्यार्थयोर्वक्तृवक्त्रादिवैशिष्ट्येन व्यञ्जकत्वं ज्ञेयमित्यर्थः। एवमेव 'साहेन्तीति' लक्ष्यस्य, 'उअ णिच्चलेति व्यङ्ग्यस्य वक्तृवक्त्रादिवैशिष्ये व्यञ्जकत्वमिति। व्यङ्ग्ये द्विकोदाहरणमाह-अत्ता एत्थेति। श्वश्रूरत्र निमज्जति अत्राहं दिवसके प्रलोकय। मा पथिक रात्र्यन्धक शय्यायां मम निमङ्क्षसि।।" इति छाया। निमज्जाति निस्पन्दंशेते अत्रवक्तृबोद्धव्यवशाद् व्यङ्ग्य शय्यादेशं रत्यर्थं अत्रैव यातेति व्यङ्ग्यम्। रात्र्यन्धेति केनचिद् घर्षणे रात्र्यन्धो भर्त्रादिना अपन्हवो विधेयः।

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ।। २३ ।।

शब्देति न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः।

इति काव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीय उल्लासः ।।

कमलाकरी

नन्वर्थस्य व्यञ्जकत्वे कथं शब्दार्थौ काव्यमत आह–शब्देति । यद्वा नन्वार्यस्य च्यङ्ग्यप्रमाणकत्वे मानान्तरं स्यादत आह– शब्देति । शब्दबोध्येन अर्थस्य च्यञ्जकता न स्वरूपेण मानान्तरोपस्थितते तदभावात् तेनान्वयव्यतिरेकाभ्यां शब्दस्यैव प्रमाणतेत्यर्थः । प्रमाणान्तरेति– प्रत्यक्षोपस्थितेः आस्वादाभावादित्यर्थः ।।

इति श्रीमन्नारायणभट्टसूनुश्रीरामकृष्णभट्टात्मज–महामहोपाध्याय श्रीकमलाकरभट्टकृतायां कमलाकरीव्याख्यायां तृतीयोल्लासः ।।

अथ चतुर्थोल्लास

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह-

अविवक्षितावाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ ।
अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम् ।।२४।।

कमलाकरी

ननूक्तकाव्यलक्षणे शब्दार्थौ निरुप्य तदन्तर्गतौ दोषगुणौ वक्तुमर्हौ न ध्वनिरत आह- यद्यपीति । दोषाणां हेयत्वं गुणालङ्काराणाञ्चोपादेयत्वम् धर्मिणि काव्ये । यद्यपि दोषो न काव्यधर्मस्तथापि दोषाभावविशिष्टानामुपादेयतया विशेषणीभूताभावप्रतियोगित्वेनावच्छेदकत्वाद् धर्मत्वोपचारः । उत्तममध्यमाधमकाव्यानां सामान्येन स्वरूपे उक्ते चतुर्थपञ्चमषष्ठोल्लासेषु क्रमेण तद्विशेषनिरूपणम् । सामान्येन दोषादिनिरूपणे प्रतिबन्धकत्वादित्यर्थः । प्रथमं दोषादिनिरूपणात् पूर्वम् । काव्यभेदान् ध्वनिभेदान् । दोषादीनां रसादिध्वन्याश्रितत्वेन तद्गृहाधीनग्रहत्वादित्याशयः ।

तत्र ध्वनिरूपं काव्यं द्वेधा लक्षणामूलमभिधामूलञ्च । आद्यमविवक्षितवाच्यमन्त्यं विवक्षितान्यपरवाच्यमित्युच्यते । तत्राल्पत्वाल्लक्षणामूलस्य द्वैविध्यमाह - अविवक्षितमिति । अविवक्षितमनुपयुक्तमन्वयायोग्यं वा वाच्यं यत्र स ध्वनिर्ज्ञेयः। तत्र तस्मिन् ध्वनौ वाच्यमर्थान्तरे लक्ष्ये पुंसां तात्पर्यवशात् सङ्क्रमितं परिणमितम् । अतएव णिच् । अन्त्यन्तं तिरस्कृतमन्वयाप्रतियोगि वा भवेदित्यन्वयः । एतेनोपादानलक्षणलक्षणे उक्ते । लक्षणेत्याद्यविवक्षितवाच्य[१]स्योपविवरणम् । लक्षणामूलं यद् गूढव्यङ्ग्यं तस्य प्राधान्ये सतीत्यर्थः । अभिधामूले विवक्षितान्यपरवाच्येऽतिव्याप्तिं निराकर्तुं लक्षणामूलेत्युक्तम् । अन्ये तु-अभिधामूलेऽविवक्षितवाच्यत्वाभावान्नातिव्याप्तिरतो निरूढलक्षणाया निष्प्रयोजनत्वाद्व्यङ्ग्याभावेन तत्रातिव्याप्तिनिरासाय लक्षणामूलेतिपदमित्याहुः । अगूढव्यङ्ग्ये मध्यमकाव्ये तां वारयितुं

---

१. वाच्यस्य-ब.।

लक्षणांमूलगूढव्यङ्गप्रधान्ये सत्येवाविवक्षितं वाच्यं यत्र स 'ध्वनौ' इत्यनुवादाद् ध्वनिरिति ज्ञेयः ।

तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितम् । यथा-

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ।। २३ ।।

अत्र वचनादि उपदेशादिरूपतया परिणमति ।

क्वचिदनुपपद्यमानतया अत्यन्तं तिरस्कृतम् । यथा-

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व
ततः शरदां शतम् ।। २४ ।।

कमलाकरी

गूढ़व्यङ्ग्येत्युक्तम् । गूणीभूतव्यङ्ग्येऽतिव्याप्ति-वारणाय प्राधान्ये सतीत्युक्तम् ।

लक्षणामूलमतएवाविक्षितं वाच्यं यत्र स ध्वनिर्ज्ञेय इत्यन्वयः । नन्वर्थान्तरसङ्क्रमितवाच्यत्वाद् यत्र विधेयं न तु ध्वनित्वमतः कथं ज्ञेय[1] इति योज्यतेऽत आह- ध्वनावित्यनुवादादिति । अयं भावः-मूले तत्र ध्वनाविति ध्वनिमनूद्यार्थान्तरसङ्क्रमितवाच्यत्वादि विधीयते । न चान्यतो ध्वनित्वं सिद्धमस्ति, न च 'ध्वनिर्बुधैः कथितः' (का.प्र.१/४) इत्युक्तेर्ध्वनित्वं सिद्धमिति वाच्यम् । तस्यैतद्भवध्वनित्वानुवादेन वाच्यातिशयित्व लक्षणपरस्त्वात् अनुवादस्य सन्निहितगामित्वाच्च । अतोऽत्रैवानुवादानुपपत्या विधित्वं परिकल्प्य तस्य द्वैविध्यमुच्यते । अतो ज्ञेय इति भिन्नं योजितम् । न च वाक्यभेदः पौरुषेयत्वात् इति ।

आद्यभेदमाह-तत्रेति । एतेन तात्पर्यानुपपत्तिरन्वयानुप पत्तिर्वा लक्षणाबीज[2]मिति प्रत्युक्तम् । त्वामिति । अस्मीत्यहमर्थेऽव्ययम् । अहं त्वां वदामि, अत्र विदुषां समूहोऽस्ति तत् तस्मादात्मीयां मतिं दृढीकृत्यात्र तिष्ठेत्यर्थः । अत्रेति-वक्तुः श्रोतुश्च साम्मुख्यात् प्रत्यक्षत्वाच्चाहं त्वां वच्मीत्याद्यनुपयुक्तं[3] हितत्वमित्रत्वोपदेशत्वादि

१. ज्ञेय इत्युच्यतेऽत आह-अ. ।
२. बीजमुक्तम् -अ.।
३. हितत्वमित्यत्र चोपदेशत्वादि-अ.।

एवमपकारिणं प्रति विपरीतलक्षणया कश्चिद् वक्ति ।

विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः।

अन्यपरं व्यङ्ग्यनिष्ठम् । एष च-

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ।।२५।।

कमलाकरी

लक्षयति, अवश्य[१] ग्राह्यत्वाप्तत्वादि च व्यङ्ग्यम् । एव सर्वस्यात्मीयवत्तावस्थितेः प्रामाणिकमतिर्लक्ष्या सावधानत्वञ्च व्यङ्ग्यमित्यर्थः । कुन्ता इत्यत्र कुन्तस्य धर्मिरू[२] पतापत्तिरेव परिणाम'स्त्वामस्मि' इति पदद्वये लक्षणायां वचनादिरिति मूले कथमुक्तम् ? (अत्र) केचिदाहुः - भूवादिवत्कुटादिवच्च वचनमादिर्यस्य वचनस्यादिर्यस्येति समासद्वयात् सर्वलाभ इति । सर्वनाम्नां बुद्धिस्थे शक्तेर्न लक्षणेत्यन्ये तन्न युष्मदस्मदोः परस्वात्ममात्रशक्तत्वेन सर्वनामत्वाभावेन लक्षणासत्वात् । तत्वन्तु त्वामहमिति वचनक्रियाकर्मकर्तृत्वाद् वचनविवक्षयैव तयोरनुपयोगो न स्वातन्त्र्येणेति तदा युक्तिः । ननु वच्मीति सामान्यवाचकस्योपदेशे विशेषे कथं लक्षणा । मैवम् - सामान्येन बोधे तथैव विशेषप्रकारेण बोधे लक्षणैव तत्राशक्तेः ।

मुख्यार्थबाधमूलां लक्षणामाह-क्वचिदिति । उपकृतमिति-अपकारिणं प्रतीति मुख्यार्थबाधः विपरीतेति सम्बन्ध उक्तः । त्वया यत्र यस्मिन् विषये उपकृतं तत्र किमुच्यते किमु वक्तव्यम् । अवचनमेव शरणमित्यर्थः । तत्रेति पाठे यदपकृतं तत्र किं वाच्यम् किन्तु सौजन्यमेव त्वया ख्यापितम् । अत ईदृशमेव कुर्वन् शरदां वर्षाणां शतं सुखितं यथा स्यात्तथाऽऽस्व तिष्ठेत्यर्थः । अत्रापकारिण्युपकारित्वबाधा द्विरोधितासम्बन्धेनापकारित्वं लक्ष्यम् । तदुक्तम् - "[३] अभिधेयेन सम्बन्धात् सादृश्यात् समवायतः । वैपरीत्यक्रियायोगाल्लक्षणा पञ्चधा मता ।।" इति ।

अपकारेऽपि प्रियोक्त्या स्वसाधुत्वं व्यङ्ग्यम् । एवं सुजनतया दुर्जनता, सखित्वेन शत्रुत्वं लक्ष्यम् । यद्यपि कुन्ता इत्यत्र व्यङ्ग्यं

---

१. ग्राह्यत्वादि च व्यङ्ग्यम् ब.।

२. ध्वनिरूपतापत्ति-ब.।

३. ध्वन्यालोकलोचने च कारिकेयं समुपलभ्यते, तत्रत्यो भिन्नपाठः यथा-अभिधेयेन सामीप्यात् सारूप्यात् समवायत। वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मतेति ।। (ध्व.लो. चौ.सं.पृ.२८)

अलक्ष्येति । न खलु विभावानुभावव्यभिचारिण एव रसः, अपि तु रसस्तैरित्यस्ति क्रमः । स तु लाघवान्न लक्ष्यते ।

अत्र-

रसभावतदाभास-भावशान्त्यादिक्रमः ।

भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ।। २६ ।।

आदिग्रहणाद् भावोदय-भावसन्धि-भावशबलत्वानि । प्रधानतया यत्रस्थितो रसादिस्तत्रालङ्कार्यः यथोदाहरिष्यते । अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिरुतत्र गुणीभूतव्यङ्ग्ये रसवत् प्रेयोर्जस्विसमाहितादयोऽलङ्कारास्ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते ।

कमलाकरी

नार्थान्तरसङ्क्रमितवाच्येऽन्तर्भूतं कुन्तानां परिणामाभावात् नात्यन्ततिरस्कृतवाच्ये स्वार्थत्यागात् तथापि कुन्तत्वेन पुरुषप्रतीतौ ऽस्त्येव । यदा तु कुन्तवृत्तितत्संयोगाश्रयत्वेन पुरुषधीस्तदा सुतरां परिणामः ।

अभिधामूलं ध्वनिमाह - विवक्षितमिति । विवक्षितमबाधितम् । अन्य परं व्यङ्ग्योपसर्जनम् । केचिदन्यतात्पर्यमित्याहुस्तन्न शब्दशक्तिमूले ध्वनावव्याप्तेः, तत्रान्यतात्पर्याभावात् अन्यथा शक्त्यैव द्वयोपस्थितौ व्यञ्जनोच्छेदापत्तेः । अपरो ध्वनिरिति शेषः ।

कोऽपीति-क्वचिद्वाच्यव्यङ्ग्ययो क्रमः प्रतीयते क्वचिन्नेत्यर्थः । कोऽप्येक इत्यर्थः । अलक्ष्यक्रमव्यङ्ग्य इति - अलक्ष्यव्यङ्ग्यक्रम इत्यर्थः । बहुव्रीहिगर्भो बहुव्रीहिः । आहिताग्न्यादित्वात् क्रमशब्दस्य पूर्वनिपातो वा । यद्यपि लक्ष्यक्रमाभावरूपत्वेनालक्ष्यक्रमस्य प्रतियोगिग्रहाधीनत्वात् पश्चान्निर्देशोऽर्हस्तथाप्यत्र न तदभाववत्त्वमविवक्षितवाच्येऽतिव्याप्तेः । किन्तु अन्योन्यविरहव्याप्यत्वं नीलपीतादिवच्छैत्योष्णवच्चेति मधुमतीकारः । अविवक्षितवाच्ये तु वाच्यस्यैव बाधेन क्रमाभावान्नेदं भेदद्वयमित्यर्थः।

ननु शब्दाद्वि[1]भावादय एव प्रतीयन्ते न रसः । अतः कुत्र क्रमवर्तितेत्यत आह- न खल्विति । विभावादय एव रसस्तेषां गुणीभूतव्यङ्ग्यतेऽपि सत्वात् किन्तु तैर्विभावादिभिः रसोऽभिव्यज्यते

---

१. शब्दाद् विभावाद्येव- अ.।

तत्र रसस्वरूपमाह -

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।२७।।
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।।२८।।

उक्तं हि भरतेन

'विभावानुभावव्यभिचारिसंयोगाद रस-निष्पत्तिः, इति ।

कमलाकरी

प्रतीयते इति वि[१]शेषः, अतस्तैरिति हेतुत्वात् पौर्वापर्यक्रमः इत्यर्थः ।

ननु क्रमोऽस्ति चेत् कथं न लक्ष्योऽत आह- स त्विति । न लक्ष्यते न ज्ञायते सहप्रतीतेरित्याशयः । अलक्ष्यक्रमभेदानाह - रसेति । रसाः श्रृङ्गारादय, भावा रत्यादयः तदाभासा रसाभासा भावाभासाश्च । भावस्य व्यभिचारिणः शान्तिश्चादौ यस्य सः । अक्रमोऽलक्ष्यक्रम इत्यर्थः । अत्र पुनर्भावग्रहणं रसऽभाव शान्त्यादि निषेधार्थम् । तथाहि रसस्य नित्यत्वाद्विभावादिशान्तिरेव रसशान्तिर्वाच्या, न च तच्छान्तौ व्यञ्जनास्ति, न चाव्यक्तं चमत्कुरुते, रसोदयस्तु रसाभिव्यक्तिरेव तस्य नित्यत्वात्तत्रोदयपदं व्यर्थमभिव्यक्त स्यैव रसत्वात । नापि रससन्धिः रसानां विगलितवेद्यान्तरत्वात् । व्यभिचारिभावानान्तु सत्वासत्वाभ्यां युज्यते शान्त्यादीत्यर्थः ।

ननु रसादेरलङ्कारत्वे उपसर्जनत्वान्मध्यमकाव्ये निरू[२]पणं युक्तं नात्रात आह- भिन्न इति । रसादिरूपादलङ्कारादलङ्कार्यतया भिन्न स्थित इत्यन्वयः । यत्र रसादिः प्रधानं तत्रालङ्कार्थं यत्र गुणीभूतो वाच्यो[३] वा तत्रालङ्कार इत्युच्यते तेनोभयत्राभिधानं युक्तमिति भावः । तदुक्तम् -

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ।। (ध्वन्याः२।५)

आदिशब्दार्थमाह - भावोदय इति । अलङ्कार्यतयेति व्याचष्टे - प्रधानतयेति । यथेति -' अयं स रसने' (का.प्र.५।११६) त्यादावित्यर्थः । अन्यत्र मध्यमकाव्ये । मूले रसादिपदार्थमाह - प्रेय इति । रसस्य गुणत्वे रसवदलङ्कारः, भावस्याङ्गत्वे प्रेयोऽलङ्कारः, रसाभासस्याङ्गत्वे

---

१. वा शेषः-ख.।
२. निरूपणमयुक्तं-क.।
३. बाध्यो वा-क० ।

एतद्विवृण्वते -

विभावैर्ललनोद्यानादिभिरालम्बतोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रसः, इति भट्टलोल्लटप्रभृतयः ।

कमलाकरी

ऊर्जस्विदलङ्कारः, भावशान्तेरङ्गत्वे समाहितः, आदिपदात् भावोदयादेङ्गत्वेऽलङ्कारान्तराणि ज्ञेयानि । गुणीभूतेति - पञ्चमोल्लासे इत्यर्थः । तत्रेति- रसाभावादिमध्ये रसस्य प्रथमोद्देश्यत्वात् स्व[१]रूपं लक्षणमाहेत्यर्थः ।

कारणानीत्यादि-लोके स्थायिन्नोऽन्याबाध्यस्य रत्यादेः प्रीत्यादेर्वृत्तिरूपस्यान्तःकरणपरिणामस्य यानिकारणान्यङ्गनादीनि । अथश्चार्थे । कार्याणि कटाक्षादीनि, रत्याद्यभावे तदभावात् सहचारीणि लज्जाहासादीनि सामग्रीसम्पातेन रत्या सहचरणादुपचायकानि । सहकारीणीति-रतेरेकरूपत्वेन स्मितरोदनादिविचित्रकार्यायोगात् सामग्री वैचित्र्यापादकानीत्यर्थ इति परमानन्दः । तानि नाट्येऽन्याभिनयरूपे काव्ये उक्त-लक्षणे चेद्यदि ज्ञातानि स्युस्तदा कारणानि विभावाः, कार्याण्यनुभावाः, सहचारीणि व्यभिचारा इति कथ्यन्ते । ननु संज्ञामात्रं भिन्नमुतार्थोऽपि, आद्ये लोकविरोधात् काव्यनाट्योरिति व्यर्थम्, नान्त्यः अनिर्वचनात् । उच्यते- लोके तत्तत्सम्बन्धित्वेन बुद्धाः सीतादय एव कारणादिरूपाः पदार्थाः विशेषत्यागेन सम्बन्धिविशेषास्पर्शे स्त्रीत्वादिना बुद्धाः रसाभिव्यञ्जकत्वं लभन्ते । तदेव विभावादिशब्दार्थः । कथमन्यथाऽऽराध्यत्वज्ञाने सति सीतादेरालम्बनता रत्यादौ स्यात् । तैर्विभावाद्यैरभिव्यक्तः । स भावो रत्यादिः, स्थायी स्थिर । अन्यथा ऽबाध्यश्चेत्तदा रसः स्मृतःउक्त इत्यर्थः । अनभिव्यक्तो भावः स एवाभिव्यक्तो रस इति पद्मनाभः । स्थायीति-बाध्यतामङ्गतां वा प्राप्तोऽपि न स रसः इत्युक्तम् । ननु चित्तवृत्तेः क्षणिकत्वेन स्थैर्याभावात् कथं स्थायित्वम् ? उच्यते-आप्रबन्धं विरुद्धाविरुद्धभावैरविच्छिन्नश्चित्त- सन्तान एव स्थायी तस्य

१. स्वरूपलक्षणमाहे-ब.।

सन्तानरूपतया सूक्ष्मतया वा स्थिरता युक्तैव। यदाह भरतः (धनञ्जयःच)

"विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः॥"
(ना.शा.७।, द.रु.४।३४)

तथा-"सजातीय विजातीयैरतिरस्कृतमूर्तिमान्।
यावद्रसं वर्त्तमानः स्थायीभाव उदाहृतः॥"

(भावलक्षणन्तु -)
'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्।'
भावनं वर्णनीयमयीभवनमित्यर्थः; विभावादयस्ते[1] नैवोक्ताः-
'बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रिताः।
अनेन यस्मात्तेनायं विभावः परिकीर्तितः॥'
'अनुभावो विकारस्तु भावसंसूचनात्मकः।'
रसमनुभावयन्ति पोषयन्ति प्रत्या[2] ययन्ति वेति अनुभावाः। ते च स्तम्भादयोऽष्टौ। यथा[3]-
"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युग्मननिर्मग्नाः कल्लोला इव वारिधौ॥"

इति। अन्येतु - तैरिति सहार्थे तृतीया। वृद्धोऽयमिति शब्दानुविद्धप्रत्यक्षवद्विभावादिभिः सहैव रसधीरित्यार्थः। तदुक्तम्।

'स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः।'

इति। तैरित्येव सिद्धे सम्भूयरसव्यञ्जकत्वार्थं विभावाद्यैरित्युक्तम्। स इत्येव सिद्धे स्थायीत्युक्तिः सञ्चारिणो निरासाय। रतिहासक्रोधादीनां हि करुणशृङ्गारवीरादिषु सञ्चारित्वमस्ति कान्तादर्शनश्रवणादिनोत्पन्ना प्रीतिर्व्यासङ्गेऽ प्यनुवर्तते चिन्तादयस्त्वपगच्छन्ति तेन ते व्यभिचारिणः प्रीतिस्तु स्थायी। तेन रत्यादि स्थायी चेत्तदैव रसः, न तु सञ्चारी अस्थिरत्वात् तदुक्तम्।

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते।'

इति। 'न तिरोधीयते स्थायी तै[4]रसौ पुष्यते परम्।'

इति च। भावश्चित्तं तद्वृत्तेस्तद्धर्मत्वात् तद्रूपो रस आनन्दः। 'रसौ वै सः' इति श्रुतेः परमात्मस्वरूप इत्यर्थः। स्मृतः उक्तः श्रुत्येति शेषः।

---

१. स्तेनैवोदाहृताः-ब.।
२. प्रत्यापयन्ति वा-ब.।
३. तथा-ब.।
४. तैः रसः पुष्यते-क.।

राम एवायमयमेव राम इति, न रामोऽयम्' इत्यौत्तरकालिके बाधेरामोऽयमिति, रामः स्याद् वा न वाऽयमिति, रामसदृशोऽयमिति च सम्यक्-मिथ्या-संशय-सादृश्य- प्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्या ग्राह्ये नटे ।

सेयं मामाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ।।२५।।

कमलाकरी

अत्रेदं तत्वम्-काव्ये शब्दादिभिः कान्तादिविषयोऽन्तःकरणपरिणामोऽन्तरे चो[१]त्पद्यते सैव रतिरित्युच्यते । सा च वृत्ती [२] द्धा बोधो बोधेद्धा वृत्तिर्वा ? तत्र चाभि[३]व्यक्ते चैतन्ये काव्यप्रदर्शनश्रवण विभावादिसहकारिमहिम्ना व्यञ्जनावशेन च चैतन्यस्यानन्दांशे आवरणभङ्गः क्रियते । आवरणञ्चाज्ञानमेव घटादिज्ञाने त्वानन्दांशे आवरणसत्वान्न रसोब्दोधः । न च तत्रानन्दांशेऽप्यावरणभङ्गः कुतो न जायते इति वाच्यम्, विभावादिज्ञानाभावात् । यद्वक्ष्यति- 'विभावादिजीविता'वधि रिति । यत्र तु नाट्ये विभावादिज्ञानं तत्रानन्दांशे आवरणभङ्गादस्त्येव रसोद्बोधः । यद्वक्ष्यति ' चर्व्यमाणतैकप्राण' इति । चर्वणा चानन्दांशाभिव्यक्तिरेव । आनन्दस्य कथं भानमिति चेत् साक्षिणैवेत्यवेहि । वृत्तेस्तत्रैवाध्यस्तत्वात् । सर्वस्य हि शुक्तिरजतादेरधिष्ठानसत्तैव सत्ताऽधिष्ठानस्फूर्तिरेव स्फूर्तिः, आत्मभानं विना प्रत्यक्षादेः प्राणाण्यायोगाच्च । अज्ञातज्ञापकं हि प्रमाणं, अज्ञानञ्चात्मन्येव नत्वनात्मनि । अस्ति प्रकाशते इति सामग्र्यां सत्यां नास्ति । न प्रकाशते इति व्यवहारो हि तत्कल्पकः, स चात्मन्येव । तदुक्तम् 'अस्ति भाति प्रियं नाम रुपञ्चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।।' इति ।

ततश्चात्मभानाभावे कथं तेषां प्रामाण्यम् । कथं तर्हि रसस्यावेद्यत्वमिति चेत् फलव्याप्यत्वाभावादित्यवेहि । वृत्तिविषयावच्छिन्नं हि चैतन्यं प्रत्यक्षादौ फलम् । अनावृत्तसंवित्तादात्म्यस्यैवापरोक्षत्वात् । न चानुमितिः सुखरसादिज्ञाने तदस्ति

१. वोत्पद्यते-ब.।
२. वृत्तीद्धो बोधेद्धा वृत्ति-क.।
३. चाभिव्यक्त-क.।

दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ।। २६ ।।

इत्यादि काव्यानुसन्धानबलाच्छिभ्यासनिर्वर्तितस्वकार्य प्रकटनेन च नरैरेव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभाविशब्दव्यपदेश्यैः 'संयोगाद् गम्य-गमकभावरूपात् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्

कमलाकरी

वृत्तिनिर्गमनाभावात् । परमानन्दस्तु-विभावाद्यैर्भावनायां प्रवर्तिते सामाजिके बाह्यविषयव्यावृत्ते मनसि ज्ञानसुखात्मको रत्यादिः स्वयं प्रकाशते । मोक्षेऽविद्यानिवृत्तौ तत्वज्ञानस्येव बाह्यविषयनिवृत्तौ विभावाद्यपेक्षेत्याह । यत्वत्र श्रीवत्सेन दूषणमुक्तं रसव्यङ्ग्यत्वं समुद्रे क्षिपन्तो वन्ध्या एवेति । तन्न आवरणभङ्गो आनन्दाभिव्यक्तौ वा स्वमते व्यञ्जनापेक्षावशात् तन्मते बाह्यविषयनिवृत्तौ प्रकाशे वा तदपेक्षणात् । मधुमत्या[१]दयस्तु कान्ताद्यैः पूर्वं चित्ते जनितो रत्यादिर्वासनारूपः स्थितः काव्योपात्तैर्विभावादिरूपैस्तैः सम्भूय रसत्वं लभत इत्याहुः। सा चाभिव्यक्तिः काव्यादौ शब्देनार्थेन वा साक्षात्काररूपैव जायते । 'यत् साक्षादपरोक्षाद् ब्रह्मे' ( ) ति श्रुतेः । 'शब्दादपरोक्षत्वञ्च दशमस्त्वमसीति' इत्यादौ विवरणे स्पष्टम् । उक्तेअर्थे सम्मतिमाह - उक्तं हीति । संयोगः साहित्यं निष्पत्तिः प्रकाशः । इदं चतुभिर्भरतटीकाकृद्भिः रसस्योत्पत्तिरनुमिति-र्भुक्ति-रभिव्यक्तिर्वेति चतुर्धा व्याख्यातम् । तत्राद्यं पक्षमाह - विवृण्वते भट्टलोल्लटप्रभृतय इत्यन्वयः । विभावाः कारणानि । तानि द्वेधा रतेर्विषयाः कान्तादीन्यालम्बनविभावाः उद्यानचन्द्रमारुताद्युद्दीपनविभावाः उपचये रसस्वरूपे कारणानि तैः रामादावनुकार्ये जनितो रतेः कार्यैः कटाक्षाद्यैः प्रतीतः । उपचयं विना प्रतीत्यभावादंशे [२]न व्यङ्ग्य इत्युक्तम् । निर्वेदाद्यैरुपचितः पुष्टः । अत्रोपचयान्तरं ज्ञानात् पाठक्रमबाधादर्थक्रमेण पश्चात्प्रतीत इति योज्यम् ।

नन्विदानीं रामस्यासत्वात् कथं तन्निष्ठरसधीरत आह-मुख्ययेति मुख्ययाऽभिधयेत्यर्थः । इदञ्च काव्ये शब्दशक्त्या प्रतीयमानः स्थायीभावो रस इत्यन्वयः । नाट्ये आह- तद्रूपेति । रामसादृश्येन नर्तके रामत्वारोपाद् रामनिष्ठो रसो नटे आरोप्यते इत्यर्थः । केचित्तु नाट्यपर

---

१. मधुमतीस्कारायादय (१)स्तु-क.।
२. दंशेन योग्य इत्युक्तम-ब.।

रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

कमलाकरी

एवायं ग्रन्थः, मुख्यया वृत्या साक्षात्सम्बन्धेन रामादो प्रतीयते तद्रूपानुसन्धानात्तदारोपेण नटे प्रतीयते इत्यर्थमाहुः । उत्पत्तिदशायां यस्य स्थायिभावत्वं तस्यैव प्रतीतिदशायां रसत्वम् । अयं भावः- सीतादिविषया राम एव रतिः, नटे तत्स्मरणात्तद्धीः, सामाजिकानान्तु नटे रामसादृश्येन रामत्वारोपेण च तद्धीरिति । भरतसूत्रे च संयोगः सम्बन्धः विभावानां रतेः कार्यकारणभावः सम्बन्धः, अनुभावानां गम्यगमकभावः व्यभिचारिणां पोष्यपोषकभावः सम्बन्धः । निष्पत्तिपदञ्च विभावादिक्रमेणोत्पत्ति-ज्ञप्ति-पुष्टिपरमिति नानार्थमिति । अस्मिंस्तु पक्षे न रसप्रतीतिः, सा हि न मानसप्रत्यक्षाऽसन्निकर्षात् नानुमितिरारोपो वा । नटे रामादिभेदग्रहे तद्गतरत्याद्यनुमितौ बाधान्न स्मृतिर[1]नुभवाभावादित्यरुच्यानुमिति- पक्षमाह- राम एवायमिति । प्रतीतिपदस्य सम्यगादिपदैः प्रत्येकमन्वयः। सम्यक्प्रतीत्यादिचतुष्टयस्य क्रमेणोल्लेखमाह- राम एवेत्येवकारस्य विशेषणसङ्गतत्वा-दयोगव्यवच्छेदेन अयमेव राम इति, विशेष्यसङ्गत त्वादन्ययोगव्यवच्छेदेन च सम्यक्प्रतीतिः । उपलक्षणञ्चेदम् । अयंभाव- भवत्येवेति क्रियासङ्गतस्यात्यन्तायोगव्यवच्छेदेन च प्रतीतेर्भिन्न[2]त्वेन चेति ज्ञेयम् । न रामोऽयमित्यौत्तरकालिके बाधे सति रामोऽयमिति मिथ्याप्रतीति र्भ्रान्तेरित्यर्थः । यथा नेदं रजतमिति बाधे सति शुक्तौ रजतज्ञानम् । बाधाभावे तु न मिथ्यात्वं स्वतःप्रामाण्यवादे यावद्बाधं प्रामाण्यात् । मधुमतीकारस्तु सावधारणधीत्वं सम्यक्त्वं बाधशिरस्कत्वं मिथ्यात्वमित्याह। अतएव नटे रामोऽयमिति धीर्भ्रान्त्यैवेति कथं मि थ्यावैलक्षण्यमुक्तमिति दूषणमपास्तम् । रामः स्याद्वा न वेति संशयः, रामसदृशोऽयमिति सादृश्यधीः, एताभ्यः प्रतीतिभ्यो विलक्षणतया रामोऽयमिति प्रतिपत्या रामत्वप्रकारकपुरोवर्ति- मात्रविशेष्यकप्रतीत्येत्यर्थः । अन्यथा संशये सादृश्ये च राममात्राकाराभावेनाप्रसक्तौ व्यावृत्ययोगात् । ग्राह्ये विषयीकृते नटे इति पक्षोक्तिः । कारणादिभिः संयोगादनुमीयमानो रत्यादिर्भावो रस इत्यन्वयः ।

---

१. अनुभावादित्यरुचेः-क.।
२. भिन्नतयेति ज्ञेयम्-ब.।

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यते इति भट्टनायकः ।

लोके प्रमदादिभिः स्थाप्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्वा दलौकिकविभावादिशब्दव्यवहार्यैः ममैवेते शत्रोरेवैते तटस्थस्यैवेते इति सम्बन्धविशेषस्वीकार-परिहारनियमानध्यवसायात् साधारण्येन प्रतीतैः अभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलित परिमितप्रमातृ भाववशोन्मिषित-वेद्यान्तरसम्पर्क शून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वस्वाकारइवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः

कमलाकरी

ननु सम्यग्मिथ्यादिविलक्षणा लोके धीर्न दृष्टाऽत आह-चित्रेति । चित्रलिखिते तुरगे यथोक्तभिन्ना धीस्तथेत्यर्थः । इयञ्च बाध-समकालीनत्वादाहार्यभ्रमरूपेति पद्मनाभः । वेदान्तिनस्त्वनिर्वचनीय ताख्यातिरित्याहुः ।

हेतुज्ञानोपायमाह - सेयमिति । अङ्गेषु अमृतद्रवलहरीरूपा आलिङ्गनात्तापनिवृत्तेः, दृशोर्निविडकर्पूरशलाकातुल्या शरीरिणी मूर्तिमती मनोरथश्रीरभिलाषासम्पत्तिः सेयं प्राणेश्वरी प्रिया मनसः सकाशाल्लोचनविषयं प्राप्तेत्यर्थः । याऽद्य यावन्मनसि स्थिता सा बहिर्दृष्टेत्यर्थः । मनस एव मनोरथ श्रीर्भवतीति स मनस इत्यन्ययोगव्यवच्छेदार्थमिति मधुमतीसरस्वतीतीर्थकृता योजना त्वयुक्ता तथापि प्रयोजनाप्राप्तेरयं सम्भोगाख्यः शृगारः ।

वियोगमाह - दैवादिति । अद्याहं तया प्रियया विमुक्तश्चाभूवम् । घनचपला मेघा यत्र यद्वा निविडं चपलञ्च जलं ददातीति जलदः कालः समयो यमश्च, आवाभ्यां तुल्यकालता । इत्येवं काव्यस्यानुसन्धानं

पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्ग अन्यत् सर्वमिव तिरोदधत् ब्रह्मस्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः ।

कमलाकरी

विमर्शनम्, तद्बलान्नटेन प्रकाशितैस्तथा शिक्षोपदेशोऽभ्यासः पौनःपुन्येन प्रवृत्तिस्ताभ्यां निर्वर्त्तितानां स्वकार्याणां पुलकादीनां प्रकटनेन हेतुना च नटेन प्रकाशितैर्नतु वस्तुसद्भिः कारणाद्यैरिति हेतुः ।

कथं कृत्रिमैर्हैतुभिरनुमितिर्बाधादत आह- कृत्रिमैरपीति । अनाहार्यहेतुधीरेवानुमितिहेतुर्न तु प्रमा । अन्यथा धूलीपटलेन वह्न्यनुमितिर्न स्यादिति भावः । तथा कृत्रिमत्वेन कारणादिमात्रज्ञानाल्लोके कुतो न रसधीरत आह- विभावादीति[१] । अलौकिकचमत्कारहेतुत्वाद्विभावप्रयोगः । सूत्रस्थं संयोगपदं व्या चष्टे- संयोगादिति । गम्यं साध्यं, गमको हेतुस्तद्भावो व्याप्ति स्तद्रूपात् सम्बन्धात् लोके पुलकादिभिः प्रीत्यनुमानेऽत्रापि तथेत्यर्थः ।

ननु रसस्यानुमेयत्वेऽनुमिनोमीत्यनुव्यवसायः स्यादत आह-वस्त्विति, यद्वाऽनुमिताद् रसात् कथं चमत्कारोऽत आह-वस्त्विति । पुत्रोत्पत्त्यनुमानवद्विषयमहिम्ना तथा चमत्कार इति भावः । ननु रामनिष्ठस्य रत्यादेर्नटेऽसत्वात् कथं तत्रानुमानमत आह-स्थायित्वेनेति । तत्रासन्नपि नटप्रकाशितविभावादिवत् स्थायित्वेन विद्यमानत्वेन सम्भाव्यमानः रामत्वारोपेण तत्र विद्यमान इव प्रतीयत इत्यर्थः । साध्यमाह-रत्यादिर्भाव इति ।

ननु नानुकार्यस्य रसानुमानं रामस्य तदानीमसत्वात् न नटस्य अभिनयाविष्टचित्तत्वादत आह-सामाजिकानामिति । ननु सकृदनुमितस्य सिद्ध्या प्रतिबन्धेन पुनरनुमानायोगात् कथं बहुकालं नृत्यदर्शनादौ प्रवृत्तिरत आह-वासनयेति । धारावाहीच्छयेत्यर्थः चर्व्यमाणः पुनः पुनरनुमीयमानः सिसाधयिषयानुमितौ सिद्धेरप्रतिबन्धत्वादिति । भाव । प्रयोगश्च रामत्वप्रतीतिविशेष्योऽयं सीतालम्बनकरत्याश्रयः तद्विभावादि-सन्धित्वात् यन्नैवं तन्नैवं यथाऽहमिति । विशेष्यावृत्तिप्रकारकज्ञानस्यैव भ्रमत्वेन प्रकृते तद्वैलक्षण्यायोगः ।

---

१ योजयति - ब. ।

स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्यः सिद्धस्य तस्यास्मम्भवादपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः । कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न क्वचिद् दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणम् ।

कमलाकरी

विशेषदर्शनेन च बाधाद्रसानुमित्यसम्भव इति दोषं मनसि कृत्य भुक्तिपक्षमाह न ताटस्थ्येनेत्यादिना भट्टनायकः, प्रागुक्तौ पक्षौ सिद्धन्तञ्च विकल्प्य दूषयति । रसस्य हि प्रतीतिरनुमितिरुत्पत्तिरभिव्यक्तिर्वा साप्यैकैका रामादिगतस्य वा नटनिष्ठस्य वा सामाजिकनिष्ठस्य वेति नवभेदाः । तत्र ताटस्थेन स्वभिन्नरामनटादिगतत्वेन रसो न प्रतीयते नानुमीयते नोत्पद्यते न वाभिव्यज्यते । प्रतीतिरत्रानुमितिः । रामस्य तदानीमसत्वेना-श्रयासिद्धेः तटस्य च सीताद्यसम्बन्धित्वादन्यथातिप्रसङ्गात् रसस्य परगतत्वेनारसनीयत्वापत्तेः सीतादीनामसत्वेनोत्पादकत्वायोगाच्च । नात्मेति-आत्मगतत्वेन सामाजिकनिष्ठत्वेन रसो नानुमीयते नोत्पद्यते नाभिव्यज्यते इत्यावृत्या योज्यम् । सीतादीनामतत्सम्बन्धित्वान्नोत्पत्तिः । सीतादीनां तदानीमभावान्नाभिव्यक्तिः रसस्य प्रागसिद्धेः । किञ्च 'न मयि रस' इत्येवं रसधीः विभावादीनां रसमात्रबोधकत्वेनात्मबोधकत्वात् । न च सुखबोधे आत्मनो विशेषणविशेष्यभावाद् रसबोधेऽपि तथेति वाच्यम् । विभावादिप्रत्याम्यंस्य रसतयाऽत्मनोऽपि रसत्वापत्तेश्च । ननु विभावादिभिर्न रसवत्साध्यतयात्मा प्रतीयते किन्तु पक्षतयेति चेन्न अनुमित्यसिद्धौ साध्यत्वस्यैवासिद्धेः सिद्धौ चानुमितिवैयर्थ्यादन्योन्या श्रयापत्तेश्च, अतो न रसस्यानुमित्यादिति सिद्धम् ।

कथं तर्हि रसधीरत आह-अपि त्विति । अभिधा शक्तिः ततो द्वितीयेन भिन्नेन भावकत्वरूपेण व्यापारेण भाव्यमानो विषयीक्रियमाण इत्यर्थः । अयं भावः-न सीतादयः शक्त्या सीतात्वेन प्रतीताश्चमत्कारिणः आराध्यत्वज्ञानस्य प्रतिबन्धकत्वात् किन्तु स्त्रीत्वादिरूपेण । अतः सीता[१] शब्देन शक्त्या मैथिलीत्वोपस्थितावपि तां विहाय भिन्नेन स्त्रीत्वादि [२]रूपेण भावकत्वम् । तदेतदाह-विभावादीति । विभावादेः

१. अतः सीतात्वे शक्तया-क. ।
२. स्त्रीत्वादिना रूपेण-ख.।

चर्वणानिष्पत्या तस्य निष्पत्तिरूपचरितेति कार्योऽप्युच्यताम्। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञान-वेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसित-परिमितेतरयोगिसंवेदन-विलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्।

कमलाकरी

सीतादेः साधारणीकरणं सम्बन्धिविशेषास्पर्शः आत्मा स्वरूपं यस्य तेन भावकत्वव्यापारेणेत्यर्थः। स्थाय्यनुच्छिद्यमानः भोगेन साक्षात्कारेण भुज्यते विषयीक्रियते। कामिनीभावनयेव तत्साक्षात्कारः। केचित्तु-अभिधा, भावकत्वं भोगश्चेति शब्दस्य त्रयो व्यापाराः अन्यत्राभिधैव व्यापारः काव्यादौ तु द्वितीयेन व्यापारेण साधारणीकृतैर्विभावाद्यैस्तृतीयव्यापारेण भोगेन भुज्यत इत्यर्थमाहुः। परमानन्दस्तु- अभिधा लिङ्निष्ठा प्रवर्तिका द्वितीया तज्ञातीया विभावादिनिष्ठेत्यर्थमाह तद् भ्रान्तिविलसितम्।

भोगस्वरूपमाह - सत्वेति। सत्वं गुणस्तस्योद्रेको रजस्तमोसम्बन्धस्तेन प्रकाशा स्फुटाऽऽनन्दमयी या संवित् ज्ञानं तत्र या विश्रान्तिर्योगिनां विगलितवेद्यान्तरत्वेन स्थितिस्तत्सतत्वेन तत्समानत्वेन यद्वा स्थितिस्तत्वं स्वरूपं यस्य तेन भोगेन समाध्यवस्थातुल्येनेत्यर्थः। तत्वं सतत्वमिति पर्यायः। एत[१]च्च पञ्चपादिकायां स्पष्टम्। अत्रेदं तत्वम्। यथा सुरभि चन्दनमित्युपनीलं सौरभं चाक्षुषं ज्ञानगोचरस्तथा समाधितुल्यभावेनोपनीता रामादिनिष्ठा रतिः सामाजिकमनसि चिदानन्दसा[२] क्षत्कारविषयतामापन्ना रस इति।

अस्मिन् पक्षे प्रतीतिभिन्नभोगाभावादर्थादभिव्यक्तेरेवाङ्गीकारा द्रसस्य चोत्पत्यभावे नित्यत्वापत्तेरभिव्यक्त्यभावे चासत्वापत्तेररुच्याऽभिव्यक्तिपक्षं सिद्धान्तयन्नाह-लोके इति। लोके काव्यनाट्यभिन्नस्थले प्रमदाकटाक्षनिर्वेदादिभिः कारण-कार्यसहकारिभिः स्थायिन्नो रत्यादेश्चित्तवृत्तिविशेषस्यानु- मानेऽभ्यासः पौनपुन्यं तेन पाटवं प्रज्ञातिशयस्तद्वतां सामाजिकानामित्यग्रे सम्बन्धस्तेन रसिका एव रसास्वादे योग्या न तु विरक्ता यत्यादय इत्युक्तम्। अनुमानञ्चायमेतद्विषयरतिमान् [३]कटाक्षादिमत्वात् यो नैवं स नैवं यथा

१. एतत्पञ्च-क.।
२. साक्षात्कारविषयतामापन्नो - क.।
३. तत्कार्यकटाक्षादिभावात् - क.।

तद्ग्राहकञ्च न निर्विकल्पकं विभावादि परामर्शप्रधानत्वात् । नापि सविकल्पंकं चर्व्यमाणस्यालौकिकान्दमयस्य स्वसंवेदनासिद्धत्वात् उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः ।

कमलाकरी

विरक्त इति । सामाजिकानां वासना रत्यनुभवजन्यः संस्कारस्तदात्मतया स्थितः सूक्ष्मतया स्थिति इत्यन्ये । स्थायी अबाध्यो रत्यादिकस्तेन बाध्यस्यान्याङ्गस्य वा रत्यादेर्न रसत्वं किन्तु सञ्चारित्वमिति ज्ञेयम् । रत्यादिकः रसो ज्ञेय इति शेषः ।

ननु कारणादिज्ञापने क्वचिन्न रसोदयोऽत उक्तं-तैरेवेति । कारणादिभिरेव काव्ये नाट्ये च कारणत्वत्यागेन प्रतीतैरभिव्यक्त इत्यन्वयः । विभावादिशब्दव्यपदेशे हेतुर्विभावादीति । कारणादिभिरेव काव्ये नाटये च कारणत्वत्यागेन प्रतीतैरभिव्यक्त इत्यन्वयः । विभावादिशब्दव्यपदेशो हेतुर्विभावनादीति । ईषत्स्फुटं स्फुटतराप्रकाशा एव विभावनादयो व्यापारा यथावर्णक्रमेण स्फोटस्योत्तरोरमभिव्यक्तिप्रकर्षस्तथा रसस्यापि तत्तदंशाभिव्यक्तिरित्यर्थः। तदुक्तम् -

"विभावा अनुभावाश्च सात्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ।।" (सा.द. ३.)

इति । तेनैव प्रथमोल्लासे स्फोटदृष्टान्तः ।

ननु सीतादीनां सामाजिकैरसम्बन्धात् कथं रसोदयोऽतआह- साधारण्येनेति । काव्यश्रवणादिमहिम्ना स्वस्य रामादिभेदाग्रहे सम्बन्धिविशेषास्पर्शेन[१] प्रतीतेः सीतात्वादिज्ञाने ह्याराध्यत्वज्ञानान्न सामाजिकानां रतिः मैथिलीत्वादित्यागेन तु कान्तामात्रज्ञानाद्युक्तौ रसोदयः । यत्र सीतादिधीस्तत्रानौचित्यान्नैव रसोदयः मालतीमाधवादावेव स इत्यर्थः ।

साधारण्यमेवाह - ममैवेति । आद्यत्रये सम्बन्धिविशेषस्वीकार-नियमोऽन्त्यत्रये तत्परिहारनियमः । यद्वा ममेति स्वीकारः न ममेति परिहारः । ममैवेति तयोर्नियमस्तेषामनध्यवसायादनिश्चयात् । स्वात्मा

---

१. प्रतीतैः-क.।

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिताः निर्दिष्टाः ।

कमलाकरी

प्रियः । मित्रस्य स्वपक्षनिक्षेपान्न पृथगुक्तिः । शत्रुर्द्वेष्यः, तटस्थ उभयेतरः । वर्णनीयत्रैविध्यात्त्रितयोपादानम् । अन्यसम्बन्धित्वे हि स्वासम्बन्धादनौचित्याच्च न रतिः स्यादतस्तदनिश्चयादित्युक्तम् । ममैवेति स्वसम्बन्धित्वग्रहो यद्यपि रसानुगुण एव तथापि तत्प्रकाशनेन नाट्य काव्ये चानौचित्यान्न रस्यते इति मदीयः पन्थाः । तादृशी च प्रतीतिर्नाटये प्रत्यक्षा, काव्ये शब्दात् । वासनात्मतया सूक्ष्मतया ।

विभावादिसाधारण्येऽपि कथं स्थायिनः साधारण्यमत आह– नियतेति । नियतः प्रमाता सामाजिकः । साधारणोपायो विभावादिसाधारण्यम् । तत्काले रसधीकाले । विगलिताऽ ज्ञाता नष्टा वा या परिमितप्रमातृता पुरुषविशेषनिष्ठता तद्वशेनोन्मिषित उदितः । वेद्यान्तरं स्वातिरिक्तं वेद्यं तेन सम्पर्को विषयताख्यः सम्बन्धस्तेन शून्यो रहितः अपरिमितः साधारणो भावो रत्यादिर्यस्य तेन प्रमात्रेत्यन्वयः । परमानन्दस्तु–परिमितश्चासौ प्रमाता च तस्य भावस्तत्ता । कर्मधारयोत्तर तक प्रत्ययेन परिमितत्वप्रभातत्वयोरेकाश्रयत्वं सम्बन्धस्तस्य विगलितं विगलनम् । भावे क्तः । अर्धपिघल्यादित्वाद्विगलितपदे पूर्वनिपात-स्तद्वशादुन्मिषितमुन्मेषणं ज्ञानम् । अत्रापि भावे क्तः । तस्य वेद्यान्तरेण सम्पर्को विषयताख्यः सम्बन्धस्तच्छून्यः स्वमात्रविषयो न प्रमात्रादिविषय इति यावत् । अपरिमितभावस्साधारणत्वं प्रमात्रादिप्रतीतौ ह्यसाधारणं स्यात् तेनोन्मिषिणेन । पूर्वनिपातः पूर्ववत् । गोचरीकृतमित्यर्थमाह । यद्वा परिमितत्वेन साधारण्येन गोचरीकृत इति सम्बन्धः । मानमाह–संवादेति । संवाद एकरूप्यम् अन्यथा तन्न स्यादित्यर्थः ।

ननु वेद्यान्तराभावे ज्ञेयन्तानयोरभेदाद्विषयविषयिभावो न स्यात्तत्राह– स्वाकार इवेति । स्वप्रकाशज्ञानवादिमते साकारज्ञानवादिमते चैतत् । स्वं ज्ञानं तस्याकारो विषयः स यथा ज्ञानरूपादिभिन्नोऽपि ज्ञानस्य विषय इत्यभेदेऽपि विषयविषयिभावस्तथाऽत्र स्वप्रकाशो रसोऽपि स्वेनैव गोचरीक्रियत

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयितेप्रसीद मुग्धे ।।२७।।

इत्यादौ-

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी -
मभिनवकरिदन्तच्छेदकान्तः कपोलः ।। २८ ।।

इत्यादौ -

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरूणे गृहीतवसने किञ्चाञ्चितभूलतम् ।

कमलाकरी

इत्यर्थः । प्रमाता वृत्यवच्छिन्नश्च चित्वेनाभिन्नोऽपि इत्यर्थ इति कश्चित्तन्न प्रक्रमविरोधात् । लोके कथमेवं नेत्यत आह - चर्व्यमाणेति । आनन्दांशस्य व्यज्यमानतो वृत्तिर्वा प्राणो यस्य रसत्व निर्वाहकत्वाद् अन्यथा रसश्रृङ्गारादिपदात् सुखोदयः स्यादित्यर्थः ।

चर्वणैव कुतो न सदा तत्राह - विभावादीति । विभावादिज्ञानं जीवितस्य रसस्वरूपस्यावधिर्यस्य । तत्सत्वे सत्वात्तन्नाशे नाश्य त्वाच्च । तेन तदभावान्न चर्वणेत्यर्थः ।

तर्हि विभावादिज्ञानस्य प्रत्येकं रसत्वं स्यात्तत्राह- पानकेति पानकेऽम्लखण्डमरिचकादीनां चित्ररसवत्संवलितानां रसत्वमित्यर्थः । नाटये वृत्तिविष[1]यावच्छिन्नचैतन्यनिष्ठाननन्दांशाभिव्यक्ते पुरइवेत्युक्तम् । काव्येऽपि शब्दादपरोक्षवादे वृत्तिद्वारातदभिव्यक्तानन्दस्य प्रमातृचैतन्येनैकीभावाद् हृदयमिवेत्युक्तम् । यद्वा काव्ये आह-हृदयमिति । शब्दानुमित्यादौ ह्य[2]न्तरैव वृत्तिः, घटमहं जानामीत्युभयावच्छेदेनानुभूयमानस्याज्ञान-स्यान्तर्वृत्याऽऽवरणभङ्गेन मौढ्यनाशेऽपि विषयतासम्बन्धेन तदावरणभङ्गद्वाज्झाड्यानिवृत्तेः परोक्षत्वं प्रवेशाभावात् प्रविशन्निवेत्यन्वयः । सर्वाङ्गीणं सर्वाङ्गव्यापनं यथा स्यात्तथा पादे सुखमितिवद् वृत्या प्रादेशिकत्वेऽपि ब्रह्मानन्दस्य निरति[3]यत्वेन सर्वाङ्गीणमिवेत्युक्तम् । विगलितवेद्यान्त-

---

१. वृत्तिविषयावच्छिन्नचैतन्येनैकीभावाद्-ब.।
२. ह्यन्तरैवं वृत्तिः ब.।
३. निरतिशायित्वेन-क.।

मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं

चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ।। २९ ।।

इत्यादौ च यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडा-इर्ष कोपासूयाप्रसादानाञ्च व्यभिचारिणां केवलानामत्र स्थिति-स्तथाप्येतेषामसाधारणमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ।

तद्विशेषानाह-

कमलाकरी

रत्वार्थमन्यत्सर्वमिवे-त्युक्तम् । रसस्य ब्रह्मास्वादत्वेऽपि ब्रह्ममात्रं प्रकाशते रसे तु विभावाद्यपीति मुक्तेर्भेदं वक्तुं ब्रह्मास्वादमिवेत्युक्तम् । पुर इवेत्यारभ्यानुभावयन्नित्यन्तेनालौकिकत्वमुक्तम् । अलौकिकः कारणादि धीमात्रजन्यः ।

नन्वस्तु शृंङ्गारे सुखास्वादः करुणादौ तु कथं सः ? प्रवृत्तिश्च प्रत्युत बीभत्सादौ वान्तादिसम्भावनाऽपीति चेन्मैवमन्यदा दुःखजनकस्यापि सुरते कान्ताकृतस्य मुष्टिताडनकेशग्रहादेरिव काव्ये नाट्ये च विभावादिमहिम्ना दुःखांशतिरोधाने तत्सम्भवात् । न चैवमेकरसत्वापत्तिः विभावादिभेदेन तन्नानात्वात् ।

ननु भरतसूत्रे पञ्चम्या हेतुत्वमुक्तं तच्च कारकत्वं ज्ञापकत्वं वा स्यात् तत् किं रसः कार्यो ज्ञाप्यो वाऽ -स चेति हेतुमाह-विभावादीति । तत्पदे तज्ज्ञानं विभावादिज्ञानानां समवाय्यसमवायि कारणत्वाभावात् निमित्तकारणत्वं वाच्यम् । ततश्च तन्नाशेऽपि रसधीः स्यात् । नहि निमित्तकारणनाशात् कार्यनाशो दृष्टः द्वित्वादौ तु नित्यत्वादपेक्षाबुद्धिरभिव्यञ्जिका न तु निमित्तकारणं तेन तत्र न व्यभिचारः । प्रकृते तु विभावादिज्ञाने सत्येव रसोदयो न तु तन्नाशेऽतो न तज्जन्यः । तत्वन्तु- रत्याद्यवच्छिन्नचैतन्यस्य रसत्वात् स्वप्नेऽपि न तस्य कार्यता यद्यपि घटाकारवृत्यवच्छिन्नचैतन्यस्य विशिष्टरूपेण नाशोऽस्त्येव अन्यथा ततः स्मृत्यनाप्तेः तथाप्यत्रानन्दांशस्य विशेषस्य न नाश इति हृदयम् । विशिष्टरूपेण तस्य कार्यता त्विष्टैव । यथा वक्ष्यति । 'कार्योऽप्युच्छताम्' इत्यादि ।

नापि ज्ञाप्य इति। स्वभिन्नप्रत्यक्षादिवेद्य आगंतुकज्ञानविषयो वा नेत्यर्थः। तत्र हेतुः सिद्धस्येति। पूर्वसिद्धं हि घटादिः प्रदीपादिना व्यज्यते प्रत्यक्षादिना वा विषयीक्रियते। न चैवं रसे विभावाद्यविभक्तस्यैव रसत्वादतः कथं तैर्ज्ञाप्येत। केचित्तु न ज्ञाप्यो न फलव्याप्यः। विषयावच्छिन्नाभिव्यक्तचैतन्य सम्बन्धित्वं हि फलव्याप्यत्वम्। न च चैतन्यरूपरसस्यचित्सम्बन्धित्वं सम्बन्धस्याभेदाधीनत्वात्। मानान्तरसिद्धे हि घटादौ फलव्याप्यत्वं न तु स्वप्रकाशचैतन्ये रसे चित्सम्बन्ध इत्यर्थमाहुः।

किं तर्हि विभावादिभिः क्रियते तत्राह-अपि त्विति। चर्वणीयः आनन्दतया प्रकाशित इत्यर्थः। स्वजन्यवृत्तिविषयः कृत इति वा। नन्वलौकिकीयं प्रक्रियेत्याशङ्क्येष्टापत्तिः शङ्कोत्तराभ्यांमाह-चर्वणेति। चर्वणा वृत्तिविषयता। न चाभिव्यक्तावपि कार्यत्वज्ञाप्यत्वविकल्पः। आत्मन्यावरणस्य कल्पितत्वेन कल्पितप्रतियोगि[1]काभावात्तस्याधिष्ठानरूपतया हस्तगतविस्मृतसुवर्णवत् कार्यत्वोपचारात् तदेतदुच्यतामित्यनेनोक्तमिति वयम्। वृत्य वच्छिन्नचैतन्यस्य विशेषणांशे जन्यत्वम्।

कथं तर्हि ज्ञाप्यत्वोक्तिस्तत्राह- लौकिकेति। विशेष्यांशे ज्ञाप्यत्वमित्यर्थः। योजना तु विलक्षणपदस्य प्रत्येकमन्वयात् त्रीण्यपि स्वस्वसंवेदनाविशेषणानि। तेनायमर्थः लौकिकप्रत्यक्षादिप्रमाणेभ्यो विलक्षणम्।

द्विविधयोगिज्ञानाद्वैलक्षण्ये हेतू आह- ताटस्थ्येति। द्विवि[2]धा योगिनः योगमारुरुक्षवः आरूढाश्च। समूलमिथ्या-ज्ञानानुच्छेदात् समाधौ गृहीतसर्वविषयाः युञ्जानपदवाच्याः पूर्वे, समूलतदुच्छेदात् सर्वप्रपञ्चभेदविलयेन गृहीतात्मतत्वमात्राः युक्तपदवाच्याः परे। आद्य वैषम्यमाह- ताटस्थ्यं भेदः अवबोधः। करणव्युत्पत्या प्रमाणम्। शालिपदं जन्यपरम्। भेदप्रमाणजन्यं मितं यत् योगिज्ञानम्, यद्वा शालिपदं स्वरूपपरम्। भेदावबोधस्वरूपयोगिज्ञानाद्विलक्षणमित्यर्थः। योगिज्ञानस्य भेदविषयत्वादस्य च स्थायिविभावादिभेदानवगाहित्वात् तद्विलक्षणम्।

युक्तयोगिज्ञानाद्वैलक्षण्यमाह-वेद्येति। वेद्यः प्रपञ्च-स्तत्स्पर्शराहित्ये भेदराहित्यं तस्यापि वेद्यत्वात् 'यत्र त्वस्य

---

१. प्रतियोगिकाभावस्याधिष्ठानरूपतया-ब.।
२. द्विविधयोगिनःक.।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥२९ ॥

तत्र शृङ्गारस्य द्वौ भेदौ, सम्भोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तत्वादपरिच्छेद्य एक एव गण्यते । यथा-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्रा-व्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ ३० ॥

कमलाकरी

सर्वमात्मैवाऽभूत्तत् केन कं पश्येत् । इति श्रुतेः । अतएव स्वात्ममात्रविषयं परिमितेतरमखण्डाकारवृत्तिरूपं यद्योगिनां संवेदनं ज्ञानं तस्यात्ममात्रगोचरत्वादत्र च विभावादीनामपि भाना त्तद्विलक्षणम् । अतएव लोकोत्तरं यत् स्वसंवेदनं स्वः आत्मा सम्बद्यतेऽनेनेति, वृत्तिस्तद्विषयः । विभावादिजन्य इत्यभिव्यक्तानन्दस्य, वृत्या ज्ञाप्यत्वोक्तिरित्यर्थः ।

इतोऽप्यज्ञाप्य इत्याह - तद्भरारकञ्चेति । तन्मात्रतेत्यर्थः । विभावादीनां विमर्शनं ज्ञानं तत्प्रधानं कारणं यस्य तत्वात् तज्जन्यत्वात । न हि निर्निकल्पकज्ञानजन्यम् ईश्वरज्ञानजन्यत्वेऽपि जन्यज्ञानाजन्यत्वादिति भावः । परामर्शः सम्बन्धः तद्विषयत्वादिति वा विभावादिवैशिष्टाविषयत्वादित्यार्थः । न हि तमृते चमत्कार इति भावः ।

नापीति । स्वभिन्न-स्वविकल्पकमित्यर्थः । स्वाभिन्नन्त्विष्टमेव विभावादिसमूहालम्बनस्य रसत्वेन तेषां सम्बन्धाग्रहादित्यर्थः । न हि ज्ञानजन्यत्वमात्रेण सविकल्पता निर्विकल्पस्यापीश्वरज्ञानजन्यत्वेन तत्वापत्तेः किन्तु विशेषणज्ञानजन्यतया, न चात्र तदस्तीत्यर्थ इन्यन्ये ।

ननु स्वभिन्नस्वविकल्पकाद्येकैकनिषेधे उभयविषयत्वापत्तेर्विरोधोऽत आह-उभयेति । निर्विकल्पकाभावः सविकल्पकं सविकल्पकाभावश्च निर्विकल्पकम् । अभावस्याधिकरणात्मकत्वादतएव रूपस्येत्युक्तम् तेनोभयाभावे कथमुभयरूपता विरोधादित्यपास्तम् ।

तथा-

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ।। ३१ ।।

कमलाकरी

न विरोधमिति- अनुभवबलेन तथैव स्वीकारादित्यर्थः । अभिनवेति । बालवलभीभुजङ्गनाम्नो भवदेवस्य संज्ञा । बहुवचनं श्रीपादाभ्यां च सम्मतत्वमुक्तम् । भरतसूत्रे च संयोगाद्विषय-तासम्बन्धान्निष्पत्तिरभिव्यक्तिरित्यर्थः । अत्रेदं तत्वम्- काव्यादौ दर्शनश्रवणमहिम्ना सीतात्वाविशेषत्यागेन साधारण्येन स्त्रीत्वादिना प्रतीतै[१] र्विभावाभाद्यैर्व्यञ्जितं वृत्तिरूपं रत्याद्यवच्छिन्नं चैतन्यं स्वप्रकाशमानन्दांशे भग्नावरणं विभावादिसम्भिमभिव्यक्तं रसः। सा चाभिव्यक्तिः काव्यादौ शब्देनाप्यपरोक्षसाक्षात्काररूपैव 'यत् साक्षादपरोक्षाद् ब्रह्म' () इति श्रुतेरिति ।

ननु विभावादीनां प्रत्येकं रसाभिव्यकत्वात् सूत्रे द्वन्द्वस्तैरिति च साहित्योक्तिर्व्यर्थाऽत आह- व्याघ्रादय इति । ते हि भीषणं भयमिव वीराणामुत्साहमपूर्वदर्शनाद्वि पिस्मयं हृतवधूनां क्रोधं जनयन्ति । अतो भयानकवद् वीराद्भुतरौद्राणामपि ते विभावा व्यभिचारान्नैकस्य व्यञ्जका इत्यर्थः ।

एवमनुभावमात्रेऽप्याह- अश्रुपातेति । शृङ्गारो विप्रयोगः । सञ्चारिष्वाह - चिन्तादय इति । अत्रापि शृङ्गारो वियोगः । चिन्ता ध्यानम् । कान्ताध्यानेन विप्रयोगस्येव वीरकरुणयोः पोषणम् भयहेतुगतक्रूरत्वादिचिन्तया वीरकरुणभयानकानां पोष इत्यर्थः । पृथगेकैकस्यानेकान्तिकत्वाद् व्यभिचारित्वादा भरतसूत्रे द्वन्द्वेन मिलिता उक्ता इत्यर्थः । ननु यत्र मिलिता अपि विभावादयः साधारणास्तत्र कथं रसोदयः? नैव तत्र रसोदयः इति देवनाथः ।

ननु प्रत्येकमपि रसोऽनुभूयत इत्याशङ्क्य निराचष्टे-वियदिति । 'अस्ति स्थिति' रित्यन्तः शङ्काग्रन्थः । अलिः मलिनाश्च ते तेऽम्बुगर्भाश्च ते मेघा यत्रैतादृशं वियदस्ति । मधुकराश्च कोकिलाश्च, केषाञ्चित्

१. विभावाद्यैर्वर्जितंनृत्तिरूपरत्याद्यव-ब.।

अपरस्तु - अभिलाषविरहेर्ष्या-प्रवासशापहेतु इति पञ्चविधः । क्रमेणोदाहरणम् -

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढ़रागोदया-
स्तास्ताः मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ।। ३२ ।।

कमलाकरी

पिकानां वर्षास्वपि मदः, अङ्कोऽङ्कनं तदर्थं पांषाण [१]दारणः, अभिनवाङ्कुर एवा ङ्कटङ्को यस्यां, मानदारकत्वात् टङ्कोक्तिः । हे मुग्धे हे मूटे उद्दीपकबहुत्वेन मानभङ्गो भवितैव तत्कुतः प्रणत्युपेक्षा । उद्दीपनरहितदेशे पलायन्त्वशक्यमेव आकाशे दिक्षु भूमौ च तत्सत्वादित्यर्थः । दयिते कृपापात्रे न तु स्वामिनि प्रसीद प्रसादं कुरु ।

परिमृदितेत्यादि मालतीवर्णनम् । अस्या इति । अङ्गं प्रवृत्तिः कपोलोऽस्तीति पूर्वोक्तेन सम्बन्धः । क्रियासु बहुचेष्टासु मध्ये परिवारः सखीजनः तस्य बह्वीभिः प्रार्थनाभिः । क्वचिदेका प्र[२]वृत्ति रित्यालस्यम् । अभिनवो बालः करिः तद्दन्तस्य कोमलत्वादस्य[३] पाटलवर्णत्वम् । निष्कलङ्कस्य कला (मात्रा) वशिष्टस्य चन्द्रस्य शोभां कपोलः कलयतीति कृशत्वं पाण्डुता च ।

दूरादिति । प्रेयसि प्रिये जातागसि जातापराधे सति मानिन्याश्चक्षुः प्रपञ्चः प्रकारवैचित्र्यं तत्र चतुरं जातम् । चक्षुषोऽपि चातुर्यमित्यहो इत्या[४]श्चर्यम् । दूरादन्यत्र मागच्छेदिति उत्सुकं, समीपमागते ममोत्कण्ठामयं मा जानीयादिति विचलितं तिर्यक्कृतं स्फारितं हर्षाद्विस्तारिलं संश्लिष्यत्यालिङ्गनोद्यते सति । कथमप्रसाद्यैव स्पर्श इति रोषादरुणम् । क्रोधेन जिगमिषन्त्या वस्त्राञ्चले गृहीते . किञ्चशब्दः किञ्चिदर्थे । अञ्चिते वक्रिते भूलते यस्य । चरणानत्या व्यतिकरः सम्पर्को यस्यैवंविधे यद्वा संयोगे सति मानभङ्गात् प्रसादस्तदनुभावो वाष्पाम्बु ।

---

१. पाषाणदारकःक.।
२. देका वृत्तरित्यालस्यम् । क.।
३. दस्य पाटलवर्णत्वात् निष्फल-क.।
४. इत्याश्चर्ये -ब.।

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च ह ह हा कोऽयं विधेः प्रक्रमः ।

कमलाकरी

यद्यपीति । आद्ये आलम्बनोद्दीपनविभावाः द्वितीये म्लानतादयोऽनुभावाः, अन्त्ये औत्सुक्यादयः सञ्चारिण इत्यर्थः । प्रसादस्यं सञ्चारित्वाभावेऽपि हर्षविशेषोऽत्र प्रसादः । उत्तरमाह–तथापीति । असाधारणत्वं झटिति बोधकत्वम् । न चाक्षेपे साहित्यं साहित्याच्चाक्षेप इत्यन्योन्याश्रय इति वाच्यम् । प्रत्येकं व्यभिचारेण सहितानां तत्वे प्रकरणतात्पर्यादिवशादाक्षेपात् । अन्यथा रसत्वाभावाद्यथा 'परिमृदिते () ति मालतीमाधवयोः प्रकरणादाक्षेपः । तद्विशेषाद् रसविशेषात् । अलौकिकसामग्रीजन्यतावच्छेदिका रसत्वजातिः सामान्यलक्षणमं । तदव्या[१] प्या हास्यादिजातयः इति मधुमतीकारः तन्न विशिष्टस्य रसत्वा[२]दजन्यत्वाच्च जात्ययोगात् ।

शृङ्गारेति । नाट्येऽभिनयेऽष्टौ, काव्ये तु शान्तोऽपि नवमः । नाट्ये गीतवाद्यादिमये सर्वविषयोपरमरूपशान्ताभावात् । तदुक्तम् 'शममपि केचित् प्राहुर्पुष्टि र्नाटचचेषु नैतस्येति । शृंङ्गारादिचरूपं विभावादि-विशेषैर्ज्ञेयम् । ते च विशेषाः भरतेनोक्ताः ।

द्वाविति । रतिप्रकृतिकः शृङ्गार इति सामान्यलक्षणम् । एक एवेति । –'अनुरक्तौ निषे[३]वेते यत्रान्योन्यं विलासिनौ ।

दर्शनस्पर्शनादीनि सः सम्भोग उदाहृतः ।।' इत्युक्तेः । सोऽपि द्विधा नायिकारब्धो नायकारब्धश्चेति । तत्राद्यमुदाहरति-शून्यमिति । शून्यत्वान्निशङ्कप्रवृत्तियोग्यता । वासेति स्वीयत्वात् परानागमनम् । सखी निलीना माऽभूदिति विशेषेणावलोक्य । शयनान्नत पीठादिति सूरतौचित्यम् । किञ्चिदिति । तस्योत्थाने पार्श्वविवर्तनेन समाधानम् । शनैरिति वलयध्वनिहस्ताकर्षादौ तज्जागरापत्तेः । निद्राया व्याजं न तु वास्तवत्वम् । पत्युः प्रभोः । न प्रियस्यान्यथा विपदं दृष्ट्वा सुरते विप्रलम्भायोगात् । निर्वर्ण्येति तमोभावः । विस्रब्धं निश्शङ्कमिति रागादनुचितकारित्वम् । चुम्बनेन तस्य कामोद्रोकाद्रोमाञ्चोद्गमं दृष्ट्वा जागर्त्ययमिति ज्ञानाल्लज्जया नम्रमुखी न तु चुम्बनाय । धार्ष्ट्ये

---

१. तद्व्याप्यहास्यादिति जातय इति मधुमती तन्न-क.।
२. रसत्वाच्च-क.।
३. निषेवेतां-क.।

इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ।। ३३ ।।
एषा विरहोत्कण्ठिता ।
सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ।। ३४ ।।

कमलाकरी

रसभङ्गापत्तेः । आलोक्येति लज्जा मुखनम्रत्वापेक्षया समानकर्तृकत्वं भुक्त्वा खिन्न इतिवत् । तव रहस्यं ज्ञातं यद्वा मत्प्रार्थनयापि न प्रवृत्तासीदानीं कथमिति हासः । चिरमिति पौनःपुन्यं लज्जाभावः सुरतञ्च व्यङ्ग्यम् । यत्तु परमानन्दादयः लज्जेति इति लज्जते भिन्नं पदं लज्जनक्रियापेक्षया । लोक्येति क्त्वाप्रत्ययः । अन्यथा मुखनम्रत्वेन कार्येण तत्प्रतीतौध्वनित्वेन श्रृङ्गाराङ्गता न स्यादिहुस्तन्न चुम्ब [१]नप्रवृत्यापि मुखनम्रत्वसम्भवे लज्जाया व्यभिचारात् ।

द्वितीयं सम्भोगमाह – त्वं मुग्धाक्षीति । मुग्धं रम्यम् । विनेति । अक्ष्णैव जगन्मोहनात् । कञ्चुलिकायाः वीटिका ग्रन्थिः । सस्मिताऽऽलीजनस्य सखी नायिका सैव नेत्रोत्सवः । भर्त्तुः चोलिकापसारणे कुचदर्शनोत्कण्ढयात्तेनानन्दितः सख्याः पत्युरनुरागदर्शनेन हृष्टः । शय्योपान्तेति । सुरतोद्योगो भर्तुः सूच्यते । आलीजन अलीकवचनं भोक्तुं गच्छामीत्यादि तस्योपन्यासं यथा स्यात्तथा शनैर्गतः । झटिति गमने तस्या लज्जया पलायनापत्तेरित्यर्थः । पूर्वत्र नायकोऽत्र नायिकालम्बनमिति भेदः । अत्र वीटिकास्पर्शाद्यनुभावाः उत्त्काण्ठादय सञ्चारिणः ।

अपर इति । विप्रलम्भ इत्यर्थः । तथा हि –

'भावोदयो रतिर्नाम प्रकर्षमधिगच्छति ।

नाधिगच्छति चाभीष्टं विप्रलम्भः स उच्यते ।। ' इत्युक्तेः। अभिलाषः सङ्गमेच्छा एकदेशे गुर्वादिपारतन्यात् । सङ्गमप्रतिबन्धो विरहः । प्रिये सपत्नीरक्ते कोप ईर्ष्या । प्रवासो दूरदेशः । शापो मुन्यादिकोपः । अभीष्टस्य प्राप्तियोग्यत्वे विरहस्तेनैकस्य मृतौ करुणे न

---

१. चुम्नप्रवृत्यभिमुखनम्रत्व-क.।

प्रस्थानं वलयैः कृतं प्रियसखैरस्त्रैरजस्त्रं गतं
धृत्या न क्षणमासितं व्यवसितं चितेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिताः
गन्तव्ये सति जीवित, प्रियसुहृत्सार्थं किमु त्यज्यते ।। ३५ ।।
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामिं कर्तुम् ।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।। ३६ ।।

कमलाकरी

प्रसङ्ग । विरहः । करुणाद भिन्नः प्रियनैराश्यकारित्वादित्युक्तेः । काव्यप्रदीपस्तु पूर्वसङ्गमाभावेऽभिलाषहेतुः तत्पदेनाभिलाषहेतु-सादिसंसर्गाभावो लक्ष्यते । सङ्गमपूर्वस्तु चतुर्विध इत्याह ।

अभिलाषमाह - प्रेमेति । मालतीमुद्दिश्य माधवोक्तिः । प्रेम स्नेहस्तेनार्द्रा स्तिमिताः तदेवाविचलं प्रणयः प्रणयस्पृशो मालत्या इति वा । परिचयः सङ्घर्षश्चाक्षुषं ज्ञानम् । वातेनद्राढ स्थिरः निविडो वा रागोदयो यासु, स एवातिशयेन रञ्जनक्षमत्वाद् रागः । तास्ताः मनोरथशतारूढा । निसर्गः स्वभावस्तेन रम्याश्चेष्टाः भ्रूभङ्गादयो मयि भवेयुः स्युः । यास्वाशंसेच्छा तया कल्पितासु किम्पुनरनुभूतास्विप्यपि शब्दः । बाह्यकरणानि चक्षुरादीनि तेषा व्यापारो विषयग्राहित्वं तस्य रोधी प्रतिबन्धकोऽ न्तःकरणस्य मनसः सान्द्रो लयस्तन्मयत्वं भवतीत्यर्थः ।

विरहस्याह - अन्यत्रेति । इति बहुवितर्काक्रान्तचि [१]त्ता वृत्तः सञ्जातो विवर्तनस्य पार्श्वलोटनस्य व्यतिकरः सम्बन्धः यस्या सा बाला निशान्तं गृहम् । 'निशान्तवस्त्यसदनम् इत्यमरः। तदभ्यन्तरे निशि निद्रां नाप्नोति । वितर्कानिवाह-गृहान्तरे स्त्र्यन्तरे वागत इत्याशङ्क्याह-अन्यत्रेति । इति इयं कथा वार्ता का, पुनः मां बिना जीवनसम्भवान्नैतत्सभाव्यते इत्यर्थः । केनचित्सुहृदा तर्हि निवारित स्तत्राह-यः माँ नेच्छति द्वेष्टि तादृगस्य सुहृदपि नास्ति । तर्हयायास्यति तत्राह । नागतश्चेति । आगतस्तु न । चस्त्वर्थे । कालातिक्रमान्नैतदपीत्यर्थः। तर्हि दैवान्नागतस्तत्राह । सहसेति । सहसा

---

[१] चित्ताः-क.।

हास्यादीनां क्रमेणोदाहरणम् -

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
तारस्वनं प्रथितथूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ।। ३७ ।।

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धौ दृशौ ।

कमलाकरी

निष्कारणः विधेर्दैवस्य कोऽयं प्रक्रम आरम्भः । विधेर्मया किमपराद्धमिति भावः। हहहेति पाठे दैन्यम् ।

ननु विरहो न भेदान्तरं प्रवासेन सिद्धेः न च दूरदेशाभावान्न तथेति । तद् विशेषणवैय[१]र्थ्यान्तमाह-एषेति । ऐक्ये हि प्रोषितभर्तृकातो भेदो न स्यात् । न च मास्त्विति वाच्यम् । भरतेन नायिकानां स्वाधीनभर्तृकादिषोडशभेदोक्तेरन्यथा विरहान्तःपातादैक्यं स्यादित्यर्थः ।

ईर्ष्याया आह- सा पत्युरिति । सा बाला मुग्धा पत्युः प्रथमोऽपराधः द्वितीयादौ चातुर्यसम्भात्, सख्येनोपदेशः सख्येत्यसमस्तं वा तयो[२] तं विना तदभावात् । सविभ्रममङ्गचलनानि वक्रोक्तयश्च ताभिः संसूचनम् । मान[३]स्येत्यर्थात् न जानसि किं त्वं जनपत्रवल्लीक्षालनात् स्वच्छैरच्छकपोलयोरुत्तानशयनान्मूले गलितैर्लुठ[४]न्तः लोला अलकाः येषु । अश्रुभिरूपलक्षितेत्यपव्याख्या । अश्रुभिरलकैश्च पर्यस्ते आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया । कान्ता विषया तु व्यक्त शृङ्गारः । व्याप्ते म्लाने वा नेत्रोत्पले यस्या इति युक्तोऽर्थः । केवलं रोदित्येव न तु वदतीत्यर्थः । अत्र पत्युरन्यस्त्रीसङ्गादीर्ष्या ।

प्रवासस्याह - प्रस्थानमिति । जीवितं प्रति नायिकोक्तिः । हे प्रियजीवित कान्तवत्त्वापि मम त्यागौचित्यात् प्रिये गन्तुं निश्चितचिते न तु गते । वलयैः प्रस्थानं कृतमिति कृशत्वम् । हृदयस्थत्वात् प्रियसखैरस्रैरश्रुभिरजस्त्रं गतम् । धृत्या धैर्येण क्षणमपि नासितं न स्थितम् । चित्तेन पुरः प्रथमं गन्तुं व्यवसितमुद्युक्तम् । भावे क्तः । न तु

---

१. वैयर्थ्यात्तथा तत्राह-क.।
२. तयोपदेशे तेन विना तदभावात् -क.।
३. मानसेत्यर्थात्-क.।
४. लुण्ठिता लोला-क.।

इत्थं घर्घरमध्यरूद्धकरणाः पौराङ्गनानां गिरः
चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ।। ३८ ।।

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिनाम्
अयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ।।३९ ।।

क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायकाः निष्पतन्तः।

कमलाकरी

गतं तेन सममित्यविरोध । गन्तव्ये इत्यवश्यार्थे कृत्यः। सुहृदामः यद्वा सुहृदां समूहः किमु कुतः त्यज्यते । त्वमपि गच्छेत्यर्थः ।

शापस्याह - त्वामालिख्येति । मेघदूते प्रियां प्रति वियुक्तगन्धर्वोक्तिः । प्रणयो मानः प्रीतिर्वा तेन कुपिताम् । धातुरागैः रक्तधातुभिर्गैरिकाद्यैः कोपेन लोहित्याद्धातुरागैरिति । मानिन्याः शय्यां हित्वा शयनात् शिलायामिति चोक्तम् । तेऽनुनयार्थमात्मानं यावद्यदा चरणानतं कर्त्तुमिच्छाम्यात्मप्रतिरूपं पादपतितं लिखितुमिच्छामीत्यर्थः। न तु करोमि । तेन दृष्टिप्रतिघाते लिखनं मे कथमिति शङ्का । तत्रापीच्छामीत्यन्वयाल्लिखनद्वारा तत्प्रतिबन्ध इत्युत्तरञ्चापास्तम् । लिखिताया अपि पादपतनावसर एव दृष्टिप्रतिघातात् । तावत्तदैव विरहस्मृत्यु[१]द्बुद्धशोकजैरश्रुभिर्मुहुरुपचयेनाश्रुमार्जनेऽप्यशक्यत्वम्, क्रूरः श्रेयोविघातकः कृतान्तो दैवं कुवेरशापो यमश्च । 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इति कोशात् । तस्मिन् लिखनेऽपि नावावयोः सङ्गमं न सहते किम्पुनर्वास्तवमित्यर्थः ।

अत्र कुवेरशापो यक्षस्य विरहे हेतुः । अत्र प्रवासहेतुत्वेऽपि तस्या विवक्षया पृथगुक्तिः । तत्वन्तु पाण्डुमाद्र्योः शापाद् विप्रलम्भः तत्र प्रवासाभावादिति ।

एवं शृङ्गारभेदानुक्त्वा हास्यादीनामुदाहरणान्याह- आकुञ्च्येति मन्त्रयुतानामम्भसां पृषतैः बिन्दुभिः प्रतिपदं पवित्रे मम मूर्ध्नि वेश्योच्छिष्टादिनाशुचिं पाणिमाकुञ्च्याङ्गुलिसङ्कोचेन मुष्टीकृत्य तारो

१. स्मृत्युद्बद्धशोक- क.।

सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ।।४०।।
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।४१।।
उत्कृत्योत्कृत्य कृतिं प्रथममथपृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

कमलाकरी

दीर्घः स्वरः शब्दो यत्र । प्रहितः थूत्कः लाला यत्र, यद्वा प्रहितः प्रेषित यूदिति शब्दो यत्रेति क्रियाविशेषणम् । प्रहारमदात् कृतवती । हा हा हतोऽहमित्युक्त्वा विष्णुशर्मा ब्राह्मणो रोदितीत्यर्थः।

अत्र विष्णुशर्मालम्बनं, थूत्कमुद्दीपनं, रोदनादयोऽनुभावाः, ग्लान्यादयो व्यभिचारिणः स्मितहसितादीन्युत्तममध्यमाधमेष्वनुभावाः। यस्य हासस्तदनिबन्धेऽपि सामर्थ्यात्तद्धीः विकृतवाग्वेषाद्यैर्हासोदयात् ।

करुणमाह – हा मातरिति । राजपत्न्यां मृतायां परिजनोक्तिरियम् । कुत्र त्वरितासि त्वरया गतासि । 'त्वमितासीति' पाठे कुत्रेतासि गतासि । हा किमिदमित्यतर्कितप्राप्तेः पूजाद्यैरप्यरक्षणाद्देवताक्षेपः । क्वाशिषो द्विजाशिषोऽपि व्यर्था इत्यर्थः । क्वशब्दस्योभयत्रान्वयः । प्राणान् धिक् एवं दुःखेऽपि स्थिरत्वात् । ते तवाङ्गेषु हुतवहोऽग्निरेवाशानिः पतितः, इमे दृशौ दग्धेऽशुभदर्शनादित्यर्थः । बहुक्रन्दनाद् घर्घरा विस्वराः वाष्पेण मध्ये रुद्धाः स्थगिताश्च ताश्च ताः करुणाश्च । इत्थं गिरः अचेतनान्यपि द्रावयन्तीत्यर्थः।

अत्र मृतालम्बनं, शरीराग्निसंयोगाद्युद्दीपनं, रोदनमनुभावः दैन्यादयः सञ्चारिणः ।

क्रोधहेतुं रौद्रमाह–कृतमिति । वेणीसंवरणे द्रोणवधेऽश्वत्थाम्नोरुक्तिरियम् । कर्त्तुरनुमन्तुर्द्रष्टुरुपेक्षकस्य च दण्डमाह । इदं गुरोर्वधरूपं पातकं यैर्भवद्भिरविवेकात् पशुभिः कृतमनुमतं दृष्टञ्च तेषां नरकरिपुणा श्रीकृष्णेन सार्द्धं भीमार्जुनसहितानाम् असृक् रक्तं मेदो वसा मांसञ्च तैर्दिशां वलिं पूजामयंमहमसहाय एव करोमीत्यर्थः ।

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्काद-
ङ्कस्थादस्थिसंस्थात्स्थपुटगतमपिक्रव्यमव्यग्रमत्ति ।।४२ ।।
चित्रं महानेष बतावतारः क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ।।४३।।

एषां स्थायिभावानाह-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ।। ३० ।।

कमलाकरी

अत्र भीमादय आलम्बनम्, आयुधाद्युद्दीपनं, प्रतिज्ञानुभावः गर्वस्सञ्चारी ।

उत्साहहेतुर्वीरः स च त्रिधा । युद्धवीरो दयावीरो दानवीरश्चा तत्राद्यमाह - क्षुद्रा इति । इन्द्रजिदुक्तिः । जात्या पलायनाच्च क्षुद्राः भो हरयः त्रासं विजहत त्यजत । एते इति सम्बुद्ध्ययोगादेते यूयं विजहतेत्यन्वयः । एनमिति युक्तः पाठः । परं केवलं लज्जां दधतीति न तत्र पतिष्य[१]न्तीत्यर्थः । हेतुमाह-क्षुण्णेति । शक्रेभ ऐरावतस्तस्य कुम्भः क्षुण्णो भिन्नो यैः । सौमित्रे इति मातुः प्रियत्वाद् युद्धानभिज्ञतोच्यते । तिष्ठ विरम हि यतः त्वं रूषां पात्रं न योग्यो न । ननु रे बाल, अहं मेघनादः, नादेनैव तव मूर्च्छा युद्धे चर्चा कुत्रेत्यर्थः । किञ्चित्संरम्भः ईषत्क्रोधः स एव लीला तया नियमितो बद्धः वशीकृतो वा जलधिर्येन, रामान्वेषणे विकत्थनापत्तेः एषोऽहं राममनुयामीत्यन्वयः ।

अत्र राम आलम्बनं, जलधिनियमनाद्युद्दीपनं, शरपातलज्जारामस्पर्धाद्यनुभावाः, हर्षादिर्व्यभिचारी । दानवीरो भार्गवो यथा-

उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुः
वीर्यं यस्य[२] न तद्गिरां पथि न व्यक्तं हि तत्कर्मभिः ।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः
सत्यब्रह्मतपोनिधेः भगवतः किं किं न लोकोत्तरम् ।।

दयावीरो यथा-

अनाद्रतचमूपतिंप्रहितहस्तमस्वी[३]कृत-

---

१. प्रतिष्यन्तीत्यर्थः-क.।
२. यस्य तु तद्विषां पथि-क ।
३. मस्वीकृतं -क.।

व्यभिचारिणो ब्रूते-

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यञ्च चिन्तामोहः स्मृतिर्धृतिः ।। ३१ ।।
व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ।। ३२ ।।
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।। ३३ ।।

कमलाकरी

प्रणीतमणिपादुकं किमिति चाकुलान्तःपुरम् ।
अवाहनपरिच्छदं पतगराजमारोहतः
करिप्रवरवृंहिते भगवतस्त्वरायै नमः ।।
यथा वा- यद्गोविन्देति चुक्रोश कृष्ण मां दूरवासिनी ।
ऋणन्तु तत्प्रवृद्धं मे हृदयान्नापसर्पति ।।
यद्वा-
चिकीर्षिते कर्मणि चक्रपाणेरपेक्षणीया न सहायसम्पत् ।
पाञ्चालजायाः पटसंविधाने मध्येसभं नापि तुरी व वेमा ।।

परमानन्दस्तु एषाममानुत्वादद्भुते ऽन्तर्भविमाह । रौद्राद्वीरस्ये यानेव भेद यद्वीरें वि[१]वेको रौद्रे तदभावः ।

भयानकमाह - ग्रीवाभङ्गेति । शांकुन्तले मृगमुद्दिश्य दुष्यन्तस्य राज्ञः सारथीं प्रत्युक्तिः । एष पूर्वप्रक्रान्तो मृगः ग्रीवाया भङ्गो वक्रीभावस्तेनाभिरामं यथा देशवैषम्येण रथादर्शनान्मुहुर्दत्तदृष्टिरनुपतति धावति । पश्चादर्धं पश्चार्धमिति निपातः । त्राणाय भूयसा स्थूलेन जघन-भागेन पूर्वदेहं प्रविष्टः । स्थूलस्य कृशे प्रवेशवर्णने भयपोषः । न च

१. विवेकी- क.।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ।।३४ ।।

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादनं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम् ।

कमलाकरी

भयस्य स्वपदोपादानं दोषः, राज्ञो रथाद्वा भयस्य रसप्रकृतिकत्वात् । स्वयं भ्रंशिभिर्न तु तेन त्यक्तैः । उदग्रं तीव्रं प्लुतमुड्डानं यस्य तत्वात् वियत्याकाशे । भूपस्य साम्याभावाद्बहु ऊर्व्यां तत्साम्यादल्पंतु वियति प्रयाति । पश्येति सारथिं प्रत्युक्तिः ।

अत्र राजा रथो वाऽऽलम्बनं, शरपाताद्युद्दीपनं, पलायनमनुभावः श्रमस्सञ्चारी ।

बीभत्समाह – उत्कृत्येति । मालतीमाधवे श्मशानवर्णनम् । प्रेतेषु रङ्को प्रेतान्तरनयनाशङ्कयाऽङ्कसंस्थात् करङ्कात् कङ्कालात् शवात् प्रथमं पूर्वकृत्ति त्वचमुत्कृत्योत्कृत्य पृथुरुत्सेधः शोफः । 'उच्छोफ' इति पाठे स एवार्थः । तेन भूयांसि बहुलानि अंसौ च स्फिक् च कटिश्च पृष्ठभागः पिण्डीजघनं पश्चात् पिण्डौ । पिण्ड इति पाठेऽपि स एवार्थः । तत्र सुलभान्युग्रस्तीव्रः पूतिर्दुर्गन्धो येषां तानि मांसानि जग्ध्वा भक्षयित्वाऽथ स्थपुटं निम्नो विषमश्च भागोऽत एवास्थिसन्धिगतं क्रव्यं मांसमव्यग्रमेकाग्रचित्तं त्वरया वा अत्ति । आर्त्तः पिशाचान्तरनयनभीत्याऽतएव पर्यस्ते प्रसारिते नयने येन सः । दैन्याद्दन्तप्रकटनम् ।

अत्र शव आलम्बनम्, उग्रगन्धाद्युद्दीपनं, नासाकुञ्चन वान्ताद्यनुभाव उद्वेगादि सञ्चारी ।

अद्भुतमाह – चित्रमिति । बलेर्वामनमुद्दिश्योक्तिः । बत हर्षे । भङ्गिः रचना । एष महानवतार इदं चित्रम् । अविकार इति पाठे

तेन -

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रियौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा गम समदृशो यान्ति दिवसाः ।
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः ।। ४४ ।।

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।

भावः प्रोक्तः

कमलाकरी

विकाराभावः । अत्र चित्रं महान् बत लोकोत्तरमहो क्वापि नूतनशब्दाः वर्णनीयस्यालौकिकत्वव्यञ्जकाः ।

अत्र वामन आलम्बनं, कान्तिरुद्दीपनं, चिकासोऽनुभावः, हर्षस्सञ्चारी । यद्वा-

कल्याणञ्च क्रियासुः मिलिदटनियुगस्थास्नुगीर्वाणभोगि -
स्त्रैणव्यत्यस्तकल्पद्रुमनवसुमनोनागहारावलीनि ।
नालीकाश्लिष्टलक्ष्मीकरचलनलिनोद्वातमाध्वीकधारा-
तिम्यद्बालेक्षणानि त्रिपुरहरधनुर्ज्यालताकर्षणानि ।।
तथा 'भ्रश्यद्विश्वम्भराणीत्यादि ।

एषामिति । आस्वादे स्वतो भेदाभावेन तद्भेदाधीनभेदत्वादित्यर्थः सामान्यलक्षणन्तु-

आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया कान्ताविषया तु व्यक्त शृङ्गारः ।

उदाहरणम् -

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ।। ४५ ।।
हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ।।४६।।

कमलाकरी

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायिपदास्पदः ।।इति ।
रत्याद्यव्याख्यायां हेतुमाह- स्पष्टमिति । भरतशास्त्रे इत्यर्थ । यथा-
रतिर्मनोऽनुकूलेऽर्थे मनसः प्रव[१]णायितम् ।
रागादिवैकृताच्चेतो विकासो हास उच्यते ।
इष्टनाशादिभिश्चेतो वैक्लव्यं शोक उच्यते ।
कार्यारम्भे त्वरोत्साहस्तैक्ष्ण्यं वै क्रोधं संज्ञितम् ।
रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम् ।
दोषेक्षणादिभिर्गर्हा जुगुप्सेति निगद्यते ।
विस्फारश्चेतसो यस्तु स विस्मयः उदाहृतः ।।

---

१. प्रवणायिता-क.।

एवमन्यदप्युदाहार्यम् ।

अङ्गितव्यभिचारी यथा-

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत् परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ।। ४७ ।।

अत्र विधिं प्रत्यसूया ।

तदाभांसा अनौचित्यप्रवर्तिताः ।

कमलाकरी

ये तु- लीलाविलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ।
विकृतञ्चेति विज्ञेया दश हावास्तु योषिताम् ।
केचिज्जृम्भामपि प्राहुः । तत्र
भूषाद्यनुकृतिर्लीला विलासो नेत्रवाक्कृतः ।
अपूर्वभूषाविच्छित्तिर्विभ्रमः स्थानपर्ययः ।
क्रोधाश्रुहर्षभीत्यादिसङ्करः किलकिञ्चितम् ।

परेभ्यस्त्रासलज्जादेर्मृष्टिः[१] मोट्टायितं रहः । निभृत निभृतं निभालयन्त्या वरुणाशाभरणायितं पत[२]ङ्गम् । गुरुयन्त्रितयापि गोपनार्या नयन्तान्तेन निमन्त्रितो मुकुन्दः ।।

१. पृष्टिर्मेदायितं-ब.।
२. पतङ्गः-क.।

तदाभासा रसाभासा भावाभासाश्च ।

तत्र रसाभासो यथा-

स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्
तपश्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ।। ४८ ।।

अत्रानेककामुक विषयमभिलाषं तस्या स्तुम इत्याद्यनुगतं बहुव्यापारोपादानं व्यनक्ति ।

कमलाकरी

सुखे दुःखचेष्टा कुट्टमितं, गर्वाद्यैरनादरो विब्वोकः ।

यथा - रिपुरिति पुरतो भयार्त्तरक्षः -
कलकलितैर्नयनाञ्चलीमुदस्य ।
नर इति दशकन्धरानुजन्मा
पुनरलसायितलोचनः स्म[१] शेते ।।

[२]ललितं सुष्ठ चेष्टितं, प्रियसन्निधावप्यभिलाषपूर्तिः विकृतम् । एषामेष्वेवान्तर्भावात् भरतानुक्तेश्च नोक्तिः । सामाजिक-निष्ठाश्चानुभावैरुन्नेयाः । करुणबीभत्सभयानकानां शोकाद्यालम्बनतया दुःखरूपत्वेऽपि शोकाद्यवच्छिन्नचैतन्यस्यानन्दांशे आवरणभङ्गे उत्कटेच्छाविषयत्वाद्रसत्वम् । कथमन्यथा रामायणादौ प्रवृत्तिरिति दिक् । तत्वन्तु कवेर्ज्ञातिवर्णने कौशलमात्रात्तत्र चमत्कारः ।

भावानां व्यभिचारिगर्भत्वात्तानाह - निर्वेदेति । स्वनामतोऽन्वर्थं संज्ञया लब्धार्था इत्यर्थः । सामान्यलक्षणन्तु-

---

१. स्मरेशे -क.।
२. ललितमित्यारभ्य अनुभावैरुन्नेया इत्यन्तोंऽशः क. पुस्तके नास्ति ।

भावाभासो यथा-

राकासुधारकमुखी तरलायताक्षी
सा स्मेरयौवनतरङ्गित-विभ्रमाङ्गी ।
तत् किं करोमि विदधे कथमत्र मैत्रीं
तत् स्वीकृतिव्यतिकरे क इवाभ्युपायः ।। ४९ ।।

अत्र चिन्ता अनौचित्यप्रवर्तिता । एवमन्येऽप्युदाहार्याः ।

भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।। ३६ ।।

क्रमेणोदाहरणम् -

तस्या सान्द्रविलेपनस्तनतटप्रश्लेष-मुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपायते ।

कमलाकरी

विशेषाभिमताः काव्ये स्थायिनं चारयन्ति ये ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ।। इति
विशेषो यथा-
तत्वज्ञानापदीर्ष्यादेः निर्वेदः स्वावमाननम् ।'
यथा-

आधायाधाय राधाधव तव चरणाम्भोजमन्तः समाध-
वन्ये रण्येति पुण्ये पुलकितमनसो वासरान् वाहयन्ति ।
देशे देशे दुराशाकवलितहृदयो निष्कृपाणां नृपाणां
धावं धावं पुरस्तादतिकुमतिरहं जन्म संवाहयामि ।।

यथा वा -

मृषात्मगुणकत्थने गुणिनि दोषसञ्जल्पने
परस्य परपीडने भृशमनीयतायुर्व्ययम् ।
अतः परमपि क्षणं न यदि यादवाधीशितुः
कदापि न कथाश्रयस्य ह ह जन्म सर्वं वृथा ।।

इत्युक्ते क्व तदित्युदीर्य सहसा तत् सम्प्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात् तन्व्या च तद्विस्मृतम् ।। ५० ।।

अत्र कोपस्य ।

एकस्मिन् शयने विपक्षरणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।। ५१ ।।

अत्रौत्सुक्यस्य ।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।

कमलाकरी

बलस्यापचयो ग्लानिः । यथा-

किसलयमिव लूनं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डुक्षाममस्याः शरीरं
शरदिज इव धर्मः केतकीगर्भपत्रम् ।।

शङ्काऽनिष्टसमुन्नयः । यथा-

चित्रं कनकलतायां पल्लव एवामृत सूते ।
कुसुमसमुद्गमसमये नो जाने किं परं भावि ।।

यथा वा कौशल्योक्तिः-

लोचनस्य शरयूरविदुरे गेहमेव तमसा तटिनीयम् ।
शृङ्गवेरमपि सख्युरधीनं कुत्र वत्स्यति परेऽहनि रामः ।।

असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता । यद्वा

'परोत्कर्षाक्षमाऽसूया' । यथा –

रे रे राजकुलाधम प्रकटितं ब्रा[1] ह्मण्यमस्त्रैस्त्वया-
प्येकामेव निशाचरीं त्वमवधीर्माता न मे ताटका ।
शीर्णं भग्नमिह त्वया हरधनुः क्षुण्णं क्लैत्तत्वया-
पीत्थं भार्गवरोषपोषणकरः पायात् स वो राघवः ।।

सम्मोहानन्दसम्भेदो मदो मद्योपयोगसः । यथा माघे

प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढ़सूचितरहस्यसहायः सुभ्रुवां प्रववृते परिहासः ।।
(शिशुव १०।१२)

यथा वा-

घूर्णत्पा[2] टलनेत्रपालिविगलन्मुक्तावलिप्रस्खलन्-
मैरेय[3]प्लुत सृक्कतिक्कणदलिव्यादष्टदन्तच्छदम् ।
क्षौमोद्वीजनखिन्नरेवति हलव्यालम्बि दोर्वल्लरि-
भ्रश्यत्कुन्तलि लोलकुण्डलि नुमस्तालाङ्कमाद्यं महः ।।

श्रमः खेदोऽध्वगत्यादेः । यथा-

सद्यः पुरीपरिसरेषु शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ।। (हनु.ना.)

यथा च माघे सुरतश्रमोक्तिः ।

क्रियाविद्वेष आलस्यम् । यथा-

---

१. ब्रह्माणमस्त्रै-क.।
२. चूर्णत्पाटल-क.।
३. मैरेयष्णुत-क.।

वैदेही परिरम्भ एष च मुहुश्चैतन्यमामीलयन्
आनन्दो हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्धयन्मतः ।। ५२ ।।
क्वाऽकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ।। ५३ ।।

अत्रौत्सुक्यवितर्कमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलतां । भावस्थितिस्तूक्ता उदाहृता च ।

कमलाकरी

चलति कथञ्चित्पृष्टा यच्छति वाचं कथञ्चिदालीनाम् ।
आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः ।।

सत्वत्यागादनौजस्यं वाक्यादेर्दैन्यमुच्यते । यथा-

जीर्णा तरिः सरिदतीवगभीरतीरा
बाला वयं सकलमित्थमनर्थहेतुः ।
विश्वासबीजमिदमेव कृशोदरीणां
यन्माधव त्वमसि सम्प्रति कर्णधारः ।।

ध्यानं चिन्ता हिताप्राप्त्या सन्तापादिकरी मता ।
यथा- अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानततिं तदीयाम् ।
श्वासान् स वर्षत्यधिकं पुनर्यद् ध्यानात्तव त्वन्मयतामवाप्य ।।
(नै च.३।१०६)

मोहो विचित्तता भीतिर्दुःखवेगानुचिन्तनैः । यथा-
तीव्राभिषङ्गप्रभवेन वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ।। (कु.सं.३।७३)

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।।

ते भावशान्तयादयः । अङ्गित्वं राजानुगत विवाहप्रवृत्तभृत्यवत् ।

अनुस्वानाभसंलक्ष्यक्रम-व्यङ्ग्यस्थितिस्तु यः ।। ३७ ।।

शब्दार्थोभयशक्त्युत्थस्त्रिधा सः कथितो ध्वनिः ।

शब्दशक्ति मूलानुरपानम् रूप व्यङ्ग्यः, अर्थशक्तिक्त्युत्थ लानुरपनरूपव्यङ्गः, उभयशक्रिमूलानुरणनरूपः व्यङ्गश्चेति त्रिविधः ।

कमलाकरी

स्मृतिः पूर्वानुभूतार्थधीः । यथोत्तर (राम)चरिते सुमन्त्रोक्तिः

अवगणितसुरासुरप्रभावं
शिशुमवलोक्य तवैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे ।
धृतधनुषं रघुनन्दनं स्मरामि ।। (उ.रा.च. (५।४)

धृतिस्तोष उच्यते । यथा

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलै,
सम इति परिणामे निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ।।

सङ्कोचश्चेतसो व्रीडा यथा–

हृतवति दयिते हृदो दुकूलं हरिणकिशोरदृशो ह्रिया नम[१]न्त्यः ।
कुचशिखरशिखाचरीस्मितश्रीरमृतझरीमधरी चरीकरीति ।।

वाक्पारुष्यकरी चेतोऽनवस्था चापलं मतम् । यथा–

१. नमन्त्याः–क.।

अलङ्कारोऽथ वस्त्वेव शब्दाद् यत्रावभासते ।। ३८ ।।

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।

वस्त्वेवेति, अनलङ्कारं वस्तुमात्रम् ।

कमलाकरी

'काश्चित्कराभ्यामुपगूढनाल' (रघु.६.१३) मित्यादि रघुवंशे । मनः प्रसादो हर्षः स्यात् । यथा-

आगते दयिते बाला हर्षोत्कर्षवशम्वदा ।
उत्तरीयं न जानाति विभ्रष्टः स्तनमण्डलात ।।

आवेगः सम्भ्रमो राजगतवृष्टयादि सम्भवः । यथा-' अर्घ्यमर्घ्यमिति वादिनं नृपम् ' (रघु. ११।६९) इत्याद्युदाहरणमिति परमानन्दः युक्तन्त्वसूयोदाहरणमिदम् । अस्य तु-

एको वक्षसि विश्लथे सहचरीस्कन्धे द्वितीयः करः
पश्चाद्गच्छति चक्षुरेकमितरद्भर्त्तुर्मुखे भ्राम्यति ।
एकं कण्टकविद्धमस्ति चरणं निर्गन्मुमत्कण्ठते
चान्यद्राक्षससुभ्रुवां रघुपतेरालोक्य सेनाचरान् ।।

क्रियास्वपाटवं जाड्यम् । आलस्ये तु क्रियाद्वेषः नात्रेति भेदः यथा- आगताः प्रथममाहित गर्वं, कूलसीन्नि मुषिता इव तस्थुः ।
वानरा चलितकन्धरबन्धं, नीरधौ निदधिरे नयनानि ।।
निन्दादितः परावज्ञा गर्वोऽसूयादिजो भवेत् । यथा-

पीत्वा गर्जन्त्यपस्ते दिशि दिशि जलदास्त्वं शरण्यो गिरीणां
सुत्रामां त्रासभाजां विवुधविटपिनां जन्मभूमिस्त्वमेव ।
गाम्भीर्यं तच्च तादृटक् तव सलिलनिधे किन्तु विज्ञाप्यमेतत्
सर्वोपायेन मैत्रावरुणि मुनिकृपादृष्टयः काङ्क्षणीयाः ।।

यथा वा-

अ[१]द्राक्षं नृपवृक्षकान् परशुना[२]धाक्षं प्रतापानले

---

१. अद्राक्षंधृष(१)वृक्ष-क.।
२. परशुनाधाक्षं-क.।

आद्यो यथा-

उल्लास्य कालकरवालमहाम्बुवाहं
देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः ।। ५४।।

अत्र वाक्यस्यासम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीदिति प्राकरणिका-प्राकारणिकयोरुपमानोपमेयभावः कल्पनीय

कमलाकरी

रक्ताक्षं भटरक्तपङ्किलमरिक्षेत्रं यशस्त्रीहलैः ।
रावाप्सं बहुकीर्तिबीजमथ यत्तसैन्धितान्वस्तृण-
प्रा[१]यानुच्छिनिदानि कीर्तिरथ मे गन्ता दिगन्तानपि ।।

सत्वभ्रंशो विषादः स्यात् । यथा-
व्यर्थं यत्र हरीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा चलतो न यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामपिषयस्तत्र प्रिया क्वास्ति मे ।।

यथा वा-
न मे तादृग्ग्वल्लीनियमितजटामण्डलमिदं
न वारण्यानीषु भ्रमणमनुजस्यार्द्रवपुषः ।
इयं यादृक्कान्तारणितकरतप्तो स्वरभुवि
प्रयान्ती पादाब्जे व्यथयति मनो हा विधुनती ।।

औत्सुक्यं वाञ्छितप्राप्तौ कालक्षेपासहिष्णुता । यथा-
गतया पुरः प्रतिगवाक्षमुखं
दधती रतेषु भृशमुत्सुकताम् ।

---

१. प्रख्यानुच्छिविदानि-क.।

इत्यत्रोपमालङ्कारो व्यङ्ग्यः।

तिग्मरुचिरप्रतापो विधुरनिशाकृत् विभो मधुरलीलः ।
मतिमानतत्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ।। ५५।।
अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः ।
अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।

कमलाकरी

मुहुरन्तराल भुवमस्तगिरेः
सवितुश्च योषिदमिमीत दृशा ।।

निद्रा व्यापारवैमुख्यमिन्द्रियाणां श्रमादिभिः । मनसोऽपि तेन स्वप्नाद् भेदः । यथा 'अथावलम्ब्य क्षणमेकपादिका (नै १।१२१) मित्यादि नैषधे ।

मनः क्षेपस्त्वपस्मारः। यथा माघे-

आश्लिष्टभूमिं रसितारमुच्चै
र्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगाना-
मसावपस्मारिणमाशशङ्के ।। (शि.व.३।७२)

अन्यव्याधेस्तु रसान्तरेऽपि सत्वम् ।

विषयानुभवे निद्रा स्वप्नः सुप्तञ्च तत्स्मृतम् । यथा-

एते लक्ष्मण जानकीविरहिणं मां खेदयन्त्यम्बुदाः
मर्माणीव विघट्टयन्त्यलममी क्रूराः कदम्बानिलाः ।
इत्थं व्याहतपूर्वजन्मचरितो यो वीक्षितो राधया
सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः ।।

निद्रापगमहेतुभ्यः प्रबोधः चेतनागमः । यथा [१] माघे-

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः
प्रतिपदमुपहूतः केनचिज्जागृहीति ।

---

१. माघे एकादशे-ब.।

अहितः सहितः साधुयशोभिरसतामसि ।। ५६ ।।

अत्रापि विरोधाभासः ।

निरुपादानसम्भारमभित्तावेव तन्वते ।

कमलाकरी

मुहुरविशदवर्णां निद्रया शून्यशून्यां
दददपि गिरमन्तर्बुद्ध्यते नो मनुष्यः ।। (शिशु.११।४)

यथा वा- प्रातः स्मरामि दधिघोषविधूतनिद्रं
निद्रावसान रमणीयमुखारविन्दम् ।
हृद्यानवद्यवपुषं नवनीतचोर-
मुन्निद्रमब्जनयनं नयनाभिरामम् ।।

कोप एव स्थिरोऽमर्षः । यथा-'मथ्नामि कौरवशतम् (वे.सं.) इत्यादि । यथा वा-

कस्त्वं बालितनूद्भवो रघुपतेर्दूतः स बालीति कः
को वा वानर[१] राघवः समुचिता ते बालिनो विस्मृतिः ।
त्वां बद्ध्वा चतुरम्बुराशिषु परिभ्राम्यन्मुहूर्तेन यः
सन्ध्यामपर्ययति स्म निस्तृप कथं तातस्त्वया विस्मृतः ।।

अवहित्थाऽऽकारगुप्तिः । यथा-

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।। (कु.सं.६।८४)

अधिक्षेपापमानादेश्चेतश्चण्डतत्वमुग्रता । यथा - 'चञ्चद्भुजभ्रमित (वे.१।२१) मित्यादि वेण्याम् ।

मतिः शास्त्रार्थ-निर्द्धारः । यथा शाकुन्तले -

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।। (शा.१।२२)

---

१. राघवसमुचितो -क.।

जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ।। ५७ ।।

अत्र व्यतिरेकः ।

अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता ।

कमलाकरी

व्याधिर्विरहजा व्यथा । यथा-

विरहतप्ततदङ्गनिवेशिता कमलिनीनिमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ।।

उन्मादत्तश्चिविक्षेपः । यथा नैषधे-(नै.च.४।३२)

इत्थं वदन्त्या यदलोपि लज्जा साऽनौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषतायामुन्माद्य यस्तत्तदवीवदत् ताम् ।।(नै.
३।९७)

अन्त्यावस्थाऽथवा मूर्च्छा मृतिः । यथा-

मुहुर्व्यजनवीजनैर्बहलचन्दनासेचनैः
सरोजदलसङ्गमैरपि न चेष्टते सुन्दरी ।
परन्तु तव नामनि प्रियसखीभिरावेदिते
निवेदयति जीवितं श्रवणसीम्नि रोमोद्गमः ।।

त्रासोऽथ कम्पभूः । यथा किराते-

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनात्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोक
नीयताम् ।। (कि.८।४५)

तर्को विचारः सन्देहात् । स चतुर्धा -विचारः, संशयोऽनध्यवसायो विप्रतिपत्तिरिति । यथा-

किं मां विलोकयसि वक्रितकुण्ठनाले
नाहं घटाङ्कितकटीं प्रमदां भजामि ।
दासस्तवास्यसदृशो मम सम्प्रनष्टः
सोऽयं भवेन्नहि भवेदिति मे वितर्कः ।।

वस्तुमात्रं यथा -

पंथिअ ण एत्थ सत्थरमत्थि त्रमणं पत्थरत्थले गामे ।
उण्णअपओहरं पेक्खिऊण जउ वससि ता वससु ।। ५८ ।।

कमलाकरी

पर्याप्तिरेकत्र कलत्रलोभे परत्र च क्षत्रकुले कलङ्कः।
इति क्षणं धूर्जटिचापभङ्गे दोलायितो दाशरथिः पुनातु ।।
द्विधाकृतात्मा किमयं दिवाकरः विधूमरोचिः किमयं हुताशनः ।
गतं तिरश्चीनमनरुसारथे प्रसिद्धमूर्द्धज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितञ्जनैः ।।
(शिशु.व. १।२)

यथा मम-

केचिद्दिक्करिकुम्भचालनभवं वाताभिघातोद्भवं
के चिन्नीरधिवीचिदोलनभवं तन्मीनजातं परे ।
भू[१]कम्पं ब्रुवते वयं हरिगुणश्रेणी समाकर्णन-
प्रोद्यद्धर्षफणीन्द्रकम्पित शिरः श्रेणीभरं ब्रूमहे ।।

यास्त्वभिलाष-चिन्तास्मृतिगुणकथोद्वेग-प्रलायोन्मादव्याधि-जाड्यनिधानानिवियोगे दशावस्थास्तासामौत्सुक्यादावन्तर्भावान्न पृथक्त्वम्। क्वचित् स्थायिनोऽपि सञ्चारिणः, यथोक्तम्-

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ।
शान्ते जुगुप्सा कथिता व्यभिचारितया बुधैः ।।

अन्ये तु - छलविनयानुनयोपदेशोपालम्भानप्यधिकानाहुः । एषां भरतेनानुक्तत्वान्न सङ्ग्रह इति भावः ।

नाटये इत्युक्ते काव्ये नवमो रस उक्तः, स कोऽत आह-निर्वेदस्येति । विषयनिवृत्तिरूपत्वादमङ्गलत्वं, स्थायिसञ्चा-रिमध्यपाठादुभयरूपत्वम् । तेन वस्तुतत्वज्ञाने निर्वेदस्य स्था[२]

१. भूकम्पं-क.।
२. स्थायित्वाच्छान्तत्वमिष्टवियोगादिजस्य च -ब.।

अत्र यद्युपभोगक्षमोऽसि तदा आस्वेति व्यज्यते ।

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ।। ५९ ।।

कमलाकरी

यित्वाच्छान्तरसत्वमिष्टं वियोगादिजस्य च सञ्चारित्वम् । तदुक्तम् –'स्थायी स्याद्विषयेष्वेव तत्वज्ञानाद् भवेद्यदि । ' केचित्तु – न निर्वेदः शान्तस्य स्थायी, तस्य विषयेषु तुच्छधीरूपत्वात् शान्तरसस्यानन्दस्वरूपत्वात् । तदुक्तम् –

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।। " इति ।

अतो शमोऽस्य स्थायी निर्वेदस्तु व्यभिचारी । तदुक्तम्– 'शमो निरीहावस्थायामात्मविश्रामजं सुखम् ।' इति । अन्ये तु करुणवद्गतिमाहुः ।

अहो वेति । द्वयोः साम्यार्थं वाशब्दद्वयं, स्त्रैणं स्त्रीसमूहः प्रलापोऽनर्थकं वचः, तत्राप्यसहिष्णुता । तेन शिवविष[१]यान्न रतिः–यद्वा प्रवदत इत्यर्थः ।

अत्र विरक्त आलम्बनम्, अनुतापविषयदोषादय उद्दीपकाः साम्यधीरनुभावः धृत्यादयः सञ्चारिणः ।

एवं रसभावेत्यत्र रसस्तस्य स्थायिनो रत्यादयः सञ्चारिणश्चोक्ताः । अथ क्रमप्राप्तं भावमाह– रतिरिति । देवादिविषया रतिः, रत्यादिः पूर्वोक्तः स्थायीभावः सर्वोऽपि भावः प्रोक्तः । तथाऽञ्जितः प्राधान्येन व्यञ्जित पूर्वोक्त व्यभिचारी च भाव इत्यर्थः । देवादिविषयाः प्रधानभूताश्च रतिहासादयो भावाः कान्तादिविषयास्तु रस एव तथा प्राधान्येन व्यञ्जिताः पूर्वोक्ताः निर्वेदादयो व्यभिचारिणश्च भावा इत्युच्यन्ते । तेषामङ्गत्वे स्वशब्देनोक्तौ च व्यभिचारित्वमेवेति ता[२]त्पर्यम् ।

१. विषयाऽ यान्न (षयान) रतिः
२. तात्पर्यार्थः–क.।

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते ।

अर्थशक्त्युद्भवोप्यर्थो व्यञ्जकः सम्भवी स्वतः ।। ३९ ।।
प्रौढौक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य वा ।
वस्तु वालङ्कृतिर्वापि षड्भेदोऽसौ व्यनक्ति यत् ।।४०।।
वस्त्वलङ्कारमथवा तेतनायं द्वादशात्मकः ।।

स्वतःसम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद् बहिरप्यौ

कमलाकरी

देवादिपदव्यावर्त्यमाह- कान्तादीति । व्यक्ता विभावाद्यैः प्रधानभूता चेत्यर्थः । तेनापुष्टत्वेऽन्याङ्गत्वे च रतिमात्रं न रसः । तदाहुः-

" रत्यादिश्चेन्निरङ्गः स्याद्देवादिविषयोऽथवा ।
अन्याङ्गभावभाग् वा स्यान्न तदा स्थायिशब्दभाक् ।।"

देवविषयां रतिमाहः कण्ठकोणेति । हे ईश कालकूटं विषमपि ते कण्ठ एव कोण एकदेशस्तत्र सम्बद्धं मेऽमृतमेव त्वदनुग्रहेण विषस्यापि जीवनहेतुत्वात् । उपात्तमप्यमृतं चन्द्ररूपं भवद्वपुषो भेदेन वृत्तिः स्थितिर्यस्य तादृशञ्चेति परमानन्द । उपात्तं पीतमप्यमृतं सुधा भवद्वपुषो भेदोऽसम्बन्धस्तद्वृत्तिश्चेत्तदा मे मह्यं न रोचते । यद्वा भवद्वपुर्यदि मयि भेदवृत्ति भेदधीवत् यद्वा मे मम वपुर्भवत् भवत्तः इति छेदः, यदि भेदवृत्ति भिन्नस्थिति चेत्तदोपात्तममृतमपि मे न रोचते । त्वां विना तस्यापि विषत्वात् । अतएवेशेति सम्बुद्धिः। तदुक्तम्- ' विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया' (रघु.) इति मदीयः पन्थाः ।

अत्र शिव आलम्बनं, स्तवोऽनुभावः, धृतिस्सञ्चारी, अत्रानन्दात्मकत्वेऽपि स्वतन्त्रेच्छमुन्युक्त्यैव न रसत्वमिति परमानन्दादयः । न चायं शान्तः भेदावभासात् । वयन्तु देवतादिविषय भावस्यारसत्वोक्तिर्हृदयशून्योक्तिरेवाश्रुवैचित्र्याद्यैरानन्दस्यानुभव-सिद्धत्वादिति ब्रूमः ।

मुनिविषयामाह-हरतीति । माघे नारदं प्रति श्रीकृष्णोक्तिः । भवदीयस्य सेवकादेरपि कस्यचित् किम्पुन्न दर्शनं कालत्रयेऽतीतेऽनागते भविष्यति च योग्यतामिष्टला[1]भार्हतां गमयति । अलब्धला[2] भवाचियोगशब्दाद्दण्डादित्वाद्यत् । एष्यत आगमिष्यतः शुभस्य

१. लाभार्हतामयति-क.।
२. अलब्धताभाववियोगशब्दा-क.।

चित्येन सम्भाव्यमानः। कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः। वस्तु वाऽलङ्कारो वाऽसाविति षोढ़ा व्यञ्जकः। तस्य वस्तु वाऽलङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः।

क्रमेणोदाहरणम् -

कमलाकरी

हेतुरित्यन्वय। एह्येहि पुत्रेति उदाहरणमिति क्वचित्पाठः तद् यथा-

एह्येहि पुत्र रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्द्धनि चिरञ्च परिष्वजेऽहम्।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकं द्वयन्ते॥

व्यभिचारिणः प्रा[१]धान्ये आह- जाने इति। जाने स्मरामि, नत्वाहार्यमित्यर्थः। शठेन विधिनेति जाने इत्यन्वयो वा। विधेरेवैतत् कार्यमिति जाने इतिवा। मा मां मा संस्पृश। यद्वा कोपाद्वीप्सा। पाणिनैव निषेधो न वाचेत्यन्ये। मां पाणिना मा स्पृशेति तु तत्वम्। दृष्टान्ततो गन्तुं प्रवृत्तेत्यन्वयः। भ्रातरिति सखायं प्रत्युक्तिः। दरिद्रपदात् स्वस्य शोच्यता।

असूयेति। शठपदादित्यर्थ स्वप्राद्धिप्रलम्भरसत्वेऽपि विध्यसूयैव शठपदात् प्रधानमिति भावत्वमित्यर्थः। अननुरक्तविषयत्वाद्रसानुद्बोधस्तेन भावत्वमिति देवनाथः। विप्रलम्भरसत्वेऽपि भावत्वाविरोधः। उपधेयसङ्करेऽप्युपाधेरसङ्करात्तेन 'त्वामालिख्ये (मे.दू) ति विप्रलम्भादभेदापत्तिशङ्का परास्ता।

तदाभासा इति। अनौचित्यं प्रकर्षाभावः लोकशास्त्रविरोधित्वमित्यर्थः। स्तुमः कमिति। रण एव मखो यज्ञस्तस्य मुखेऽग्रे

---

१. प्राधान्येनाह-क.।

अलससिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ ।
इअ भणिएण णअंगी पफ्फुल्लविलोअणा जाआ ।। ६० ।।

कमलाकरी

कः प्राणान् विलेभे दत्तवान् । मृगयसेऽन्वेषयसि । अत्रेति -स्तुतेः कान्ताव्यापारत्वाभावादतद्गुणसंविज्ञानबहुव्रीहिणा पुमन्वेषणालिङ्गनादिग्रहणं स्तुम इत्यादिभिरनुगतं कृतम् । बहूनां व्यापाराणां बहुषुं पुरुषेषु वा व्यापाराणामालिङ्गनादीनामुपादान क[1]र्तृ तस्याः पतिव्रताया अनेके कामुका जारास्तद्विषयमभिलाषं कर्मीभूतं व्यनक्तीत्यन्वयः । तेन द्रौपद्या अनेकपतिषु व्यापारो नाभासः 'निश्शेषच्युते' त्यादौ स्वैरिण्या जारविषयोऽभिलाषो नाभासः तस्यानौचित्याभावात् । तदुक्तम् -

'उपनायकासंस्थायां मुनिगुरुपत्नीगतायाञ्च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ।
'आभासत्वं कथितम्', (सा.द. ३।२६३-६४) इत्यादि ।

यद्यप्येकस्मिन्नपि पुंसि नानाव्यापाराः सम्भवनीति नानेकविषयत्वम् । तथापि यं यमिति भिन्नकर्मोपादानादनेकगतत्वमिति केचित् । काव्यप्रदीपस्तु शब्देनेतरव्यवच्छेदार्थेन व्यापारस्यानेकपरत्वमित्याह । मदननगरीत्यने[2]कसञ्चरणलाभ इति नव्याः । देवनाथस्तु-प्रार्थनालिङ्गनचिन्तन्तानां नै[3]कदा नैकविषयत्वं युक्तम् । न ह्यनालिङ्गित एव प्रार्थ्यतेऽनुचिन्त्यते वा सिद्धेरिच्छाभावात्, न च कालभेदात्तथा सर्वत्र वर्तमान[4]त्वोक्तेः, अतोऽनेकविषयत्वमित्याह । न च प्रागनौचित्ये ज्ञाते न रसोब्दोधः उद्बुद्धे तु रसे [5] तद्भाने ऽपि

---

१. कर्तृतायाः पतिव्रताया-क.।
२. त्यनेकसंवरण-क.।
३. नैकदैकविषयत्वं-क.।
४. वर्तमानोक्तेः-क.।
५. तद्गतेऽपि-क. ।

अत्र ममैवपोभोग्य इति वस्तु वस्तुना व्यज्ञते ।
धन्यासि या कथयसि प्रियसङ्गमेऽपि
विस्त्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शमापि यदि किञ्चिदपि स्मरामि ।। ६१ ।।

कमलाकरी

नाभासस्तस्य प्रागेवोदयादिति वाच्यम् । पूर्वज्ञाने स्थायिन आभासत्वं रसस्यानुत्पत्तेरिति सुबुद्धिमिश्राः ।

भावाभासमाह- राकेति । रावणोक्तिः । राका पौर्णिमा चपलदीर्घनेत्रा स्मेरं प्रौढं यौवनं तेन तरङ्गितां विभ्रमा यत्रेदृश[1]माननं यस्येदृशी सा सीताऽस्तीति शेषः । 'स्यादिति' पाठे क उपायरस्यादित्यन्वयः । तत्तस्मादत्र सीताविषये मैत्रीं सख्यं कथं विदधे । तस्याः स्वीकृतिर्ममताधीर्वशीकारो वा तेन व्यतिकरः सम्बन्धस्तत्र क उपाय इत्यर्थः ।

अत्रेति - तस्या अननुरागाच्चिन्ताया अनौचित्येन प्रवृत्तिः । अन्येऽपीति सान्तराभासा भावान्तराभासाश्चोन्नेयाः नीचविषयाः रसाभासाः । यथा-

यवनी नवनीतकोमलाङ्गी शयनीये यदि नीयते कदाचित् ।
अवनीतलमेव साधु मन्ये न वनी माघवनी विला[2] सहेतुः ।।

भावाशान्त्यादिरिति व्याचष्टे- भावस्येति । शान्तिर्विनश्यता, उदय उत्पत्तिः, सन्धिरेकदानेकारचादः शबलता भिन्नकाले पूर्वोपमर्दैन परास्वादः ।

भावशान्तिमाह - तस्या इति । कस्यचिन्मित्रं प्रत्युक्तिः । तस्याः सपत्न्या अमर्षान्नामाग्रहणम् । घनं विलेपनं यत्रेदृशस्य स्तनयुगलस्य प्रश्लेषेण गाढालिङ्गनेन या मुद्रा तदाकारचिह्नं तेनाङ्कितं स्वीयं वक्षः पादपतनमेव व्यतिकरस्सम्बन्धः न तु फलोपधानमालिङ्गनादि वाऽतश्छलं कपटं, यद्वा पादपाते भूम्यादिसम्बन्धव्याजेन किमित्याच्छा

१. यत्रेदृशमास्यं-ब.।
२. विनोदहेतुः-ब.।

अत्र त्वमधन्य अहंतु धन्येति व्यतिरेकालङ्कारः ।

दर्पान्धगन्धगजकुम्भकपाटकूट-
सङ्क्रान्तिनिघ्नघनशोपितशोणचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपायः ।। ६२ ।।

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यते इति वस्तु ।

कमलाकरी

द्यत इति कान्त[१] योक्ते क्र तदित्युकत्वा तन्मुद्राङ्कं प्रमार्ष्टुं प्रमार्जितुं वेगेन सा हर्षेणालिङ्गिता तेनाश्लेषविस्मृत्योस्तुल्यकालता ।

कोपस्येति-भावस्यशान्तिरिति मूलश्लोकस्थपदानुषङ्गेणान्वयः । एवमग्रेऽपि । प्रसादे सत्यपि न चमत्कारः तदनुभावाद्यसत्वात् ।

भावोदयमाह - एकस्मिन्निति । आवेगः कोपः तूष्णीमिव स्थितः आहार्यं मौनं वक्तुमिवेत्युक्तम् । तत्समये सुप्तो मा भूदिति हेतोः किञ्चिद्वक्रितग्रीवं यथा तथा प्रियो वीक्षित इत्यन्वयः । औत्सुक्य-स्योदयः न कोपस्य तदनुभावोक्तेः ।

भावसन्धिमाह - उत्सिक्तस्येति । भार्गवागमे रामोक्ति । उत्सिक्तस्य दृप्तस्य ख्यातस्य वा तपश्च पराक्रमश्च तयोर्निधेर्भार्गवस्यागमनात् सत्सङ्गे प्रियता प्रेम वीरस्य च रभसो हर्षः तस्य उत्फाल उद्रेकश्च मामेकतः कर्षत इत्यावेगत्वरा । अन्यत्रैष अनुभूत हरिचन्दनञ्चेन्दुश्च तद्वच्छीतलः स्पर्शो यस्येदृशः । चैतन्यं विषयान्तरज्ञानं तिरोदधद् आनन्दी सुखहेतुर्वैदेहीपरिरम्भः मुहुः रुणद्ध्यावृणोतीति हर्षस्ताभ्यां तुल्यकालतेति सन्धिरित्यर्थः ।

शबलतामाह - क्वाकार्यमित्यादि । देवयानीदर्शनोत्तरं ययाते रुक्तिः[२] अकार्यं परस्त्रीलोभरूपं क्व चन्द्रस्य वंशः क्वेति वितर्कः ।

---

१. कान्तयोक्तं क्र.।
२. तत्राह उक्ता -ब., वस्तुस्तुपुसरवसः उक्तिरियं विक्रमोर्वशीये । सम्पा. ।

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन् निर्दशन् युधि रुपा निजाधरम् ।।६३।।

अत्र विरोधालङ्कारेमानाधरनिदर्शनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता । मम क्षत्याप्यन्यस्य क्षतिर्निवर्ततामिति तद् वुद्धिरुत्प्रेक्षते इत्युत्प्रेक्षा च ।

एषु उदाहरणेषु स्वतः सम्भवी व्यञ्जकः ।

कैलासस्य प्रथमशिखरे वेणुसंमूर्च्छनाभिः
श्रुत्वा कीर्तिं विबुधरमंणीगीयमानां यदीयाम् ।

कमलाकरी

भूयोऽपीत्यौत्सुक्यम् । नोऽस्माकं श्रुतमध्ययनं दोषाणां कामादीनां प्रशमायेति मतिः, कोपेऽपीति स्मृतिः , किं वक्ष्यतीति शङ्का, स्वप्नेऽपीति दैन्यम् ।, चेतः स्वास्थ्यमिति धृतिः, कः खल्विति चिन्ता । चिन्तादीनामित्थं शबलतेति शेषः । पूर्वपूर्वबाधेन स्थितिरित्यर्थः ।

ननु भावस्य शान्त्युदयवद् भावस्थितिः किन्नोक्ता तत्राह– भावस्थितिरिति । उक्ता, 'व्यभिचारी तथाञ्जित' इत्यत्र, उदाहृता 'जाने कोपे ( ) ति । ननु रसाङ्गस्य सञ्चारिणो भवतु प्राधान्यं भावशान्त्यादीनान्तु रसानन्तर्गतिः कथं प्राधान्यं तत्राह–मुख्येति । कदाचन भावशान्त्यादेः प्राधान्यनिर्देशे इत्यर्थः । भृत्यो[१]त्कर्षाद् राजोत्कर्ष इव भावशान्त्याद्युत्कर्षो रसोत्कर्ष एव विश्राम्यतीति भावः । तेनैषामापाततः प्राधान्यं, मुख्यन्तु रस एवेति भावः ।

अलक्ष्यक्रमस्य ध्वनि (त्व) मुक्त्वा लक्ष्यक्रममाह– अनुस्वानेति अनुस्वानः प्रति[२]ध्वनिस्तदाभा तत्तुल्या संलक्ष्यक्रमाव्यञ्जकेन सह ज्ञेयक्रमा व्यङ्ग्यस्थितिर्यत्र ध्वनौ काव्यभेदे स ध्वनिः । यथा ध्वनिप्रति ध्वन्योः क्रमस्तथा व्यङ्ग्यव्यञ्जकयोर्यत्रेत्यर्थः । शब्दश्चार्थश्चोभयञ्च तेषां शक्तयस्तदुद्भवा त्रिधेत्यर्थः । शब्दशक्तीति । अनुरणनं

१. भृत्योत्कर्षो राजोत्कर्ष इव–क.।
२. प्रतिशब्दः –क.।

त्रस्तापाङ्गा सरसबिसिनीकाण्डसञ्जातशङ्का ।
दिङ्मातङ्गा श्रवणपुलिने हस्तमावर्जयन्ति ।। ६४ ।।

अत्रवस्तुना येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादि-बुद्धिजननेन चमत्कारं करोति त्वत्कीतिरिति वस्तु व्यज्यते ।

केसेसु, बलामोडिअ तेण अ समरंमि जअसिरी गहिआ ।
जह कंवराहिं विहुरा तस्स दढं कंठअंम्मि संठबिआ ।। ६५।।

अत्र केशग्रहणावलोकनोद्दीपित-मदना इव कन्दरास्तद्विधुरान् कण्ठे गृण्हन्ति इत्युत्प्रेक्षा । एकत्र सङ्ग्रामे विजयवर्णनात् तस्यारयः

कमलाकरी

घण्टानादवत्तदुत्थाप्य धीविषयत्वं तच्च तेनैव शब्देन यथार्थधीर्नतु पर्यायेण तद्वैपरीत्येअर्थशक्तिः तेनाविवक्षितवाच्ये न प्रसङ्गस्तत्र बाधेन शक्तोर्विच्छेदात् ।

आद्ये द्वैविध्यमाह - तत्रेति । प्रधानत्वेन यत्र भासत इत्यन्वयः, प्राधान्याभावे गुणीभूतव्यङ्ग्यतेत्यर्थः । नन्वलङ्कारस्यापि वस्तुत्वात्कथं भेदोऽत आह- अनलङ्कारमिति । गोवलीवर्दन्यायाद्भेदः ।

उल्लास्येति - अत्रान्यार्थेऽपि शक्तिरिति केचितु । तत्वन्त व्यञ्जनैवेति भावः । 'भद्रात्मनः' इत्यत्र लक्ष्यत्वमेन । कालः श्यामो वैरिनाशको वा यः करवालः खङ्गः महदम्बु जलं धारारूपं तद्वहतीति वाहः स चासौ स च नवकरवाल एव मेघः खङ्ग एव मेघ इव मेघ इत्यर्थौ युक्तौ । एवं हि रूपकापत्तेरूपमा न स्यात्, शब्दपरिवृत्तिसहत्वेन शब्दशक्तिमूलत्वाभावाच्च । तमुल्लास्योद्यम्य । जरठं कठिनमूर्जितं महद्गर्जितं सिंहनादो यस्य तेन देवेन राज्ञा रणे युद्धे रिपूणां सकलः प्रतापः धाराजलैः खङ्गकान्तिभिः शामित इत्येको अर्थः । कालकरः श्यामकान्तिर्बालो नूतनः बवयोरभेदान्महाम्बुवाहो मेघस्तं प्रकंटीकृत्य देवेनेन्द्रेण रणे विद्युतां शब्दे सति धारारूपैर्जलैः रिपूणां पर्वतादीनां जलवैरिणामग्न्यादीनां वा प्रकृष्टस्ताप औष्ण्यं शामित इत्यन्वयः ।

अत्रेति । राजात्र प्रकृतः इन्द्रेऽपि व्यञ्जनया भासते , तयोःस्वातन्त्रेण बोधे वाक्यभेदः स्यादतोऽङ्गाङ्गिभावेनैकार्थो वाच्यः । तत्र रूपकेणेन्द्र एव राजेत्यर्थे इन्द्रप्राधान्यात् तद्रतिर्व्यङ्ग्या स्यात् इत्यसम्बद्धार्थत्वं स्यात् । न चेन्द्रत्वारोपाद् राजैवेन्द्र इति रूपकम् 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इत्युपमाधीन [1]ग्रहत्वेन प्राथम्यात्तथैवोपपत्तेः । उपमायान्तु इन्द्र इव राजेति प्रकृतराजगोचरा रतिः सैव व्यङ्ग्येत्यर्थः । अत्र भूपमेघादिशब्दोक्तावप्रतीतेः शब्दशक्तिमूलत्वम् , न चात्र श्लेषः उभयत्र तात्पर्याभावात् ।

प[2]दभेदे व्यङ्ग्यमाह-तिग्मेति । तिग्मस्तीक्ष्णः शत्रुषु रुचिरो मित्रेषु प्रतापस्तेजो यस्य सः । विधुराणां शत्रूणां निशाकृन्नाशकरः मोहको वा । विशिष्टा भा यस्य स विभो स्वामिन्निति वा । मधुरा लीला चेष्टा यस्य, मतिः सुबुद्धिःमानोऽभिमानस्तयोः ताभ्यां वा तत्वेन वृत्तिर्यस्य । प्रतिपदं प्रतिस्थानं पक्षाणां स्वपक्षाणामग्रेसरो भवान्विभाति । द्विपदत्वे तु तिग्मरुचिः सूर्योऽनुष्णः विधुश्चन्द्रो रात्रि कर्त्ता विगता भा यस्य स मधुर्वसन्तो लीलाहीनः मति[3]मान्तथाचातत्वज्ञः प्रतिपत्तिथिः अपक्षाग्रणीः पक्षस्याद्या नेति विरोधाभासः । एकपदत्वेन प्रकृते अर्थे ज्ञाते द्विपदत्वानुसन्धाने व्यङ्ग्यः । अप्रकृत[4]त्वादन्यार्थो व्यङ्ग्य एव न तु वाच्य इत्यर्थः ।

पदैक्येऽपि विरोधं व्यङ्ग्यमाह- अमित इत्यादि। सङ्ग्रामात्प्राप्तैरुत्कर्षैरमितोऽपरिमितः । न चार्थभेदाद् विरोधासम्भवः तत्कालविरोधज्ञानस्य सत्वात् । अमित इति पञ्चमी क्तिबन्तम् । अपरिमितात् सङ्ग्रामादित्यर्थो वामितं मानेन युतः । समितोऽमितो मानहीन इति विरोध इति देवनाथः । शत्रुमित्रयोर्हर्षं द्यति खण्डयति ददाति वेति हर्षदः । असतामहितः यशोभिः सहित इत्यन्वयः । अपिशब्दाद्यभावे विरोधो व्यङ्ग्यः सोऽ प्यप्रकृतत्वात् ।

निरूपादानेति - उपादानानां चित्रकारणानां सम्भारं समूहो मसीवर्त्तिकादिः तद्रहितं जगदेव चित्रं नानाकारं लेखञ्च भित्तिशून्ये देशे

---

१. विग्रहत्वेन-क.।
२. अलङ्कारान्तरमाह-तिग्मेति-क.।
३. मतिमान् वातत्वज्ञः-क.।
४. दप्यर्थो व्यङ्ग्य एव-क.।

पलाप्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः । न फ्लाय्या ऽपि तु ततः पराभवं सम्भाव्य तान् कन्दरा न त्यजन्तीत्यपन्हुतिश्च ।

गाढलिंगणरहसुज्जुअम्मि दइए लहुं समोसरइ ।
माणंसिणीण माणो पीलणभीअ व्व हिअआहिं ।। ६६ ।।

कमलाकरी

प्रकटयते। कला चन्द्रिका कौशलञ्च। व्यतिरेक इति व्यङ्ग्य इत्युनुषङ्ग। अन्ये हि शिल्पिनो मस्यादिना भित्तौ चित्रं कुर्वन्ति शूली तन्वन्यथैवेत्यप्रकृतेन व्यङ्ग्येनालेख्येन व्यङ्ग्या तत्कर्त्तुरप्रकृतात् प्रकृतस्य शूलिन उत्कर्षो ज्ञाप्यते ।

ननु वाच्यापेक्षोपमादेः प्राधान्यात् कथमलङ्कारताऽतआह अलङ्कार्यस्येति । श्रमणः सन्यासी । तत्र यथा ब्राह्मणत्वं सन्यासित्वञ्च तथा रसं प्रति गुणत्वादलङ्कारत्वं वाच्यापेक्षया च प्राधान्याद् ध्वनित्व मित्यर्थः ।

अलङ्कारव्यङ्ग्यतामुक्त्वा वस्तुनस्तामाह- पंथिअ इति ।

पथिक नात्रस्रस्तरमस्ति प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरान् वीक्ष्य यदि वससि तद्वस ।। इति संस्कृतम् ।

स्रस्तरमास्तरणं कामशास्त्रञ्च, प्रस्तराः पाषाणः मूर्खाश्च, पयोधराः मेघाः स्तनौ च । 'पओहरे' इति प्राकृते द्वित्वबहुत्वयोः समं रूपम् ।

अत्रेति । इङ्गितानभिज्ञाक्रान्ते ग्रामे मेघे उद्दीपके चोन्नतस्तनदर्शनात् कोऽन्यत्र गच्छेदित्यभिप्रायो व्यङ्ग्यो वस्तु । स च पयोधरादिनानार्थसत्वे एवेति शब्दशक्तिमूलतेत्यर्थः । न चोपमा द्वयोर्भेदाग्रहात् ।

शनिरिति । शनिर्ग्रहः अशनिस्तदभावो वज्रं वा पुनःशब्दो ऽस्त्वर्थे । यत्र त्वित्यन्वयः स उदारो महान् दाता वा अनुदारस्तद्भिन्नः अनुगतदारश्च । धनप्राप्तौ प्रवासाभावात् स्त्रीयुतत्वम् । न चात्र विरोधाभासो व्यङ्ग्यः पूर्वार्द्धे विषयैक्याभावात् । तदुक्तं विरुद्धाविति । शब्दतो विरुद्धावेकं कार्यं हननव्यत्ययः, कदाचिच्छनिः कदाचिदशनिरिितिक्रमः तेन पूर्वार्द्धमेवोदाहरणम् । प[१]रार्द्धेऽप्यर्थक

१. परार्द्धेऽप्यर्थैक्त्वशब्देन-क० ।

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भते इति वस्तु।

जा ढेरं व हसंती कइवअणंबुरुहबद्धविणिवेसा।
दावेइ भुअणमंडलमण्णं विअ जअइ सा वाणी॥ ६७॥

अत्रोत्प्रेक्षया चमत्कारैककारणं नवंनवं जगत् अजड़ासनस्था निर्मिमीते इति व्यतिरेकः।

कमलाकरी

चशब्देन विरोधोक्तेः। समुच्चयार्थत्वे विरोध एव व्यङ्ग्य इति देवनाथः तत्वन्तु मूले व्यत्ययेन विरोधोक्तेः सालङ्कारेण वस्तुना मित्रेण त्वदनुवर्तने फलं वस्तुमात्रं व्यज्यतेऽत्रेति न दोषः।

शब्दशक्तिमूलं द्विविधमुक्त्वार्थशक्तिमूलस्य भेदानाह- अर्थशक्तीति। उद्भवेऽपीति पाठे ध्वनाविति शेषः। कवेः प्रौढ़ोक्त्या चर्वणानुगुणोक्तया सिद्धः कल्पितो यो वक्ता तस्य प्रौढ़ोक्त्या सिद्धः। यद्यपि कविनिबद्धवक्तुरुक्तिर्न पृथगस्ति तथापि चमत्कारविशेषार्थं पृथगुक्तिरिति प्राञ्चः। तत्वन्तु वृथैवेति। बहिरपीति लोकसिद्ध इत्यर्थः।

अपर इति- वस्तुरूपो ऽलङ्काररूपश्चार्थः प्रत्येकं स्वतः सम्भव्येकः कविनिर्मितः कविनिबद्धक्तृनिर्मितश्चेति द्विविधोऽन्य इति सर्वस्त्रिविधः। तस्य त्रिविधस्य वस्तुनोऽलङ्कारस्य च वस्तुव्यङ्ग्यमलङ्कारो वेति द्वादशविध इत्यर्थः।

स्वतःसम्भविवस्तुना वस्तुव्यङ्ग्यमाह - अलसेति। 'अलसशिरोमणिधूर्त्तामग्रणीः पुत्रि धनसमृद्धिमयः। इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता।' इति छाया। अलसत्वादप्रवासी धूर्त्तः सुरतविदग्ध धःनित्वात् सुखी। प्रफुल्लेति स्वस्यापि धूर्त्तत्वात् 'समानशीलं व्यसनेषु सख्यमित्युक्तेः, तदुक्तं ममैवेति हर्षादिवस्तुना ममोपभोग्य इति वस्तु व्यज्यत इत्यन्वयः।

स्वतः सम्भविवस्तुनाऽलङ्कारव्यङ्ग्यमाह- धन्यासीति। गर्विताया एकस्या पराजेयत्वादेकत्वं बह्वीनां बोधात् सख्यरिति बहुत्वम्। रतमध्येषु आदावन्ते वा यथा तथास्तु [१]रतिविशेषेषु वा। प्रियसङ्गमे

१. रतविशेषेषु तु वा-क.।

एषु कविप्रौढोक्तिमात्रनिष्पन्नो व्यञ्जकः ।

जे लंकागिरीमेहलासु खलिआ संभोगखिन्नोरई-
फारुफुल्लफणावलीअवलणे पत्ता दरिदत्तणं ।

कमलाकरी

आलिङ्गनादौ विस्रब्धानि विश्वासादनर्गलानि मुञ्च मुञ्चेत्यादीनि या कथयस्यतो धन्यासि । अहन्तु कान्तेन नीवीं प्रति हस्ते प्रणिहितेऽर्पितुं सङ्कल्पिते नत्वर्पिते रतादावेव किम्पुनर्मध्ये किञ्चिदुक्तमपि यदि स्मरामि तदा शमापि । सुखपारवश्यान्नैव स्मरामीत्यर्थः । शपामीति शपथे शप नात्मनेपदं मिथ्यानिरासमात्रतया शपथाभावात् ।

अत्रेति - ननु व्यतिरेकालङ्कार एवात्र व्यञ्जकस्तत् कथमत्र वस्तु[१] व्यञ्जकत्वं न सम्बोध्यस्योपमानत्वादुपमेयगतो ह्यलङ्कारः : स्वस्मिन् कथनाभावो न शाब्दः व्यङ्गत्वेऽपि तमनपेक्ष्य वस्तुन् एवं [२] व्यङ्ग्यो व्यतिरेक इत्यन्ये । अत्राधन्यत्वे विपरीतलक्षणेति केचित् । विप्रलम्भार्थं (लब्धार्थं) धन्यत्वं विवक्षितमेवेत्यन्ये ।

स्वतः सम्भविनोऽलङ्काराद्वस्तुव्यङ्ग्यमाह- दर्पेति । दर्पो मदगन्धस्तेनान्धो यो गन्धगजः । 'यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । तं गन्धहस्तिनं विन्द्यात् नृपतेर्विजयावहम् ।।' इत्युक्तलक्षणः । तस्य कुम्भ एव कपाटं विशालत्वाद्दुर्भेद्यत्वाच्च तस्य कूटमग्रं तस्मात् सङ्क्रान्तं निघ्नं सम्बद्धं घनं निविडं यच्छोणितं तेन शोणं शोचिस्तेजो यस्य कोपेन कषाया रक्ता कान्तिर्यस्येति कटाक्षविशेषणम् ।

अत्रेति - सादृश्यस्य लोके सत्वादुपमालङ्कारोऽत्र स्वतःसम्भवी । न चोत्प्रे[३]क्षेयं नोपमेति वाच्यं सम्भावनाभावात् । तादात्म्याध्य[४]वसानाभावाच्च ।

१. वस्तु इत्यारभ्य ह्यलङ्कारः इत्यन्तोंऽशः क-पुस्तकेनास्ति ।
२. वस्तुनैव-क.।
३. चात्रोत्प्रेक्षया नोपमेति-क.।
४. ध्वसायाभावाच्च-ब.।

ते एण्हि मलआणिला विरहिणीणीसाससंपक्किणो
जादा झत्ति सिसुत्तणे वि बहला तारुणपुण्णा बिअ ।। ६८।।

अत्र निःश्वासैः प्राप्तैश्वर्या वायवः किं किं न कुर्वन्तीति वस्तुना वस्तु व्यज्यते ।

कमलाकरी

स्वतःसम्भविनालङ्कारेणालङ्कार व्यङ्ग्यमाह- गाढेति । यो राजा युद्धे कोपेन स्वोष्ठं निर्दशन् शत्रुस्त्रीसमूहस्योष्ठा एव प्रबालशकलानि विद्रुमः पल्लवः इत्येके, निविडभर्तृदन्तक्षतदुखःस्वरूपात् सङ्कटादमोचयदित्यर्थः । अत्रेति-ओष्ठदंशमोचनयोर्विरोधः प्रतियोगिभेदादाभासः यद्वा स्वोष्ठदंशः कारणं तत्काले वधूदन्तक्षतमोककार्योक्तेः कारणकार्ययोः पौर्वापर्यभावरूपाति-शयोक्तिस्तयोर्वैयधिकरण्यरूपोऽसङ्गत्यलङ्कारो वा विरोधपदेनोच्यत इति मधुमती-देवनाथादयः । तुल्येति -यद्य[१]प्यत्र प्रकृतानामप्रकृतानाञ्चैकधर्मसम्बन्धरूपा मुख्या तुल्ययोगिता नास्ति तथापि तुल्यं समकालं योगितारूपः समुच्चमालङ्कार एव तत्पदेनोच्यते । ओष्ठो दष्टः शत्रवो हताश्चेति समकालोक्तेरिति दर्पणादयः । ओष्ठदंश-शत्रुहननयोर्वीरानुभावत्वेन प्रकृतयोः कालोपाधि-सूर्य क्रियारूपैकधर्मसम्बन्धान्मुख्यैवेति परमानन्दः । कार्यकारणयो-रेकालतारूपातिशयोक्तिरेवात्रापीति मधुमतीकारः तद्बुद्धिर्नृपबुद्धिः उत्प्रेक्षा च प्रसज्यते इति शेषः । एष्विति । क्वचित्कोपज कामजयोरधरदंशनयोर्वैजात्येन . विरोधात् क्वचित् कविप्रौढोक्तिसत्वेऽपि प्राधान्यात् स्वतःसम्भवित्वमित्यर्थः ।

कविप्रौढ़ोक्तिसिद्धान् भेदान् क्रमेणाह - कैलासस्येति । प्रथमं सर्वोच्चं वेणीनां सम्मूर्च्छनास्तदुत्थरागाः 'स्वरःसम्मूर्च्छितो यत्र रागतां प्रतिपद्यते । मूर्च्छनामिति तां प्राहुर्गीतितत्वविदो जनाः ।।' इत्युक्तेः ।

---

१. यद्यप्यत्र तु प्रकृता-क.।

सहि विरइउण माणस्स मज्झ धीरुत्तेण आसासं ।
पिअदंसणविहलंखणखणम्मि सहसत्ति तेण
ओसरिअं ।। ६९ ।।

अत्र वस्तुना कृतेऽपि प्रार्थने प्रसन्नेति विभावना प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढु न शक्यते इत्युत्प्रेक्षा वा ।

कमलाकरी

तैः सुरस्त्रीभिर्गीयमानां यस्य कीर्तिं श्रुत्वा स्रस्तापाङ्गा तिर्यग्भूतापाङ्गाः दिग्गजा पुलिने बिसोत्पत्तेः श्रवणे तद्रूपत्वं कीर्तेः शुक्लत्वात् । कर्णे बिसमस्तीति भ्रान्त्या भक्षार्थं तत्र शुण्डां क्षिपतीत्यर्थं ।

वस्तुनेति-कीर्तेर्विसवत्कर्णप्रवेशरूपेण कविप्रौढोक्ति-सिद्धेनेत्यर्थः । अर्थेति - गीतार्थज्ञानम् । एवमादीति -बिसधीजननेत्यर्थः । यद्यपि सञ्जातशङ्केति भ्रान्तिमान् सन्देहो वालङ्कारो व्यञ्ज[१]क इति नात्र वस्तुनो व्यञ्जकत्वं तथापि तदप्रतिसन्धाने एतदिति देवनाथः । भ्रमरपटनिभाकृतिभ्रष्टनिद्राः पुलिने इति युगले इति पाठाद्वस्तु व्यञ्जकतेति नव्याः ।

कविप्रौढोक्तिसिद्धवस्तुनालङ्कारव्यङ्ग्यमाह - केसेसु इति । केशेषुबलादामोडय तेन समरे जयश्रीर्गृहीता । यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः । तस्य विधुराः शत्रव इत्यन्वयः । तेन राज्ञा समंरे केशेषु बलाद् धृत्वा तथा जयश्रीर्गृहीता यथा सुरतकालीन-केशग्रहणदर्शनात् कन्दराभिरभि मदनवशास्तस्यारयः कण्ठे स्थापिताः स्वयमङ्गीकृता इत्युत्प्रेक्षा कन्दराणां नायिकात्वासिद्धेः कथं सा व्यङ्ग्या तल्लाभे तु समासोक्तिरेव स्यादिति चिन्त्यमेतदिति काव्यप्रदीपः । समासोक्तेरुत्प्रेक्षाङ्गत्वमिति परमानन्दः । कथं तर्हि वस्तुव्यञ्जकत्वमलङ्कारस्य तत्वादलङ्कारस्य तत्वेऽपि वस्त्वपि व्यञ्जकमित्यन्ये । तत्वमाह -एकत्रेति । जयश्रीग्रहणेन हेतुना भीताः

---

१. व्यज्यते-क.।

ओल्लोल्लकरअरुखएहिं तुह लोअणेस्तु मह दिण्णं ।

रक्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिआ ।। ७० ।।

अत्र किमिति लोचने कुपिते वहसीति उत्तरालङ्कारेण न केवलमार्दनखक्षतानि गोपायसि यावत् तेषामहं प्रसादपात्र जातेति वस्तु ।

कमलाकरी

शत्रवो गुहासु तिष्ठन्तीति काव्यहेतुः काव्यलिङ्गमलङ्कारः अपह्नुतिश्चेति अप्रस्तुतस्य पलायनस्यापह्नवादपह्नुतिरलङ्कारश्च व्यङ्ग्य इत्यर्थः ।

कविप्रौढक्तिसिद्धालङ्कारेण वस्तु व्यङ्ग्यमाह- गाढेति । गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति । मनस्विन्याः मानः पीडनभीरुरिव हृदयात् । पत्यौ गाढालिङ्गनोद्यते सति मानिन्याः मानः हृदयात् पीडनभयेनेव लघु शीघ्रं पलाय्य गच्छतीत्यर्थः । भयोत्प्रेक्षया प्रत्यालिङ्गनं विना पीडनं नेति तद्व्यज्यते । अत्रेति- आ[१]दिपदेन प्रसादहसितादि गृह्यते ।

कविप्रौढोक्ति सिद्धादलङ्कारादलङ्कारव्यङ्ग्यमाह- जा ठेरमिति ।

या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।

दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी । इति संस्कृतम् ।

स्थविरं ब्राह्मणमुत्प्रेक्षया इव-द्वयोक्त्या ब्रह्मसर्गादुपमानादुपमेय-कविसर्गस्याधिक्यं व्यतिरेकः । हसतीति-ब्र[२]ह्मणः अन्यदिवेति जगदित्यर्थः । अजलजेति पद्मभिन्नकविमुखरूपासनस्या । अनम्बुजेति पाठेऽम्बुजासनो ब्रह्मा तद्भिन्ना तज्जडं पद्मम् अस्यास्त्वजडमित्यासनाधिक्यमित्यर्थः ।

कविनिबद्धवक्तृरप्रौढोक्तिसिद्धानाह - जे लंकेति । ये लङ्कागिरिमेखलासु स्खलिताः सम्भोगखिन्नोरगी स्फारोत्फुल्लफणावली कवलने प्राप्ता दरिद्रत्वम् । त इदानीं मलयानिला

---

१. इयं पङ्क्तिर्वपुस्तके नास्ति ।

२. ब्राह्मणः(?) क.।

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअंती ।
अणुविणमण्णकम्मा अङ्गं तुणुअं वि तणुएइ ।। ७१ ।।

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तते इति विशेषोक्ति ।

एषु कविनिबद्धवक्तृर प्रौढौक्तिमात्रनिष्पन्न-शरीरो व्यञ्जकः ।

एवं द्वादश भेदाः ।

शब्दार्थो भयभूरेकः-

यथा-

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ।। ७२ ।।

कमलाकरी

विरहिणीनिःश्वाससम्पर्किणः जाता झटिति शिशुत्वेऽपि बहलास्तारुण्य पूर्णा इव ।। इति संस्कृतम् ।।

ये मलयानिलाः सर्पत्रासाल्लङ्कासमीपे गिरिर्मलयस्तन्मेखलातः स्खलिताश्च्युताः गिरिपातेन हस्तपादभङ्गात् कृशत्वम् । श्रमे भोजनाधिक्यात् स्त्रीणां स्वेदाधिक्याच्चोत्प्रेक्षया खिन्नोरग्यु[१]क्तया मन्दवायुना विरहाधिक्यम् । स्फाराः वितताः उत्फुल्लाः ऊर्ध्वं प्रसृताः तेन ग्रासे न स्थूलता । कवलनाद् भक्षणात् । सप्तम्यन्तपाठे सति-सप्तमी । दरिद्रत्वं कृशत्वमल्पत्वमित्यर्थः प्राप्तास्ते बाल्येऽपि तारुण्यपूर्णा इव जाता इत्यर्थः ।

अत्रेति - निश्वासैर्वस्तुना तद्रूपेण वस्तुना प्राप्तैश्वर्याः वायवः किं न कुर्वन्तीत्यनौचित्यं विरहिणीनिःश्वासस्यागणनान्निर्दयत्वं च वस्तु व्यज्यत इत्यर्थः । पुरुष[२]सङ्गेः निःश्वासाधिक्यान्निःश्वासैश्च बाधाधिक्यात् । निश्वासैरित्यत्र निश्वासा इति वा पाठः । अत्र पूर्णा

---

१. खिन्नोरग्युक्तम् -क ।
२. पुरुषसयोगे-क ।

अत्रोत्प्रेक्षा व्यङ्ग्या ।

भेदा अष्टादशास्य तत् ।। ४१ ।।

अस्येति ध्वनेः ।

ननु रसादीनां बहुभेदत्वेन कथमष्टादशेत्याह

रसादीनामनन्तत्वाद् भेद एको हि गण्यते ।

अनन्तत्वादिति- तथाहि नव रसा । तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च । सम्भोगस्यापि परस्परावलोकनालिङ्गन परिचुम्बनादि-कुसुमोच्चय-जलकेलि-सूर्यास्तमयचन्द्रोदयषड्ऋतु

कमलाकरी

इवेत्युत्प्रेक्षासत्वेऽपि निःश्वासस्य तारुण्यहेतोः सत्वात् काव्यलिङ्गसत्वेऽपि तदविवक्षया वस्तुनो व्यञ्जकत्वोक्तिः । अत्र कवि निबद्धो वक्ता कर्पूरमञ्जरी नायिका तत्प्रौढोक्त्या सिद्धम् । वायूनां कृशत्वात् ।

ईदृशेन वस्तुनालङ्कारव्यङ्ग्यमाह - सहीति । सखि विरच यमानस्य मम धीरत्वेनाश्वसम् । प्रियदर्शनविश्रृङ्खलक्षणे सहसेति तेनापसृतम् ।। इति संस्कृतम् ।। 'विहलंखणेति पाठे विह्वलक्षणेइत्यर्थः । वस्तुना प्रियदर्शनविभावनाकारणाभावे कार्योक्तिः । प्रियेतिनूनं प्रियदर्शनबलाद्धैर्यं पलायितमित्यर्थः ।

ईदृशेनालङ्कारेण वस्तु व्यङ्ग्यमाह - उल्लो[१] लेति । आर्द्रार्द्रकरजरदनक्षतैस्तव लोचनयोर्दत्तम् । रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते ।। इति संस्कृतम् ।। कान्ते सपत्नीदत्तनखक्षतदर्शनात् क्रुद्धां नायिकां प्रति किमिति कोपादरुणे ते नेत्रे इति कान्तेन पृष्टे तस्या उक्तिः । पुनस्त्वर्थे । इमे नेत्रे तु कोपेन नाक्रान्ते किन्तु तव क्षतैर्मम लोचनयोरित्यन्वयः । रक्तांशव एव रक्तांशुकं वस्त्रञ्च प्रसादो दत्त इत्यर्थः ।

---

१. उल्लोलेत्यारभ्य त्वेकैकमूलत्वमित्यन्तो भागः व-पुस्तके नास्ति ।

वर्णनादयो बहवो भेदाः विप्रलम्भस्याभिलाषादय उक्ता तयोरपि विभावानुभावव्यभिचारिवैचित्र्यम् । तत्रापि नायक-योरुत्तमाधमप्रकृतित्वम् । तत्रापि देशकालावस्थादिभेदा इत्येकस्यैव रसस्यानन्त्यम् । का गणना त्वन्येषाम् । असंलक्ष्यक्रमत्वं तु सामान्यमाश्रित्य रसादिध्वनिभेद एक एव गण्यते ।

वाक्ये द्‌युत्थः ।

द्व्युत्थ इति शब्दार्थोभयरशक्तिमूलः ।

पदेप्यन्ये,

अपि शब्दाद् वाक्येऽपि । एकावयवस्थितेन मूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्यस्यापि भारती भासते ।

कमलाकरी

अत्रेति इति प्रश्ने कृते सति वाच्येनोत्तररूपेणालङ्कारेण न केवलं नखक्षतान्यादयसि किन्तुं तेषां क्षतानां प्रसादनपात्रमप्यहं जाता । मह्यं दर्शयिस्यपि इति महान् प्रसादः कृत इति वस्तु व्यज्यत इत्यर्थः । कोपनिषेधादपह्नुत्या चेति देवनाथः । प्रतिषेधात् प्रश्नाक्षेपेणोत्तरालङ्कारे विश्रान्तेर्नापह्नुतेर्व्यञ्जकत्वं यथाऽसत्प्रतिपक्षोत्थापकस्योपाधेर्न हेत्वा भासत्वमुपक्षीणत्वादिति परमानन्दः ।

कविनिबद्धवक्तसिद्धस्यालङ्कारव्यङ्ग्यमाह-महिलेति । महिला सहस्रभरिते तव हृदये सुभग अमा अन्ती सा ।अनुदिनमनन्यकर्मा अङ्ग तन्वपि तनयति ।। इतिसंस्कृतम् ।

महिला स्त्री । नायकं प्रति दूत्युक्तिः । चित्ते अमान्तीत्यत्र स्त्रीसहस्र भृतत्वेन हेतुनालङ्कारेण तनुत्वे कारणे सत्यपि हृदयवर्थनं कार्यं नेति विशेषोक्तिरित्यर्थः । अत्र कविनिबद्धवक्त्री दूती । एवमिति - अर्थशक्तिमूलस्य लक्ष्यक्रमस्येत्यर्थः । उभयशक्तिमूलं लक्ष्यक्रममाह-शब्दर्थेति । एकोऽलङ्कारः । यद्यप्युभयशक्तिमूलं वस्त्वपि व्यङ्ग्यस्ति तथापि रहस्यवस्तुनो व्यङ्ग्यस्य गोपनायैव नानार्थपदोपादानं, तद्गोपनञ्च शब्दशक्त्यैवेति शब्दशक्तिमूलतैवेति परमानन्दः ।

तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि-

यस्य मित्राणि मित्राणि शत्रवो शत्रवस्तथा ।
अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ।। ७३ ।।

अत्र द्वितीयमित्रादिशब्दाः आश्वस्तत्व-नियन्त्रणीयत्व स्नेहपात्रत्वादिसङ्क्रमितवाच्याः ।

कमलाकरी

अतन्द्रेति । अतन्द्रोऽनल्पश्चन्द्रः शशी आभरणं यस्या पक्षे चन्द्रोऽभ्रकः कर्पूरो वा येषु तान्याभरणानि यंस्याः समुद्दीपितो उद्बुद्धःकामो यस्याः सा पक्षे समुत्सहर्षा दीप्तकामा तारकाणि नक्षत्राणि नेत्रकनीनिका च तैश्च तरलाऽधैर्यवहा श्यामा रात्रिः षोडवार्षिकी च कं पुमांसमानन्दं न करोतीत्यर्थः ।

अत्र रात्रिः कान्तेवेत्युपमा गम्या सा च चन्द्रतारका-श्यामापदानां परिवृत्यसहत्वादन्येषाञ्च तत्सहत्वाच्चोभयमूला । यद्यप्यर्थशक्तिमूले शब्दस्य तन्मूले वार्थस्येत्युभयशक्तिमूलत्वं सर्वत्रास्ति तथाप्युभयोः प्राधान्ये उभयशक्तिमूलत्वं गुणप्रधानभावे त्वेकैकमूलत्वमित्याहुः ।

अष्टादशेति - अविवक्षितवाच्यस्यार्थान्तरसङ्क्रमित वाच्यात्यन्ततिरस्कृतवाच्यौद्वौभेदौ, विवक्षितान्यपरवाच्ये-ऽलक्ष्यक्रमव्यङ्ग्य एकः लक्ष्यक्रमव्यङ्ग्ये शब्दशक्तिमूले वस्त्वलङ्कृती व्यङ्ग्ये इति द्वावर्थशक्तिमूला द्वादश, उभयशक्तिमूलश्चैक इत्यष्टादशेत्यर्थः । अस्येत्यवधानादुभयशक्तिमूलस्येति भ्रमः स्यात्तत्राह- ध्वनेरिति ।

रसादीनामिति - आदिपदाद् भावादीनां दर्शनादिकं 'यान्त्यामुहुर्वलितकन्धरमाननं यदि'त्यादौ स्पष्टम् । कुसुमाना-मुच्चयोऽवचयस्तदादीनामृत्वन्तानामुदाहरणानि माघ- किरातार्जुनीयादौ स्पष्टानि । आदिपदात् प्रभातरतान्तर-वयःसन्धय स्तेषामप्युदाहरणानि तत्रैव ज्ञेयानि ।

नायकयोरिति - नायिका च नायकश्च तयोः । तत्र नायिकाया उत्तमादित्वं यथा-

खलववहारा दीसंति दारुणा चइवि तहवि धीराणं ।
हिअअववअस्सबहुमआ ण हु ववसाआ विमुज्झंति ।। ७४ ।।
अत्र विमुह्यन्तीति ।

कमलाकरी

मुग्धा मध्या प्रगल्भा च त्रिविधा नायिका भवेत् ।
मुग्धा नववधूस्त[१]त्र नवयौवनमण्डिता ।।
नवालङ्कारहस्तापि लज्जाप्राय-रतिर्भवत् । (१)
आरूढ़यौवना मध्या प्रादुर्भूतमनोभवा ।।
प्रगल्भव[२]चना किञ्चिद्विचित्रसुरता भवेत् ।
लब्ध्वा[३] पतिः प्रगल्भा स्यात्समस्तरतिकोविदा ।।
धीराधीरा च मध्या च सा पुनस्त्रिविधा भवेत् ।
कृतदोषेऽपि सा धीरा पत्यौ विनयमारचेत् ।।
अधीरा च रुषा हन्ति सन्त्यज्य दयितं बलात् ।
मध्या प्रतिदिनञ्चैव सोत्कण्ठं साधु भाषणैः ।।
साध्व्येकैकाष्टधा यथा–
स्वाधीनपतिरुत्का च तथा वासकसञ्ज्ञिका ।
अभिसन्धिता विप्रलब्धा खण्डिता चाभिसारिका ।
प्रोषितप्रेयसी चेति नायिकाः सूचिताः क्रमात् ।।
यस्या रतिगुणाकृष्टः पतिः पार्श्वन्न मुञ्चति ।
विचित्रविभ्रमासक्ता सा स्वाधीनपतिर्भवेत् ।।
उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयत्याकुला क्वचित् ।
भवेद्वासकसज्ञासौ सज्जिता सङ्गभाष(व) या ।

---

१. सूत्रनव (१) -क.।
२. प्रगल्भयौवना- क.।
३. लब्धा-पतिः - क.

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ।। ७५ ।।

कमलाकरी

निश्चित्यागमनं भर्त्तुर्द्वारिक्षणपरायणा ।
निरस्तो मन्युना कान्तो नमन्नपि यया पुनः ।
दुःस्थिता चाविलासाभिसन्धिता कथिता भवेत् ।।
प्रेक्ष्य दूतीं स्वयं गत्वा सङ्केतान्नागतः प्रियः ।
यस्यास्तेन विना दुःस्था विप्रलब्धा तु सा भवेत् ।
दूरदेशे स्थिते पत्यौ नायिका खण्डिता भवेत् ।
कान्तार्थिनी तु या याति सङ्केतं साभिसारिका ।।
पत्यौ देशान्तरप्रते प्रोषितप्रेयसी भवेत् ।

साप्येकैका त्रिधाऽहितेऽपि प्रिये हितोत्तमा, हिताहिते प्रिये हिताहितकारिणी मध्या हितेऽप्यहितकारिण्यधमा । तथा-

दक्षिणश्चानुकूलश्च शठो धृष्ट इति क्रमात् ।
चतुर्विधस्तु सम्प्रोक्तो नायको भरतादिभिः ।।
यो गौरवं भयं प्रेम सद्भावं पूर्वयोषिति ।
न मुञ्चत्यन्यचित्तो ऽपि ज्ञेयोऽसौ दक्षिणस्तया ।।
अतिरिक्ततया नार्यां सदा त्यक्तपराङ्गनः ।
सीतायां रामवत् सोऽयमनुकुलस्तु नायकः ।।
प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
त्यक्तापराधचेष्टश्च शठो ऽसौ नायको भवेत् ।।
निश्शङ्कक़ृतदोषोऽपि विलज्ञस्तर्जितोऽपि सन् ।
मृषावाक् दृष्टदोषेऽपि धृष्टो ऽसौ नायको भवेत् ।।
इति नायिकानायकयोर्भेदः । देशो विजनादिः, कालो
वसन्तादिर्यौवनादिरवस्थाः ।
"इतिकालवयोऽवस्था-भावकन्दर्पनायकैः ।
इतरा अप्यवस्थास्स्युर्नोक्ता विस्तरकारणात् ।।

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाशन्ते ।

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।

कमलाकरी

अभिलाषोऽथ चिन्ता च स्मरणं गुणकीर्तनम् ।
उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिपीडनम् ।
जड़ता मरणञ्चैव दशावस्थाः द्वयोः क्रमात् ।।"

इत्युक्ताः । अन्येषां हास्या[१]दिरसानां भावादीनाञ्च[२] । वाक्ये इतिद्व्युत्थः शब्दार्थमूलो यो ध्वनिः स वाक्ये एवेति सावधारणं ज्ञेयम् । अन्येऽर्थान्तरसङ्क्रमितवाच्यादयः सप्तदश भेदाः वाक्ये पदे वेत्यर्थः ।

ननु पदव्य[३]ञ्जकत्वे कथं समस्तवाक्ये चारुत्वं तत्राह-एकेति । यद्वा पदव्यञ्जकत्वे कथं वाक्यस्य काव्यत्वमव्यङ्ग्यत्वादत आह – एकेति । वाक्यस्य व्यङ्ग्य यत्र सा वाक्यव्यङ्ग्या । तदुक्तं ध्वनिकृता-

[४]एकावयसंस्थेन भूषणेनेव कामिनी ।
पदव्यङ्ग्येन सु[५]कवेः ध्वनिना भाति भारती ।। (ध्व.३)

पदेऽप्यर्थान्तरसङ्क्रमितवाच्यमाह – यस्येति । यस्य राज्ञो मित्राणि मित्राण्येव विश्वस्तान्येव नान्यथा । शत्रवो शत्रवो एव अनुकम्प्यः स्नेहपात्रमेव स एव सुजन्मा स च श्लाघ्यजीवित इत्यर्थः । च शब्द एवार्थे ।

अत्रेति – द्वितीयमित्रादिशब्दा वैयर्थ्यादविवक्षितवाच्या सन्त आश्वस्तत्वादि लक्षयन्ति । तेन नायके स्थिरप्रतिज्ञत्वं व्यङ्ग्यम् । अत्र पदानां प्रत्येकमर्थसमाप्तेर्नैकवाक्यता । तेन पदानि व्यञ्जकानि न वाक्यं

---

१. हास्यादीनां -क.।
२. भावादीनां वा-क.।
३. पदस्य व्यञ्जकत्वे -ब.।
४. भावादीनां वा-क०
५. तु ध्वनेः-क. ध्वन्यालोके तु – 'विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी । पदद्योत्येन सुकवेः ध्वनिनाभाति भारती ।।' इति पाठः लभ्यते-सम्पा० ।

सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ।।७६।।

अत्र भीताननेति । एनेन हि नीचैः शंसनविधानस्य युक्तता गम्यते । भावादीनां पदप्रकाशत्वे न वैचित्र्यमिति न तदुदाहियते ।

रुधिरविसरप्रसाधित-करवालकरालरुचिरभुजपरिघः ।
झटिति भ्रुकुटिपिटङ्कितललाटपट्टो विभासि नृप भीम ।। ७७।।

कमलाकरी

'त्वामस्मि' इति तादृशनानापदघटितत्वाद् वाक्यं व्यञ्जकम् । अत्र त्वेकवाक्ये एकमेव पदं व्यञ्जकमिति वैषम्यमिति देवनाथः ।

पदेऽत्यन्ततिरस्कृतवाच्यमाह - खलेति । 'खलव्यवहारा दृश्यन्ते दारुणा....यद्यपि तथापि धीराणाम् । हृदयवयस्य बहुमता न खलु व्यवसाया विमुह्यन्ति ।। इतिछाया । .... यद्यपि खलव्यवहारा दारुणास्तथापि धीराणां हृदयमेव वयस्यः सखा सदर्थग्राहित्वात् तस्य बहुमताः सम्मता व्यवसाया न तिष्ठन्तीत्यर्थः ।

अत्रेति - विमुह्यन्तीति व्यञ्जकमिति शेषः । अचेतने व्यवसाये चेतनधर्मस्य मोह[१]स्य बाधात् कुण्ठितत्वं ल[२]क्ष्यमिष्टकार्यकारित्वं व्यङ्ग्यम् ।

पद[३]स्य लक्ष्यक्रममाह - लावण्यमिति । लावण्यं संस्थानविशेषः कान्तिरुज्ज्वलतारूपं वर्णस्तदा सम्भोगेऽनुभवे सुधास्पदं स्मरणे ज्वर इत्यर्थः ।

अत्रेति- अनुभवैकगोचराः निर्वक्तुमशक्या । तदादिशब्दानां बुद्धिस्थे शक्तेर्लावण्याद्यतिशया व्यङ्ग्याः विप्रलम्भसत्वेऽपि तदादीनामेव प्राधान्यात् पदमेव व्यञ्जकम् ।

सम्भोगमप्याह-मुग्धे इति । मुग्धे हिताग्राहिणि एवकारेणायोग-व्यवच्छेदः । अखिलो भविष्योऽपि भूतस्तु जात एव प्रियानत्यै मानं धारय । धैर्य्यस्य बन्धनादनपनेयता । प्रेयसि प्रिये ऋजुतां साधुतां त्यज ।

---

१. मोहस्य वा घात कुण्ठितत्वं - क।
२. दृष्टकार्यकारित्वं -क.।
३. पदे लक्ष्यक्रम -ब.।

अत्र भीषणीयस्य भीमसेन उपमानम् ।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।

कस्य नानन्दनिष्यन्दं विदधाति सदागमः ।। ७८ ।।

कमलाकरी

तां सखीं प्रति-वचः प्रतिकूलं वचः । अत्रेति -व्यञ्जकमिति शेषः । भयकार्यशोषवैवर्ण्यवत्वान्मुखे भीतत्वोक्तिः ।

एतेन हीति । शनैः शंसनस्य विधानमप्राप्तप्रापणं तस्य युक्तत्वं भयगम्यानुरागस्याकृत्रिमत्वात् सम्भोगप्रकर्षो गम्यः[१] स च भीताननापदगम्य इत्यर्थः । भावादीनामिति । -अधिकं वाक्यापेक्षयाऽतिरिक्तं नेत्यर्थः ।

विक्षितान्यपरवाच्य लक्ष्यक्रमस्य शब्दशक्तिमूलमलङ्कारं पदे व्यङ्ग्यमाह-रुधिरेति । रुधिरस्य विसरः प्रवाहस्तेन प्रसाधितोऽलङ्कृतः करालो भीषणो यः करवालः खङ्गस्तेन रुचिरो मित्राणां प्रियो भुज एव परिधोऽर्गला यस्य । यस्या वैरिविरोधकत्वादर्गलात्वम् । भृकुट्या विटङ्कितस्तरङ्गायितः यद्वा भृकुट्यां विटङ्कवत् कपोतपालिकावदाचरितो ललाटपट्टो यस्य स भवान् भीमो भीषणः भीमसेनश्च विभासि । अत्रेति -भीषयतीति भीषणीय 'कृत्यल्युटोबहुलम्' इत्युक्तेः कर्तर्यनीयर् । भीमपदे प्रकृत्योः सादृश्यादुपमा व्यङ्ग्या ।

पदे शब्दशक्तिमूललक्ष्यक्रमस्य वस्तुव्यङ्ग्यमाह - भुक्ति मुक्तीति । सदागमः सच्छास्त्रं सतः कान्तस्यागमनञ्च कस्यानन्दधारां न करोति । यतः[२] भुक्तिर्भोगः स्वर्गादेः मुक्तिर्मोक्षः । पक्षे भुक्तिः सम्भोगःमुक्तिः सर्वत्यागस्तं करोतीति कृत् । एकान्तो ऽद्वैतं समादेशनं विधिश्च तत्परः । ब्रह्म[३] ज्ञानकर्मकाण्डपरत्वात् । पक्षे एकान्तस्य विजनस्योपदेशे परः । काचिदिति- एवं श्लिष्टपदेन ।

ननु कान्तागमवच्छास्त्रमित्युयमा किं न तत्राह मुख्ययेति सदागमपदे षष्ठीतत्पुरुषात् कर्मधारयस्य बलीयस्त्वात् पूर्वं सच्छास्त्रधीस्ततो रतरूपार्थस्य गोपनार्थं शास्त्रधीमुखेन कान्तागमस्योपदेश्यत्वेन प्राधान्यन्नोपमा, समप्राधान्य एव तत्सत्वात्तेनेहागच्छेति वस्त्वेव व्यङ्ग्यमित्यर्थः ।

१. व्यङ्ग्यः -ब.।
२. यदा -क.।
३. ब्रह्माकर्मकाण्ड - क.।

काचित् सङ्केतदायिनमेनं मुख्यया वृत्या शंसति ।

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेक्षद्वन्द्वममीलव्यतिकरं शक्नोति ते नासितुम् ।। ७९ ।।

अत्र वस्तुना कृतपरपुरुषपरिचया क्लान्तासीति वस्तु अधुना पदद्योत्यं व्यज्यते ।

कमलाकरी

अर्थशक्तिमूलध्वनेर्द्वादशभेदेषु पदे स्वतः सम्भविवस्तुना वस्तुव्यङ्ग्यमाह- सायमिति । श्रमापनयनव्याजेन स्वाङ्ग प्रसाधनं गोपायन्तीं सखीं प्रति नायिकोत्तिरियं सायं स्नानं कृतं चन्दनेन चाङ्गं सायं लिप्तं न तु मध्यन्दिने। सूर्यतापवशात् स्नानञ्चेत्तत्राह - अम्बरमणिः सूर्योऽस्तङ्गतः । विस्रब्धममन्दमत्रागमनम् अभितः सर्वतः श्रान्तासि, अतस्तव सौकुमार्यमाश्चर्यम् । आतपेन श्रमः । अधुना कारणाभावेऽपि क्लान्तासीत्याश्चर्यं येन श्रमेण मीलनममुद्रणं तस्य व्यतिकरः सम्बन्धो यस्य तत्ते नेत्रद्वन्द्वमासितुं स्थातुं न शक्नोति । श्रमे हि नेत्रमुद्रणं दृष्टमिह च तदभावः । अतोऽप्याश्चर्यमिति भावः ।

अत्रेति - अधुना कारणाभावे इत्येवं रूपेणार्थेन स्वतःसम्भविना कृतः परपुंसा परिचयः सङ्केतो यया सा त्वं स्नातासीति व्यङ्ग्यमित्यर्थः । केचित्तु रतश्रमेण स्नातासीति रत[1]खेदरूपं वस्तु ब्यज्यत इत्यर्थमाहुस्ते त्वक्षरानार्जवादुपेक्ष्याः ।

पदे स्वतः सम्भविवस्तुनालङ्कारव्यङ्ग्यमाह - तदप्राप्तीत्यादि । विष्णुपुराणीयमिदम् । तस्य कृष्णस्याप्राप्तिर्विरहः तज्जदुःखेन नष्टपापा । तस्य चिन्ता ध्यानं तज्जानन्देन क्षीणपुण्या । भोगेन पुण्यपापयोर्नाशात्, निरुच्छ्वासः प्राणापगमाभावः त[2]त्र या गोपकन्या सा मोक्षं गता । 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते' इत्यादि श्रुतेः ।

अत्रेति-श्रीकृष्णवियोगजदुःखस्य तद्ध्यानजानन्दस्य चानन्तपापपुण्यफलाभेदाध्यवसानादतिशयोक्तिरिति प्राञ्चः । तत्तज्जन्मोपभोग्या[3]नन्तसुखदुःखानां तत्तज्जन्मरुपकारणाभावे

१. रतखेदे रूपं-क.।
२. तत्तया गोपकन्य- क.।
३. भोग्यानन्द - क.।

तदप्राप्तिमहादुःख-विलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ।। ८० ।।
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ।। ८१ ।।

अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि

कमलाकरी

कार्यानुभवोक्तेरतिशय इत्यन्ये । मधुमतीकृत्तु-मुख्यातिशयोक्तेरत्राभावात्तत्पदयोगेन विशेषोक्तिरूपालङ्कारपरम् । अत्र च वियोगजदुःखोपभोगेन सर्वपापजदुःखोपभोगोक्तेर्वियो[1] गजदुःखहेतु पापनाशेन च बहिर्गमनं सर्वपापनाशोक्तेर्विशेषालङ्कारद्वयम् । तद्ध्यानजसुखभोगेन समस्तपुण्यजसुखोपभोगोक्तेर्ध्यानसुखहेतु पुण्यनाशेन च सर्वपुण्यनाशोक्तेश्च विशेषोक्तिद्वयमित्याह । अतएवाशेषचयपद्योत्ये इत्युक्तम् । अर्थशक्तिमूलस्वतःसम्भव्यलङ्कारेण पदेन वस्तुव्यङ्ग्यमाह-क्षणदेति। तव द्विषतां त्वां द्विषतां, द्वेषे कर्मणि षष्ठी । त्वयि विमुखे सर्वं विपरीतमित्याह - असौ प्रसिद्धा क्षणदा रात्रिरक्षणदाऽनुत्सवदा वनमरण्यमवनं रक्षकमवीनां मेषाणामसनं क्षेपणं चारणमेव व्यसनं व्यापारः । अक्षणदाऽवनमव्यसनमिति नञा तदभावोक्तेर्विरोध स्तत्परिहारस्तूक्त एव ।

अत्रेति - विरोधोऽङ्गमुत्थापकमुपायो यस्य तेनार्थान्तरयन्यासेन सर्वं विपरीतमित्येतद्गम्येन ब्रह्नमापि त्वामनुसरतीति वस्तु व्यङ्ग्यम् । ननु विरोधस्य शब्दशक्तिमूलत्वात् कथमर्थशक्तिमूलतोच्यते । तत्राह-शब्दशक्तीति । शब्दशक्तिमूलोऽपि विरोधोऽर्थान्तरन्यासस्यैवोत्थापकस्तेन तु वस्तुव्यङ्ग्यमिति युक्तमर्थशक्तिमूलत्वमित्यर्थः ।

पदे स्वतःसम्भविनालङ्कारेणालङ्कारव्यङ्ग्यमाह - तुह वल्लहेति । तव वल्लभस्य प्रातरासीदधरोम्लानकमलदलम् । इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम् । इति संस्कृतम् । गोसम्मीति देशीयभाषायां प्रातर्वाची । अत्रेति अधरस्य म्लानदलत्वेन रुपकेण म्लानत्वे चुम्बनं हेतुरिति काव्यलिङ्गं व्यङ्ग्यमित्यर्थः ।

पदे कविप्रौढोक्तिजेन वस्तुना वस्तुव्यङ्ग्यमाह - राईस्विति । रात्रिषु चन्द्रधवलासु ललिततममांस्फाल्य यश्चापम् । एकच्छत्रमिव

---

१. विस्मद्धेतु (१) योगजदुःख- यमित्यर्थः । अत्रेति का ।

वियोगदुःखचिन्तनाल्दादाभ्यामनुभूतानीत्युक्तम् । एवं चाशेषचयपदद्योत्ये अतिशयोक्ती ।

क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनम् ।
बत बीर तव द्विषतां पराङ्मुखे त्वयि
पराङ्मुखं सर्वम् ।। ८२।।

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन 'विधिरपि त्वामनुवर्तते' इति सर्वपदद्योत्यं वस्तु ।

कमलाकरी

करोति भुवनराज्यं विजृम्भमाणः इति संस्कृतम् यः रात्रिषु चापमास्फाल्य भुवन राज्यमेकच्छत्रं स्वशासनादद्वैतं राज्यं करोतीति चापास्फालनं कविप्रौढोक्तिजमित्यर्थः । अत्रेति - वस्तुना भुवनराज्यपदार्थेन तेभ्यस्तेषां मध्य इत्यर्थः ।

पदे कविप्रौटोक्तिजेन वस्तुनाऽलङ्कार व्यङ्ग्याह - निशितेति अनङ्गोऽराले कुटिले कामिहिंस्रे वयसि यौ [१] वने सुदृशः कामिन्याः दृष्टौ तीक्ष्णबाणानां धिया बुद्ध्या स्वबलमर्पयति क्षिपति । चो हेतौ । सा दृष्टिर्यस्य यस्यां दिशि निपतति तत्रावस्थाः रुदितमूर्च्छादयः व्यतिकरं सङ्घर्षं प्राप्योद्भवन्तीत्यर्थः । अत्रेति-वस्तुना दृष्टौ स्व [२]बलार्पणरूपेण कविप्रौढोक्तिजेनेत्यर्थः ।

प्रौढोक्तिजेनालङ्कारेण पदे वस्तुव्यङ्ग्यमाह - वरिज्जंतो वि इति वार्यमाणोऽपि पुनः सन्तापकदर्थितेन हृदयेन । स्तनभरवयस्येन विशुद्धजातिर्नचलत्यस्या हारः।। इति संस्कृतम् । गाढालिङ्गनेन स्तनयोः पीडनात् सन्तापाद्दुःखितेनातएव स्तनभरस्य वयस्येन सहवासान्मित्रभूतेन हृदयेन वार्यमाण इवेत्युत्प्रेक्षा । अपिरिवार्थे । त्वमितो मा गच्छ येन स्तनयोः पीडनमपि तावन्न स्यादिति वार्यमाण इव न चलतीत्यर्थः । विशु[३]द्धोऽ यं स्वाश्रयं न जहातीति चलनाभावे शुद्धजातित्वं हेतुः तेनालङ्कारेणेत्यर्थः ।

प्रौढोक्तिजेनालङ्कारेणालङ्कारं पदे व्यङ्ग्यमाह - सो मुद्धेति । स मुग्ध श्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः । तस्या स्कन्धात् बलं गृहीत्वा स्मरः सुरतसङ्गरेजयति । इति संस्कृतम् । धम्मिल्लः

---

१. यौवने सति सुदृशः क.।
२. स्वबलार्पणकविप्रौढोक्तिजेनेत्यर्थः-क.।
३. विशुद्धौ हि स्वाश्रयं-ब.।

तुह वल्लहस्स गोसंमि आसि अहरो मिलाणकमलदलो ।
इअ णवबहुआ सोऊण कुणइ वअणं महिसंमुहं ।। ८३ ।।

अत्र रूपकेण त्वयास्य मुहुर्मुहुः परिचुम्बनं तथा कृतं येन म्लानत्वमिति मिलाणादिपदद्योत्यं काव्यलिङ्गम् ।

एषु स्वतःसम्भवी व्यञ्जकः ।

राईसु चंदधवलासु ललिअमप्फालिऊण जो चावम् ।
एकच्छत्तं बिअ कुणइ भुऊणरज्जं विजंभंतो ।। ८४ ।।

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्श्दिपितदा-देशपराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तै र्निशातिवाह्यते इति भुअणरज्जपदद्योत्यं वस्तु प्रकाशते ।

निशितशरधियार्पयत्यनङ्गो
दृशि सुदृशः स्वबलं वयस्यराले ।
दिशि निपतति यत्र सा च
तत्र व्यतिकरमेत्यसमुन्मिषन्त्यवस्थाः ।।८५ ।।

कमलाकरी

केशपाश एव स्मर इति प्रौढोक्तिजं रूपकं तस्या स्कन्धादंसात् सेनानिवेशाच्च, बलं सामर्थ्यं सैन्यञ्च, रताभावो ह्य[१]भिलाषे हेतुः रताभावरूपकारणाभावेऽप्यभिलाष इति विभावना सा च स्कन्धपदे तत्सम्बन्धात् केशानां शोभातिशयादित्यर्थः ।

कविनिबद्धवक्तृप्रौढोक्तिजं पदे वस्तुना वस्तुव्यङ्ग्यमाह-णवेति । नवपूर्णिणामृगाङ्कस्य सुभग कस्त्वमसि भण मम सत्यम् । का सौभाग्य समग्रा प्रदोषरजनीव तवाद्य ।। इति संस्कृतम् । नवः प्रथमोदितः पूर्णिमापदेन नायिका मृगाङ्कपदे सदोषत्वं व्यङ्ग्यम् । प्रदोषो रजनीमुखं तत्र यथा चन्द्रः क्षणमात्रं रक्तः नोर्ध्वं तथा त्वं तस्यां प्रथममनुरक्तः न ततः पश्चादिति शेषः । न च रजनीवेत्युपमात्वात्कथं वस्तु व्यञ्जकत्वमिति वाच्यं तदनुपादानेऽपि व्यङ्ग्यधीसत्वात् ।

अत्रैव वस्तुनालङ्कारव्यङ्ग्यमाह - सहीति । सखि नवविधुवनसमरेऽङ्कपालीसख्या निविडया । हारो निवारित एवोच्छ्रियमाणस्ततः कथं रमितम् ।। इति संस्कृतम् ।। निधुवनं

---

१. ह्यभिलाषहेतुः-क.।

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा॰अपि प्रभवन्तीति व्यतिकरपदद्योत्ये विरोधः ।

वारिज्जंतो वि पुणो संदावकदत्थिएण हिअएण ।
थणहरवअस्सएण विसुद्ध जाई ण चलइ से हारो ।। ८६ ।।

कमलाकरी

सुरतमङ्कपाली आलिङ्नं सैव सखी सुखहेतुत्वात् । ‘ अङ्कपालिः परीरम्भः’ इति मेदिनीकारः । उद्धार्यमाणोऽप्रसार्यमाणो । रतिकाले ह्न्यो निवार्यते हारोऽपि विघ्नहेतुत्वान्निवारितः गाढ़ालिङ्गनेन त्रोटित इत्यर्थः । परमानन्दस्तु उच्चेरंतो उद्वण्वन् ह्रियते इति हारः इत्यन्वर्थमर्थमाह । एतावन्मया दृष्टं तत ऊर्ध्वं कथं रमितम् । अत्रेति । हारच्छेदादिवस्तुना सर्वरतेभ्योऽधिकत्वाद् व्यतिरेक कथं पदेन व्यज्यते इत्यर्थः ।

पदे कविनिबद्धवक्तृजेनालङ्कारेण वस्तुव्यङ्ग्यमाह- पविसंतीति । प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पन्थानम् । स्कन्धे गृहीत्वा घटं हा हा नष्ट इति रोदिषि सखि किमिति ।। इति संस्कृतम् । नष्टत्वं रोदने हेतुः ।

नन्वत्र स्वतःसम्भंवित्वमेवेत्यस्वरसादाह - यथा वेति । विसंठुलामि ति । विश्रृङ्खलां त्वां सखि दृष्ट्वा कुटेन तरलतरदृष्टिम् । द्वारस्पर्शमिषेण चात्मा गुरुकइति पातयित्वा विभिन्नः ।। इति संस्कृतम् । कुटो घटः केचित्तु- कुट इति घटमाहुः तेनोपलक्षितां विह्वलां त्वां दृष्ट्वा घटेनात्मा स्वरस्वरूपं गुरुरिति पातयित्वा विभिन्नः विभेदितः । द्वाराघातमिषेणेत्यपहुतिस्तया तव श्वश्रूं बोधयिष्ये इति वस्तु मिषेणेति पदे व्यङ्ग्यम् ।

पदे कविनिबद्धवक्तृजेनालङ्कारेणालङ्कारव्यङ्ग्यमाह- जोण्हाए इति । ज्योत्स्नाया मधुरसेन च वितीर्णतारुण्योत्सुकमनाः सा. । वृद्धापि नवोढेव परवधूरहह हरति तव हृदयम् । इति संस्कृतम् । हृदयहरणे[१] परवधूत्वं हेतुरतः काव्यलिङ्गम् । त्वच्चरितस्य वक्तुमशक्यत्वेन निषेधरूप आक्षेपालङ्कारो व्यङ्ग्य इत्यर्थः । उदाहृतमिति-‘उल्लास्य कालकरवालम् ’ मिति ‘निश्शेष च्युतेत्यत्र चेत्यर्थः ।

पदे उभयशक्तिजः कुतो नोक्तोऽत आह- शब्दार्थेति । एकस्य

---

१. हृदयहरणेन-क.।

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति ण चलइ पदद्योत्यं वस्तु ।

सो मुद्धसामलंगो धम्मिल्लोकलिअललिअणिअदेहो ।
तीरा खंधाहि बलं गहिअ सरो सुरअसंगरे जअइ ।। ८७ ।।

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तथा केशपाशः स्कन्धयोः प्राप्तः यथा रतिविरतावप्यनिवृत्ताभिलाषः कामुकोऽभूदिति खंधपदद्योत्या विभावना । एषु कविप्रौढौक्तिमात्रनिष्पन्नशरीरः ।

णवपुण्णिमामिअंकस्स सुहअ को त्तंसि भणसु महसच्चम् ।
का सोहग्गसभग्गा पओसरअणिव्व तुह अज्ज ।। ८८ ।।

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्त स्त्वं न तत इति णवेत्यादि पओसेत्यादिपदद्योत्यं वस्तु व्यज्यते ।

सहि णवणिहुवणसमरम्मि अंकषाठीसहीए णिविडाए ।
हारो णिवारियो व्विअ उच्छेरंतो तदो कहं रमिअम् ।। ८९ ।।

कमलाकरी

पदस्यान्वयव्यतिरेकाभावादित्यर्थः । पञ्चत्रिशदिति- वाक्येऽष्टादश पदे सप्तदशेति मिलित्वा पञ्चत्रिंशदित्यर्थः।

प्रबन्धेऽपीति । प्रबन्धो महावाक्यं प्रकरणं वा । अपिशब्दात् पदे वाक्ये च । महाभारते हि शान्तिपर्वणि गृद्धगोमायुसंवादे मृतं बालं स्मशाने नीतं दृष्ट्वा गृद्धस्य रात्रावन्धस्य दिने जनविसर्जनार्थं मांसं स्वयं भक्षयितुं जनान् प्रति गृद्धोक्तिः-अलं स्थित्वेति । कङ्कालानि शवास्थीनि । 'स्याच्छरीरास्थि कङ्काल' (अ. २।६।६९) । इह प्रियो द्वेष्यो वा कालधर्मं मरणं प्राप्तः कोऽपि जीवितो नेत्यर्थः । एवं गृध्द्रेणोक्ते दिवान्धस्य गोमायोः कोष्ठुर्गृद्ध एव सर्वं मा भक्षयत्विति जनस्थिरीकरणार्थमुक्तिरादित्योऽयमिति । अनिष्टमिति दिने इति शेषः । अयमयमेव सन्ध्यारूपो मुहूर्त्ता बहुविधसतेनास्मिन् मुहूर्ते गते जीवेदपीत्यर्थः ।

अत्रार्थरूपेण वस्तुना बालमांसभक्षणरूपं वस्तु व्यज्यत इत्यर्थः । अतः प्रबन्ध एवेदृशोऽर्थः प्रथत इत्यर्थः ।

अर्थशक्तिमूलस्य द्वादशभेदेषु प्रबन्धवाच्येष्वेको भेद उक्तः । अन्ये तु वस्तुनाऽलङ्कारस्तेन वा वस्तु व्यङ्गमित्याद्येकादशभेदः स्वयं ज्ञेया

अत्र वस्तुना हारच्छेदानन्तरमन्यदेव रतमवश्यमभूत तत्कथय कीदृगिति व्यतिरेकः कहं-पदगम्यः ।

पविसंती घरदारं विवलिअवअणा विलोइऊण पहम् ।
खंधे घेत्तूण घणं हाहा णहोत्ति रुअसि सहि किंत्ति ।। ९० ।।

अत्र हेत्वलङ्कारेण सङ्केतनिकेतनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदाऽपरं घटं गृहीत्वा गच्छेति वस्तु किंति पदद्योत्यम् ।

यथा वा-

विहलंखलं तुमं सहि दट्ठूण कुडेण तरलतरदिट्ठिम् ।
वारफ्फंसमिसेण अ अप्पा गुरुओत्ति पाडिअ विहिण्णो ।।९१।।

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारोपद्यघातव्याजेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटित इति मया चिन्तितम्, तत् किमिति नाश्वसिषि, तत्समीहितसिद्धये व्रज, अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति द्वारस्पर्शनव्याजेन इत्यपह्नुत्या वस्तु ।

जोण्डाए महुरसेण अ विइण्णंतारुण्णउस्सुअमणा सा ।
बुढ्ढ्वाव णवोढव्वि परबहुआ अहह
हरइ तुह हिअअम् ।। ९२ ।।

अत्र काव्यलिङ्गेन वृद्धां परवधूं त्वमस्मानुज्झित्वाऽभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेपः परवहूपदप्रकाश्यः ।

कमलाकरी

इत्याह- अन्येत्विति । प्रबन्धेऽपीत्यापिशब्दार्थमाह-पदैकदेशेति-पदं सुबन्तं तिङन्तश्चेति द्वेधा । एकदेशाः नामधातुनिपातोपसर्गसर्वनामपूर्वनिपातप्रकृतितद्धित-सुप्तिङ्प्रत्ययतद्विशेषात्मनेपदपरस्मैपदरूपाः रचनाल्पमध्यमदीर्घसमासाः वर्णा मृदुरुक्षादयः ।

पदस्योदाहृतत्वात् तदेकदेशधातुरूपप्रकृतेराह-रइ केलीति । रतिकेलिहृत-निवसनकरकिसलयरुद्धनयनयुगलस्य । रुद्रस्य तृतीय-

एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाशे तु पूर्वमुदाहृतम्। शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पञ्चत्रिंशद्भेदाः।

प्रबन्धेऽप्यर्थशक्ति भूः ॥ ४२ ॥

यथा गृध्रगोमायुसंवादादौ-

अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे ॥ ९३ ॥
न चेह जीवितः कश्चित् कालधर्ममुपागतः ॥
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ ९४ ॥

इति दिवाप्रभावतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम्।

आदित्योऽयं स्थितो मूढा स्नेहं कुरुत साम्प्रतम्।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥ ९५ ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥ ९६ ॥

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तनिष्ठञ्च वचनमिति प्रबन्ध एव प्रथते।

अन्ये त्वेकादशभेदा ग्रन्थविस्तरभयान्नोदाहृताः। स्वयन्तु लक्षणतोऽनुसर्तव्याः। अपि शब्दात् पदवाक्ययोः।

पदैकदेशरचनावर्णेष्वपि रसादयः।

तत्र प्रकृत्या यथा-

रइकेलि-हिअ-णिअसणं करकिसलअरुद्ध-णअणजुअलस्य।
रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ ॥ ९७ ॥

कमलाकरी

नयनं पार्वती-परिचुम्बितं जयति ॥ इति संस्कृतम् ॥ रतिकेलौ हृतं वस्त्रं येन स चासौ करपल्लवरुद्ध[1]नेत्रद्वद्वश्चेति कर्मधारयः कृतनिवसनेति पाठे मोर्याः नग्नतायै तद्वस्त्रं स्वंय परिहृतं येनेत्यर्थः।

---

१. कररुद्धेन नयनयुगलस्य द्वन्द्वश्चेति क.।

अत्र जयतीति न तु शोभते । समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव व्यापारेणास्य पिधानमिति तदेवोत्कृष्टम् । यथा वा-

प्रेयान् सोऽयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद् यावन्न यात्युन्मनाः ।
तावत् प्रत्युतपाणिसम्पुटगलन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ।। ९८ ।।

अत्र पदानि न तु द्वाराणीति ।

तिङ्सुपोर्यथा-

पथि पथि शुकचञ्चूचारूराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा ।। ९९ ।।

अत्र किरतीति किरणस्य साध्यमानत्वम्, निवृत्तेति निवर्तनस्य सिद्धत्वं तिङा सुपा च, तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते । यथा वा-

कमलाकरी

अत्र न प्रकृत्यन्तरं व्यञ्जकमित्याह - न तु शोभते इति । तत्र हेतुः - समाने प्रपीति । स्थमनमाच्छादनं हस्तादिनाच्छादनं लोके दृष्टं, चुम्बनेन तत् कारणं क्वाप्यदृष्टमिति लोकोत्तरत्वम् । तदेवेति चुम्बनविधानमेवोत्कृष्टं लज्जाहर्षरागातिशयद्वारासम्भोगरसपोषणात् तदुत्कृष्टत्वं जयतिगम्यं न तु शोभते इत्यादिपदगम्यमित्यर्थः ।

नाम्नो व्यञ्जकत्वमाह - यथा वेति - प्रेयानिति । सोऽयं प्रेमास्पदत्वेन प्रसिद्धः (सायमिति पाठे सन्ध्याकाले) प्रेयान् प्रियः सशपथं पादानतः कान्तया सशपथमपाकृतश्च सन्निवासगृहात् । रासेति पाठे रासः क्रीड़ा । द्वित्राणि पदानि यावन्नैव याति गच्छति प्रत्युत विपरीतं पाणिसम्पुटेन प्रणामार्थं बद्धाञ्जलिना गलन्नीविबद्धो यथा तथा धावित्वैव धृतः।

अत्रेति - द्वारपर्यन्तगमनेऽप्यधैर्यमित्युत्कण्ठातिशयो व्यङ्ग्यः सम्भोगपोषकः ।

पथि पथीति । शुकचञ्चुवच्चारुणां रम्भा कदली तदङ्कुराणां न लासक उद्बोधकः । चारुराभाङ्कुराणामिति पाठे- चारू

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैः
तवावस्था चेयं विसृज कठिने मानमधुना ।। १०० ।।

अत्र लिखन्निति न तु लिखतीति, तथा आस्ते इति न त्वसित इत्यपितु प्रसादपर्यन्तमास्ते इति, भूमिमिति न तु भूमाविति, न हि बुद्धिपूर्वकमपरं किञ्चिल्लिखतीति तिङ्सुब्विभक्तीनां व्यङ्ग्यम् ।

सम्बन्धस्य यथा-

गामारुहम्मि गामे वसामि णअरट्ठिइं ण जाणामि ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ।।१०१।।

अत्र नागरिकाणामिति षष्ठयाः ।

रमणीयः क्षत्रियकुमारः आसीत्' इति कालस्य । एषा हि भग्नमहेश्वर-कार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ।

कमलाकरी

अङ्कुराणामाभा कान्तिः प्रतिमार्गं शुकचञ्चूवच्चारू अस्तीति शेषः । पवमानो वायुर्वीरुधां लतानां लासको नर्तकश्चास्ति । चर्चा वार्ता ।

अत्रेति - । औणादिकक्युप्रत्ययात् किरणपदस्य साधुत्वम् । अयं भावः-माननिवृत्तौ शरकिरणं कारणं तस्य सिद्धत्वे वाच्ये किरतीति तिङा सिद्धा[१]वस्थोक्तेः साध्यत्वोक्तिः माननिवृत्तौ च कार्यभूतायां साध्यत्वे वाच्ये सुपा सिद्धत्वोक्तिः तेन कार्यकारणयोः पौर्वापर्यविपर्ययादतिशयोक्तिस्तेन माननिवृत्तेः शैघ्र्यात् वसन्तस्योद्दीपकत्वाप्रकर्षो व्यङ्ग्यः सुपा च द्योत्यते इत्यन्वयः। तत्रापीति माननिवृत्तेः कार्यस्यातीतत्वं व्यङ्ग्यम् । ननूक्तप्रत्ययस्यातीतत्वं वाच्यमेवातः कथं व्यङ्ग्यत्वोक्तिरिति चेदुच्यते । निवृत्तेति क्तेन निवृत्तेरतीतत्वं नोच्यते बाधात्, निवृत्तेरतीतरूपाया आसीतत्वाभावात् । न च मानचर्चागतमतीतत्वं तस्याः प्रकृतित्वाभावात्, प्रत्ययार्थानां प्रकृत्यर्थान्वितत्वात् । तेनाप्रकृत्य[२]र्थचर्चागतमतीतत्वं क्तेन व्यञ्जनयैव बोध्यते इति । न च प्रकृत्या क्तप्रत्ययेन चातीतत्वोक्त्या चेक [३]

१. साध्यावस्थोक्तेः साध्यत्वोक्तिः-क.।
२. तेनप्रकृत्यर्थ-क.।
३. [illegible]तेनोतमतीतत्वम् -क.।

वचनस्य यथा—

ताणं गुणग्गहणाणं ताणुक्कंठाणं तस्स पेम्मस्स ।
ताणं भणिआणं सुन्दर एरिसिअं जाअमवसाणम् ।।१०२ ।।

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते ।

कमलाकरी

तरवैयर्थ्यम्, सम्भेदेऽन्यतरवैयर्थ्याभावात् । यद्वाति शक्तनोयेनेतरत्वमतीतत्वम् । तेन प्रकृत्योक्तस्याप्यतीतत्वस्य पुनः क्त-प्रत्ययोक्तिरतिशयार्था । शुक्लः इति द्वितीयशुक्लपदस्येव चर्चातीतत्वेऽतिशयश्च चर्चान्तरासमानकालीनत्वमिति परमानन्दः ।

अत्रैव लक्ष्यान्तरमाह – लिखन्निति । सख्याः नायिकां प्रत्युक्तिः ।

अत्रेति – लिखन्निति शत्रा लिखनस्याबुद्धिपूर्वकत्वादप्राधान्यम् । प्रसादस्यैवोद्देश्यत्वात्, न त्वासीदिति प्रसादपर्यन्तं स्थितिरुद्देश्या, तेन स्थितेरतीतताव्यवच्छेदो व्यङ्ग्यः । भूमीमित्यस्य कर्मणो लिखनमुद्देश्यं नेत्यर्थः । शुकैः हसितार्थं पठितं यत्तदपि त्यक्तम् । यथा-

"मुञ्च मुञ्च बहु मा किल कार्षीर्देहि चुम्बनमहो सुखमद्य ।
अस्ति ते सुखमितः खलु पश्येत् कश्चिदाशु विसृजेति रतेः गोः ।।"

नन्वस्य शिक्षोत्तरं सर्वं मया समाधेयमत आह- तवेति । तदुत्तरं कः करिष्यतीति भावः । तेन धर्मिबाधात् वरं मानबाधः न चात्यन्तं तद्बाधः सुरतोत्तरं पुनः मानस्वीकारादित्याह-अधुनेति, । न च तदा तद्वैयर्थ्यं न च भगसौन्दर्येण तस्य पुनः सुरतेच्छात्वात्, इत्याह-सुभंगेति । 'कठिने' इति पाठे भर्तुः प्राणात्ययेऽपि निर्दयत्वात् काठिन्यम् ।

प्रत्ययार्थस्य षष्ठ्यर्थस्य व्यञ्जकतामाह- गामेति । ग्रामरुहास्मि ग्रामे वसामि नगरस्थितिं न जानामि । नागरिकाणां पतीन् हरामि या भवामि सा भवामि ।। इति संस्कृतम् । अत्रेति षष्ठ्या व्यञ्जकत्वमित्यनुषङ्गः । षष्ठ्या नगरभवानामपि स्त्रीणां परिहारकत्वात् तादृशकला[१]भिज्ञतारूप उत्कर्षो व्यङ्ग्य इत्यर्थः । । यत्तु परमानन्देन षष्ठ्याऽनादरे व्यङ्ग्य इत्यूचे यद्यपि 'षष्ठी चानादरे' (अ.२।३।३८) इत्यत्रानादरो वाच्य एव न व्यङ्ग्यस्तथापि तेन रसव्यञ्जनैवेत्युक्तं तद्भ्रान्तिकृतमेव ।

---

१. कलाभितातरूप - उत्कर्षो -क. ।

पुरुषव्यत्यस्य यथा-

रे रे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ।। १०३ ।।

कमलाकरी

कालस्येति - अतीतकालार्थस्य लुङो व्यञ्जकत्वमित्यनुषङ्गः । मत्क्रोधग्रस्तोऽयं न स्थायी न वा भविष्यन्निति व्यङ्ग्यमित्यर्थः ।

ताणमिति । तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः । तासां भणितीनां सुन्दर ईदृशं जातमवसानम् ।। इति संस्कृतम् । प्रेमहेतूनां गुणादीनामानन्त्येऽपि प्रेमैकरूपमेवेति व्यङ्ग्यम् । प्रेम्ण इत्येकत्वस्य शक्यत्वेऽपि प्रकारैक्यं व्यङ्ग्यमित्यर्थः ।

पुरुषेति- पुरुषः प्रथममध्यमोत्तमरुपः । रेरे इति - । कस्यचित् कान्ताभिलाषुकस्य तदप्राप्तया नेत्रमनसी प्रत्याक्षेपोक्तिः । चञ्चललोचना स्त्री तस्यामञ्चिताऽऽविष्कृता रुचिरभिलाषो येनेति चेतो-विशेषणम् । श्रद्धा रे लोचने हे चेत इति द्वे सम्बुद्धी । स्थिरं प्रेम यत्र तं महिमानं प्रमुच्य मृगाक्षीं दृष्ट्वा च किमिति नृत्यसि स्फुरसि हृष्यसि चेति नेत्रचेतसोर्यथा योगम् ।

किं मन्यसे विहरिष्यामि । त्वं मन्ये इति पाठे त्वं मन्यसे इत्यर्थः । उत्तममध्यमयोर्मध्यमोत्तमौ ज्ञेयौ । 'प्रहासे मन्योपपदे मन्यतेरुत्तम एकवच्च' (अ. १।४।१०६) इति । हतां निन्दितामन्तर्मनस्याशा वहिस्तद् गोपनमिमां मुञ्च खलु । यतः एषामाशा स्त्री वा संसारसमुद्रे मज्जनार्थं कण्ठतटे शिलारूपा कृता, अनया दुःखप्राप्त्या मज्जनमेव न तु कदाचिदपि सुखलेख इत्यर्थः । अत्र हासो व्यङ्ग्य इति शेषमाहुः । तत्वन्तु हास एव पुरुषव्यत्ययस्मृतेर्हासो न व्यङ्ग्य किंतु निवृत्ति रूपशान्तरसस्य व्यञ्जक इति योज्यमिति । परमानन्दस्तु पदवाक्याभ्यां हासाप्रतीते र्व्यञ्जनैवेत्याह । तत्रानुशासनं किमर्थमिति चिन्त्यम् ।

अत्र प्रहासः

पूर्वनिपातस्य यथा-

'येषां दोर्बलमेव दुर्बलतया ते सम्मतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ।
ये क्ष्माशक्र पुनः पराक्रमनयस्वीकार-कान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्रा परम् ।।१०४।।

अत्र पराक्रमस्य प्राधान्यमवगम्यते ।

विभक्तिविशेषस्य यथा-

प्रधानाध्वनि धीरधनुर्ध्वनिभृति विधुरैररयोधि तव दिवसम् ।
दिवसेन तु नरप भवानयुद्ध
विधिसिद्धःसाधुवादपदम् ।।१०५।।

कमलाकरी

येषामिति- । येषां राज्ञां केवलं दोर्बलमेव न तु नीतिस्ते दुर्बलतया सम्मताः दुर्बला एव ज्ञातव्याः, तैरप्युर्वीधरैः केवलनीतिमार्गरतैः किं कार्यं न किमपीत्यर्थः । हे क्ष्माशक्र भूमीन्द्र ये तु पराक्रमनीतिमार्गयोः स्वीकारेण कान्तक्रियाः रम्यगतयस्ते न स्युरेव । यदि स्युस्तदा भवादृशा द्वित्रा एव, येऽपि द्वित्राः पवित्रास्तेऽपि भवादृशा न स्युरित्यन्वयो वा । अत्र नयशब्दस्याल्पाचतरत्वेन पूर्वनिपातत्वेऽपि पराक्रमस्य पूर्वनिपातोऽभ्यर्हिततत्वादार्थः । अभ्यर्हितं पूर्वं निपततीति स्मृतेः । प्रधनेति – हेवीर चापशद्बवति युद्धमार्गे तव विधुरैः शत्रुभिर्दिवसं व्याप्यायोधि । हे नरप, भवाँस्तु विधिसिद्धं दैवसिद्धं साधु-वादस्य पदं यस्यां क्रियायां तथा दिवसेनायुद्ध युद्धफलमाप्तवान् ।

अत्रेति – 'अपवर्गे तृतीया' (अ. २।३।६) इत्यपवर्गस्य युद्धफलस्य विजयस्य प्राप्तिर्व्यङ्ग्येत्यर्थः । यद्यप्यपवर्गस्तृतीयाया एव शक्य एव तथापि समाप्तिर्वाच्या फलप्राप्तिव्यग्ङ्ग्येर्यत्यर्थः ।

भूयोभूय इति – । भवने प्रासादे वलभीकलशयुतं स्थलं तत्र तुङ्गमुच्चं वातायनं गवाक्षं तत्रस्था मालती सविधे समीपे नगर्या रथ्या राजमार्गास्तेन पुनः पुनर्गच्छन्तं नवं युवानं माधवं रतिः काममिव साक्षात्

अत्र दिवसेनेति 'अपवर्गे तृतीया फलप्राप्तिं द्योतयति ।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात् कामं नवमिव रतिर्मालती माधवं यत्
गाढोत्कण्ठाललितकुलितैरङ्गकैस्ताम्यतीति ।। १०६ ।।

अत्रानुकम्पावृत्तेः करुपतद्धितस्य ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचित-महामोहगहनो
विकारः कोऽप्यन्तर्जयति च तापञ्च कुरुते ।। १०७ ।।

अत्र प्रशब्दस्योपसर्गस्य ।

कृतञ्च गर्वाभिमुखं मनस्त्वया
किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान्
न यावदायात्युदयाद्रिमौलिताम् ।। १०८ ।।

कमलाकरी

दृष्ट्वा न त्विन्द्रजालवज्ज्ञात्वा यत् किल ललितकुलितैरत्यन्तं परिवर्तनशीलैः । ललितेति पाठेऽतिमनोहरैः । ललितं लुण्ठनं येषामिति वा । अङ्गकैरनुकम्प्यैः । कृशैरङ्गैस्ताम्यति ग्लायतीति मालतीधात्र्या मे कथितमिति कामन्दकीवचनम् । अत्रेति - अल्पार्थे विहितस्य कन्प्रत्ययस्य तद्धितस्य कृशत्वेनानुकम्पा, तया विरहोत्कर्षव्यञ्जकत्वमित्यर्थः।

उपसर्गस्य व्यञ्जकत्वमाह-परिच्छेदेति । मकरन्दं प्रति माधवोक्तिः-परिच्छेदो विरतिरियत्ता वा तद्रहितः, सकलानि वचनानि निर्वचनानि तेषामगोचरो निर्वक्तुमशक्यः तेन सकलानि शक्तलाक्षणिकादीनि वचनानि तेषामगोचर इत्यपव्याख्या । अस्मिन्

अत्र तुल्ययोगिताद्योतकस्य च इति निपातस्य ।

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्
अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानति तम् ।
बन्दीवैष यशांसि गायति मरुद् यस्यैकबाणाहति -
श्रेणीभूतविशालताल-विवरोद्गीर्णैः स्वरैः सप्तभिः ।। १०९ ।।

अत्र असौ इति भुवनेष्विति, गुणैः इति सर्वनाम प्रातिपदिकवचनानां न त्वदिति न मदिति अपि तु अस्मदित्यस्य सर्वाक्षेपिणो भाग्यविपर्ययाद् इत्यन्यथासम्पत्तिमुखेन न त्वभावमुखेनाभिधानस्य ।

तरुणिमनि कलयति कलामनुमदनधनुर्भुवोः पठत्यग्रे ।
अधिवसति सकलललनामोलिमियं चकितहरिण-
चलनयना ।।११०।।

कमलाकरी

जन्मनि च कदापि पुनर्द्वितीयवारं नानुभूतः । यद्वा पुनर्जन्मनि जन्मातरेऽन्यस्मिन् वा जन्मनि नानुभूतः । उपचिते वृद्धो मोहोऽज्ञानं तेन गहनो निविढः, कोऽप्य न्तर्मनसि विकारो विवेकः[१] भेदज्ञानं तस्य नाशाज्जडयति प्रवृत्तीः प्रतिबध्नाति तापञ्च विरहसन्तापञ्च करोतीत्यर्थः । अत्रेति-प्रध्वंसादिति प्रशब्दे पदैकदेशे प्रकर्षो व्यङ्ग्य ध्वंसे प्रकर्षश्च प्रतियोगिजातीयतत्प्रागभावासमानाधिकरण्यमुपसर्गाणां द्योतकत्वाद् व्यञ्जकत्वम् ।

निपातस्याह-कृतञ्चेति । त्वया गर्वाभिमुखं न तु गर्वितं मनः कृतमेवं शस्त्रादिकं विना नोऽस्माकं शत्रवो निहताश्च । अन्यच्छस्त्रादिकं किं किमु वक्तव्यमित्यर्थ। यावत् सूर्य उदयाद्रिमौलितामुदयाचलशिखरं नारोहति तावत्तमांसि तिष्ठन्ति। अत्रेति- चकारद्वये तुल्यकालता व्यङ्ग्या तेन वीरोत्कर्ष इत्यर्थः । अत्र मुख्यतुल्ययोगिताभावात्तच्छद्धेन समुच्चयोऽभिधीयत इति केचित्। चादीनां पदत्वात् तदेकदेशत्वाभावेऽपि केवलस्याप्रयोगात् पदैकदेशत्वोपचार इति काव्यप्रदीपः ।

रामोऽसाविति । रावणं प्रति कुम्भकर्णोक्तिः । असौ

१. तत्वज्ञानं - क० ।

अत्र इमनिजव्ययीभाव-कर्मभूताधाराणां स्वरूपस्य, तरुणत्वे इति, धनुष समीपे इति, मौलौ वसतीति, त्वादिभिस्तुल्ये एषां वाचकत्वे अस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी स एव व्यञ्जकत्वं प्राप्नोति । एवमन्येषामपि बोद्धव्यम् ।

वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते । अपि शब्दात् प्रबन्धेषु नाटकादिषु ।

कमलाकरी

खरवधसेतुबन्धादिपरा क्रमवत्तया त्वयैव दृश्यमानो रामः । भुवनेषु न तु ग्रामेषु भुवने वा विक्रमस्थ गुणै धैर्यादिभिः । बहुत्वेन दोषाभावः । तदेतद्वक्षति सर्वनामेत्यादिना परां प्रसिद्धिं प्राप्तः । यदिशब्दो ऽवधारणे । परं केवलमस्माकं कुलस्थानां भाग्यस्य विपर्ययादन्यथा परिणामाद् अभाग्योक्तौ प्रभुक्रोधापत्तेस्तस्मा देव परं केवलं तं न जानात्यन्ये तु केवलं जानन्त्यनुभवन्ति च । एकबाणाहतौ श्रेणीभूतानां विस्तृति-शीलानां विवरैरुद्गीर्णैः प्रकटितैः सप्तभिः स्वरैः षड्जाद्यैरेष मरुद् वायुर्बन्दी वैतालिक इव यशांसि गायतीत्यर्थः ।

तदेतत्सर्वमाह - अत्रेति । असाविति सर्वनाम्नः भुवनेषु गुणैरिति[१] प्रातिपदिकबहुवचनानां व्यञ्जकत्वमिति शेषः । न त्वदिति न त्वद्भाग्येत्युक्तं न वा मद्भाग्येत्युक्तमपि त्वस्मद्भाग्येत्यात्मगतबहुत्वेन सर्वकुलाक्षेपिणोऽस्मदित्यस्य व्यञ्जकत्वमिति शेषः । भाग्यविपर्यया दित्यन्यथासम्पत्ति, परिणामोऽन्यथा सम्पत्तिमुखेन सम्पत्तेरन्यथा मुखेनेति वा तन्मुखेन त्वभावमुखेन भाग्यमित्येवमभिधानस्य व्यञ्जकत्वमिति शेषः ।

तरुणिमनीति । तरुणिमनि तारुण्ये कलामुपचयं कलयति प्राप्ते सति भ्रुवोरग्रे शिष्यभूते कामधनुषः गुरोः समीपे पठति सति यद्वा कलां कौशलं पठति सतत्यन्वयः । इयं भीतमृगचलनेत्रा सर्वस्त्रीणां मौलिमधितिष्ठतीत्यर्थः ।

अत्रेति- तरुणिमनीत्यिमनिजनुमदनेत्यव्ययीभावः , मौलिमिति कर्मभूताधारैस्तेषां स्वरूपस्य व्यञ्जकत्वमिति शेषः । तदेतदाह-तरुणत्व

१. प्रकृतिबहुवचनानां क. ।

एवं रसादीनां पूर्वगणितभेदाभ्यां सह षड्भेदाः ।

भेदास्तदेकपञ्चाशत्

व्याख्याताः ।

तेषां चान्योन्ययोजने ।। ४३ ।।

कमलाकरी

इति । एषामिमनिजादीना भवाद्यर्थत्वात् तरुणत्वे धनुः समीपे मौलावित्यादिभिः पदैः तुल्येऽपि वाचकत्वे, स्वरूपस्य वाचकत्वे इति वाऽन्वयः । एषामेव रुपस्य कश्चिद् विशेषोऽस्ति व्यञ्जकत्वे इति शेषः । इमनिजा वर्णमाधुर्येण सौकुमार्यान्नवं वयः प्रतीयते, त्वप्रत्ययेन तु श्रुतिकटुत्वात् प्रौढं वयः, एवमव्ययीभावे पूर्वपदार्थप्रधाने धनुः सामीप्यमहिम्ना भ्रुवोऽग्रे जयित्वं मौलिमिति कर्मत्वाद् व्याप्तिः सूच्यते । आधारत्वे ह्येकदेशेऽपि वृत्तिः स्यादिति स्वसाक्षिकोऽत्र चमत्कार एव मानमिति भावः ।

एवमिति । अन्येषामपि पदैकदेशादीनां व्यञ्जकत्वं बोद्धव्यमित्यर्थः । क्रमेण वर्णानां रचनानाञ्च व्यञ्जकत्वं कुतो नोक्तं तत्राह-वर्णेति । वर्णादेर्माधुर्यव्यञ्जकत्वात् तस्य च रसव्यञ्जकत्वात् न साक्षात् तत्वमतोऽष्टमोल्लासे गुणेषु वक्ष्यत इत्यर्थः । मूले. वर्णेष्वपीत्यपिशब्दार्थमाह । नाटकादिप्रबन्धेषु रसादयो व्यङ्ग्या इत्यर्थः । आदिशब्दात् प्रकरणे इति ।

पूर्वगणितेति - । पदवाक्यगतौ द्वौ, प्रबन्ध पदैकदेशवर्णगताश्चत्वारः इति षड् इत्यर्थः । एकपञ्चाशदिति-अविवक्षितवाच्यस्यार्थान्तरङ्क्रमितोऽत्यन्ततिरस्कृतश्चेति द्वौ भेदौ तौ पदवाक्यगताविति चत्वारः, विवक्षितान्यपरेष्वलक्ष्यक्रमव्यङ्ग्यः षोढा, पदवाक्यप्रबन्धपदैकदेशरचनावर्णभेदात् , लक्ष्यक्रमव्यङ्ग्येषु शब्दशक्तिमूलौ द्वौ, तौ च पदवाक्यगतत्वेन प्रत्येकं द्वेधेति चत्वार, अर्थशक्तिमूलस्य अर्थशक्तिमूलस्य द्वादशभेदाः, तत्र एकैकः पदवाक्यप्रबन्धगतत्वात् त्रिधेत्यस्य षड्विंशद्भेदाः, उभयशक्तिमूलो वाक्य एवेत्येवं वाक्येऽष्टादश पदे च सप्तदशेति पूर्वोक्ताः पञ्चत्रिंशत्, अर्थशक्तशुत्थाः प्रबन्धे द्वादश, असंलक्ष्यक्रमस्य पदैकदेशरचनावर्णप्रबन्धगाश्चत्वारो भेदाः . इत्येकपञ्चाशद्भेदा इत्यर्थः ।

तदाह - व्याख्याता इति । पूर्वगणनेनेत्यर्थः । शुद्धभेदान् उक्त्वा

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।

न केवलं शुद्धा एवैकपञ्चाशद्भेदाः भवन्ति, यावत् तेषां स्वप्रभेदैरेकपञ्चाशता संशयास्पदत्वेन, अनुग्राह्यानुग्राहकतया, एकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन सङ्करेण, परस्परनिरपेक्षरूपया एकप्रकारया संसृष्ट्या चेति चतुर्भिर्गुणने-

वेदखाब्धिवियच्चन्द्राः (१०४०४)

शुद्धभेदैः सह-

शरेषुयुगखेन्दवः ।। ४४ ।। (१०४५५)

तत्र दिङ्मात्रमुदाह्रियते-

खणपाहुणिआ देअर जाआए सुहअ किंपि दे भणिआ ।
रुअइ पडोहरवलीपरम्भि अणुणिज्जउ वराई ।। १११ ।।

कमलाकरी

सङ्कीर्णभेदानाह - तेषामिति । तेषामेकपञ्चाशतां व्यक्ति-भेदमादाय सजातीयेन विजातीयेन च योजने एकाधिकानि षड्विंशतिशतानि (२६०१) भवन्ति । यथाऽर्थान्तरसङ्क्रमितवाच्यस्यार्थान्तर सङ्क्रमितवाच्येन योगः एवं तस्यात्यन्ततिरस्कृतवाच्येनेत्येवमन्यैर्योगः एवमेकैकस्यैकपञ्चाशद्भेदैः पूर्वा संख्या सेयं स्वप्रभेदैरेकपञ्चाशतेत्यनेन सूचिता स्पष्टत्वात्तु नोक्ता । तेषां त्रिरूपेण सङ्करेणैकरूपया संसृष्ट्या चेति चतुर्भिः प्रकारैः योजनमित्यर्थः ।

त्रिरुपं सङ्करं व्याचष्टे - संशयेति । को मुख्यो वा को वा गौणोऽयं व्यङ्ग्योऽयं वेति संशयः । अनुग्राह्यं प्रधानमनुग्राहकमङ्गम् । अङ्गप्रधान भावेनेत्यर्थः। एको व्यञ्जकः शब्दस्तदनुप्रवेशः एकपदाद् युगपदुभयप्रतीत्या च त्रिविधः सङ्कर इत्यर्थः ।

एकरूपां संसृष्टिमाह-परस्परेति । पृथक् पदैर्निश्चितानां स्वातन्त्र्येणोपस्थितिः संसृष्टिरित्यर्थः । एवं पूर्वोक्तानामेकाधिकषड् विंशतिशतानां (२६०१) चतुर्भिर्गुणने एकमयुतं चतुरधिका चतुश्शती चेत्याह-वेदेति । वेदाश्चत्वारः खं शून्यमब्धयश्चत्वारः । वियच्छून्यं चन्दः एकः एषां प्रातिलोम्येन पाते एकमयुतञ्चतुरधिका चतुःशती (१०४०४) चेत्यर्थः ।

एषां शुद्धभेदमेलने आह - शुद्धेति । शराः पञ्चेषवः इषक पञ्च

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे सङ्क्रमितः, किमनुरणनन्यायेनोपभोग एव व्यङ्ग्ये व्यञ्जक इति सन्देहः ।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः ।
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।

कमलाकरी

युगं चत्वारि खं शून्यमिन्दुरेकः । एकमयुतं पञ्चपञ्चादधिका चतुःशती चेत्यर्थः । यद्यपि पदैकदेशानां सुप्तिङन्तादीनाञ्चानन्त्यादनन्ता संख्या युक्ता तथापि पदैकदेशोत्थत्वेनैकीकारान्न दोषः, न चार्थशक्त्युत्थत्वेनैक्यान्न्यूनत्वापत्तिः स्वतन्त्रेच्छानियोगानर्हत्वात् ।

अत्र परमानन्दादयः – नेयं गणना युक्ता परस्य पूर्वपूर्वयोजने[१] एकैकभेदह्रासात् य एवार्थान्तरसङ्क्रमितवाच्यस्यात्यन्ततिरस्कृतवाच्येन योगे भेदःस एवात्यन्ततिरस्कृतवाच्यस्यार्थान्तरसङ्क्रमितेन योगः सम्बन्धस्य द्विष्ठत्वात् । तेन –

"एकोराशिर्द्विधा स्थाप्य एकमेकाधिकं कुरू ।
समार्धेनासमो गुण्य एतत् सङ्कलितं लघु ।।"

इत्युक्तदिशा द्विपञ्चादर्धेन षड्विंशत्या एकपञ्चाशतानां गुणने त्रयोदशशतानि षड्विंशतिश्च योगश्चतुःप्रकार इति चतुर्भिर्गुणने वेदा–भ्र–दहनेषव इति पञ्चसहस्राणि चतुरधिका शतत्रयी चेत्येव युक्तमित्याहुः । मधुमती–काव्यप्रदीपादयस्तु–यत्र यस्य चमत्कारित्वं तत्र तस्य प्राधान्यादितरेण योग इत्युच्यते । एवमितरस्य प्राधान्ये पूर्वेण योगः 'प्राधान्येन व्यपदेशा भवन्तीति न्यायेन योगस्य भेदे गणनायाः साधुत्वात् । यद्पि त्रिरुपे सङ्करे प्राधान्यमन्तर्भूतमेवेति न्यूनतैव युक्ता तथापि प्राधान्य भेदे सङ्ख्यातिरेको युक्त एव । एतेन यत् तैरुक्तमतएवं विरोधालङ्कारे–

"जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धस्याद् गुणैस्त्रिभिः ।
क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ।।"

इति जातिगुणादीनां विरोधे दशत्वमुक्तमन्यथा जातिगुणयोर्गुणजात्योश्च विरोधे द्वाविति प्रत्येकं चतुष्टे षोडशत्वापत्तेस्तयोरनन्यत्वे त्वत्रापि न्यूनत्वमेवार्हतीति तत्परास्तम् । अत्र तथा विवक्षणात् तत्र च तदभावात् ।

---

१. चेति च संशयः–ब ।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ।। ११२।।

कमलाकरी

संशयास्पदं ध्वनिद्वयसङ्करमाह – खणपाहुणिऐति । क्षणप्राधुणिक देवर जायया सुभग किमपि ते भणिता । रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकी ।। इति संस्कृतम् । पओहरशब्दो देशीयभाषायां गृहपश्चाद्भागवाची । हे देवर क्षणे उत्सवे प्राधुणिकी अतिथिः काचित् स्त्री तव जायया किमपि भणिता सती गृहपश्चाद्भागे रोदिति, वराकी दीना उपनीयतामुपभुज्यतां[1] रोदनातन्निवर्तताञ्च ।

अत्रेति – । अनुनयो मुख्यार्थबाधान्निवृत्तिमात्रेण किमुपभोगं लक्षयति किं वा रोदनान्निवृत्तिमात्रेणोपभोगं व्यनक्तीत्यविवक्षितवाच्यविवक्षितान्यंपरवाच्ययोः सन्देहः ।

परयोः सङ्करयोस्संसृष्टेश्चैकमुदाहरणमाह– स्निग्धेति । स्निग्धा श्लक्ष्णा श्यामायाः कान्तिस्तया लिप्तं व्याप्तं वियद् व्योम यैस्तथा वेल्लन्त्यः खेलन्त्यो बलाका येषु ते घनाः कामं निश्चितं सन्तु, तथा वाताः शीतलाः पयोदसुहृदां मयूराणाँ कलाः अव्यक्ताः मधुरा वा आनन्देन केका वाण्यश्च कामं निश्चितं प्रकामं वा सन्तु । एष्व सत्स्वपि दुःखिनो मे मृत्युर्नेत्यर्थः। यतः दृढं गाढं कठोरहृदयो रामोऽ स्मि । अतः सर्वमिदं सहे सहामीत्यर्थः । 'सहे' इत्युत्तमपुरुषः । यद्वा रामोऽस्मीत्यतः किमपि मे न भविष्यति । वैदेही विदेहराजपुत्री सुकुमारी तु कथं भविष्यति जीविष्यतीत्यर्थः । सीतामरणं सम्भाव्य पृथ्वीमाह– हहहाहेति खेदे । सर्वंसहे वसुधे देवि, त्वं धीरा भव । ' सर्वंसहा वसुमती' (अ.२।९।३) इत्यमरः । मम हृदयं कठोरत्वात् न विदीर्यते, दुहि[2]तृशोकेन त्वं मा विदीर्णा भूरित्यर्थो मदीयः । परमानन्दश्रीवत्सलाञ्छनादयश्च हा देवीत्यादि–सङ्कल्पोपनीतां सीतां प्रत्याहेत्यर्थमाहुस्तदज्ञानकृतमिति ।

अत्रेति – । व्योम्नः कान्तेश्च निःस्पर्शत्वेनामूर्तत्वेन लेपायोगान्निबिडत्वं मेघे चाचेतने सुहृद्भावान्मुख्यार्थबाधात्तज्जन्यत्वात् केकानां मनोहरत्वं लक्ष्यं तेन दुःखं व्यङ्ग्यम् । तेन च

---

१. रोदननिवृत्ति–ख० ।
२. दुहितुःशोकेन –क.।

अत्र लिप्तेति पयोदसुहृदामिति च अत्यन्ततिरस्कृतवाच्ययोः संसृष्टिः, ताभ्यां सह रामोऽस्मीत्यर्थान्तरसङ्क्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तर-रसङ्क्रमितवाच्यरसध्वन्योः सङ्कर । एवमन्यदप्युदाहार्यम् ।

इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थोल्लासः ।।

कमलाकरी

लिप्तसुहृच्छब्दावत्यन्ततिरंस्कृतवाच्यौ द्वयोश्च प्राधान्येन परस्परनैरपैक्ष्यात् संसृष्टिरित्यर्थः । ताभ्यामिति रामस्य वक्तृत्वाद्रामोऽस्मीत्युक्तं दुःखसहिष्णुत्वं लक्षयद्विप्रलम्भं व्यनक्तीत्यर्थान्तरसङ्क्रमितवाच्च्योऽयं ध्वनिः । अस्य ध्वनेस्ताभ्यां लिप्तसहृत्पदगम्याभ्यामत्यन्त-तिरस्कृतवाच्यामनु-ग्राह्काभ्यां सहानुग्राह्यत्वेनोपकार्यत्वेनैकः सङ्करः पूर्वयोरुद्दीपकत्वात् ।

एकव्यञ्जक्रानुप्रवेशेन सङ्करमाह - रामेति । रामपदं राज्यभ्रंशवनवासस्त्रीवियोग-पितृशोकादिदुः-खपात्रतावगमाद्दैन्य-शोकधैर्यनिर्वेदैर्विप्र- लभ्यः प्रका[1]शते इति दुःखसहिष्णुत्वं वस्तुध्वनिरसध्वन्यो-रेकरामपदेऽनुप्रवेशात् सङ्कर इत्यर्थः । वस्तुनश्च वाच्यात् प्राधान्यात् ध्वनित्वं विप्रल[2]म्भास्वादे तु गुणत्वमेवेति ।

इति श्रीमहामहोपाध्याय श्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टात्मज श्री रामकृष्णभट्टसूनु-श्रीकमलाकारभट्टकृतायां काव्यप्रकाशकमलाकरी व्याख्यायां चतुर्थोल्लासः समाप्तः ।

---

१. प्रकाशः-क.।
२. विप्रलम्भेनास्वादे-क.।

अथ पञ्चमोल्लासः

एवं ध्वनौ निर्णीते गुणीभूतव्ययप्रभेदनाह-

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम्
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।। ४५ ।।
व्यङ्ग्यथेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।

कामिनीकुचकलशवद्गूढं चमत्करोति, अगूढन्तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ।

तत्रागूढं यथा-

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीवाव्यब्धव्यतिकरेण युनक्ति कर्णौ ।

कमलाकरी

मध्यकाव्यनिरूपणस्य सङ्गतिमाह- एवमिति । एवं गुणीभूतव्यङ्ग्यस्य अष्टौ भेदा इत्यन्वयः । व्यङ्ग्यस्य गुणत्वे च वाच्यनिरूपितप्रकर्षानाश्रयत्वं बीजम् । अगूढपदे गूढत्वं विवृणोति कामिनीति । तदुक्तम्-

नान्ध्रीपयोधर इवातितरां प्रकाशो
नो गुर्जरीस्तन इवातितरां निगूढः ।
अर्थो गिरामपिहितः पिहितश्च किञ्चित्
रम्यत्वमेति मरहट्टवधूकुचाभः । इति ।

अत्यन्तगूढन्त्वस्फुटमेव ।

यस्येति - बृहन्नलादशायामुत्तरगोग्रहे दुर्योधनेन स्त्रीत्वाद् धिक्कृतार्जुनस्योक्तिरियम् । असुहृच्छत्रुर्द्यूतेकृते कृतपराजयोऽप्यतप्त-सूचीवेधस्य व्यतिकरः पर्यायं तेन वचोरूपेण कर्णौ युनक्ति योजयति । कर्णकटुवचसा तुदतीत्यर्थः । काञ्चीगुणबन्धनपात्रं स्त्रीरूपः स एषोऽहं जीवन्नस्मि । किमावहामि किं करोमि । अत्रेति- जीवतस्तदभावोक्तौ बाध इति श्लाघ्यजीवितत्वं लक्ष्यं, तच्चा[१]त्र तदभावोक्तौ मरणमेव युक्तमित्यनुतापो व्यङ्ग्यः, स च स्पष्ट इत्यर्थः । वाच्यस्य ध्वनेरुदाहरणमिति शेषः । एवमग्रेऽपि ज्ञेयम् ।

---

१. न चात्र-ब.।

काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि ।। ११३ ।।

अत्र जीवन्नित्यर्थान्तरसङ्क्रमितवाच्यस्य ।

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ।। ११४ ।।

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य ।

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।

कमलाकरी

अगूढस्योदाहरणान्तरमाह-उन्निद्रेति । च्छटा समूहः । च्छदेति पाठे पत्रम् । अत्रेति - मुखसंयोगस्य चुम्बनस्य बाधात् संयोगो लक्ष्यः, रविबिम्बे तस्याप्यभावात् तेनोदयाद्रि संयोगविशेषप्रतीतिरिति वाच्यस्यात्यन्ततिरस्कृतत्वं प्रभातञ्च व्यङ्ग्यमगूढमित्यर्थः ।

शब्दशक्तिमूले व्यङ्ग्यस्य वाच्यसमत्वादगूढत्वं स्पष्ट[१] माद्योदाहरणेन गतार्थञ्चेति तदुपेक्ष्यार्थशक्तिमूले आह-अत्रासीदिति । रावणं हत्वा स्वपुरीमागच्छतः पुष्करस्थस्य रामस्य रणभूमौ सीतां प्रत्युक्तिरियम् । भवद्देवर इति सर्वनाम्नो वृत्तिमात्रे पुँवद्भावः । अत्रेति सामान्यविशेषं विना पर्यवसानात् सर्वनाम्नः किमः प्रकृतेः शक्तेश्च । मयेति । किं व्यङ्ग्यमर्थशक्तिमूलानुरणनगम्यमगूढम् । तस्यापीति -तस्य तत्तत्प्रभावेन ख्या[२] तस्यापीत्यर्थः । केनापीति पाठे उक्तदिशा मयेति व्यङ्ग्यस्यागूढता । तस्येति पाठे त्वर्थान्मयेति गूढत्वान्मुख्यध्वनित्वं 'तज्जयान्नायकोत्कर्ष' (का.द.) इतिरीत्या फणिपाशबन्धादि-स्वापमानलज्जापह्नुतिश्च लक्ष्मणेऽपि तथेत्यर्थः ।

द्वितीयं भेदं विवृणोति-अपरस्येति । वाक्यार्थीभूतस्य रसादेरङ्गमरसादीत्यादिशब्दाद्भाव-तदाभास-भावशान्तिभावोदय भावसन्धि-भावशबलताः । वाच्यस्य रसादिरङ्गमनुरणनं वा तेन विना वाच्यापर्यवसानादित्यर्थः ।

---

१. माराद्योदाहरणेन (१)-क.।
२. ख्यातत्वादित्यर्थ -क.।

दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी ।।११५।।

अत्र 'केनाप्यत्र' इत्यर्थशक्तिमूलानुरणनरूपस्य । 'तस्याप्यत्र' इति युक्तः पाठः ।

अपरस्य रसादेर्वाच्यस्य वा वाच्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा । यथा-

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीविविस्रंसनः करः ।। ११६ ।।

अत्र श्रृङ्गारः करुणस्य ।

कैलासालयभाललोचनरुचा निर्वर्तितालक्तक-

कमलाकरी

रसस्य रसाङ्गतामाह - अयं स इति । युद्धपतितं भूरिश्रवसो हस्तं दृष्ट्वा तत्स्त्रिया उक्तिरियम् । अत्रेति - अङ्गमित्यनुषङ्गः । एवमग्रेऽपि । रसनाकर्षणा प्रतीतोऽपि शृङ्गारः शोकमेव पुष्णातीत्यर्थः ।

रसस्य भावाङ्गतामाह कैलासेति । कैलासालयः शिवस्तस्य भाललोचनकान्त्या कृताऽलक्तकस्य व्यक्तिर्यस्यां सा गिरिभुवः गौर्याः पादनखस्य द्युतिर्युष्मान् सदा रक्षतु यया नेत्रयोः कान्तिः रक्तता सद्यः अपनी[१]यते । गौर्याः आक्रोशवशाज्जाताऽपि नेत्ररक्तान्ते हरस्य पादप्रणामेन शान्तेत्यर्थः ।

अत्रेति - त्रायतामित्यतः प्रतीतस्य गौरीविषयकरत्याख्यभावस्य नतिबोध्यः सम्भोगरूपःशृङ्गारोऽङ्गमित्यर्थः । आदिशब्दोपात्तस्य भावस्य भावाङ्गतामाह - अत्युच्चा इति । राजानं प्रति कवेरुक्तिः । एवं श्लोकपञ्चकेऽपि । रसाभासभावाभासयोर्भावाङ्गतामाह-बन्दीकृत्येति । हे नृप, तव सैनिकाः द्विषां वधूर्बन्दीकृत्य पश्यतां प्रेयसां । पश्यतः प्रियाननादृत्य । अनादरे षष्ठी । ताः शिलष्यन्तीत्यर्थः । आलिङ्गन्ति लान्ति गृह्णन्ति तैः प्रत्यर्थिभिः शत्रुभिस्तवमिति स्तूयसे । इति किम्-अस्माकमित्यादि । अत्रेति -परस्त्रीष्वालिङ्गनादेरनौचित्यात् पूर्वार्धे तद्गम्यः शृङ्गाररसाभासः । शत्रूणां राज्ञि वस्तुतो रतेरभावेनाहार्यत्वात्तदुत्तरार्धेभावा भासस्तौ च राजविषयकरत्याख्यभावाङ्गमित्यर्थः ।

---

१. अपनीयत इत्यारभ्य हरस्येत्यन्तोंऽशः - कपुस्तके नास्ति ।

व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्यार्यते।। ११७ ।।

अत्र भावस्य रसः ।

अत्युच्चा परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयः
तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवः
तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ।। ११८ ।।

अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ।

बन्दीकृत्य नृपद्विषां मृगदृशस्ताः पश्यतां प्रेयसां

कमलाकरी

अत्रेति-मदाख्यभावस्य प्रशमः राजगोचरभावस्याङ्गमिति शेषः ।

साकमिति-कुरङ्गकदृशा सुहृद्भिरपि साकमित्यन्वयः । नाम संज्ञा । विषमां कठिनाम् । अत्रेति । त्रासाख्यभावोदयो भावाङ्गमित्यर्थः ।

असौढेति । शैलदुहितुर्गौर्यास्तपसोऽसोढा तपोजन्यक्लेशासहिष्णुरित्यर्थः । कपटबटुश्छलब्रह्मचारी । अत्रेति त्वरयाऽऽवेगशैथिल्येन धैर्यम् ।

पश्येदिति - अत्र शङ्केति । पश्येत् कश्चिदिति शङ्का, चल चपलेत्यसूया, का त्वरेति धृतिः, अहं कुमारी तेनेदं नोचितमिति स्मृतिः, हस्तालम्बं वितरेति श्रमः, हहहेति दैन्यं, व्युत्क्रम इति विबोधः, क्वासीत्यौत्सुक्यम् । फलकिसलयानि परेण वञ्चनार्थं दत्तानि गृ[१]हीतेत्यर्थः । एषां शबलता भावस्याङ्गमित्यर्थः ।

पूर्वं यदुक्तं रसवदादयो गुणीभूतव्यङ्ग्ये उदाहरिष्यते इति तदाह एते चेति । रसस्य गुणत्वे रसवदलङ्कारः भावस्य गुणत्वे प्रेयोऽलङ्कारः, रसाभासस्य गुणत्वे ऊर्जस्विदलङ्कारः, भावाभासस्य गुणत्वे समाहितालङ्कारः । एवं भावशान्त्यादेरङ्गत्वे रसवदादित्वमूह्यम् । य एते पूर्वमुक्तास्ते –'अयं स रसनोत्कर्षी' इत्यादिभिरुदाहृता इत्यर्थः ।

---

१. गृहानेत्यर्थः-ब.।

शिलष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः
स्तूयसे ।।११९।।

अत्र भावस्य रसाभासभावाभासौ प्रथमार्धद्वितीयार्धद्योत्यौ ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ।।१२०।।

अत्र भावस्य भावप्रशमः ।

कमलाकरी

कश्चिदिति । इतरोत्कर्षकत्वमलङ्कारत्वं तेन यद्यपि जीर्णैर्भावोदयादिष्वलङ्कारत्वं नोक्तं तथापि वक्तुमर्हमित्यस्माभिरुक्तमित्यर्थः ।

ननु 'अयं स रसने' त्यादौ करुणस्य प्राधान्याद् गुणीभूतव्यङ्ग्यत्वाभावात् कथं मध्यमकाव्यत्वमत आह- यद्यपीति । स्वभेदैर्गुणीभूतव्यङ्ग्यभेदैः आदिपदाद् विजातीयभेदैः । अङ्गाङ्गित्वे सङ्करः द्वयोः प्राधान्ये संसृष्टि, । प्राधान्यं च मत्कारित्वं तात्पर्यविषयत्वं वा । कवेः शृङ्गारे तात्पर्ये तस्य गुणत्वान्मध्यमत्वं करुणे तात्पर्ये तु मुख्यध्वनित्वमेवेत्याशयः ।

अनुरणनरूपस्योपमालङ्कारस्य वाच्याङ्गत्वमाह- जनस्थाने इति । मया कनके मृगातृष्णद्व मरीचिका भ्रान्तिस्तद्वदन्धया बुद्ध्या जनस्थाने लोक [१] गृहे भ्रान्तम् । रामपक्षे कनकमृगो मारीचस्तस्य तृष्णा जनस्थानं पञ्चवटी । तथा वै निश्चितं देहीति वचः उदश्रु यथा स्यात्तथा प्रलपितम् । 'प्रलापोऽनर्थकं वचः' इति । वृथैवोक्तमित्यर्थः । पक्षे-वैदेहि सीतेति वचः । भर्तुः भरणकर्तुः । परिपाटीषु सेवारचनासु । का घटना प्रकारो न कृता वद किन्तु सर्वापि कृता । यद्वा काभर्तुः कुत्सितप्रभोर्वदन परिपाटीषु वचोभङ्गीषु घटनाऽलङ्कृता । पक्षे लङ्काभर्तुः रावणस्य वदनपरिपाट्यां वक्त्रपङ्क्तौ इषुघटना शरसन्धानं कृतम् । कुशलं वसु यस्य तत्ता पक्षे -कुशलवौ सुतौ यस्या सा सीता ।

अत्रेति - मयाप्तं रामत्वमिति कवौ रामत्वारोपरूपस्यातिशयोक्त्यलङ्कारस्य वाच्यस्य जनस्थानादिपदगम्यो रामेण

---

१. लोकगृहे इति पदं कनुस्तके नास्ति ।

सांकं कुरङ्गकदृशा मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो गृहीतं
केनापि तत्र विषमामकरोदवस्थाम् ।। १२१ ।।

अत्र त्रासोदयः ।

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात् कपटबटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ।। १२२ ।।

अत्रावेगधैर्ययोः सन्धिः ।

कमलाकरी

सहोपमानोपमेयभावः साम्यमङ्गतां पोषकतां नीतः । 'वाच्यतामिति पाटे कवौ रामत्वबाधाद् रामसदृश इत्यर्थो वाच्यवत् प्रतीयते तदङ्गं जनस्थानादिपदगम्यं साम्यमित्यर्थः ।

अनुरणनरूपस्य वस्तुनो वाच्याङ्गत्वमाह आगत्येति । सूर्यः सम्प्रति प्रभाते आगत्य पादपतनेन रश्मिपातेन चरणपातेन चैतामम्भोजिनीं प्रसादयति विकासयत्यनुनयति वेत्यर्थः । वियोगो विरहः पक्षियोगश्च तेन च विसंष्ठुलाङ्गीं कृशाङ्गीम् ।

अत्रेति – व्यङ्ग्यस्य नायकानायिकावृत्तान्तस्य वाच्ये रविकमलिनीवृत्तान्तेऽध्यारोपात् तत्पोषकत्वं व्यङ्ग्यं विनापि वाच्यार्थोपपत्तेर्न तत्साकाङ्क्षत्वं येन ' भ्रमिमरतिं' (का.प्र.५।१२६) मितिवद् वाच्यसिद्ध्यङ्गं स्यादिति वक्तुं निरपेक्षेत्युक्तम् । नायकयोश्च वृत्तान्तोपसर्जनत्वात् प्राधान्येन तदनुपस्थितेर्नोपमा रूपकञ्चेत्याह–वस्तुरूप इति । रसस्य वाच्याङ्गत्वेऽप्येतदेवोदाहरणम् । पादपतनावगतस्य सम्भोगस्य वाच्यरविकमलिनीवृत्तान्तपोषकत्वात् ।

तृतीयं भेदमाह–भ्रमिमिति । जलदा एव भुजगाः सर्पास्तज्जं विषं गरलञ्च वियोगिनीनां भ्रम्यादि कुरुत इत्यर्थः। भ्रमिर्भ्रान्तिररतिरप्रीतिः, प्रलयो नष्टचेष्टत्वं ज्ञानशून्यत्वं वा, मूर्च्छा इन्द्रियनिरोधो निष्क्रियत्वं वा तमः आन्ध्यं मूर्च्छारूपं तम इत्यभेदो वा । अत्रेति–यद्यपि विषपदे गरलं वाच्यं न व्यङ्ग्यं तथापि जलदे भुजगत्वाबाधादारोपितस्य च गरलजनकत्वायोगाद् दुःखजनकत्वेन जले गरलत्वे व्यङ्ग्ये सति जलदे

पश्येत् कश्चित् चल चपल रे का त्वराऽहं कुमारी
हस्तालम्बं वितर सहसा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढं भवद्विद्विषोऽरण्यवृत्तेः
कन्यां कञ्चित् फलकिसलयान्याददानाभिधत्ते ।। १२३ ।।

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता ।

एते च रसवदाद्यलङ्काराः ।

यद्यपि भावोदयभावसन्धिभावशबलत्वानि नालङ्कारतया उक्तानि तथापि कश्चिद् ब्रूयादित्येवमुक्तम् ।

यद्यपि स नास्ति कश्चिद्विषयः यत्र ध्वनि-गुणीभूतव्यङ्ग्ययोः स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा नास्ति, तथापि 'प्राधान्येन व्यपदेशा भवन्ति, इति कश्चित् केनचिद् व्यवहारः ।

कमलाकरी

भुजगत्वारोपः । न चान्योन्याश्रयः भ्रम्याद्यष्टविधकार्यस्य गरलादेवोत्पत्तेः, भुजगत्वोपपादकस्यान्यस्याभावादतो गरलत्वमेव भुजगत्वसाधकमित्यर्थः ।

गच्छामीति – हे अच्युताहं गच्छामि । च्युतं रेतः स्खलनं तद्रहित क्लीबेति न्यक्कारो व्यङ्ग्यः फलञ्च नेत्यनुतापो व्यङ्ग्यः । भवतो दर्शनेन किं प्रीतिरुत्पद्यतेऽपि तु नैव किन्तु सुरतेनेति भावः । किन्तु किञ्चेत्यर्थः । एवं सति हतजनः सपत्नीजनो विजनमेकान्तस्तत्थयोरावयोः सम्बन्ध्यन्यथाऽन्यत् सम्भोगादि सम्भावयति । अकीर्तिजतैव सा व[1]रं फलोपधानेनैव जातेत्यर्थः । आमन्त्रणं सम्बोधनं तस्य भङ्गिः रचना सा चाच्युतस्थिरा । अद्यापि निरुद्योगोऽसि इत्येवंरूपा तया यद्वा भङ्गिश्चेष्टा ताभ्यां सूचितो यो वृथावस्थानखेदस्तेनालसामित्यर्थः । अत्रेति-अच्युतपदे व्यङ्ग्यं निरुद्योगेत्यादि तद्वृथावस्थानादेर्वाच्यस्य सिद्धिकृदिति शेषः । उदाहरणद्वये भेदकमाह –एतत्विति । एकवाक्ये श्लोके एको वक्ता । कविरपरत्रान्त्ये पूर्वार्धे गोप्या उत्तरार्धे कवेरिति भिन्नवक्तृगतत्वेन वाच्यस्य सिद्धिकृदित्यनुषङ्गः ।

अदृष्टे इति । त्वयीति शेषः । श्लिष्टमस्पष्टम् । प्रतीयमानमिति

१. वश-क.।

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ।। १२४ ।।

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानमेयभावो वाच्याङ्गतां नीतः ।

आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।
एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि पादपतनेन सहस्ररश्मिः ।। १२५ ।।

अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तान्ताध्यारोपेणैव स्थितः ।

कमलाकरी

बिम्बफलेत्यत्र व्यङ्ग्यं चुम्बनं प्रधानमित्यगे गतेनान्वयः । किञ्चेति–उभयोश्चमत्काराधायकत्वादित्यर्थः ।

ब्राह्मणेति – रावणं प्रति परशुरामशिष्योक्तिरियम् । अत्रेति । पूर्वार्धे भृत्युपदेशात् सामवाच्यमुत्तरार्धे च दण्डो व्यङ्ग्यस्तयोः चानर्थनिवारकत्वेन तुल्यता ।

मथ्नामीति – वेणीसंवरणे (संहारे) कौरवसन्धानार्थं श्रीकृष्णं गतं श्रुत्वा सहदेवं प्रति क्रुद्धभीमसेनोक्तिरियम् । उरस्तो हृदयात्, पणेन पञ्चग्रामरूपदेयेनाथवा ग्लहेन तानपि पुनर्दीव्यतु सन्धिञ्च करोतु । अतएव भवतां नृपतिर्न तु ममेत्यर्थः ।

अत्रेति- । अयं भाव- काक्वाक्षिप्तत्वं हि काकुव्यङ्ग्यत्वे सति वाच्यसम्बन्धित्वं, तत्र मथ्नामीत्यत्र मथ्नाम्येवेति व्यङ्ग्ये नियमे एवकारार्थो मथनायोगव्यवच्छेदस्तत्प्रतीतौ च प्रतियोगिभूत-मथनाभावप्रतीतेर्न क्रोधो वाच्यः यो निषेधः प्रमथनाभावस्तत्सहभावेन तत्पुरस्कारेणैव व्यङ्ग्यप्रतीते, शूरस्य च तत्प्रतीतौ तिरस्कारोदयाद् व्यङ्ग्यं न चमत्कारकारीति ।

वाणीरेति । वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः । गृहकर्मव्यापृतायाः वध्वाः सीदन्त्यङ्गानि ।। इति संस्कृतम् । अत्रेति-सीदन्त्यतः शृङ्गारप्रतीतिः, शीघ्रं यद्यपि लतागृहं प्रविष्टस्तेनोत्कण्ठया

वाच्यसिद्ध्यङ्गं यथा -

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ।१२६।

अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत् ।

यथा वा-

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ।।१२७।।

अत्राच्युतादिपदव्यङ्ग्यमामन्त्रणेत्यादिवाच्यस्य । एतच्चैकत्र एकवक्तृगतत्वेन, अपरत्र भिन्नवक्तृगतत्वेन इत्यनयोर्भेदः ।

कमलाकरी

व्यङ्ग्येऽपि सा तुल्या तथापि व्यवहितेत्यर्थः ।

एषामिति - । अर्थान्तरसङ्क्रमितवाच्यादयो यावन्तो ध्वनिभेदास्तेषां गुण[1]त्वे तत्तदुपाधिवशात् तावन्तो मध्यमकाव्यभेदा इत्यर्थः । ननु यत्र वस्तुनाऽलङ्कारो व्यज्यते तत्र गुणीभूतस्य वस्तुनो वाच्यत्वेन व्यङ्ग्यत्वाभावात् कथं गुणीभूतव्यङ्ग्यत्वमत आह- यथायोगमिति ।

व्याचष्टे - व्यज्यन्ते इति । वस्तुना यत्रालङ्कृतयो व्यज्यन्ते तदा तासामलङ्कृतीनां ध्रुवं निश्चितं ध्वनिं प्रत्यङ्गता, काव्यस्वरूपस्य तदाश्रयात् तदलङ्कारमुखेनैव चमत्कारात् यद्वा काव्यवृत्तेः काव्यपदशक्तेः तदाश्रयाद् ध्वन्याश्रितत्वात् । ध्वनेः प्रधानत्वादुत्तमत्वमेव न तु मध्यमत्वं, तेन वस्तुकृतषड्भेदैरूनत्वादस्य पञ्चचत्वारिंशद्भेदा इत्यर्थः ।

सालङ्कारैरिति - तैर्गुणीभूतव्यङ्ग्यैः केवलैरलङ्कारयुक्तैश्च ध्वनेः पूर्वोक्तस्य द्विपञ्चाशद्भेदस्य संसृष्ट्या[2]ऽङ्गाङ्गित्वेन सङ्करेण समप्राधान्येन च योग इत्यर्थः । तैरेवेति - व्यङ्ग्यस्य गुणत्वमेवालङ्कारत्वमतस्तद्रूपैरित्यर्थः । स्वैः प्रभेदैरर्थान्तर-सङ्क्रमितवाच्यादिभिः । अयं भावः-अलङ्कारोपमादौ

---

१. गुणीत्वे -क.
२. संसृष्ट्यायोगित्वेन क.

अस्फुटं यथा-

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ।। १२८ ।।

अत्रादृष्टो यथा न भवसि वियोगभयञ्च यथा नोत्पद्यते तथा कुर्या इति क्लिष्टम् ।

सन्दिग्धप्राधान्यं यथा-

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ।।१२९।।

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं किं वा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः ।

कमलाकरी

गुणीभूत-व्यङ्ग्येन व्यङ्ग्यान्तरव्यञ्जने विवक्षाभेदात् व्यङ्ग्यापेक्षयोत्तमत्वमलङ्कारापेक्षया च मध्यमत्वमित्येवं ज्ञेयम् । आनन्त्यमिति - तत्तु चतुर्थोल्लासे उक्तमित्यर्थः ।

व्यञ्जनां साधयितुमाह- सङ्कलनेनेति । सङ्क्षेपेणेत्यर्थः । त्रिरूपत्वादिति वस्त्वलङ्काररसरूपत्वादित्यर्थः । वाच्यतां सहते वाच्यतां कर्तुं शक्यते । वस्त्वलङ्काररसरूपमित्यर्थः । किञ्चिद्रसाद्यन्यथा वाच्यं नेत्यर्थः । यद्यपि वस्तुपदार्थादिशब्देनोक्तस्य वस्तुनोऽलङ्कारपदेनोक्त[१]स्य च चमत्कारकारित्वाभावाच्च वाच्यतासहत्वं तथापि वाक्यार्थधीविषयत्वं तत्त्वं, रसादौ तु न तथेति भावः ।

नन्वलङ्कारे व्यङ्ग्ये मुख्यध्वनित्वात् कथमलङ्कारव्यपदेशो ऽन्यालङ्करणादत आह- यद्यपीति । प्राधान्येन हेतुना तद् व्यङ्ग्यमलङ्कार्यं न त्वलङ्काररूपं तथापि व्यङ्ग्यस्य गुणत्वेऽलङ्कारत्वं प्राधान्येन ध्वनित्वम् । श्रमणः सन्यासी । यथैक एव चैत्रोऽवस्थाभेदेन पूर्वं ब्राह्मणः पश्चात् सन्यासी चोच्यते तथैवेहापीत्यर्थः ।

रसादीति - लक्ष्यते ज्ञायतेऽनेनेति लक्षणं नाम । आदिपदात् भावादि स्वप्ने सर्वथेत्यर्थः । हेतुमाह- स हीति । न चेति-नैवेत्यर्थः । तदिति रस-शृङ्गारादिपदप्रयोगेऽपि चमत्काराभावाद्विभावादेरेव तद् व्यञ्जकत्वं, रसादिपदोक्तौ स्वशब्दवाच्यत्वात् प्रत्युत दोषत्वं वक्ष्यत

---

१. पदोक्तस्य चमत्कार क.।

तुल्यप्राधान्यं यथा-

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ।। १३० ।।

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

काक्वाक्षिप्तं यथा-

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरु
सन्धिं करोतु भवतां नृपतिः पणेन ।। १३१ ।।

अत्र मथ्नाम्येवेत्यादिव्यङ्ग्यं-वाच्यनिषेधसहभावेन स्थितम् ।

असुन्दरं यथा -

कमलाकरी

इति भावः । व्यङ्ग्य एवेति - व्यञ्जना [1]वृत्तिवेद्य इत्यर्थः ।

ननु विभावादिवाचकेभ्यो रसप्रतीतेः 'अर्द्धमन्तर्वेदि मिनोति अर्द्धं बहिर्वेदी' तिवत् 'जातः पुत्रः कृष्णकेश' इत्यत्रावस्थाविशेषवच्च वाक्य एवैका लक्षणास्तु अत आह - मुख्यार्थेति । न च तात्पर्यानुपपत्त्या लक्षणाऽतात्पर्यगोचरस्यापि प्रतीतेः । न चात्र योगः । न च विभावादेः कारणत्वात् कार्यकारणभाव एव योगः ' आयुर्घृतमित्यादिवदिति वाच्यम्, रसादेरकार्यत्वस्योक्तत्वात् । न च ज्ञाप्यज्ञापकभाव एव योगः वृत्तिं विना तस्यैवा[2]सिद्धेः । ततश्चान्योन्याश्रयः । न चात्र गङ्गापदे पावनत्वज्ञानमिव रसलक्षणायां प्रयोजनमस्ति, तां विना प्रतीतिविश्रान्तेः योगाभावाच्च न रसप्रतीतिरेव प्रयोजनं लक्ष्यमिति वाच्यम् । ज्ञानविषयस्य प्रयोजनत्वाभावात् फलस्य विषयभिन्नत्वस्योक्तत्वात् । अतएव न लक्षितलक्षणा गौणी वा योगाद्यभावात् ।

ननु मा भूद्रसादौ लक्षणा वस्तुनि तु व्यङ्ग्ये सा स्यादत आह- अर्थान्तरेति । 'त्वामस्मि वच्मी' त्यत्र वचनमुपदेशेऽर्थान्तरे- सङ्क्रमितम्'उपकृतं बहु तत्र' ( ) इत्यत्रापकारे व्यङ्ग्ये वाच्यमत्यन्तं तिरस्कृतम् । अत्राद्ये रूढ्यभावात् अन्त्ये त्वपकारे प्रयोजनस्य

१. व्यञ्जकवृत्ति-क.।
२. तस्यैव सिद्धेः-ब.।

वाणीरकुडङ्गुड्डीन सउणिकोलाहलंसुणंतीए ।
घरकम्मवावडाए वहुए सीअंति अंगाइं ।। १३२ ।।

अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्गयात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ।

एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ।। ४६ ।।

यथायोग्यमिति-

व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा ।
ध्रुव ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ।।

इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते न तत्र गुणीभूतव्यङ्ग्यत्वम् ।

सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।

कमलाकरी

व्यङ्ग्यत्वेमव न तु लक्ष्यत्वमनवस्थापत्तेरुक्तदूषणत्वाच्चेत्यर्थः । प्रागिति- द्वितीयोल्लासे ' एवामप्यनवस्था स्यात्' (का.प्र.२१) इत्यत्रेत्यर्थः ।

शब्दशक्तीति - । 'उल्लास्य कालकरवाले (का.प्र.) ' त्यत्राभिधावृत्त्यविषयस्य मेघादेरर्थान्तरस्योपमादेश्च निर्विवादं व्यङ्ग्यत्वं शब्दबोध्यस्य वृत्तिविषयत्वनियमात् , तेन सहार्थान्तरेण सहेत्यर्थः । पृथक्पदाभिहितानां पदार्थानामन्वयः संसर्गो वाक्यार्थः इति भाट्टाः । इतरपदार्थान्विते स्वार्थे पदानां शक्तिः तेन वाक्यार्थः शक्यः इति प्राभाकराः ।

तत्राद्यमतेनाह - विशेषेति । तत्तद् व्यक्तिषु सङ्केतः शक्तिग्रहः कर्तुं न शक्यते, आनन्त्याद् व्यभिचाराद् वाक्यार्थस्यापूर्वत्वेन प्रागप्रतीतेश्च । सामान्यं जातिस्तद्रूपाणां शक्तिमत्वेन ज्ञातानि पदान्याकाङ्क्षादिसहकारिवशात् स्वार्थान्वयं बोधयन्ति । सेयं संसर्गमर्यादेत्युच्यते । इदञ्च भट्टैकदेशि-मते । भाट्टास्तु-संसर्गमर्यादायाः शब्दवृत्तित्वाभावाद् वृत्त्यविषयत्वे च वाक्यार्थस्याशाब्दत्वापत्तेरनेकपदे वाक्ये संसर्गाणां भेदाद् वाक्यभेदापत्तेश्च । तिङन्तपदोक्तविशेष्यपदार्थे एव वाक्यार्थस्तस्य स्वपदोपस्थितावपि विशेषणपदैः । स्वार्थवैशिष्ट्यं लक्ष्यते ।

ननु विशेष्यपदे लक्षणा न स्यात्तदर्थस्य शक्यत्वात् तत्संसर्गप्रतीतेश्च विशेषणपदैरेव कृतत्वादिति चेन्न विशेष्यत्वस्याशक्यत्वात्

सालङ्कारैरिति तैरेवालङ्कारैः अलङ्कारयुक्तैश्च तैः । तदुक्तं ध्वनिकृता-

स गुणीभूत व्यङ्गचः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा ।। इति ।

अन्योन्ययोगादेवं स्याद्भेदसंख्यातिभूयसी ।। ४७ ।।

एवमनेन प्रकारेण अवान्तरभेदगणनेऽतिप्रभूततरा गणना । तथाहि-शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यम् । का गणना तु सर्वेषाम् ।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्गचस्य त्रिरूपत्वात् ।

कमलाकरी

संसर्गस्य च विशेषणत्वादिसाधा[१]रण्येन विशेष्यत्वार्थं लक्षणासिद्धेः । तेन क्रियारूपो वाक्यार्थो लक्ष्य इति । तदुक्तं वार्तिके- "भावनैव च वाक्यार्थः स्वकारकविशेषिता" इति । 'तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता' (अ.१।६।२) इत्यमरकोशेऽपि । अत्र विशेषो मीमांसाकुतूहले वार्तिकटीकायाञ्च ज्ञेयः। ये तु [२] पदांशे ज्ञाताः संसर्गांशे त्वज्ञाता इति संसर्गांशे कुब्जां शक्तिमाहुः तेषां शक्तिमत्वस्य पदत्वेन वाक्यमपि पदं स्यात् । शब्दतात्पर्यविषयत्वं शाब्दत्वमिति चेच्छक्तिलक्षणाभिन्नतात्पर्यस्याभावादध्याहारलक्षणाद्युच्छेदापत्तेश्चे-त्यास्ताम्, शाब्दो वाक्यार्थोऽपि चेन्नाभिधेयस्तदा ततः पश्चाद्भाविनो व्यङ्गचस्याभिधेयत्वं दूरापास्तमिति भावः ।

द्वितीयमते व्यङ्गचस्य वाच्यत्वं निराचष्टे- येऽपीति । येऽप्यन्विताभिधानवादिनः इत्याहुरित्यन्वयः । शब्दो गामानयेति वाक्यम् । वृद्धः प्रयोज्यः, अभिधेयो गवानयनादिरर्थः । एता[३]नत्र व्युत्पत्तिकाले प्रत्यक्षेण श्रोत्रादिना पश्यति जानाति । श्रोतुः प्रयोज्यस्य चेष्टयाऽनुमानेन तल्लिङ्गकेन प्रतिपन्नत्वं ज्ञातार्थत्वं जानाति । यथा अयमेतज्ज्ञानवान् एतद्गोचरप्रवृत्तिमत्वादेतत्प्रवृत्तित्वान्मदीयप्रवृत्तिवत् । सा च धीः एतद्वाक्यजन्यात्तदन्वयव्यतिरेकानुविधानात् । द्वयात्मिकां वाच्यवाचकभावात्मिकाम् । अनुपपतिश्च शब्दादर्थज्ञानं जायमानं वृत्तिं

---

१. साधारण्येन-क।
२. पदांशे इत्यारभ्य कुब्जामित्यन्तो भागो क-पुस्तके नास्ति
३. एतान् यत्र-क।

तथाहि किञ्चिद्वाच्यतां सहते किञ्चित्वन्यथा । तत्र वाच्यतासहमविचित्रं विचित्रं चेति । अविचित्रं वस्तुमात्रं विचित्रन्त्वलङ्काररूपम् । यद्यपि प्राधान्येन तदलङ्कार्यं, तथापि ब्राह्मश्रमणन्यायेन तथोच्यते । रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः । न हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत, न चाभिधीयते । तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेस्तदप्रयोगेऽपि विभावादिप्रयोगे तस्य प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयते, इति निश्चीयते । तेनासौ व्यङ्ग्य एव । मुख्यार्थबाधाद्यभावान्न पुनर्लक्षणीयः ।

अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं

कमलाकरी

विनाऽनुपपन्नमन्यथा शक्यार्थधीप्रसङ्गात् । सा च वृत्तिःशक्तिरेव स्वाभाविकत्वात् लक्षणायाश्च मुख्यबाधादिपूर्वकत्वात् ।

अर्थापत्त्येति - गोपदं गवि शक्तमत् तदितराप्रत्यायकत्वे सति तत्प्रत्यायकत्वादित्येवं रूपे[1]त्यर्थः । त्रिप्रमाणकं प्रत्यक्षानुमानार्थापत्तिरूपप्रमाणत्रयवन्तं सम्बन्धं शक्तिरूपं जानातीत्यर्थः । इदं पूर्वार्द्धविवरणमिति केचित्, अन्ये तु अन्यथानुपपत्तिरूपयाऽर्थापत्त्येत्यभेदेनान्वयमाहुः ।

एतद्व्याचष्टे - देवदत्तेति । अनुमायेत्यन्तमाद्यश्लोकस्य विव[2]रणं तयोरित्याद्युत्तरश्लोकस्य । बालो व्युत्पित्सुः द्वयात्मिकां शक्तिमिति व्याचष्टे । वाच्यवाचकसम्बन्धमिति- तत्र वाक्ये व्युत्पत्तिः शक्तिग्रहः । पदे कथं शक्तिग्रहस्तदाह - परतः इति । चैत्रेत्यादि वाक्यत्रये एकैकपदस्यावापोद्वपावन्वयव्यतिरेकौ ।[3]

व्यभिचारात् तर्हि केवलेऽर्थे एव शक्तिर्नान्वितेऽर्थे-ऽतआह-प्रवृत्तिनिवृत्तीति । अयंभावः- परार्थः शब्दप्रयोगः परश्च गामानय, गां नयेति प्रवृत्तिनिवृत्तिकारिवाक्यादेव निराकाङ्क्षो जायते न तु पदमात्रात् । अतस्तदेव प्रयोगयोग्यं तदेव च व्युत्पत्तिस्थलम्, तत्र

१. रूपयेत्यर्थः -ब ।
२. विवक्षणं -क.।
३. ननु व्यभिचारान्वयस्तर्हि-क.

व्यङ्ग्यं विना लक्षणैव न भवतीति प्राक् प्रतिपादितम् ।

शब्दशक्तिमूले तु अभिधायाः नियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम् ।

अर्थशक्तिमूलेऽपि विशेषे सङ्केतः कर्तुं न युज्यते इति सामान्यरूपाणां पदार्थानामाकाङ्क्षासन्निधियोग्यतावशात् परस्परसंसर्गोऽपि विशेषरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्ता व्यङ्ग्यस्याभिधेयतायाम् ।

येऽप्याहुः -

शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ।। १ ।।

कमलाकरी

चान्वित एव पदार्थे शक्तिर्गृहीतेति न केवलं पदमात्रप्रयोगेऽन्विताभिधानमिति वाक्यस्थितानामेवान्वितानां साकाङ्क्षाणां पदानामन्वितैः पदार्थैः सह सङ्केतो गृह्यते इत्यन्वयः । विशिष्टाः संसर्गविशिष्टाः। न तु तथापि संसर्गत्वं वाच्यं, न तु संसर्गविशेषः, गामानय गां बधानेत्यादावानयनबन्धनादिसंसर्गाणां शक्यत्वे गोपदस्य नानार्थत्वापत्तेः । न चेष्टापत्तिः, अर्थभेदे शब्दभेदापत्त्या तदेवेदं पदमिति प्रत्यभिज्ञा[1] नं स्यादत आह- यद्यपीति । उत्तरमाह- तथापीति । अयम्भावः-यथा घटमानयेत्यत्र घटत्वेन शक्यता जातेरेव शक्यत्वात् नीलघटादिर्विशेषस्तु प्रकरणादिना आक्षेपाद्वा भासते तथा संसर्गत्वेन शक्यत्वेऽप्याकाङ्क्षायोग्यतादिवशाद् विशेषधीरिति सामान्येनावच्छादितः आक्षिप्तः सामान्यस्य विशेषं विनाऽपर्यवसानात् असौ पदार्थः प्रतिपद्यते ज्ञायते । व्यतिषक्तानामन्वितानां पदार्थानां तथाभूतत्वाद्विशेषबोधविषयत्वात् । दृष्टान्तोऽयम् । यथापदार्थे गवादौ विशेषधीस्तथा पदार्थत्वात् संसर्गेऽपीत्यर्थः ।

एतन्मतेऽपि व्यङ्ग्यस्य वाच्यत्वं निराचष्टे-तेषामपीति । सामान्यरूपेण[2] विशेषरूपो वाच्यः न तु विशेषत्वेनातिविशेषभूतः आनयनान्वयीत्यर्थः । वाक्यार्थेऽन्तर्गतो योग्यतया भासमान इत्यर्थः।

---

१. प्रत्यभिज्ञा न स्या-क.।
२. सामान्यपुरस्कारेण -विशेष-क. ।

अन्यथानुपपत्या तु बोधेच्छक्तिं द्वयात्मिकाम्।
अर्थापत्त्यावबोधेत सम्बन्धं त्रिप्रमाणकम्।। २।।

इति प्रतिपादितदिशा देवदत्त गामानयेत्याद्युत्तम-वृद्धवाक्यप्रयोगाद्देशाद्देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति-'अनेनास्माद्वाक्यादेवं विधोऽर्थः प्रतिपन्न' इति तच्चेष्टयाऽनुमाय तयोरखण्डवा- क्यवाक्यार्थयोरर्थापत्त्या बाध्यबाधकभावलक्षणं सम्बन्धमवधार्य बालस्तत्र व्युत्पद्यते। परतः 'चैत्र गामानय' 'देवदत्त अश्वमानय' 'देवदत्त गां नय' इत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयति, अन्वयव्यतिरेकाभ्यां प्रवृत्ति-निवृत्तिकारि वाक्यमेव

असङ्केतितत्वादिति- सामान्यलक्षणप्रत्यासत्यभावात् सङ्केताविषयत्वादित्यर्थः। अयम्भावः - शक्तिग्रहकाले गोत्वेन गोपिण्डस्य शक्यत्वेऽपि न सर्वव्यक्तिषु शक्तिग्रहः सामान्य लक्षणानङ्गीकारेण तद्व्यक्तीनामनुपस्थितेः। विशेषभानन्तु प्रकरणादिना आक्षेपाद्वा एवं संसर्गेऽपि। न च तर्हि अपदार्थ एव विशेष इति वाच्यमन्वयव्यतिरेकाभ्यां पदगम्यत्वादिति।

अर्थान्तरेति - तदन्तिकगमननिषेधविरोधिनस्तदन्तिकगमनरूप-विध्यादेरित्यार्थः। यत्र व्यक्तिविशेषस्यानभिधेयत्वं तत्र वाक्यार्थप्रतीत्यनन्तरं तदन्तिकमेव रन्तुं गतासीत्यादिव्यङ्ग्यस्य विधेश्चर्चा वाच्यत्वप्रसङ्गो दूरेऽनाशङ्क्य इत्यर्थः।

मतद्वये प्रकृताविरोधमाह - अनन्वित इति। अभिहितान्वये इति वाच्य इति शेषः। एवमग्रेऽपि। अतोऽर्थस्य वाच्यत्वे एव विवादः। प्रतीयमानस्य संसर्गविशेषस्य व्यक्तिविशेषस्य वानभिधे-यत्वन्तूभयोस्तुल्यं तथा व्यङ्ग्येऽपीति भावः। वाक्यार्थो वाक्ये प्रतीयमानोऽर्थः इत्यर्थः। अपदार्थः पदानभिधेयः।

एकदेशिमतमाशङ्कते - यदपीति। नैमित्तिकं व्यङ्ग्यधीस्तद्वशात् शब्दशक्तिर्निमित्तं कल्प्यते। शब्दश्रवणानन्तरं व्यङ्ग्यधीः जायमानाऽन्यस्या[१] सम्भवात् शब्दमेव निमित्तं कल्पयन्ती शक्तिं विना [२]

---

१. नान्यस्याभावात् - क०
२. तदभिसम्भवात् क.।

प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव सङ्केतो गृह्यते इति विशिष्टा एव पदार्था वाक्यार्थो न तु पदार्थानां वैशिष्ट्यम् । यद्यपि वाक्यान्तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानि निश्चीयन्ते इति पदार्थान्तरमात्रेणान्वितः सङ्केतगोचरस्तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते व्यतिषक्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधानवादिनः ।

तेषामपि मते सामान्यविशेषरूपः पदार्थः सङ्केतविषय इत्यतिविशेषभूतो वाक्यार्थान्तरगतोऽसङ्केतित्वादवाच्य एव यत्र पदार्थः प्रतिपद्यते तत्र दूरेऽर्थान्तरभूतस्य 'निश्शेषच्युते-त्यादौ' विध्यादेश्चर्चा ।

कमलाकरी

तदसम्भवात् तां कल्पयतीति भावः। दूषयति – तत्रेति । कारकत्वं. जनकत्वम् । अज्ञातस्येति–प्रत्यक्षेतरप्रमाणस्य ज्ञात[१]कारणत्वनियमात् अगृहीतसङ्केतस्य तद्धीप्रसङ्गाच्च ।

अस्तु तर्हि ज्ञातस्य ज्ञापकत्वमत आह– ज्ञातत्वञ्चेति ।सङ्केतेनैव न तु स्वरूपेणेत्यर्थः । स च सङ्केतोऽन्वितमात्रे न तु अन्वितविशेषे इत्यर्थः । अस्तु को दोषस्तत्राह – एवञ्चेति । निमित्तस्य शब्दस्य नियतनिमित्तत्वं विशेषसङ्केतवत्त्वं नैमित्तिकस्य व्यङ्ग्यस्य विशेषसङ्केतग्रहे सति तदुपस्थितिर्विशेषोपस्थितौ च तत्र सङ्केतग्रह इत्यन्योन्याश्रयः । लोल्लटमतमाशङ्कते – ये त्विति । यथा शरः एकेनैव वेगाख्यव्यापारेण रिपोः कवच–हृदयभेद–प्राणहरणानि करोति तथा शब्दः एकैनैव शक्तिरूपेण व्यापारेण पदार्थवाक्यार्थव्यङ्ग्यज्ञानानि करोत्यतो व्यङ्ग्ये शक्तिरेवेत्यर्थः । यत्परः इति – यत्र शब्दस्य तात्पर्यं सः । शब्दार्थ इत्यर्थः । अत्रेति – 'न पुनस्तस्याधमस्यान्तिकम् ।' इत्यत्र गतासीति विधिर्वाच्य एवेत्यर्थः । दूषयति – तेऽपीति । तात्पर्य वाचोयुक्तेस्तात्पर्यपदस्य तात्पर्यमजानन्तस्ते देवानां प्रियाः पशवः इत्यर्थः । भूतभव्येति – । अयम्भावः– न तावत् प्रतीतेर्व्यङ्ग्ये शब्दस्य तात्पर्यं युक्तं 'पूर्वो धावती' त्यादावपदार्थेऽपि तात्पर्यापत्तेः किन्तु

१. ज्ञातकरणत्वानिय–क.।

अनन्वितोऽर्थोऽभिहितान्वये पदार्थान्तरमात्रेणान्वितस्त्व-न्विताभिधाने अन्वितविशेषस्त्ववाच्य एव इत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः ।

यदप्युच्यते - 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' इति, तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा । शब्दस्य प्रकाशकत्वान्न कारकत्वं, ज्ञापकत्वन्तु अज्ञातस्य कथं, ज्ञातत्वञ्च सङ्केतेनैव, स चान्वितमात्रे । एवं निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति "नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते इत्यविचारिताभिधानम् ।

कमलाकरी

विधीयमानस्यैव तात्पर्यविषयत्वं विधेस्तत्र तात्पर्यात् , न च व्यङ्ग्ये तदस्ति । न हि सर्वत्र व्यङ्ग्ये विधिरस्तीति । ग्रन्थार्थस्तु भूतं सिद्धरूपं सोमादि, भव्यं साध्यं यागादि, कारकपदार्थाः यागादयः । प्रधानक्रियेति । योगेन स्वर्गमिति यागस्य करणत्वेऽप्यसाधितस्य तदयोगाद् यागं कुर्यादित्यर्थाक्षिप्तयागस्य साध्यत्वं प्रतीयते । यद्वा- 'दध्ना जुहोती' त्यादौ कारकपदार्थाः दध्यादयः होमानुवादेन विधीयमाना अक्रियारूपस्य दध्नो विधेयत्वायोगात् प्रधानक्रियाया होमस्य निर्वर्तिततया स्वक्रियाकरणत्वरूपकारकाणां क्रियैकदेशत्वात् क्रियात्वोक्तिः तत्सम्बन्धात् साध्यायमानतां साध्यतुल्यातां विधेयत्वात् साध्यत्ववत् प्रधानत्वं प्राप्नुवन्तीत्यर्थः । अतएव साध्यायमानतामित्युक्तं न तु साध्यतामिति । ततश्चेति -अदग्धमेव हि अग्निर्दहति तथेत्यर्थः । उदाहरणमाह- ऋत्विगिति । ऋत्विक्सहिते प्रचरणे इत्यर्थः । प्रमाणान्तरादतिदेशात् ज्योतिष्टोम विकृतौ श्येनयागे हीदं श्रुतम् । उदाहरणान्तरमाह - हवनस्येति । अन्यतो 'अग्निहोत्रं जुहोती' त्युत्पत्तिवाक्यादित्यर्थः। अक्रियारूपस्य दध्नो विधेयत्वायोगात् करणत्वमात्रमित्युक्तम् ।

उभयविधिरिति - यथा 'सोमेन यजेते' त्यत्र सोमयागयोरित्यर्थः । त्रिविधिरिति - यथा 'यदाग्नेयोऽष्टाकपाल' इत्यत्र हव्य-देवता-यागानामित्यर्थः । यत्त्वत्र देवनाथेनोक्तं लोहितोष्णीषत्वप्रचरणयोरुभयोर्लोहितोष्णीषप्रचरणऋत्विजाञ्च त्रयाणां विधिरिति तदतिदेशात् द्वयोः प्राप्तेर्मीमांसाध्ययनाभावात् मौर्ख्यं

ये त्वभिदधति 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार' इति 'यत्परः शब्दः स शब्दार्थः' इति च विधिरेवात्र वाच्यः। तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानां प्रियाः । तथाहि - भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्तकस्वक्रियाभि-सम्बन्धात् साध्यायमानतां प्राप्नुवन्ति । ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते। यथा ऋत्विक्प्रचरणे प्रमाणान्तरात् सिद्धे 'लोहितोष्णीषाः ऋत्विजः प्रचरन्ति' इत्यत्र लोहितोष्णीत्वमात्रं विधेयं हवनस्यान्यतः सिद्धेः 'दध्ना जुहोति' इत्यादौ दध्यादेः करणत्वामात्रं विधेयम् । क्वचिदुभयविधिः क्वचित् त्रिविधिरपि । यथा 'रक्तं पटं वय' इत्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा। ततश्च यदेव विधेयं तत्रैव तात्पर्यमित्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं नतु प्रतीतमात्रे। एवं हि 'पूर्वो धावति' इत्यादौ अपराद्यर्थेऽपि क्वचित् तात्पर्यं स्यात्।

कमलाकरी

कृतमित्युपेक्ष्यम्। [१] लोकेऽप्युदाहरति - यथेति। रक्तत्वपटत्ववयत्वानां मध्ये एकस्य द्वयोस्त्रयाणां वाऽसिद्धावेकादिविधिरित्यर्थः । उपात्तस्यैवेति-तत्र 'निश्शेषे' त्यादौ विधिरूपात्तो येन शब्दस्य तत्र तात्पर्यं स्यादित्यर्थः । अर्थे वृत्तिविषये । इदन्त्वापाततः, वस्तुतस्तु लोके शक्तिलक्षणाभिन्नस्य तात्पर्यस्यैवानिरूपणादिति तत्त्वम्।

अस्तु प्रतीयमाने तात्पर्यं तत्राह - एवं हीति । पूर्वत्वापरत्वयोः समानसंवित्संवेद्यत्वादिति भावः । ननु प्रतीयमानेऽपि तात्पर्यं दृश्यते । 'विषं भक्षय' इत्यस्य नैतद्गृहे भोक्तव्यमित्यत्र तात्पर्यमिति शङ्कते । यत्विति । यद्यपि मा चास्य गृहे इत्यस्य न भोक्तव्यमित्यर्थोऽभिधैव तथापि पूर्ववाक्ये न भोक्तव्यमित्यर्थेनाभिधेति तात्पर्यं कल्प्यते इत्यर्थः । दूषयति - तत्रेति । अन्यथा मा चेति वैयर्थ्यादित्यर्थः । अङ्गाङ्गिभाव इति साक्षादिति शेषः । 'गुणानाञ्च परार्थत्वात्' इति न्यायादित्यर्थः । अङ्गतेति । अयम्भावः-भक्षयेति विधौ बलवद-निष्टाननुबन्धित्वमित्यर्थः । विषे च तद्बाध इति विरोधितासम्बन्धेन

१. लोकेषूदाहर - क.।

यत्तु 'विषं भक्षय मा चास्य गृहे भुङ्क्था' इत्यत्र ' एतद्गृहे न भोक्तव्यम्' इत्यत्र तात्पर्यमिति स एव वाक्यार्थ इत्युच्यते । तत्र चकारःएकवाक्यातासूचनार्थः । न चाख्यातवाक्ययोर्द्वयो-रङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य सुहृद्- वाक्यत्वेनाङ्गता कल्पनीयेति 'विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्वथा माऽस्य गृहे भुङ्क्थाः' इत्युपात्तशब्दार्थे एव तात्पर्यम् ।

यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावति शब्दस्याभिधैवव्यापारस्ततः कथं "ब्राह्मण पुत्रस्ते जातः" ब्राह्मण कन्या ते गर्भिणी' इत्यादौ हर्षशोकादीनामपि न वाच्यत्वम् ।

कमलाकरी

प्रतियोगिभूतमनिष्टानुबन्धित्वं लक्ष्यते तच्च् मानान्तरोपस्थिते गृहभोजनेऽन्वितमिति दुष्टमेतद्गृहे भोजनमिति पिण्डितो महावाक्यार्थः इति ।

यच्चोक्तं 'सोऽयमिषोरिवेति तद्दूषयति - यदि चेति । कन्या कुमारी अनूढा या गर्भे पापाद् राजदण्डादिभयाद्वा शोकः इत्यर्थः । न चान्त्यत्रलभ्येऽर्थेऽभिधाकल्पनं हर्षशोकादेस्तु मुखप्रसादमालिन्यादिना-ऽनुमानान्न तथात्वमत आह-कस्माच्चेति ।

ननु माऽस्तु लक्षणाऽत आह- किमिति चेति । 'समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति जेमिनिसूत्रशेषः । अत्राङ्गबोधक[१] त्वश्रुत्या षट्प्रमाणानां विरोधे परस्य दुर्बलत्वं बाध्यत्वं पूर्वपूर्वकल्पकत्वात् परेषामर्थस्य विनियोगस्य विप्रकर्षाद् व्यवधानादित्यर्थः । श्रुत्यादिलक्षणं तूक्तं मण्डनमिश्रैः-

श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगवती समाख्या ।।

इति द्वितीयतृतीयादेरुलक्षणं यथा- 'व्रीहीनवहन्ति' अरुणया गवा क्रीणाति' इत्यादि । क्षमताऽर्थप्रकाशनसामर्थ्यम् यथा-'अग्निर्मूर्धा'इत्यस्याग्नेययागार्थत्वम् । संहतानि अर्थैक्ये सति विभागे साकाङ्क्षाणि यथा - 'देवस्य त्वा' इत्यादेर्निर्वपामीत्येकवाक्यत्वात् । तदर्थं कथमिति प्रधानाकाङ्क्षा

---

१. अत्राङ्गबोधिकया -क.।

कस्माच्च लक्षणा- लक्षणीयेऽप्यर्थेदीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः ।

किमिति च श्रुतिलिङ्गवाक्यप्रकारणस्थान समाख्यानां पूर्वपूर्वबलीयस्त्वम् ? इत्यन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम् ।

किञ्च 'कुरु रुचिम्' इति पदयोर्वैपरीत्ये काव्यान्तर्वर्तिनि कथं दुष्टत्वं, न ह्यत्रासभ्योऽर्थः पदार्थान्तरैरन्वित इत्यन्नभिधेय एवेति एवमाद्यपरित्याज्यं स्यात् ।

यदि च वाच्य-वाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात् । न चानुपपन्नं सर्वस्यैव विभक्ततया प्रतिभासात् । वाच्यवाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकत्वताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव विभागव्यवस्था ।

कमलाकरी

प्रकरणम् । यथा- प्रयाजादेस्तद्वशादङ्गत्वं क्रमाद् 'अब्धिरसी' त्यस्योपांशुयाजाङ्गत्वम् । यौगिकसमाख्यया अङ्गत्वं यथा'अध्ववयवमि'त्यनयाऽध्वर्योः । विरोधे तु पूर्वस्य बलत्वाद् यथा-'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इत्यत्र द्वितीयया लैङ्गिकेन्द्रार्थत्वबाधः । एवं लिङ्गवाक्यविरोधे ' स्योनन्ते सदनम्' 'तस्मिन् सीद' इत्यनयोर्लिङ्गात् प्रत्येकं सदने चयने च विनियोगः । 'द्वादशाहीनस्येत्यत्र तु प्रकरणं
बाधित्वा वाक्यादहीनं संज्ञयाऽङ्गाङ्गत्वं यथा- सूक्तवाक्ये देवतापदैकवाक्यतया 'इदं हवि' रित्यादेरुत्कर्षो न तु प्रकरणादुभयार्थत्वम् । राजसूयेऽभिषेचनीयसन्निधिं बाधित्वा देवतादीनां प्रकरणात् सर्वार्थत्वम् । सान्नाय्यपात्रसन्निधौ 'शुन्धध्वम्' इति मन्त्रस्य पौरोडाशिक (त्व) मिति समाख्यावगततदर्थत्वबाधेन क्रमात् सान्नाय्यपात्रार्थत्वमित्युदाहरणानि ज्ञेयानि । तदुक्तं वार्तिके-

'द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः'

इत्यादौ पिनाक्यादिपदवैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वम्।

अपि च वाच्योऽर्थः सर्वान् पतिपतॄन् प्रत्येकरूप एवेति नियतोऽसौ। न हि 'गतोऽस्तमर्क' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति। प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते। तथा च 'गतोऽस्तमर्कः' इत्यतः सपत्नं प्रति प्रत्यवस्कन्दनावसर इति, अभिसरणमुपक्रम्यतामिति, प्राप्तप्रायस्ते प्रेयानिति, कर्मकरणान्निवर्तामहे इति, सान्ध्यो विधिरुपक्रम्यतामिति, दूरं मा गा इति, सुरभयो गृहं प्रवेश्यन्तामिति, सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संह्रियन्तामिति, नागतोऽद्यापि प्रेयानित्यादिरनवधिर्व्यङ्ग्योर्थस्तत्र प्रतिभाति।

कमलाकरी

"एक -द्वि-त्रि-चतुः-पञ्चवस्त्वन्तरप्रकारितम्।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनां प्रतीयते[१]॥
बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानान्तु बाध्यत्वं बाधकत्वमपेक्षया॥" इति।

तदिदं पूर्वपूर्वबलीयस्त्वं न स्याद् दीर्घदीर्घतरव्यापारेण 'इन्द्रगार्हपत्ययो' रप्यभिधया विशेषादित्यर्थः।

इष्टापत्तिं परिहरन्नुपसंहरति - इत्यन्वितेति। गुरुमतेऽपसिद्धान्तादित्यर्थः। विधेरपीति - 'निश्शेषे 'त्यादौगतासीत्यस्य व्यङ्ग्यत्वं सिद्धमित्यर्थः।

दूषणान्तरमाह - किञ्चेति। 'वैपरीत्ये रुचिं कुरु' इत्येवं रूपे। लाटदेशे (काश्मीरदेशे?) चिङ्कुपदं भगवाचि प्रसिद्धम्। न हीति-अत्र भगरूपोऽसभ्योऽर्थः पदार्थान्तरैर्न हि अन्वितः पदार्थान्तरस्यैवाभावात्। आद्यन्तयो-रुद्वयस्यार्थभावादिति हेतोरनभिधेय एवान्वितस्यैवाभिधेयत्वात्। व्यञ्जनाभावेऽसभ्यार्थे वृत्यभावात्तदवाचकस्य चिङ्कुपदस्य दुष्टत्वं न स्यादित्यर्थः।

---

१. प्रतीष्यते - क.।

वाच्यव्यङ्ग्ययोः निश्शेषेत्यादौ निषेधविध्यात्मना-
मात्सर्यमुत्सार्य विचार्य कार्य-
मार्याः समर्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणा
मुत स्मरस्मेरविलासिनीनाम् ।। १३३ ।।इत्यादौ
संशय-शान्त शृङ्गार्यन्यतरगतनिश्चयरूपेण,
कथमवनिप दर्पो यन्निशातासिधारा-
दलनगलितमूर्ध्ना विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ।। १३४ ।।
इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य, पूर्वपश्चाद्भावेन प्रतीतेः

कमलाकरी

दूषणान्तरमाह - यदि चेति । असाधुत्वं व्याकरणाननुगतत्वं, कष्टत्वङ्कर्णकटुत्वं तस्य शृङ्गारे दोषत्वेऽपि रौद्रबीभत्सेषु गुणत्वमेव । अतएवास्यानित्यत्वमसार्वत्रिकं दोषत्वमभिधया व्यङ्ग्योपस्थितौ तु तस्याः सर्वत्र तुल्यत्वात् सर्वत्र दोषत्वम् । क्वचिद् गुणत्वे वा सर्वत्र तदेव स्यात् । अतिरिक्त व्यञ्जनास्वीकारे तु तत्तद्रसप्रधानपुरुषविशेषं प्रत्येव तत्सत्वात् तेषाञ्चानियमादेकस्यैव युज्यते क्वचिद्दोषत्वं गुणत्वञ्चेति भावः ।

अस्त्वनुपपन्नमत आह - न चेति । चस्त्वर्थे । सर्वस्येति - तत्तद्रसाविष्टपुरुषस्येत्यर्थः । प्रतिभासादनुभवात् । कथं [१] तन्मते ऽनित्यदोषत्वमत आह- वाच्येति । व्यङ्ग्यस्य रसादेर्बहुविधत्वाद् रौद्रशृङ्गारादिरूपत्वात् क्वचिदेव रौद्रादौ कस्यचिच्छ्रुतिकटुत्वा-देरौचित्येन व्यञ्जनायामौचित्यज्ञानं सहकारीति युक्ता व्यवस्थेत्यर्थः ।

इतोऽपि व्यञ्जनासिद्धिरित्याह द्वयमिति-तपस्यन्तीं गौरीं प्रति ब्रह्मचारिणः शिवनिन्दोक्तिरियम् । अत्र "कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी" इत्युत्तरार्धम् । कपालं शिरोऽस्थि तद्वत्तया बीभत्सरसालम्बनत्वं जुगुप्सया गौर्या शोच्यत्वञ्चेति

१. चन्मते- ब.।

कालस्य, शब्दाश्रयत्वेन शब्द-तदेकदेश-तदर्थवर्णसङ्घटनाश्रयत्वेन चाश्रयस्य,

शब्दानुशासनज्ञानेन प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन तेन चावगम इति निमित्तस्य,

बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृत्योश्च करणात् कार्यस्य,

गतोऽस्तमर्क इत्यादौ प्रदर्शितनयेन सङ्ख्यायाः,

कस्स वा ण होइ रोसो दट्ठूण पिआए सव्वणं अहरम् ।
सभमरपउमग्घाइणि वरिअवामे सहस्सु एण्हिम् ।। १३५ ।।

इत्यादौ सखी-तत्कान्तादिगतत्वेन विषयस्य च भेदेऽपि यद्येकत्वं तत् कृचिदपि नीलपीतादौ भेदो न स्यात् । उक्तं हि 'अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च' इति ।

कमलाकरी

युक्तं काव्यानुगुणत्वम् । व्यञ्जनाभावे तु पिनाकिनः इत्युक्तेऽपि शिवज्ञानाविशेषाद् वीररसावगतेश्च न विवक्षिता निन्दा स्यादित्यर्थप्रतीतौ महदन्तरमित्यर्थः । किमिति- कुतो न स्यादेवेत्यर्थः ।

वाच्याद्व्यङ्ग्यस्य भेदकान्तरमाह - वाच्योऽर्थ इत्यादिना । यद्यपि वाच्योऽपि नानार्थसैन्धवादिपदेष्वनेकस्तथापि कोशानुशासनान्नियतरूपः, न च व्यङ्ग्येऽनुशासनमस्ति । निष्कर्षस्तु- एकवाक्यान्तर्गते तत्रापि एक एवार्थः'सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति' न्यायात् । अन्यथा वाक्यस्य संशायकत्वेनाप्रामाण्यापत्तेः । प्रकरणादिसहकारेण तद्धीर्न स्वत इत्यन्यदेतत्, न च व्यङ्ग्यस्तथा । किञ्च नानार्थे यथा तथास्तु । न च 'गतोऽस्तमर्क' इत्यादौ तथा, वाच्यस्य नियततत्वाद् व्यङ्ग्यस्य च नानात्वादिति हृदयम् । प्रतीयमानो व्यङ्ग्यः । नानात्वमिति -वाच्यस्तु नानापि प्रकरणादिसहायतयैक्यं भजत इत्यर्थः । अवस्कन्दनं मर्दनं यत्र तत्रेति क्रमेण शूर-स्वैरिणीप्रतिवेशिनी-कर्मकर-विप्र-पान्थगोपतापभीतवणिकवियोगिनीष्वित्यर्थः ।

भेदकान्तराण्याह - वाच्येत्यादिनारभ्य न स्यादित्यन्तेन । अत्रायमन्वयः-वाच्यव्यङ्ग्ययोः नि [१] षेधविध्यात्मत्वादिना हेतुना

---

१. निषेधव्यङ्ग्यत्वादिना -क.।

वाचकानामर्थापेक्षा व्यञ्जकान्तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम् । किञ्च वाणीरकुडंगिवत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूपे एव यत्र विश्राम्यति तत्र गुणीभूतव्यङ्ग्येऽतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयातामवलम्बतामिति ।

ननु "रामोऽस्मि सर्वं सहे' इति

रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम् ' इति,

'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम् ' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते विशेषव्यपदेशहेतुश्च भवति तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम ?

कमलाकरी

स्वरूपस्य, कालस्याश्रयस्य निमित्तस्य व्यपदेशयोश्चमत्कृत्योः, कार्यस्य संख्यायाः विषयस्य च भेदेऽपि यद्येकत्वं तत्तदा क्वचिदपि नीलपीतादौ गुणे तद्वति घटादौ च भेदो न स्यादिति । अक्षरार्थस्तु–निःशेषेत्यत्र निषेधो वाच्यः विधिर्व्यङ्ग्यस्तेन स्वरूपस्य भेदः मात्सर्यमिति कार्यं प्रयोजनं, नितम्बा इत्यस्य विलासिनीनामित्यत्राप्यन्वयः, अत्र संशयो वाच्यः शान्तशृङ्गारिणौ तद्रसप्रधानौ पुरुषौ तद्गतस्तत्तद्रसो निश्चयरूपो व्यङ्ग्यस्तेन स्वरूपस्य भेदः ।

कथमिति । हे अवनिप भूप यद्विद्विषां श्रीः स्वीकृता अयं दर्पः कथं कुत इत्यर्थः । यत एभिर्वैरिभिस्तवासौ कीर्तिरिव वल्लभा प्रिया स्त्री च स्वर्गे किन्न नीतेत्यर्थः । त्वत्स्त्रीहरणात् त्वत्तोऽपि तेऽधिका इत्यर्थः । अत्र निन्दा वाच्या स्तुतिर्व्यङ्ग्या तयोर्वपुषा स्वरूपेण स्वरूपस्य भेदः । पूर्वपश्चादिति– वाच्यस्य व्यञ्जकत्वेन कारणत्वात् तस्य च पूर्ववर्तित्वात् पूर्वं प्रतीतिः पश्चाद् व्यङ्ग्यस्येति कालभेदः । शब्देति– वाच्यादेः शब्दाश्रितत्वाभावेऽपि वृत्तिपरमिदम् । अभिधा शब्दाश्रिता व्यञ्जना न तु शब्दः पदं शब्दैकदेशः प्रकृतिप्रत्ययादिः वर्णास्तेषां घटनानुपूर्वी तदाश्रिता, तेनाश्रयस्य भेदः। शब्देति –अनुशासनं कोशादि तस्य ज्ञानेन वाच्यस्यावगमः प्रकरणादिना व्यङ्ग्यस्येति निमित्तस्य भेदः ।

उच्यते, लक्षणीयस्यार्थस्य नानात्वेऽपि अनेकार्थशब्दाभिधेयवन्नियतत्वमेव । न खलु मुख्येनार्थेनानियतसम्बन्धो लक्षयितुं शक्यते । प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धः अनियतसम्बन्धः सम्बद्धसम्बन्धश्च द्योत्यते ।

न च-

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसए पलोएहि ।

मा पहिअ रत्तिअंधअ सेज्जाए मह णिमज्जहिसि ।। १३६ ।।

इत्यादौ विवक्षितान्यापरवाच्ये ध्वनौ मुख्यार्थबाधः, तत्कथमत्रलक्षणा ? लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यमिति प्रतिपादितम् । यथा च समयसव्यपेक्षाऽभिधा, तथा मुख्यार्थबाधादित्रय-समय-विशेषसव्यपेक्षा लक्षणा, अत-एवाभिधा पुच्छभूता सेत्याहुः ।

कमलाकरी

कार्य[१]भेददाह - बोद्धमात्रेति । बोद्धा ज्ञाता, मात्रशब्दः साकल्यार्थः । वाच्येन सर्वबोद्धुः प्रतीतिमात्रस्य करणादुत्पादनात् व्यङ्ग्येन विदग्धशब्देन व्यपदेश्यो व्यवहार्य रसिक इति यावत् तस्य चमत्कृतेः साश्चर्यानुभवस्य कार्यस्य भेद इत्यर्थः । 'गतोऽस्तमर्क' इति वाच्यस्यैकत्वाद् व्यङ्ग्यस्यानेकत्वात् च संख्याया भेद इत्यर्थः ।

करस वाणेति । कस्य न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् । सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम् ।। इति संस्कृतम् । ओष्ठव्रणं दृष्ट्वा क्रुद्धे प्रिये सख्या इयमुक्तिः । वारिते कर्मणि वामा विरुद्धा । इदानीं जारासन्निधौ सपत्नीसन्निधौ च सहस्व पतिधिक्काराद्यनुभवस्व , जारसन्निधौ सर्वं सुखायासीदित्यर्थः । सखी वक्त्री वाच्यस्य विषयः तत्कान्तो नायकः, षट्पदेन दष्टौष्ठेयं न जारेणेति व्यङ्ग्यस्य विषयः । आदिपदात् पुनरेवं मा कृथा इति व्यङ्ग्यस्य जारो विषयः । एवं विषयस्य भेदेऽपि यद्येकत्वं वाच्यव्यङ्ग्ययोस्तदा क्वापि नीलादौ भेदो न स्यादित्यर्थः ।

उक्तं हीति । भेदोऽन्योन्याभावः विरुद्धस्य तदवृत्तेः धर्मस्याध्यासो ज्ञानं भेदः । इदञ्च ज्ञानवैधर्म्यस्यान्योन्याभावत्ववादिमतेनोक्तम् ।

---

१. भेदाह - क० ।

न च लक्षणात्मकमेव ध्वननम्, तदनुगमेन तस्य दर्शनात्। न च तदनुगतमेव अभिधावलम्बनेनापि तस्य भावात्। न चोभयानुसार्येव अवाचकवर्णानुसारेणाऽपि तस्य दृष्टे। न च शब्दानुसार्येव अशब्दात्मकनेत्रत्रिभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेः। इति अभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव।

कमलाकरी

कारण-भेदो भेदहेतुरन्योन्याभावज्ञापक इति क्रमेण योजना।

वाच्यव्यङ्ग्यवद् वाच[१]कव्यञ्जकयोर्भेदमाह- वाचकानामिति। अर्थः सङ्केतविषयः। सङ्केतितमेव वाचकाः बोधयन्ति व्यञ्जकस्तु न तथाऽर्थस्यापि व्यञ्जकत्वात्। न हि अर्थोऽप्यर्थे सङ्केतितः।

यदुक्तं तात्पर्यविषयत्वाद् व्यङ्ग्यस्य शाब्दत्वमिति तदितोऽप्ययुक्तमित्याह- किञ्चेति। सीदन्त्यङ्गानीत्यादौ लतागृहं प्रविष्ट इति व्यङ्ग्यं बोधयित्वा सीदन्तीतिवाच्येऽर्थे यत्र विप्रलम्भाख्यरसपोषणात् तात्पर्यं विश्राम्यति समाप्यते तस्मिन् मध्यमे चमत्काराभावादतात्पर्यभूतोऽपि व्यङ्ग्योऽर्थः प्रतीयमानः किं कस्य व्यापारविषयः स्यान्न कस्यापीत्यर्थः।

व्यङ्ग्यस्य लक्षणागम्यत्वं शङ्कते-नन्विति। रामेण प्रियेति अत्र "प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा, सोढं तच्च तथा त्वया कुलधनो धत्ते यथोच्चैः शिरः। व्यर्थं सम्प्रति बिभ्रता धनुरिदं तद्व्यापदः साक्षिणा' इति पूर्वपादत्रयम्। इयं रामोक्तिः। प्रत्याख्यानं निराकरणं तत्परायास्ते तव रक्षसा रावणेन समुचितं क्रूरयोग्यं (यत्) कृतं तच्च त्वया तथा सोढं यथा कुलस्थो जनो मल्लक्षणः उच्चैः शिरो धत्ते श्लाघां धत्ते। अन्यथा लाञ्छनेन नम्रीभावापत्तेः। तव व्यापदो विपत्तेः साक्षी दृष्टा तेन प्रियजीवितेनाद्यापि जीविता रामेण सह प्रेम्णः प्रीतेः सुकृतं सम्यक् करणमाचरणम्। भावे क्तः। नोचितं न युक्तमिति श्लोकार्थः। श्लोकद्वयं मूले स्थलान्तरे स्पष्टम्। 'रामोऽस्मीत्यत्र दुःखसहिष्णुत्वम्' 'रामेणेत्यत्र निःस्नेहत्वं, रामोऽसावित्युत्कृष्टत्वं लक्ष्यं तेन नानात्वमित्यर्थः। विशेषेति। विशेषव्यपदेशोऽर्थान्तर-सङ्क्रमितवाच्यत्वादिस्तद्धेतुस्तद्विषयस्तवगमो लक्ष्यावगमः। लक्षणायाः शब्दवृत्तित्वात्तदायत्तत्वं

---

१. वाचकव्यङ्ग्ययो - क.।

तत्र 'अत्ता एत्थ' इत्यादौ नियतसम्बन्धः, 'कस्स ण वा होई'त्यादावनियतसम्बन्धः ।

विपरीअरए लच्छी बह्माणं दट्ठूण णाहिकमलट्ठम् ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ ।। १३७ ।।

इत्यादौ सम्बद्धसम्बन्धः । अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते तन्निमीलनेन सूर्यास्तमयस्तेन पद्मस्य

कमलाकरी

शक्यसम्बन्धापेक्षणाच्चार्थायत्तत्वम् ।

प्रकरणादीति - तस्यैव तात्पर्यग्राहकत्वात् तात्पर्यानुपपत्तेश्च लक्षणामूलत्वादित्यिर्थः । नूतनो व्यङ्ग्यः । नानात्वादिधर्मैर्हि व्यङ्ग्यसिद्धिस्तवाभिप्रेता। ते च लक्ष्येऽपि सन्तीति तत्रैव व्यङ्ग्यस्यान्तर्भावोऽस्त्विति भावः । उत्तरमाह - उच्यते इति । नहि नानात्वाल्लक्ष्यत्वं नानार्थेऽतिप्रसक्तेरित्यर्थः। नियतत्वं सर्वपुरुषगम्यत्वम् । प्रतीयमानो व्यङ्ग्यः । गतोऽस्तमर्क इत्यादौ नियतानियतपरम्परासम्बन्धगम्यार्थप्रतीतेरित्यर्थः । मुख्यार्थबाधादपि न लक्षणेत्याह - न चेति । अत्ता एत्थेति । श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय । मा पथिक रात्र्यन्धक शय्यायां मम निमंक्ष्यसि ।। इति संस्कृतम् । निमज्जति वृद्धत्वान्निस्पन्दं शेते ।

ननु न मुख्यार्थबाधो लक्षणाबीजं किन्तु तात्पर्यानुपपत्ति, सा च 'अत्ता एत्थेत्यत्रास्त्येवात आह- लक्षणायामपीति । अयम्भावः-पावनत्वादिप्रतीतेरावश्यकत्वात् तत्र च वृत्यन्तराभावादवश्यं व्यञ्जनाऽङ्गीकार्या । न च तत्रापि लक्षणा, सा हि न निरूढा प्रसिद्ध्यभावात् न प्रयोजनवती प्रयोजनस्य विषयत्वाभावादित्युक्तं द्वितीयोल्लासे । किञ्च व्यङ्ग्ये लक्षणा न पदवृत्तिः वाच्यस्यापि व्यञ्जकत्वात् पदैकदेशवर्णादौ तत्वाच्च,. न वाक्ये पद[1] तदेकदेशादौ सत्वात्, न च शब्दवृत्तिरर्थस्य व्यञ्जकत्वादित्यादिवैधर्म्यैर्मुख्यार्थबाधाभावेऽपि तात्पर्यज्ञानं विनापि वक्तृबोद्धव्यादिसहकारेण याऽ न्यार्थधीः सा व्यञ्जनां साधयतीति । किञ्च अभिधावल्लक्षणाऽपि सङ्केतापेक्षा, न च व्यङ्ग्ये तदस्तीत्याह-यथा चेति । समयः सङ्केतः । यद्यपि तद्रूपत्वादभिधा न

---

१. पदत्वं तदेक- क.।

सङ्कोचस्ततो ब्रह्मणः स्थगनं, तत्र सति गोप्याङ्गस्यादर्शनेन अनियन्त्रणं निधुवनविलसितमिति ।

'अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्' इति येऽप्याहुः, तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽप्यवश्यमुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्य एव ।

ननु वाच्यासम्बद्धं तावन्न प्रतीयते, यतः कुतश्चिद् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात् । एवञ्च सम्बन्धाद् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति व्याप्तत्वेन

कमलाकरी

तत्सापेक्षा तथापि सम्बन्धाभिप्रायः समयशब्दः । यद्वा अभिधा तज्जन्यं ज्ञानं सङ्केतापेक्षा तज्ज्ञानापेक्षेत्यर्थः । मुख्यार्थबाधस्तद्योगः प्रयोजनञ्चेति त्रयमित्यर्थः ।

ननु तर्हि अभिधातो भेदो न स्यादत आह- अतएवेति । यतः सङ्केतापेक्षाऽभिधा तत्सापेक्षा च लक्षणा शक्यसम्बन्धात् तस्या, अतः परम्परया लक्षणापि सङ्केतापेक्षा इत्यभिधापुच्छभूता इत्यर्थः । लक्षणाव्यञ्जनयोर्भेदकान्तरमाह - न चेति । तस्य ध्वननस्यासिद्धिं निरस्यति - न चेति । अभिधेति नानार्थव्यञ्जनायाः 'भद्रात्मन' इत्यादावित्यर्थः । उभयं[१] लक्षणाऽभिधा च ।

अवाचकेति - अबोधकवर्ण 'गतोऽस्तमर्कः' इत्यादावित्यर्थः । वस्तुतस्तु -एकैकदूषणेनैवोभयदूषणाद् रसादेरपूर्वत्वेन तत्र शक्तिग्रहाभावाच्छक्यसम्बन्धाग्रहणाच्चेति तत्त्वम् । नेत्रत्रिभागः कटाक्षः । आदिपदादभिनयादिः । तात्पर्यं वाक्यस्य तदर्थे 'अत्ता एत्थ' इति नियतत्वं, वाच्यव्यङ्ग्यप्रतीत्योः एकाधिकरणत्वं द्वयोः पान्थनिष्ठत्वात्, 'कस्स ण वे' त्यादावनियतत्वं सखीकान्ताद्यनेकनिष्ठत्वात् ।

विपरीइति । विपरीतरते लक्ष्मी ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् । हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ।। इति संस्कृतम् । सम्बद्धसम्बन्धं विवृणोति - अत्र हीति । ततस्तेन सङ्कोचेनेत्यर्थः । तत्र चेति स्थगने सतीत्यर्थः । अनियन्त्रणं निर्लज्जं निधुवनं सुरतम् ।

अखण्डवाक्यस्य वाक्यार्थे शक्तिरिव व्यङ्ग्येऽपि शक्तिरिति

---

१. उभयलक्षणाभिधाना-क.।

नियतधर्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यत् तद्रूपः पर्यवस्यति । तथा हि-

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण ।
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ॥ १३८ ॥

अत्र गृहे श्वनिवृत्या भ्रमणं विहितं, गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति । यद्यद् भीरुभ्रमणं तत्तद् भयकारणनिवृत्युपलब्धिपूर्वकम्, गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः ।

कमलाकरी

वेदान्तिमतं शङ्कते-अखण्डबुद्धीति । 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतयःशक्त्या यथा बोधयन्ति तथा व्यङ्ग्येऽपि वाच्य इत्यर्थः । तदुक्तमतः अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकपदवर्ण-विभागमस्यानिमित्तमिति । अस्या बुद्धेरन्यत्राप्यविशिष्टमपर्यायानेक-शब्दप्रकाशितम् । 'एवं वेदान्तनिष्णातास्तमखण्डं प्रपेदिरे' इति ।

निराकरोति - तैरपीति । तत्त्वतश्चेद्वाक्यमलीकमिति कस्य वाचकत्वम् । अविद्यादशायान्तु व्यवहारे भाट्टनयाङ्गीकारादावापोद्वापाभ्यां पद-पदार्थविभागोऽङ्गीकार्य एव । अन्यथा साध्वसाधुशब्दव्यवहारो न स्यात् न स्याच्च वाक्ये तत्तत्पदार्थतत्तत्सम्बन्धविशेषधीः । तत्र चोक्तदिशा व्यङ्ग्येऽभिधाद्यसम्भवात् सिद्धा व्यञ्जनेति भावः । उक्तेति -'निश्शेषेत्यादौ तदन्तिकं गतासीति विधिरित्यर्थः ।

अनुमानाद् व्यङ्ग्यधीरिति व्यक्तिविवेककारमहिमभट्टमतं शङ्कते-नन्विति । तावत्पदेन व्यञ्जनावादिनोऽपीदं तुल्यमिति सूचितम् । सम्बन्धसामान्येऽप्यतिप्रसङ्गस्तुल्योऽत आह- प्रतिबन्धेति । प्रतिबन्धो व्याप्तिः । पक्षधर्मतामाह-नियतेति । द्वन्द्वान्ते श्रुतस्य प्रत्येकमन्वयः । नियतत्वेन धर्मिनिष्ठत्वेन वेत्यर्थ । विपक्षासत्वेन सपक्षसत्वेन चेत्यर्थः । अतएवोक्तं-त्रिरूपादिति । पक्षसत्वविपक्षसत्व-विपक्षासत्व -धर्मत्रययुतादित्यर्थः । अबाधितत्वस्य सर्वप्रमाणसाधारण्यात् असत्प्रतिपक्षत्वस्य स्वा[1]र्थानुमानेऽनुपयोगाच्च नाभिधानम् । अत्रानुमानपदं भावव्युत्पत्याऽनुमितिपरम् । तद्रूप इति । अनुमित्यात्मको

---

१. स्वार्थानुमानेः नुमानाच्च- क. ।

अत्रोच्यते भीरुरपि गुरोः प्रभोर्वा निदेशेन, प्रियानुरागेणान्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः। शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि, गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः, अपि तु वचनात्। न च वचनस्य प्रामाण्यमस्ति अर्थेनाप्रतिबन्धादित्यसिद्धश्च तत्कथमेवं विधाद्धेतोः साध्यसिद्धिः।

तथा निश्शेषच्युतेत्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि तानि कारणान्तरतोऽपि भवन्ति। अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानीत्यनैकान्तिकानि।

कमलाकरी

व्यङ्ग्यव्यञ्जकभाव इति पूर्वेणान्वयः। भम धम्मिएति-। भ्रम धार्मिक विश्वस्तः सः श्वाद्य मारितस्तेन। गोदानदी-कच्छकुञ्जवासिना दृप्तसिंहेन।। इति संस्कृतम्।। पुष्पावचयार्थं स्वसङ्केतस्थलं गोदानिकुञ्जं गच्छन्तं विघ्नकारिणं प्रति कस्याश्चिदियमुक्तिः। गोदातीरे सिंहोपलक्षितभयहेतोः सत्वाद् गृह एव तिष्ठ, तत्र मा गाः इति तात्पर्यार्थः।

अनुमानप्रकारमाह - अत्रेति। गृहे भ्रमणमभ्रमणमनुमापयतीत्यन्वयः। यद्यपि गृहे भ्रमणं गोदावरीतीरे न भ्रमणाभावमनुमातुमीष्टे व्यधिकरणत्वात् तथापि व्याप्तिग्रहोपायिकत्वेनेदमुक्तम्। श्वनिवृत्या गृहे विहितं भ्रमणं तद्धेतुकं कल्प्यते। तेनैवं व्याप्तिः -यद्यद् भीरुभ्रमणं तत्तद्भयकारणाभाव- ज्ञानपूर्वकमिति। गोदेति। अत्र हेतुः सिंहोपलब्धेरिति। एवञ्च प्रयोगः- गोदावरीतीरं भीरुभ्रमणायोग्यं भयकारणवत्वात् सिंहादिसमुपस्थितित्वाद्वा यन्नैवं तन्नैवं यथा गृहमिति भ्रमणाभावानुमितिः।

व्याप्तिं दर्शयितुमाह यद्यदिति। व्यापकविरुद्धेति - भीरुभ्रमणस्य व्यापिका भयकारणाभावोपलब्धिस्तद्विरुद्धं भयकारणं तदुपलब्धिरित्यर्थः।. तेन व्यतिरेकव्याप्तिरुक्ता। दूषयति - अत्रोच्यते इति। एवं हि परस्य व्याप्तिरभिमता यत्र भीरुभ्रमणायोग्यत्वाभावः किन्तु भीरुभ्रमणयोग्यत्वं तत्र भयकारणाभाव इति। सा चायुक्ता बलात् प्रभुनिदेशादिना भीरूभ्रमणस्य भयकारणेऽपि दर्शनेन व्यभिचारादिति

व्यक्तिवादिना चाधमपदसहायान्नामेषां व्यञ्जकत्वमुक्तम् । न चात्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानम् । एवं-विधादर्थादेवंविधोऽर्थ उपपत्यनपेक्षत्वेऽपि प्रकाशते इति व्यक्तिवादिनः पुनस्तददूषणम् ।

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसङ्कीर्णभेदनिर्णयो नाम पञ्चमोल्लासः ।

कमलाकरी

भावः । अन्येन चेति । निधिलाभादिनेत्यर्थः । शुनो बिभ्यदिति स्पर्शदोषाद् बिभ्यदित्यर्थः । यदि धार्मिकः शूरोऽभिप्रेतस्तत्र गोदावरीतीरं शूरभ्रमणायोग्यं भयहेतुमत्वात् सिंहवत्त्वाद्वा इत्युच्येत तदा साध्याभावव्याप्तत्वाद्विरुद्धतेति भावः । यदि तु भयकारणवत्त्वं सिंहवत्त्वं पुँसा वा पुश्चल्या प्रयुञ्जेत तदा स्वरूपासिद्धिरपीत्याह-गोदावरीति । अर्थेनेति - अप्रतिबन्धादव्याप्तत्वात् । न हि सर्वं वाक्यमर्थवत्तया व्याप्तं प्रतारक- वाक्यस्यापि दर्शनात् । अतः संदिग्धासिद्धिरपीत्यर्थः । स्थलान्तरेऽपि व्यभिचारादनुमानं निरस्यति -तथेति । कारणान्तरं संयोगभिन्नं स्नानादि तस्मादित्यर्थः । प्रतिबन्धानि व्याप्तानि । तर्हि व्यभिचारे व्यञ्जनाऽपि कथं तत्राह - व्यक्तीति । व्यक्तिर्व्यञ्जना ।

अस्तु ममाप्यधमपदसहकारेणानुमानमत आह - न चेति । ततश्च पूर्ववत् सन्दि[१]ग्धासिद्धिरिति भावः । ननु व्यञ्जनापक्षेऽप्येष दोषोऽत आह- एवमिति । तत्र व्याप्तेरनङ्गत्वेन सम्भावनामात्रादेव तथा[२] प्रतीतिः । न चातिप्रसङ्गः वक्त्रादिवैशिष्ट्यस्य नियामकत्वात् । यत् त्वर्थसन्देहे व्यङ्ग्यधीर्नेति तत् स्ववासनया प्रतीतिकलहं एव विश्राम्यतीति तत्त्वम् ।

इति श्री महामहोपाध्याय श्रीमद्रामेश्वरभट्टसूरिसूनु नारायणभट्टत्मज श्रीमद् रामकृष्णभट्टसूनु श्रीकमलाकर भट्टकृतायां काव्यप्रकाशकमलाकरी व्याख्यायां पञ्चमोल्लासः समाप्तः ।

---

१. संवित्सिद्धि-क.।
२. तत्प्रतीतिः- क.।

अथ षष्ठोल्लास

शब्दार्थचित्रं यत् पूर्वं काव्यद्वयमुदाहृतम् ।
गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ।। ४८ ।।

कमलाकरी

एवं मध्यमकाव्ये निर्णीतेऽधम निरूपपयति- शब्देति । यद्यप्याद्योल्लासे तत्स्वरूपं शब्दार्थचित्ररूपं भेदद्वयञ्चोक्तम् -तद्भेदाश्च शब्दाद्यलङ्कारमुखेनैव दर्शिता भवन्तीति न किञ्चिद्वक्तव्यमस्ति तथाप्युक्तभेदद्वयमेवानुपपन्नं शब्दार्थालङ्कारयोरन्योन्यनैरपेक्षेणा प्रतीतेरिति मतनिरासार्थो भेदार्थोऽयमुद्यम इति तत्वम् ।

'स्वच्छन्देति' शब्दचित्रं 'विनिर्गत' मित्यर्थचित्रं यत् पूर्वमुक्तं तत्र यद्यप्याद्ये व्यतिरेकालङ्कारस्यार्थचित्रत्वं द्वितीये च द्विर्मा शब्दश्रुतेरनुप्रासस्येति शब्दस्य चित्रत्वमिति सङ्करः प्रतिभाति तथापि गुणत्वेनाप्राधान्येन [१] च स्थितिर्यत्कृतं कवेश्चारुत्वं विवक्षितं तस्य प्राधान्यात् तेनैव व्यपदेश इति युक्तो विभाग इत्यर्थः ।

व्यतिरेकमुखेन व्याचष्टे - नन्विति । नहि सर्वथा परस्पर [२] परिहार स्थितिर्भेदहेतुः ' प्राधान्येन व्यपदेशाः भवन्तीति' न्यायादिति भावः । केचिदर्थालङ्कारमेव मन्यन्ते केचिच्छब्दालङ्कारम् । युक्तौ तु द्वावपीति यदुक्तं तत्र वृद्धसम्मतिमाह- यथोक्तमिति । तस्य काव्यस्य बहुधा बाहुल्येनेत्यर्थः । कान्तं सगुणमपीत्यर्थः । न विभाति विभावनां न प्राप्नोतीत्यर्थः । अयम्भावः-सर्वत्र सालङ्कारमेव काव्यं गुणस्त्वतन्त्रम्, अर्थस्यैव विभावादे रस-व्यञ्जकत्वादलरणं युक्तं न शब्दस्य तस्यार्थं प्रत्याय्यापक्षीणत्वादतोऽर्थालङ्कार एव युक्तः इति परे । अन्ये रूपकादि मलङ्कारं बाह्यं बहिरङ्गमस्वतन्त्रमाहुः । सुपां तिङ्गां तदन्तानां पदानां व्युत्पत्तिं विशेषेणोत्पत्तिमनुप्रासादिरूपं निर्माणं वाचां शब्दानामलङ्कृतिं वाञ्छन्ति । तदेतत् सौशब्दयं माधुर्यादिव्यञ्जकवर्थवत्वंरू [३] पं सुशब्दतामाहुर्वृद्धाः । अर्थस्य व्युत्पत्तिर्बोधः, ईदृशी सुशब्दसदृशी,

---

१. चास्थिते- अ. ।
२. परिहारास्थितिर्भेदहेतुः -अ.।
३. रूपं सुशब्दनामाहुः - अ.।

न तु शब्दचित्रेऽर्थस्याचित्रत्वं, अर्थचित्रे वा शब्दस्य ।
तथा चोक्तम्-"रूपकादिरलङ्कारस्तथान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ।।

कमलाकरी

नार्थेस्वतः सौष्ठ[१] वनाम्नि शब्देतु स्वतः इत्यर्थः । तेषामयं भावः-शब्द एव काव्यं तस्यैव प्रवृत्तिगोचरत्वात् स एव हि हि पठ्यते श्रूयते गीयते च । शब्दकृतचमत्कारस्य तु विभाचवाद्यर्थैरूपचयः। शब्दस्य माधुर्यादिव्यञ्जकवर्णानुप्रासादिमत्वेन व्यञ्जकस्तेन शब्दालङ्कार एव मुख्यो नार्थालङ्कारस्तस्य पाश्चात्यत्वादिति ।

स्वमतमाह - शब्देति । अभिधेयोऽर्थमात्रं तेन लक्ष्यव्यङ्ग्ययोः संग्रहः । शब्दार्थालङ्कारयोर्भेदान्नोऽस्माकन्तु द्वयमिष्टमित्यन्वयः इदमाकूतम् - न हि शब्दे स्वरूपेणालङ्कारः निरर्थकेऽपि तथाप्तेः । नाप्यर्थे सर्वदार्थसत्वेन तदापत्तेः किन्तु शब्दबोधितेऽर्थेऽर्थबोधकशब्दे च चित्रता । अतएव द्वावेव काव्यं तेनोभयोर्व्यञ्जकत्वसाम्याद् विनिगमकाभावादद्वालङ्कारौ तत्रापि यो यदन्वयव्यतिरेकानुविधायी स तेन व्यपदिश्यत इति ।

प्रथममिति । तावच्छद्वः एवार्थे । मृगलाञ्छनः क्षण[२]दामुखे प्रथममरुणकान्तिरेवोदयति इत्यन्वयः । कन्देत्यत्र काण्डेति वा पाठः । काण्डं दण्डः शरश्च तस्य रिपुनाशकत्वम् । अत्रोपमासत्वेऽप्यनुप्रासे कवेस्तात्पर्याच्छब्दचित्रतैव । उपमा त्वत्र गुणीभूतेत्यर्थः ।

ते दृष्टिमात्रेति । पक्ष्मले बहुलपक्ष्मयुते दृशौ यासां तासां स्त्रीणामलकाः केशाः खला दुर्जनाश्च संसारे कस्य क्षोभो धैर्यच्युतिरस्वास्थ्यञ्च तस्य नापि तु सर्वस्येत्यर्थः । ये नीचाः क्षुद्राः वक्रत्वात् अनुच्चाशयाश्च सविलासं सविभ्रममलीके ललाटे लग्नाः । खलपक्षे-बिलं रन्ध्रं वबयोरभेदात् आसनमासः प्रहार रन्ध्रे प्रहार इत्यर्थः । तत्सहिंत यथा तथाऽलीकेऽनृते लग्नाः सक्ताः कालतां श्यामतां तद्वत्कूटत्वं कुटिलतां वक्रताञ्च न त्यजन्तीत्यर्थः ।

अत्रार्थयोर्युगपदभिधानात्मकसमुच्चयरूपेऽर्थालङ्कारे कवेस्तात्पर्याच्छेषो गुणभूत इत्यप्रयोजकः ।

---

१. सौष्ठवं नास्ति-ब.।
२. क्षणदा मुखं-अ.।

रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिडां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ।।

कमलाकरी

नन्वत्र श्लोकद्वयेऽपि चन्द्रनारीरूपोद्दीपनालम्बनविभावादिना शृङ्गारप्रतीतेः कथमव्यङ्ग्यत्वं कथं वाऽधमत्वमत आह–यद्यपीति। सर्वत्र स्वच्छन्देत्यावपीत्यर्थः । रस्यते इति रसो व्यङ्ग्यं मुख्यरसस्य सर्वत्राभावात् व्यङ्ग्यत्वमस्त्येव । अन्ततो वर्ण्यविषयरतेरेव व्यङ्ग्यत्वात्। स्फुटस्येति–अयंभाव– शब्दार्थयोर्व्यञ्जकत्वेऽपि न सर्वत्र तत् किन्तु कयोश्चिदेव । व्यङ्ग्यमपि कस्यचिदेव चमत्कुरुते न सर्व[१]स्य । तत्र यथाभूतशब्दार्थप्रयोगे विभावादिप्रयोगेऽपि विवक्षाभावान्न रसप्रतीतिः किन्तु अलङ्कारत्वमेव । तदुक्तं ध्वनिकृता–

रसभावादिविषयविवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ।। (ध्व.३।४७)

अतो रसाद्यविवक्षया चित्रत्वं तद्विव[२]क्षया तूत्तमत्वमेवेति । अस्येति–अलङ्कारमुखेन प्रदर्शिता भवन्तीति नोच्यते इत्यर्थः । अथकाव्यभेदाः

अथ पूर्वमुक्तं काव्यं पुनः द्वेधा। द्रश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्' इत्युक्ते । तत्राल्पत्वाच्छ्रव्यमित्युच्यते ।

[३] श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा ।
छन्दोवद्धं पदं पद्यं तच्चैकेनैव मुक्तकम् ।।
द्वाभ्यान्तु युग्मकं तत्तु विशेषं त्रिभिरुच्यते ।
कालापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।।
सर्गबन्धो महाकाव्यं तत्रैकोनायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।।
एकवंशभवाः भूपाः कुलजा बहवोऽपि वा ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।।
प्रातर्मध्याह्नमृगया–शैलर्तुवनसागराः ।
वनप्रयाणोपयम–मन्त्रपुत्रादिवर्णनम् ।।

---

१. सर्वस्य तत्रायंभा- ब.।
२. तद्विवक्षायां -ब.।
३. अल्पं - अ.।

तदेतदाहुः सौशद्धं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः ।।" इति ।।

कमलाकरी

कवेर्वा नायकस्यैव नाम स्यात् सर्गनाम च ।
प्राकृते निर्मितं चेत् स्युस्सर्गा आश्वाससंज्ञकाः ।
कोशः श्लोकसमुद्बद्धः स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचिता सैवातिहृदयङ्गमा ।।
अथ गद्यकाव्यम् -
वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं मुक्तकञ्च चतुर्विधम् ।।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ।
कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ।।
यथा कादम्बरी दशकुमारचरितादि ।
आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनाञ्च कृतंपद्यंक्वचित् क्वचित् ।।
कथांशानां व्यवच्छेद आश्वास इति कथ्यते ।
[1] आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ।।
अन्यापदेशेनाश्वसमुखे भाव्यर्थसूचनम् ।
गद्यपद्यमयं काव्यं चम्पूरित्याभिधीयते ।।
[2] गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते ।
करम्बकञ्च भाषाभिर्विविधाभिर्विभूषितम् ।।
विरुदावली च सैव स्यात् श्रव्यभेदा इमे स्मृताः ।
अथ दृश्यम् । तच्चतुर्धा-
दृश्यं स्यादभिनेयन्तु रूपारोपात् तु रूपकम् ।
भवेदभिनयोऽवस्थानुकारः स चतुर्विधः ।
आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।
तत्र रूपक दशधा-
नाटकमथ प्रकरणं भाणव्यायोग- समवकार-डिमा ।

---

१. अपांवक्त्रा (१) क.अ.।
२. कदम्बकं -अ.।

शब्दचित्रं यथा-

प्रथममरुणच्छायस्तावत्ततः कनकप्रभः

तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।

कमलाकरी

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ।।

दशरूपकेऽप्युक्तम् -

नाटकं सप्रकरणँ भाणः प्रहसनं डिमः ।

व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ।। (द.रू.१।८)

इदं रसाश्रयं रूपकं दशधा । भावाश्रयं सप्तधा । तदुक्तं तत्रैव-

अन्यद्भावाश्रयं नृत्यम् ' इति ।

डोम्बी श्रीगदितं भाणो भाणी-प्रस्थानरासकाः ।

काव्यञ्च सप्त नृत्तस्य भेदास्युस्तेऽपि भाणवत् ।।

वाक्यार्थाभिनयो नृत्यं नाढ्यञ्चोच्यते । पदार्थाभिनयो नृत्तं

तद्विविधमपि द्वेधा -

मधुरोद्धतभेदेन तद्वयं द्विविधं विदुः ।

लास्य-ताण्डवभेदेन नाटकाद्युपकारकम् । (द.रु.१।१०) तत्र पुनः

नाटकमष्टादशधा । तदुक्तम् -

[१] नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।

प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं [२] तथा ।।

सल्लापकं श्रीगदितं शिल्पकञ्च विलासिका ।

दुर्मल्लिका च प्रकरी हल्लीसो भाणिकेति च ।।

अष्टादशैव जग[३]दुरुप-रूपकाणि मनीषिणः ।

विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।।

यथा-नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।

विलासद्ध्यर्यादिगुणवद् युक्तं नानाविभूतिभिः ।

सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।।

पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ।

---

१. नाटिकां नाटकं-अ.।

२. सारकं-अ.।

३. जगति-अ.,स.।

उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ।। १३९ ।।

कमलाकरी

[1]दिव्योऽथदिव्यादिव्यो वा गुणवान् नायको मतः ।
एत एव भवेदङ्गी शृङ्गारो वीर एव वा ।
दूराह्वानं वधोब्दन्ध[2] बाह्यदेशादिविप्लवाः ।
विवाहो भोजनं शापोत्सर्गःमृत्युःरतं तथा ।
व्रीडाकरञ्च यत् सर्वमेभिरेव विवर्जितः ।
अन्ते निष्क्रान्तनिखिलपात्रोऽङ्क इति कार्तितः ।
गर्भाङ्कमाह-
अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ।।
मुखादिकमाह-
तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम् ।
कथनं कविसंज्ञादेः नाटकस्य मुखं स्मृतम् ।।
यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ।।
प्रत्याहारादिकान्यङ्गान्यस्य भूयासि यद्यपि ।
तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ।।
आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।
पदैर्युता द्वादशभिरष्टाभिर्वा पदैरुत ।
पूर्वरङ्गं विधायैवं सूत्रधारो निवर्तते ।।
रूपकस्य कवेराख्यां गोत्राद्यपि च कीर्तयेत् ।
पारिपार्श्विकनामाथ नाट्यमास्थापयेत् ततः ।।
नटी विदूषको वापि पारिपार्श्वक एव वा ।
सूत्रधारेण सहिताः संल्लायं यत्र कुर्वते ।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।

---

१. दिव्यापदिव्य- अ.।
२. वस्तुदेशा-अ,.। राज्यदेशा-द. ।

अर्थचित्रं यथा-

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।

कमलाकरी

आमुखं तत्र विज्ञेयं नाम्ना प्रस्तावनापि सा ।।

सा च पञ्चधा-

उद्धात्यकः कथोद्धातः प्रयोगातिशयस्तता ।
प्रवर्तनावलगिते पञ्च प्रस्तावनाभिदाः ।।

पदानामन्यार्थं कृत्वा पात्रप्रवेशः आद्यः, सूत्रधारोत्तरं पात्रप्रवेशो द्वितीयः एकप्रयोगेऽन्यप्रयोगस्तृतीया, सूत्रधाराश्रितपात्रप्रवेशश्चतुर्थः सजातीयकार्यप्रवेशे पञ्चमः ।

नेपथ्योक्तं श्रुतं तद्वदाकाशवचनं तथा ।।
समाश्रित्यापि कर्तव्यमामुखं नाटकादिषु ।।
द्वयर्थश्लिष्टोक्तिः पताकास्थानकम् -
अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ ।
चूलिकाङ्कावतारश्च स्यादङ्कमुखमित्यापि ।।
सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।
मध्येन मध्यमाभ्यां वा पात्रभ्यां मम्प्रयोजितः ।
शुद्ध स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः ।।
प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका ।।
अङ्कान्तसूचितः पात्रैरङ्कस्यावतरः स्मृतः ।
यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला ।।
तदङ्कमुखमित्याहुर्बी[१] जार्थख्यापकन्तु तत् ।
अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात् ।।
बीजं बिन्दु, पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाक्रमम् ।।

अर्थः प्रयोजनं तस्य प्रकृतयः सिद्धिहेतवः । स्वल्पं फलं यद्बहु विस्तार्यते तद्बीजम् ।

---

१. बीजख्यापकमित्यपि-च.।

नीचाः सदैव सविलासमलीकमम्नाः
ये कालतां कुटिलतामिव न त्यजन्ति ॥ १४० ॥

कमलाकरी

उपक्रान्तार्थविच्छेदे बिन्दुरच्छेदकारणम् ।
प्रासङ्गिकं पताकां स्यात् प्रदेशः प्रकरी मता ॥
[१] दूरानुवर्तनं यत्तु पताका साभिधीयते ।
फलं प्रकल्प्यते यत्र प्रकरीं तां विनिर्दिशेत् ॥
अपेक्षितं तु यत् साध्यं तत्कार्यमिति सम्मतम् ।
अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ॥
आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमाः ।
भवेदारम्भ औत्सुक्यं फलार्थो यत्न उच्यते ॥
उपापापायशङ्काभ्यां प्राप्त्याशा प्राप्तिरुच्यते ।
अपायाभावतः प्राप्तिर्नियताप्तिस्तु सा मता ॥
फलागमस्तु संज्ञेयो यः समग्रफलोदयः ।
अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ॥

एकप्रयोजनायां कथायां मध्येऽन्यप्रयोजनसम्बन्धः सन्धिरित्यर्थः ।

अथ सन्धिभेदाः –

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः ।
इति पञ्चास्य भेदास्स्युः ते[२]षां लक्षणुच्यते ॥
नानारसारम्भयुक्तं मुखन्तु परिकीर्तितम् ।
मध्ये त्वन्यरसारम्भो ज्ञेयं प्रतिमुखन्तु तत् ।
फलस्य गर्भीकरणं सान्तरायो विमर्शकः ।
एकार्थास्तु मुखा येऽर्थाः उपसंहृतिरुच्यते ॥

मुखेऽङ्गान्याह–

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
[३] उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ॥

---

१. दूरानुवर्तने या तु- अ.।
२. क्रमाल्लक्षण-ब.।
३. उद्रेकः-अ.।

यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरुपतया पर्यवसानं, तथापि स्फुटस्य रसस्यानुपलम्भादव्यङ्ग्यमेतत् काव्यद्वयमुदाहृतम्।

कमलाकरीं

काव्यारर्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।
तस्य वृद्धिः परिकरस्तन्निष्पत्तिस्तृतीयकः ।
विलोभनं गुणाख्यानं युक्तिः स्यादर्थनिश्चयः ।
प्राप्तिः सुखागमो बीजस्यागमः सप्तमो मतः ।
विधानं सुखदुःखोत्थं कौतुकं परिभावनम् ।
बीजार्थाङ्कुरउद्भेदः आरम्भः करणं मतम् ।
करणं वा समारम्भो भेदः सम्पातभेदनम् ।।

प्रतिमुखेऽङ्गान्याह–

विलासः परिसर्पश्च विधूतं तापनं तथा ।
नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः ।।
निरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम् ।
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ।।
रतीच्छा तु विलासः स्या[१] न्नष्टानुसरणं परम् ।
विधूतं प्रार्थनात्यागो हेत्वज्ञानं तु तापनम् ।।
परिहासो नर्म धृ[२]तिस्तज्जा नर्मद्युतिः स्मृता ।
उत्तरोत्तरवाक्यानि प्रगमो व्यसनं परः ।

परो निरोधः ।

पुनः पुनः प्रार्थनन्तु पर्युपासनमुच्यते ।
पुष्पं विशेषवचनं वज्रं निष्ठुरमुच्यते ।
[३] प्रसादनमुपन्यासः पात्राणां मेलनं परः।
पात्राणि नटाः परो वर्णसंहारः ।

अथ गर्भाङ्गानि–

अभूताहरणँ मार्गो रूपोदाहरणे क्रमः ।
सङ्ग्रहश्चानुमानञ्च प्रार्थनाक्षिप्तिरेव च ।

---

१. स्यात्तत्रानु–अ.।
२. वृत्तिस्त–अ.।.तिस्तज्ञा नर्मद्युतिः स्मृता ।
३. सप्रसादमुप–अ.।

अत्र च शब्दार्थालङ्कारभेदाद् बहवो भेदास्ते चालङ्कारनिर्णये निर्णेष्यन्ते ।

इति काव्यप्रकाशे शब्दार्थचित्रनिरूपणं नाम षष्ठः उल्लासः ।।

कमलाकरी

तोटकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा ।
व्याजाश्रयन्तु वाक्यं यदभूताहरणँ मतम् ।
तत्वार्थकथनं मार्गो रूपं वाक्यं वितर्कवत् ।
उदाहरणमुत्कर्षो भावः तत्वार्थधीः क्रमः ।
सङ्ग्रहः सामदानाभ्यां लिङ्गादूहोऽनुमानकम् ।
प्रार्थना रतिहर्षेच्छा रहस्योद्भेदनं परा ।
परा क्षिप्तिः ।
संरम्भवाक् तोटकं स्यात् छलन्त्वधिबलं मतम् ।
उद्वेगो भीतिरेव स्यात् भयं त्रासश्च विद्रवः ।।
अथ विमर्शाङ्गानि-
अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः ।
शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ।
प्ररोचना विमर्शे स्यादादानं छादनं तथा ।
दशरूपके तु -
तत्रापवादसम्फेटौ विद्रबद्रवशक्तयः।
द्युतिः प्रसङ्गस्छलनं व्यवसायो विरोधनम् ।
परोचना विवलनमादानञ्च त्रयोदश ।। (द.रु.१।४४-४५)
दोषप्रख्यापवादःस्यात् सम्फेटो रोषभाषणम् ।
व्यवसायः प्रतिज्ञा स्यात् द्रवः स्याद् गुर्वतिक्रमः ।।
द्युतिः स्यात्तर्जनोद्वेगः शक्तिर्वैरस्य नाशनम् ।
प्रसङ्गो गुरुकीर्तिः स्याच्छ्रमः खेद इति स्मृतः ।।
ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते ।
कार्यात्ययो विरोधः स्यात् संहा[1]रार्थः प्ररोचना ।

१. संहारार्थप्ररो-अ.।

कमलाकरी

कार्यसङ्ग्रह आदानं छादनन्त्वपगूहनम् ॥

अवगूहनमपमानगोपनमित्यर्थः ।

अथोपसंहाराङ्गानि–

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ।
कृतिः प्रसाद आनन्द, समयो ह्युपगूहनम् ॥
भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च ।
प्रशस्तिरुपसंहारे ज्ञेयान्यङ्गानि नामतः ॥
बीजस्मृतिस्तु सन्धिः स्याद्विरोधः कार्यमार्गणम् ।
कार्योक्तिग्रथनं स्वानुभूतार्थो निर्णयः स्मृतः ॥
परिवादः परीभाषं लब्धोपशमनं कृतिः ।
शुश्रूषादिः प्रसादः स्यादानन्दो वाञ्छितागमः ॥
समयो दुःख निर्याणमद्भुतन्तूनिहनम् ।
भाषणं सामदा[१]नादि उक्तार्थं पूर्ववाक्यकम् ॥
वरदानस्य सम्प्राप्तिः काव्यसंहार इष्यते ।
नृपदेशादिशान्तिश्च प्रशस्तिरभिधीयते ।
चतुःषष्टि त्वि[२]दं प्रोक्तमङ्गं नाटचे मनीषिणः॥

षड्विधं फलमाह–

इष्टार्थवचनाश्चर्यलाभो वृत्तान्तविस्तरः ।
रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा ।
प्रकाशनं प्रकाश्यानामङ्गानां षड्विधं फलम् ।
रसव्यक्तिमपेक्ष्यैषामङ्गानां सन्निबन्धनम् ।
(न तु केवलया शास्त्रस्थितिसम्पादनेच्छया)

अथ नाट्ये रसवृत्तयः–

शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ।
चतस्रो वृत्तयो ह्येता सर्वनाट्येषु मातृकाः ।
स्युर्नायकादि–व्यापारविशेषान्नाटकादिषु ॥

अथ कैशिकी–

---

१. दानानि– अ.।
२. विधं–ब.।

कमलाकरी

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला पुष्कलनृत्यगीता ।
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता ।।

अस्या अङ्गानि–

नर्म च नर्मस्फूर्जो नर्मस्फोटोऽथ नर्मगर्भश्च ।

चत्वार्यङ्गान्यस्याः ।

वैदग्ध्यक्रीडितं नर्म इष्टजनावर्जनकृत् ।
तच्च त्रिविधं मतं विदुषाम् ।
हास्येन केवलेन तु विहितं शृङ्गारभययुतेन तेन ।।
केवलेन हास्येन श्रृङ्गारयुतेन भययुतेन चेति त्रिविधमित्यर्थः ।
नर्मस्फूर्जः सुखारम्भो भयान्तो नवसङ्गमः ।
नर्मस्फोटो भावलेशैःसूचि[१]तोऽल्परसो मतः ।।
नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः ।

अथ सात्वती–

सात्वती बहुला सत्वशौर्यत्यागदयार्जवैः ।
सहर्षा क्षुद्रश्शृङ्गारा विशोका साद्भुता तथा ।।

अथ तदङ्गानि–

उत्थापकोऽथ सङ्घात्यः सल्लापः परिवर्तकः ।
विशेषा इति चत्वारः सात्वत्यां परिकीर्तिताः ।।
उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते ।
मन्त्रार्थदैवशक्त्यादेः सङ्घात्यः सङ्घभेदनम् ।
संहार स्याद्गभीरोक्तिः नानाभावसमाश्रया ।
प्रारब्धादन्यकार्याणां करणं परिवर्तकः ।।

अथारभटी–

मायेन्द्रजालसङ्ग्राम-क्रोधोद्भ्रान्त्यादिचेष्टितैः।
संयुक्ता वधबन्धाद्यैरुद्धताऽऽरभटी मता ।।
वस्तूत्थापन-सम्फेट-सङ्क्षिप्तिरवपातनम् ।
इति भेदास्तु चत्वारः आरभट्याः, प्रकीर्तिताः ।।
माययोत्थापितं वस्तु वस्तूत्थापनमिष्यते ।

---

१. सूचिताल्प –ब.।

कमलाकरी

सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः ।
सङ्क्षिप्ता वस्तुरचना शिल्पैरितरथापि वा ।
सङ्क्षिप्ति स्यान्निकृतौ च नेतुर्नेत्रा[१]न्तर-ग्रहः ।
प्रवेशत्रास-निष्क्रान्नि-हर्ष-विद्रवसम्भवम् ।
अवपातनमित्युक्तं पूर्वमुक्तैव भारती ॥

अथ नाट्योक्तिभेदाः-

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।
सर्वश्राव्यं प्रकाशं स्यात् तद्धवेदपवारितम् ।
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ।
त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्याज्जन्तान्तेन जनान्तिकम् ।
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ।

अथ नामानि-

दत्तां मित्राञ्च सेनाञ्च वेश्यानां नाम कारयेत् ।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः।
नाटिका-सट्टकादीनां नायिकाभिर्विशेषणम् ।

अथ नाट्योक्तय-

[२] राजा स्वामीति वा भृत्यैर्भृत्यैर्भट्टेति वाधमैः ।
राजन्नित्यृषिभिर्वाच्यः सापत्यप्रत्ययेन च ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ।
वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम् ।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ।
तं सूत्रधारो मार्षेति हण्ड इत्यधमैः समः ।
भगवन्निति वक्तव्याः सर्वे देवर्षिलिङ्गिनः ।
वदेद् राज्ञीञ्च चेटीञ्च भवतीति विदूषकः ।
आयुष्मन् रथिनं सूतो वृद्धं तातेति गोचरः ।

---

१. नेत्रान्तरं-ब.।
२. राजन् विप्रर्षिभि- अ.।

कमलाकरी

वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः ।
शिष्योऽनुजश्च वक्तव्यो मान्य आर्येति वाधमैः ।
साधो इति तपस्वी च प्रशान्तश्चोच्यते परैः ।
एवमन्येऽपि कोशाद्यैर्ज्ञेया वाच्या यथायथम् ।।

अथ भाषाविभागः

अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ।
[१] चेष्टानां राजपुत्राणां श्रेष्ठिनाञ्चार्धमागधी ।।
पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम् ।
आसामेव च गाथासु महाराष्ट्रीं प्रयोजयेत् ।
चेष्टानां राजपुत्राणां चेटीनाञ्चर्धमागधी ।
प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिजा ।।
[२] चेटीनामप्यनीचानामपि स्याच्छौरसेनिका ।
बालानां षण्डकानाञ्च नीचग्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित् ।
संस्कृतं सम्प्रयोक्तव्यं लिङ्गीनीषूत्तमासु च ।
योषित् सखी बालवेश्याकितव्यप्सरसां तथा ।
वैदग्ध्यार्थं प्रयोक्तव्यं संस्कृतञ्चान्तरान्तरा ।
यद्देश्यं नीचपात्रन्तु तद्देश्यं तस्य भाषितम् ।
एवमन्यान् विजानीयात् महाकविनिबन्धतः ।।
षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा ।
लास्याङ्गानि दश यथालाभं रसव्यपेक्षया ।
स्वत एव कवेः शक्त्या ज्ञानान्नोक्तानि तेन च ।
एतदेवयदा सर्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमुच्यते ।
एतन्नाटकमिति । इति नाटकम् ।

अथप्रकरणम्–

---

१. चेष्टानां-अ.।
२. चेष्टानाम-अ.।

कमलाकरी

भवेत् प्र[१]करणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तुऽविप्रोऽमात्योऽथ बालकः (वा वणिक् ।) ।।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयञ्च तत् ।।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ।
कितवद्यूतकारादिविट-दूषकसङ्कुलः ।।

अथ भाणः-

भाणः स्याद्धूर्तचरितो नायकः षण्ढ[२]को विटः ।
संरोधनो-क्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ भारतीवृत्तिरत्र तु ।
एकाङ्को वृत्तमुत्पाद्यं मुखनिर्वहणान्वितम् ।।

अथ व्यायोगः-

ख्यातेतिवृत्ते व्यायोगः स्वल्पस्त्रीजनसंयुतः ।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ।
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः ।
नेता धीरोद्धतो हास्यशान्तशृङ्गारवर्जितः ।।

अथ समवकारः-

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् ।
नायकाः द्वादशोदात्ताः प्रख्याता देवदानवाः ।
फलं पृथक् पृथक् तेषां वीरमुख्यो रसोऽखिलः ।
वृत्ती स्तौ मन्दकैशिक्यौ नात्र बिन्दुप्रवेशकौ ।
सन्धयो निर्विमर्शास्तु त्रयोऽङ्काः परिकीर्तिताः ।।

अथ डिमः-

मायेन्द्रजालयुद्धाढ्यो डिमःख्यातेतिवृत्तकः ।
अङ्गी रौद्रौ रसा अङ्गमन्ये चाङ्कचतुष्टयम् ।
नायका देवगन्धर्व-यक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।

---

१. प्रकरणं -ब.।
२. पण्डितो विटः ब.।

कमलाकरी

वृत्तयः कैशिकीहीना निर्विमर्शाश्च सन्धयः।
नात्र विष्कम्भको नैव प्रवेशक इ[1]ह स्मृतः ॥

अथ ईहामृगः–

ईहामृगे मिश्रवृत्तश्चतु[2]रङ्कः प्रकीर्तितः ।
मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा ।
नरदिव्यावनियतौ नायक-प्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्यौ गूढभावादयुक्तकृत् ।
दिव्यां स्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यत्र किञ्चित् किञ्चित् प्रदर्शयेत् ।
युद्धमानीय संरम्भं परं व्याजान्निवर्तयेत् ।
महात्मानो वधप्राप्ता अपि वध्यास्तुरत्र नो ।
एक एव भवेदङ्को नवेत्याहुः परे पुनः ।
दिव्यस्त्रीहेतुकं युद्धं नायकाः षडितीतरे ।
मिश्रं ख्याताख्यातम् । अन्यः प्रतिनायकः ।

अथाङ्कः–

उत्सष्टिकाङ्क ए[3]काङ्को नेतारः प्राकृता नराः ।
रसोऽत्र करुणः स्थायी ख्यातक्लृप्तेतिवृत्तकः ।
भाणवत् सन्धिवृत्यङ्गं युद्धं वाचा प्रकल्पयेत् ।
अन्ये त्विममुत्सृष्टाङ्कमित्याहुः ।

अथवीथी–

वीथ्यामेको भवेदङ्कः क्वचिदेकोऽत्र कल्पयेत् ।
आकाशभाषितैरुक्तिं चित्रां प्रत्युक्तिमाश्रितः ।
सूचयेद् भूरि शृङ्गारं कांश्चिदन्यान् रसानपि ।
मुखनिर्वहणे सन्धी अर्थप्रकतयोऽखिलाः ।

अथ प्रहसनम्–

भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम् ।
तत्र नारभटी नापि विष्कम्भकप्रवेशकौ ।

---

१. इति स्मृतः-अ.।
२. श्चतुरङ्गः(?)-अ.।
३. एवाङ्को-ब.।

कमलाकरी

अङ्गी हास्यरसो द्व्यङ्कमेकाङ्कं वा भवेदिदम् ।
वृत्तं बहूनां भ्रष्टानां वे[१]श्या-चेटादिसङ्कुलम् ।

अथोपरुपकाणि- तत्रादौ नाटिका -

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ।
स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताऽथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ।
सम्प्रवर्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः ।
देवी पुनर्भवेज्ज्येष्टा प्रगल्भा नृपवंशजा ।
पदे पदे मानवती तद्वशः सङ्गमो द्वयो ।
वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः ।।

द्वयोर्नायकनायिकयोः।

अथ त्रोटकम् -

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।
त्रोटकं नाम तत्प्राहुः शृङ्गाररससंयुतम् ।।

अथ गोष्ठी-

प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलङ्कृता ।
पञ्चषट्स्त्रीयुता गोष्ठी कैशिकीवृत्तिशालिनी ।
हीना गर्भविमर्शाभ्यां स्यादेकाङ्कविनिर्मिता ।

अथ सट्टकम्-

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ।
अङ्का जवनिकाख्याःस्यु स्यादन्यत् नाटिकासमम् ।।

अत नाट्यरासकम् -

नाट्यरासकमेकाङ्कं नारी वासकसज्जिका ।
हास्योऽङ्ग्यत्र सशृङ्गारो मुखनिर्वहणान्वितः ।
केचित् प्रतिमुखसन्धिमिह नेच्छन्ति केवलम् ।

अथ प्रस्थानम् -

१. वेश्याचेष्टादि-अ.।

कमलाकरी

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।
दासी च नायिका वृत्तिः कैशिकी भारती तथा ।
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः ।
अङ्कौ द्वौ लयतालादिर्विलासो बहुलस्तथा ।

अथोल्लाप्यम् –

उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।
उल्लाप्यं बहुसङ्ग्राममस्त्रीगीतमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्काः इति केचन ।

अथकाव्यम् – काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम् ।
नेता स्त्री चाप्युदात्तात्र सन्धी चाद्यौ तथान्तिमः ।

अथ प्रेङ्खणम् –

गर्भावमर्शरहितं प्रेङ्खणं हीननायकम् ।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् ।
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम् ।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ।

अथ रासकम् –

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।
भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतम् ।
असूत्रधारमेकाङ्कं श्लिष्टनान्दीसमन्वितम् ।

अथ संल्लापकम् –

सल्लापकेऽङ्काश्चत्वारस्त्रयो वा नायकाः पुनः ।
पाषण्डः स्याद् रसस्तत्र शृङ्गारकरुणेतरः ।
भवेयुः पुरसंरोधच्छलसङ्ग्रामविद्रवाः ।
न तत्र वृत्तिर्भवति भारती न च कैशिकी ।।

अथ श्रीगदितम् –

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।
प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ।
भारतीवृत्तिबहुलं श्रीतिशब्देन सङ्कुलम् ।
मतं श्रीगदितं नाम विद्वद्भिरुपरुपकम् ।।
स्त्रीरासीना श्रीगदिते गायेत् किञ्चित् पठेदपि ।

कमलाकरी

एकाङ्को भारती प्राय इति केचित् प्रचक्षते ।।

उत्तरोत्तररूपं यत् प्रस्तुतार्थ परिष्कृतम् । अन्तर्यवनिकं गीतमस्त्रगीतं तदुच्यते ।। इति गीतलक्षणं संगीतशास्त्रे ।

अथ शिल्पकम् -

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।
अशान्तहास्याश्च रसाः नायको ब्राह्मणो मतः ।
वर्णना स्यात् स्मशानादे, हीनः स्यादुपनायकः ।

अथा विलासिका-

शृङ्गारबहुलैकाङ्का दशलास्याङ्गासंयुता ।
(विदूषकविटाभ्याञ्च पीठमर्देन भूषिता।)
हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायका ।
स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ।।

अथ दुर्मल्लिका-

दुर्मल्ली चतुरङ्का स्यात् कैशिकी भारतीयुता ।
[१] अगर्भा नागरनरा न्यूननायक-भूषिता ।
त्रिनाडिः प्रथमोऽङ्कोऽस्यां विटक्रीडामयो भवेत् ।
पञ्चनाडिः द्वितीयोऽङ्को विदूषक-विलासवान् ।
षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान् ।
चतुर्थः दशनाडिः स्यादङ्कः क्रीडितनागरः।।)

अथ प्रकरणी-

नाटिकैव प्रकरणी सार्थवाहादिनायका ।
समानवंशजा नेतुर्भवेद्यत्र च नायिका ।

अथ हल्लीसः-

हल्लीस एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः-
[२] वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्वलः ।
मुखान्तिमौ तथा सन्धी बहुताललय स्थितिः ।।

अथ भाणिका-

---

१. आगर्भा-अ.।
२. वाध्यो (च्यो) वा नायिका एकनायकः कौशिकीयुतः -अ., वन्धी वा नायिका-ब.।

कमलाकरी

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।
कैशिकी भारतीवृत्तियुक्तैकाङ्कविनिर्मिता ।।
उदात्तनायिका मन्दपुरुषा च व्यवस्थिता ।

अत्राङ्गसप्तकम् ......

उपन्यासोऽत्र विन्यासो विबोधःसाध्वसं तथा ।
समर्पणं निवृत्तिश्च संहार इति सप्तमः ।
उपन्यासः प्रसङ्गेन भवेत् कार्यस्य कीर्तनम् ।
निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति सः स्मृतः ।
भ्रान्तिनाशो विबोधः स्यात् मिथ्याख्यानन्तु साध्वसम् ।
सोपालम्भं वचः कोपपीडयेह समपर्पणम् ।
निदर्शनस्योपन्यासो निवृत्तिरिह कथ्यते ।
संहार इति च प्राहुर्यत् कार्यस्य समापनम् ।।" । इति ।।

इति श्री जगदुरु-रामकृष्ण-भट्टात्मज-महामहोपाध्याय-श्रीमत् कमलाकरभट्टकृतायां काव्यप्रकाशव्याख्यायां कमलाकर्यां षष्ठोल्लास ।।

अथ सप्तमोल्लासः

काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह-

मुख्यार्थहतिर्दोषः रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ।।४९।।

हतिरपकर्षः । शब्दाद्या इत्याद्यग्रहणाद् वर्णरचने ।

कमलाकरी

सङ्गतिमाह - काव्येति । उक्तकाव्यलक्षणे अदोषावित्युक्तौ दोषाभावः प्रधानं सति दोषे गुणोऽपि व्यर्थः । तदुक्तम्- "स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्" इति । तस्य प्रतियोग्यधीनत्वाद्दोषोक्तिरित्यर्थः ।

मुख्येति । मुख्योऽन्येच्छा[१]नधीनेच्छाविषयो निरुपाधीच्छाविषयः स चासावर्थश्च शाब्दसाक्षात्कारगोचरः सुखमित्यर्थः । काव्यभिन्ने शब्दे सुखं शाब्दमेव काव्ये त्वपरोक्षं दशमस्त्वमसीत्यादौ शब्दादप्यरोक्षमिति विवरणे स्पष्टम् । तस्य रसस्वरूपस्य हतिरपकर्षो न तु प्रतिबन्धः दुष्टेष्वपि रसोदयात् । स चापकर्ष उत्कर्षश्च रसनिष्ठो जातिविशेषः शब्दे तारमन्द्रत्ववत् । दोषतदभावाभ्यां व्यञ्जकाभ्यां तद्गृह इति परमानन्दः । तत्त्वन्तु हतिः प्रतिबन्ध एव । दुष्टेषु रसोदयश्च काव्यांशे । एकस्यैवांशे काव्यत्वतदभावौ न विरुद्धौ इत्युक्तं प्राक् । न च जातिविशेषे मानमस्ति ज्ञातेन च दोषेण प्रतिबन्धो न स्वरूपसत्ता ज्ञानञ्च भ्रमः प्रमा वाऽस्तु । मुख्यार्थस्य हतिर्यस्मादिति देवनाथ । तेन चास्वादप्रतिबन्धो जन्यः तेनास्वादस्य जन्यत्वाज्जनकज्ञानस्य भ्रमत्वेन तज्जन्यरसस्य प्रमात्वे[२] दोषाभावः इति परमानन्द परास्तः । आस्वाद्यमानस्यैव रसत्वात् ।

ननु रसस्य मु[३]ख्यत्वेन रसे दोषो न स्याद् वैजात्याभावात् । कथं शब्दार्थयोर्दोषोक्तिरत आह- तदाश्रयादिति । तदाश्रयत्वादि रसोपायत्वाद्रसाधारत्वाद्वा वाच्यो मुख्य इत्यन्वयः । वाच्ये भाक्तमुख्यत्वमित्यर्थः । उभयं रसो वाच्यश्च तदुपयोगिनस्तदुपाय तेन शब्दादिष्वपि सः दोषः प्राधान्यधीघातकत्वाच्च न मुख्यपदे

---

१. मुखोऽपेक्षानघानेच्छा.ब.।
२. प्रमात्वेऽप्यदोषः-अ.।
३. मुख्यत्वे कथं दोषोक्तिरत आह-ब.।

विशेष लक्षणमाह -

दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थम्।
निहतार्थमनुचितार्थंनिरर्थकमवाचकं त्रिधाश्लीलम् ।।५०।।
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव ।।५१।।

कमलाकरी

वृत्तिद्वयविरोधः । गुणवद्दोषोऽपि साक्षात् रसे । आद्येति-शब्दपदं पदवाक्यपरमेव वर्णादिपरत्वे आदिपदायोगादित्यर्थः । तत्त्वन्तु चमत्कारविघात एव दोषः अतो नीरसे भावादिविघातादक्षतिरिति वयम् । तद्व्यञ्जकत्वात्तु शब्दादावित्यर्थः । विशेषेति- तेन विना सामान्यासमाप्तेरित्यर्थः । दोषाणामिति शेषः । सुबुद्धिमिश्रास्तु-मुख्यपदे रसोक्तेरर्थपदं व्यर्थमतएव न कर्मधारयः । मुख्याय रसायेमौ मुख्यार्थौ तयोः हतिरन्यथात्वम् । यस्य येन रूपेण व्यञ्जकत्वं तदभावौ मुख्यौ रसोऽर्थौ ययोरिति वा । अत्र दोषाः द्विविधः शब्दनिष्ठा अर्थनिष्ठाश्च । वाक्यार्थबोधात्: पूर्वं बुद्धाः शब्दगाः परं बुद्धाः अन्त्याः । आद्याः पदांशपदवाक्यगा अनेके अर्थगास्तु वाक्यार्थरसगता द्वेधा ।

तत्र शब्दाधीनत्वादर्थस्य शब्ददोषान् वक्तुं वाक्यस्य पदगर्भत्वात् पूर्वं पददोष[१] विभागमाह- दुष्टमिति । पदां[२]शे पददोषाणामतिदेशादुपदेशापेक्षत्वाच्च पदांशस्य पदग्रहा-धीनत्वादंशवृत्तीनामपि पदवृत्तित्वात् पदवृत्तीनामेक- देशावृत्तित्वाच्चादौ पददोषोक्तिः । दुष्टं पदमिति प्रत्येकमन्वयः । अत्र श्रुतिकटुत्वादे रूढियोगाभ्यां लक्ष्यत्वं लक्षणात्वञ्चेत्येके । लक्ष्यतावच्छेदकमेव लक्षणं पृथिवीत्वादिवदित्यन्ये । पदगताविति धातोरर्थगमकं पदं तच्च प्रकृति-रेव । प्रत्ययस्तु तामपेक्ष्यैवार्थबोधकः । प्रत्ययानां प्रकृत्यर्थान्वित स्वार्थबोधकत्वात्, तेन पददोषः प्रकृतावेव । पदैकदेशदोषस्तु प्रत्ययगत इति परमानन्दः । तत्त्व[३]न्तु- प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति

---

१. पददोषानाह-अ.।
२. यद्यपि पदांशदोषाः पूर्वं वक्तुमर्हास्तथापि पददोषाणां तत्रा तिदेशादुपदेशापेक्षत्वात् पदग्रहाधीनत्वात् पदवृत्तीनामेकदेशत्वाच्चादौ तदुक्तिः- ब.।
३. तत्वन्तु केवल प्रकृतेरसाधुत्त्वेनावाचकत्वातृगादाविव साधुशब्दो-ब.।

श्रुतिकटु परुषवर्णरूपं कष्टम्। यथा-

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ।। १४१ ।।

अत्र कार्तार्थ्यम् इति।

कमलाकरी

केवलप्रकृतेरसाधुत्वोनावाचकत्वा ऋगादाविव ? साधुशब्दोपस्थित्या शक्तिजत्वभ्रमात् प्रतीतेरवाचकत्वमेव। तेन प्रकृतिप्रत्यययोर्व्यभिचारात् प्रत्येकं शक्तिमत्वेऽप्यर्थगमकत्वं मिलितयो-'न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः ' इति स्मृतेः। तेन घटमित्यादौ वाक्यं वदन्त स्तार्किका भ्रान्ता एव। किञ्च-शक्तिकल्पने किं मानम् ? अर्थधीरिति चेत् असाधुषु काव्यादिषु किन्न स्यात्। असाधुत्वाच्चेति चेत् प्र[१] कृतिमात्रेऽपि तुल्यमेतत्। अतः प्रकृतिरपि पदैकदेश एव। 'सुप्तिङन्तं पद' मिति तातचरणाः। विशेषस्तु 'मीमांसाकुतूहले' ज्ञेयः। श्रुतिकटु श्रुत्युद्वेगजनकं परुषवर्णं वीररौद्रादौ मुख्योत्कर्षकत्वाद् गुणः। [२]अतोरसापकर्षकत्वे सतीति देयम् तेन न दोषः। च्युतसंस्कृति व्याकरणलक्षणैर्हीनम्। अप्रयुक्तत्वञ्च कविभिः रसमर्थं तदर्थाबोधकं, निहतार्थमर्थान्तरप्रतीत्या प्रकृतव्यवधायकम्। अनुचितार्थमयोग्यार्थम्, निरर्थकं पादपूरणमात्रार्थकम्। अवाचकं त्रिधा-अवाच्यार्थे प्रयुक्तम्, लाक्षणिकम् उपसर्गादिनान्यार्थकञ्च। अश्लीलमपि व्रीडानिन्दाऽ-शुभधि[३]या त्रिधा। त्रिधेति मध्ये श्रुतस्योभयत्रान्वयः। सन्दिग्धं नानार्थे, अप्रतीतमर्थान्तरे लक्ष्यज्ञानं, ग्राम्यं ग्राम्यो लोकस्तन्मात्रप्रयुक्तत्वम् , नेयार्थं निषिद्धमपि लक्षणया प्रयुक्तम्। इदं दोषजातं केवलं पदगतं समासगतञ्च। अथ क्लिष्टादि समासगतमेवेत्यन्वयः। क्लिष्टं बलाद् व्याख्येयार्थम्। अविमृष्टः प्राधान्येनानुक्तः गुणभूतो विधेयांशो यत्र, विरु[४]द्धा विपरीता मतिस्तुतिर्निन्देति यत उदेति। एषां दूषकता बीजन्तु अर्थान्तरव्रिक्षेपे रसानुदय एव। विशिष्य बीजमपौनरुक्तयञ्च वक्ष्यामः।

---

१. प्रवृत्तिमात्रे-अ.।
२. अन्ये रसा-ब.।
३. शुभविधया-अ.।
४. मतिस्तत उदेति -अ.।

च्युतसंस्कृति व्याकरणलक्षणहीनम् यथा-

एतन्मन्दविपक्व तिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत्पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ।। १४२ ।।

अत्रानुनाथते इति । सर्पिषो नाथते इत्यादाविवाशिष्येव नाथतेरात्मनेपदं विहितम् 'आशिषिनाथः' इति । अत्र तु याचनमर्थः । तस्मात् "अनुनाथति स्तनयुगम्" इति पठनीयम् ।

कमलाकरी

परुषेति - । परुषा ओजोव्यञ्जकाः दुःश्राव्याः, कष्टं संयुक्तव्यञ्जनम् । तत्र समासं विना पदमा[१]त्रगतदोषानाह- अनङ्गैति । स नायकः तन्वङ्ग्या अनङ्गस्यापि विजयान्मङ्गलगृहं येऽपाङ्गभङ्गास्तेषां तरङ्गितैः [२] प्रसरणैः करणैरालिङ्गितः सन् । यद्वा तैरुपलक्षितया तन्वङ्ग्या आलिङ्गितः सन् कदा कृतार्थतां प्राप्नोतीत्यर्थः । कार्तार्थ्यमित्य न्त्यवर्णयोः कटुत्वम् । न च पदै[३]कदेशदोषता आद्यवर्णस्यार्थाभावेनाव्यभिचारात् । कौशलेन वैय्याकरणस्य वक्तुः श्रोतुर्वा हर्षान्न दोषः । अतएवानित्यदोषत्वम् ।

च्युतेति - । व्याकरणं प्रकृतिप्रत्ययविभागस्तस्य लक्षणं बोधकं सूत्रं तद्धीनं तदविषयः । न च डित्थादिसंज्ञानां तदभावादसाधुत्वं 'उणादयो बहुलम्' (अष्टा) इति तद्विषयत्वात् । व्या[४]करणेन लक्ष्यते इति लक्षणं शब्दसाधुत्वं तद्धीनत्वं न तु व्याकरणव्युत्पत्त्यभावःसंज्ञादावतिव्याप्तेरिति सुबुद्धिमिश्राः । यत्तु व्याकरणव्युत्पाद्यत्वस्यैव साधुत्वाद् दोषतादवस्थ्यं परमानन्देनोक्तं तन्न अनादिवाचकत्वस्य साधुत्वात् ।

एतदिति -। पल्ली वीथी ग्रामो वा तस्याः पतिरधिपस्तत्पुत्री तेन व्याधसङ्गौचित्यम् । एतत्प्रत्यक्षं मन्दमीषत् विपक्वं तेन का[५]ठिन्यं

१. पदमात्र-अ.।
२. तरङ्गैः ब.।
३. पदैकदेशता-ब.।
४. व्याकरणे-ब.।
५. कठिनं-अ.।

अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतम्। यथा-

यथायं दारुणाचारः सर्वदैव विभाव्यते।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा ।। १४३ ।।

अत्र दैवतशब्दो 'दैवतानि पुंसि वा' इति पुंसि आम्नातोऽपि न केनचित् प्रयुज्यते।

असमर्थं यत्तदर्थं पठ्यते न च तत्रास्य शक्तिः। यथा-

कमलाकरी

पाण्डुरत्वञ्च यत् तिन्दुकफलं तद्वत् श्याममध्यमापाण्डु प्रान्तञ्चेदृशं स्तनद्वन्द्वम्। पुलिन्दो व्याधः स चासौ सुन्दरयुवा च तस्य करमर्दनयो[1]र्यं यद् दृश्यते तत् कुचयुगं वस्त्राभावात् पर्णैरावृतं यत्र रचनाभिश्चावृतं मा कृथः मा कुर्विति। गजयूथं कर्तृकुम्भयोरभयाभ्यर्थनायां वा या तया दीनं यथा तथा याचते। हन्तेति खेदोऽन्यतस्त्राणाभावात्। कुम्भयोः शरपातं मा कुर्वित्यतो रक्षणम् इत्यर्थः।

अत्रेति। नाथृनाधृयाञ्चा[2]शीःषु इति गणपाठादेवात्मनेपदसिद्धे 'आशिषिनाथः' (अ. २।३।२१) इति वार्तिके पुनस्तद्विधाननियमार्थमाशिष्येवात्मनेपदमिति। इह याञ्च्यार्थत्वाद्दोष इति। सर्पिष इति-सर्पिरस्तु इति प्रार्थयते इत्यादिप्रयोगे 'आशिषि नाथः' इति सूत्रेण नाथतेः कर्मणि सर्पिषि षष्ठी। आशिषि नाथ इत्युपसंख्यानाच्चात्मनेपदाद् याञ्च्यार्थाप्रतीतौ व्यासङ्गाभावाद्रसानुदयो बीजम्। न चार्थाभावान्न दोषोऽयमिति वाच्यम्। शब्दस्य परिवृत्त्य-सहत्वेऽनुगतत्वात्। अर्थाबोधस्तु दोषत्वे बीजम्। न चात्राशीरर्थत्वम्, त्वामिति कर्मायोगात्। कथं तर्हि पाठो युक्तोऽत आह- तस्मादिति।

आम्नातं शास्त्रप्रसिद्धम्। कविभिः शिष्टैः। यथेति-दारुणस्तीव्रः हिंसाद्याचारो वर्तनं यस्य यथा यतस्तथा तत हेतोरस्य पिशाचो राक्षसो वा दैवत उपास्यः तदावेशाद् विक्षिप्तोऽयमित्यर्थः।

ननु दैवतपदस्य पुंसि केनचिदप्रयोगः सर्वाप्रयोगे वा दोषः। नाद्यः एकत्र सर्वप्रयोगाभावात्, नान्त्यः- एतत्कर्तुरिव प्रयोगात् योगेनासिद्धेः। मैवम्-अलङ्कार-व्याकरणादौ उक्तप्रयोगात् पदार्थधीविलम्बात्-मुख्यार्थविच्छेद एवात्र बीजम्।

---

१. संयोगं -अ.।
२. याञ्चायामिति-अ.।

तीर्थान्तरेषु स्नानेन समुपार्जित सत्कृतिः ।
सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम् ।। १४४ ।।

अत्र हन्तीति गमनार्थम् ।

निहतार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तम् । यथा-

याावक-रसार्द्रपादप्रहारशोणितकचेन दयितेन ।
मुग्धा साध्वसतरला विलोक्य परिचुम्बितं सहसा ।। १४५।।

अत्र शोणितपदस्य रुधिरलक्षणेनार्थेनोज्ज्व-लीकृतत्वरूपोऽर्थो व्यवधीयते ।

अनुचितार्थं यथा-

तापस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ।
प्रयान्ति तामाशुगतिं यशस्विनो रणाश्वमेधे
पशुतामुपागताः ।। १४६ ।।

कमलाकरी

यत्तदर्थमिति - । उपपदं विना स्वा[1] र्थाबोधकत्वमित्यर्थः । सत्कृतिः पुण्यं धर्मः इत्यर्थः । तद्वशाद् गङ्गां यातीत्यर्थः । हन् हिंसागत्योः इति गमनेऽनुशिष्टोऽपि तत्प्रतीतौ स्वरूपायोग्यः पद्धतिरित्यत्र तूपपदात् गतेः प्रतीतिरिति नानुशासनवैयर्थ्यम् । प्रकृतेरिति-विरुद्धहिंसाधीरिव बीजम् ।

यदिति - । प्रसिद्धार्थबाधादप्रसिद्धार्थबोधकमित्यर्थः । पूर्वमेकत्रैव प्रसिद्धिः इह तूभयत्रेति भेदः । तेन प्रचुरप्रयोगाभावात् पुंसि मण्डपादिप्रयोगो दोष एवेति ।

यावकेति - । यावकस्यालक्तकस्य रसेनार्द्रो यः पादस्तस्य प्रहारेण शोणिता उज्ज्वला केशा यस्य तेन दयितेन रुधिरभ्रमात् मुग्धा अतएव साध्वसं भयमनौचित्यात् तेन विकला सहसा झटिति विलोक्यापराधं ज्ञात्वा चुम्बिता । अपराधाभावे प्रवणत्वायोगादित्यर्थः । शोणितपदस्य रुधिरे बहुप्रयोगः उज्ज्वलार्थेऽल्पः । कचेषु रुधिरोत्पत्तौ रसानुदयो दूषकताबीजम् । अत्र समासगतत्वमतन्त्रं तदभावेऽप्यनौचित्यभावात् ।

अनुचितस्तुत्यस्य लज्जाजनकः । सत्रिणो याज्ञिकाः । पशुतां

---

१. स्वार्थबोधकत्व- अ.।

अत्र पशुपदं कातरतामभिव्यनक्तीति अनुचितार्थत्वम् ।

निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम् । यथा-

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिद्ध्यतु भगवति युष्मत्प्रसादेन ।। १४७ ।।

अत्र हि शब्दः ।

अवाचकं यथा-

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति,
वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन
न विद्विषादरः ।। १४८ ।। (किरा.२।३३)

अत्र जन्तु-पदमदातर्यर्थे विवक्षितं, तत्र च नाभिधायकम् ।

यथा वा-

हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा
तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम् ।

कमलाकरी

वध्यत्वम् । अश्वमेधे हि पशवो हन्यन्ते । कातरतां दयापात्रत्वम् । तेन कातर्ये रणे वाभिमुखो हत इति वीररसानुदयो बीजम् ।

पूरणं पादपूरणम् । यत्र तु पूरणार्थत्वमपि न तत्राधिकपदत्वम् । तेन गतार्थत्वम् । चादि चहि इत्यादि । यथा च 'कला च सा कान्तिमती' इति समुच्चयोऽपीति मात्रपदात्तन्निरासः ।

उत्फुल्लेति - कमलकेसरपरागवत् द्युतिः कान्तिर्यस्यास्तेन सौरभकान्तिलाभात् पद्मिनीत्वम् । युष्मदिति गौरवार्थं बहुत्वम् । यद्यपि द्योतकत्वेनावाचकत्वात् बहिःपदं तथापि तत्सहकृतं मम पदमेवा[1]वधारणाबोधकमतिदुष्टम् । लटि युक्तावधारणा न त्वत्र लोटि असिद्धे तदयोगात् । भगवतीत्येकत्वे युष्मदिति बहुत्वमनुचितञ्चेत्यर्थः । अत्रावधारणाधीरेव विक्षेपाद् रसविरुद्धाद् दोषः ।

त्रिविधेष्ववाचकेष्वशक्यार्थेऽप्रयुक्तमाह - अवन्ध्येति । अवन्ध्यःसफलः कोपो यस्य शत्रुसूदनस्या[2]पदां दारिद्र्याणां नाशकस्य

१. धारणबोधक-ब.।
२. नस्यापदा-व.।

किं कुर्मः कुशले सदैवविधुरो धाता न चेत्तत् कथं
तादृग्यामवतीमयो भवति मे नो जीवलोकोऽधुना ।। १४९ ।।
अत्र दिनमिति प्रकाशमयमित्यर्थेऽवाचकम् ।

यच्चोपसर्गसंसर्गादर्थान्तरगतम् । यथा-

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाप्रभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्तानुकारे जयति निजतनुः स्वच्छलावण्यवापी
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः।।१५०।।

अत्र दधदित्यर्थे विदधदिति ।

कमलाकरी

दातुः देहिनः शत्रुमित्रादयः स्वयमेव यत्नं विना वश्याः भवन्ति । द्वयोर्व्यतिरेकमाह- जनस्य जन्तुना न पुंसा जातं हार्दं स्नेहो यस्य तेन दात्रा मित्रेणादरो न विद्विषाऽमर्षशून्येन दरो भयं न । जन्तुपदमदातर्यप्रदातुर्न वाचकमित्याह-अत्रेति । पूर्वार्धे आपद्विहन्तुर्दातुरुक्ते उत्तरार्धे विपर्ययार्थं जन्तुपदमदातरि प्रयुक्तम्। जायते इति जन्तुरितियोगसत्वेऽप्यदातृत्वं न शक्यमित्यर्थः ।

नन्वापद्विघातो दानं विनाप्यस्तीति पूर्वार्द्धे कथं दातुरुक्तिरत आह- यथा वेति । यत्र यस्यां रात्रौ सा शशिमुखी दृष्टा, सा रात्रिस्तामसी तमोमयी मया कलिता । शशिसत्वे तमसोऽभावेऽपि वियोगवैकल्यात् कलितत्वोक्तिः । एवं तद्वियोगदुःखेनान्धकारितं तन्मयीभूतं दग्धमपि दिनं प्रकाशमयं कल्पितं वैपरी[१]त्यभावात्। हा धिगिति खेदः । धाता ब्रह्मा कुशले इष्टे सदैव विधुरो विमुखः न चेद्विधुरस्तदाऽधुना यं जीवलोको मे तादृग्यामवतीमयः । तद्दर्शनयुक्तरात्रिमयः कथं नो भवति । प्रतिभासाम्येऽपि रात्रिभानमेव कुतो न तदभावाद्दैवकोपोऽयमित्यर्थः । अत्र दिनशब्दस्य प्रकाशे शक्त्यभावात् लक्षणेत्यवाचकमित्याह- अत्रेति । अस्यैव भेदान्तरमाह-यच्चेति । प्राद्युपसर्गयोगादर्थान्तरे प्रयुक्तमित्यर्थः ।

जङ्घेति - 'भर्तुरर्धनारीश्वरस्य 'नृत्तं पदार्थाभिनयोऽप्यनुकारो लयाश्रितः । इत्युक्तेऽभिनये भवान्याः दण्डपाद ऊर्ध्वीकृतपादः ।

---

१. वैपरीत्यभाचा-ब.।

त्रिधेति व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्। यथा-

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम् ।। १५१ ।।

लीलातामरसाहतोऽन्यवनितानिश्शङ्कदष्टाधरः
कश्चित् केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततयाऽथ वाऽऽनतिमृते तेनानिशं चुम्बिता ।।१५२।।

मृदुपवनविभिन्नो मत्प्रियाया विनाशात्
घनरुचिरकलापो निस्सपत्नोऽद्य जातः ।

कमलाकरी

'प्रसह्योर्ध्वीकृतः पादः दण्डपादोऽभिधीयते' इति सङ्गीतरत्नाकरः । जङ्घायाः काण्डं पर्व तदेव ऊरू महत् नालं दण्डो यस्य सः-नखकिरणा एव लसन्ति केसराणि तेषामालिः पङ्क्तिस्तयां करालो दन्तुरः[1] कण्टकितः प्रत्यग्रस्यार्द्रस्यालक्तस्याभानां कान्तीनां प्रसरा एव किसलयानि पत्राणि यस्य सः । मञ्जु मनोज्ञं यन्मञ्जीरं नूपुरं तदेव भृङ्गो यत्र । निजतनुरेव स्वच्छा निर्मला लावण्यस्य सौन्दर्यस्य वापी तत्र सम्भूतं पद्म तस्य शोभां बिभ्रद् । अभिनवः आद्यनृत्तानभिज्ञः विसंष्ठुलः पादोऽभीष्टदत्वाज्जयतीत्यर्थः ।

अवाचकमाह – अत्रेति । विपूर्वो दधाति करोत्यर्थे रूढः । 'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते । तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा ।।" इत्युक्तेर्धारणबाधेऽप्यवाचकमेव तत्र प्रयुक्तम् । न च धारणे लक्षणायोगे तदसम्भवाद् योगार्थस्य रूढ्या बाधात् पङ्कजादौ तु द्वयोः सत्वादविरोधः । अर्थाप्रती[2]तेरेव दोषः ।

अश्लीलं त्रिधाऽह – व्रीडेति । अश्रीरस्येत्यर्थे सिध्यादित्वाल्लच् । कपिलकादित्वाद्रेफस्य लत्वम् । तेन कान्तिहीनत्वं व्रीडाद्यन्यत[3]म मुच्यते ।

व्रीडाव्यञ्जकमाह – यथेति । यस्य राज्ञ सुमहत्साध[4]नं

---

१. दन्तुर-कठिनः-ब.।
२. प्रतीतिरेव-अ.
३. तमजमुच्यते । ब.।
४. साधनं सैन्यं सुरत-ब.।

रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हः ॥ १५३ ॥

एषु साधनवायुविनाशशब्दाः व्रीडादिव्यञ्जकाः ।

सन्दिग्धं यथा-

आलिङ्गितस्तत्रभवान् सम्पराये जयश्रिया ।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥ १५४ ॥

अत्र वन्द्यां किं हठहृतमहिलायां कि वा नमस्यायामिति सन्देहः ।

अप्रतीतं यत् केवले शास्त्रे प्रसिद्धम् । यथा-

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ।
विधीयमानमप्येतन्न भवेत् कर्मबन्धनम् ॥ १५५ ॥

अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः ।

कमलाकरी

सुरतसाधनं लिङ्गञ्च यत्रान्यत्रैव दृश्यते तस्यारालितां वक्रितां भ्रुवमन्यः कः सहेतेत्यर्थः । अत्र साधनशब्दे लिङ्गबोधो व्रीडाहेतुः ।

जुगुप्साव्यञ्जकमाह - लीलेति । कश्चिदन्यवनितया सपत्न्या निश्शङ्कमत्यन्तं दष्टाधरस्तेन लीलापद्मेन हतः सन् पद्मकेसरैः दूषितनेत्र इव नेत्रे निमील्य स्थितः । तत्र सा मुग्धा कुड्मलितेन सङ्कुचितेन मुखेन वायुं फूत्कारं ददती स्थिता । भ्रान्त्या नेत्रनिमीलनेऽग्रे कान्तमुखसत्वेऽपि तदभावभ्रान्त्या अथवा तज्ज्ञानेऽपि तदज्ञाननाटनात् धूर्त्ततया नतिम् ऋते नतिं विनैवानिशमत्यर्थं चुम्बिता । अत्र वायुशब्दादधोवायुप्रतीतेर्जुगुप्सा । 'तमृते परमात्मानमितिवत् ऋते शब्दयोगे द्वितीया ।

अमङ्गलमाह- मृद्विति । मृदुपवनेन विभिन्नो विकसितो घनो निबिडो रुचिरश्च कलापः पिच्छौघः मत्प्रियाया विनाशाददर्शनात् निःसपत्नो जातः । मम प्रियायाः सुरतशिथिलबन्धे पुष्पयुक्ते केशपाशे सत्येषः बर्हिर्मयूरः कं हरेद् रञ्जयेत् । तदग्रे कोऽयं वराक इत्यर्थः ।

अत्र विनाशो मरणममङ्गलं व्यङ्ग्यम् । एष्विति -एषूक्तेषु त्रिषु आद्ये साधनशब्दः मध्यमे वायुशब्दः अन्त्ये विनाशशब्दश्च व्रीडादिव्यञ्जकाः । अत्रासभ्यार्थस्मारंकत्वेन रसभङ्गाद्दोषकत्वं विरुद्धमतिकृत्वे तु शक्त्या

ग्राम्यं यत् केवले लोके स्थितम् । यथा-

राकाविभावरीकान्तसङ्क्रान्तद्युति ते मुखम् ।
तपनीयशिलाशोभा कटिश्च हरते मनः ।। १५६ ।।

अत्र कटिरिति ।

निरुढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ।।

इति यन्निषिद्धं लाक्षणिकम् । यथा-

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ।। १५७ ।।

कमलाकरी

विरुद्धधीरिति भेदः । परं भगिनीशिवलिङ्गब्रह्माण्डादिशब्देष्वसभ्या-[१]र्थाप्रतीतेर्न दोषः तेनानित्यदोषोऽयम् ।

सन्दिग्धमिति - अनिश्चितार्थम् । आलिङ्गितेति - सम्पराये युद्धे जयश्रियाऽऽलिङ्गितस्तत्रभवान् पूज्यस्तत्र सम्पराये इति वा । वन्द्यां नमस्यामाशीःपरम्परां कर्णे कृत्वा श्रुत्वा कृपां कुरु । वबयोरभेदाद् वन्द्यां वन्दीकृतायां राजपत्न्यां कृपां कुर्विति वाऽर्थसन्देह इत्याह - अत्रेति । 'महिषीमहिलासमा' इति विश्वः । अर्थानिश्चयाद् रसभावानुदयो बीजम् । यत्र सङ्कररूपः सन्देहः एवोद्देश्यः प्रकरणाद्वा विशेषधीस्तत्रादोषः । केवले शास्त्रे इति कोशं विना शास्त्रमात्रप्रसिद्धमित्यर्थः । तेनाप्रयुक्ताद् भेदः तस्यान्यत्रापि प्रसिद्धेः ।

सम्यगिति - । सम्यग् ज्ञानं तत्वज्ञानमेव महाज्ज्योतिस्तेन दलितो आशयः वासनाख्यः संस्कारो यस्य तस्य भावस्तत्ता तां जुषते सेवते इति यस्तस्य विधीयमानं क्रियमाणमप्येतत् काम्यं कर्मबन्धनं बन्धनहेतुर्न भवेत् । तदुक्तम्-नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ।।' (भ०गी०) इति च ।

अत्राशयपदं 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः (यो०सू०१.२४) इति पातञ्जलसूत्राद्योगशास्त्रे एव प्रसिद्धं नान्यत्रेति आह- अत्रेति । तच्छास्त्राभिज्ञे त्वदोषः तेनानित्योऽयम् दोषः ।

ग्राम्यमाह-केवलमिति । आपामरंसर्वलोकप्रसिद्धमप्रयुक्तन्तु

१. सयार्थप्रतीतावपि न दोषः-ब.।

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते ।

अथ समासगतमेव दुष्टमिति सम्बन्धः अन्यत् तु केवलं समासगतञ्च ।

क्लिष्टं यतोऽर्थप्रतिपत्तिर्व्यवहिता । यथा-

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ।। १५८ ।।

अत्रात्रिलोचनसम्भूतस्य चन्द्रस्य ज्योतिरुद्गमेन भासिभिः कुमुदैरित्यर्थः ।

अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत् । यथा-

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।

कमलाकरी

शास्त्रसिद्धत्वान्न तथेति भेदः । इदं नागरादिपदे प्रसादत्वात् गुणोऽप्यन्यत्र न[1] दोषः ।

राकेति - । राका पूर्णिमा तस्याः विभावरी कान्तश्चन्द्रमा तस्य सङ्क्रान्ता द्युतिर्यत्र । तपनीयशिला सुवर्णपट्टिका तद्वत् शोभा यस्याः सा कटिर्नितम्बश्च मे मनो हरति ।

अत्र कटिरितिपदमुत्तानार्थं न रसं पुष्पातीत्याह-अत्रेति ।

नेयार्थमाह - नेयार्थमिति । वार्तिके ह्यरुणाधिकरणेऽभिधानवच्छक्तिवत्सामर्थ्याच्छब्दस्वभावात् शुक्लो घट इत्यादौ निरूढाः अनादिसिद्धाः काश्चिल्लक्षणाः, काश्चित् साम्प्रतं सङ्केतात् क्रियन्ते । यथा गङ्गायां घोष इत्यादौ । काश्चित्तु अशक्यत्वान्नैव क्रियन्ते । यथा-रूपो घटः इत्यादौ । रूढिप्रयोजनभिन्नाऽशक्या च लक्षणा निषिद्धा । तदयोग्येऽपि लक्षणया व्याख्येयार्थमित्यर्थः ।

शरदिति- । हे तन्वि, ते मुखं शरत्कालसमुल्लासी विकासी यः पूर्णिमायां शर्वरीश्वरस्तं चपेटा हस्तप्रहारस्तस्य पातनमर्पणं तस्य अतिथिं पात्रभूतं पराजितं करोतीत्यर्थः । अत्र चपेटापातनातिथिपदे निर्जितत्वं

---

१. प्यन्यत्र-दोषः-ब० ।

कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः।।१५९।।
अत्र मिथ्यामहिमत्वं नानुवाद्यम् अपि तु विधेयम्। यथा च-
स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदाम काञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव
कार्मुकस्य ।। १६० ।।
अत्र मौर्वीद्वितीयाम् इति द्वितीयत्वमात्रमुत्प्रेक्ष्यम्। यथा च-

कमलाकरी

विच्छायत्वञ्च ल [१]क्ष्यम्। शुद्धेऽनन्वयात् बाधादिवार्थभावाच्च समस्तं पदञ्च लक्षकं न च समासे शक्योऽर्थः, वाक्ये लक्षणातिथौ पूज्ये चन्द्रे जितत्वमयोग्यमित्यर्थः । वृत्त्यभावेऽर्थाज्ञानादेव दोषत्वमतएव विरुद्धमत्या न सिद्धिः ।

अथ भवेत् क्लिष्टमिति मूले व्यवहितान्वयमाह - अथेति । अथ शब्दात् क्लिष्टादि तत्र समासगतमेव दुष्टम् । समासे पददोषोऽतत्वे वाक्यदोष इत्यर्थः। एवशब्दार्थमाह- अन्यदिति। पूर्वन्त्वसमासे समासे वा पददोष एवेत्यर्थः । क्लिष्टपदार्थमाह -यत इति । यतो विवक्षितवाक्यार्थधीर्विलम्बितेनेत्यर्थः । निहतार्थे तु पदार्थधीविलम्ब इति भेदः । सामान्यबोधे प्रकरणाद्यभावे विशेष्याज्ञानाद्विलम्बः ।

अत्रीति- अत्रेर्मुनेर्लोचनात् सम्भूतः ज्योतिश्चन्द्रस्तस्योद्गमेन भासन्ते तैः कुमुदैरत्यर्थं सदृशं तव चेष्टितं विभाति ।

अत्र नञ्समाससन्देहात् कुमुदरूपवाक्यार्थबोधे विलम्बात् क्लिष्टत्वमाह - अत्रेति । यमके त्वदोषः चित्रत्वोद्देशात् ।

अविमृष्टेति-व्याचष्टे अविमृष्टेति। प्राधान्येनानुक्तः साध्यांशो यस्य सिद्धासिद्धविपर्ययो वाक्येऽपि समासे विभक्तयभेदरूपम् ।

मूर्ध्नामिति । रावणोक्तिः । उद्वृत्तमुद्धतं निर्दयं वा कृत्ताः छिन्ना अविरलाः संसक्ता ये गलाः कण्ठाः तेभ्यो गलन्तीभिः रक्तस्य संसक्ताभिरविच्छिन्नाभिर्धाराभिर्धौतौ क्षालितौ यावीशाङ्घ्री शम्भुपादौ तयोः प्रसादेनोपनतः प्राप्तो यो जयस्तेन जगति जातो मिथ्यामहिमा येषां मूर्ध्नां कैलासस्योल्लासने दोलने इच्छा तस्याः व्यतिकरः सम्पर्कस्तस्य

---

१. लक्ष्यते-अ.।

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं
व्यस्तपि त्रिलोचने ।। १६१ ।।

अत्र 'अलक्षिता जनि'रिति वाच्यम् ।

यथा च-

आनन्दसिन्धुरतिचापलशालिचित्त-
सन्दाननैकसदनं क्षणमप्यमुक्ता ।
या सर्वदैव भवता तदुदन्तचिन्ता
तान्ति तनोति तव सम्प्रति धिग्धिगस्मान् ।। १६२ ।।

अत्र 'न मुक्ता' इति निषेधो विधेयः । यथा-

नवजलधरः सनद्धोऽयं न दृप्तनिशाचरः

कमलाकरी

पिशुनः सूचकः उत्सर्पी वृद्धो यो दर्पो गर्वस्तेनोद्धुराणां पुष्टानां दोष्णां भुजानां वानरोपरोधान्नगर्याः लङ्काया रक्षणे प्रयासः क्लेशो यद्भवति एतदेव शम्भोः प्रसादस्य फलं किम् । मिथ्यामहिमत्वं नानुवाद्यमुपरोधात् प्रागप्राप्तेः । तेन लङ्कात्राणाभावे तद्भविष्यतीत्यसिद्धमप्राप्ते[1] विधेयपदमप्राप्तपरं न कृतिविषयत्वपरम् । समासे च जातपदे सिद्धवन्निर्ज्ञातत्वेन विशेषणत्वमिति निर्देशाद् दोषः । बहुव्रीहावन्यपदार्थप्राधान्यात् सिद्धस्य जगज्जयस्य मिथ्यात्वादसिद्धत्वोक्तिः । असिद्धस्य जयमिथ्यात्वस्य सिद्धत्वोक्तिरिति वयम् । वस्त्वसत्वे बाधादेव दोषत्वम् । समासे एक-पदे उद्देश्यविधेययोर्वषट्कर्तुः प्रथमः भक्षः अङ्गैः स्विष्टकृतमिति तद्वैरूप्यञ्चेति भावः ।

ननु जयमिथ्यात्वस्यासिद्धस्य सिद्धत्वोक्त्या निर्वेदातिशये वीर-रसे गुण एवेत्यस्वरसादन्यदाह-यथा वेति । स्थानविदा स्थलज्ञेन[2] स्मरेण न्यासीकृतां निक्षेपीकृतां कार्मुकस्य द्वितीयमौर्वीमिव नितम्बात् स्रस्तां, केसरो बकुलस्तत्पुष्पमालारूपां काञ्चीं पुनः पुनः अवरोपयन्ती गौरी स्थितेति कुमारसम्भवे हरदर्शने कामचेष्टोक्तिः ।

---

१. मप्राप्तं -अ.।
२. स्थानज्ञेन-व.।

सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत प्रिया न ममोर्वशी ।।१६३।।

इत्यत्र न त्वमुक्ताऽनुवादेनान्यदत्र किञ्चित् विहितम् ।

यथा-

जुगोपात्मनमत्रस्तः भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ।। १६४ ।।

इत्यत्रात्रस्ततानुवादेनात्मनो गोपनादि ।

विरुद्धमतिकृद् यथा-

सुधाकरकराकार-विशारदविचेष्टितः ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ।। १६५ ।।

अत्र कार्यं विना मित्रमिति विवक्षितमकार्येषु मित्रमिति तु प्रतीतिः ।

कमलाकरी

श्लोके व्यत्यासेन गुणप्राधान्यमाह - अत्रेति । समासे द्वितीयत्वं विशेषणमुक्तम् । न चासिद्धं विशेषणमर्हं तेन विपर्ययपाठः । अत्र चोत्प्रेक्ष्यत्वात् द्वितीयत्वमसिद्धं प्रधानं विधेयम् । मौर्वी चोद्देश्या न प्रथमभक्ष्यंवदेकसमासे युक्ता वैरूप्यात् । न च तद्वदेव द्वितीयमौर्वीत्वं विशिष्टं विधेयमिति वाच्यम् । द्वितीयत्वस्यासिद्ध्या विशेषणत्वायोगात् । तस्योत्प्रेक्ष्यत्वेन प्राथम्यवदननुष्ठेयत्वेन विशेषणविद्ध्ययोगाञ्च । तत्त्वन्तु मौर्वीत्त्वन्नोत्प्रेक्ष्यं प्रातिभासिकस्यासत्त्वेन न्यासीकारायोगात् । तेन विपर्ययनिर्देशाद् दोष इति मदीयः पन्थाः । विपर्यये द्वितीयमन्यामित्युत्प्रेक्ष्यम् इति सुबुद्धिमिश्राः ।

विशिष्टविधित्वात् प्रथमभक्षवदशेषं मत्वान्यदाह-यथा वेति । गौरीं प्रति बटुशिववाक्यम् । वरेषु लोकैर्यन्मृग्यते । यथा -"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्ठान्नमितरे जनाः ।।" इति । तत्र साकल्यं दूरे तद्व्यस्तमेकमपि शिवे न । कथम् । विरूपाणि विषमानि सोमसूर्याग्निरूपत्वात् भीषणानि वा अक्षीणि यस्य यद्वा रूप्यते येन तद्रूपं भूषणं सर्पकलापादि, विरुद्धं रूपंमक्षीणि च यस्य तद्वपुरलक्षमज्ञेयं जन्म यस्य तस्य भावस्तत्ता जन्मैव न ज्ञायते कुलं गोत्रञ्च दूरापास्तम् । दिगम्बरत्वेन धनमप्युक्तम् । अतः कुत्रः तव

यथा वा- चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ।। १६६ ।।
अत्र कण्ठग्रहमिति वाच्यम् ।

तथा-

न त्रस्तं यदि नाम भूतकरुणासन्तान-शान्तात्मनः
तेन व्यारुजता धनुर्भगवतो दैवाद् भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकवधाद् विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः
कथं विस्मृतः ।।१६७।।

कमलाकरी

यौतकादिचर्चा ।

अत्र जन्मोद्देशेन लक्ष्यत्वं विधेयं प्रधानं प्राग्वद्विपर्ययेणोक्तमतो दोषः तेन विपर्ययो ज्ञेय इत्याह- अत्रेति । अत्रापि विशिष्टविधित्वाददोषं मत्वाऽह-यथावे ति । अन्यस्त्रीविरहखिन्ना काचिदाह- आनसिन्धुरिति । रतिचापलेन नानास्त्रीध्यानेन शालते यच्चित्तं तस्य सन्दाननं बन्धनं तस्यैकं सदनं स्थानं यस्यां चित्तबन्धेनान्यतो निवृत्तिः सा स्त्री सर्वदा भवता क्षणमपि न त्यक्ता । सम्प्रति तस्या उदन्तो वार्ता तस्य चिन्तापि तव तां ग्लानिं तनोति । अस्मान् धिक् धिक् । तत्र सुखाभावेऽस्मज्जीवनं वृथेत्यर्थः ।

अत्रेति - । समासाभावे एव नञो निषेधार्थत्वम्, नञसमासे तु पर्युदासार्थो न निषिद्धः। तदाह हरदत्तः -'प्रसज्य प्रतिषेधोऽयं क्रियया सह यत्र नञ्' यथा-'न कलञ्जं भक्षयेत्' इति । वार्तिकेऽपि- 'नञ्भक्षयत्योः सम्बन्धप्रतिषेधो हि गीयते । तत्राभावो विधीयेत विध्य -[1]र्थो वा निवार्यते ।।" ( ) इति । तथा- 'विधेर्यत्र प्रधानत्वं प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदे न नञ् ।।"

उत्तरपदं समासावयवरूपम् । विशेषो मत्कृते तत्त्वकमलाकरे ज्ञेयः । तेनात्रामुक्तेति समासे गुणीभूतनिषेधप्राधान्याद् विपर्ययविशिष्टविध्यभावाच्च पूर्वतो वैलक्षण्यमिति रहस्यम् । असमासे

---

१. सिद्ध्यर्थो-अ.।

अत्र भवानीपतिशब्दो भवान्याः पत्यन्तरे प्रतीतिं करोति ।

यथा वा -

गोरपि यद्वाहनतां प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायाद्वः सोऽम्बिकारमणः ।। १६८ ।।

अत्र अम्बिकारमण इति विरुद्धां धियमुत्पादयति ।

कमलाकरी

निषेधप्राधान्यं कुत्र दृष्टं तदाह - यथेति । उर्वशीवियुक्तपुरूरवसो मेघादौ निशाचरादिभ्रमोत्तरं विवेकोक्तिः - नवजलधरेति । अयं सन्नद्धो हन्तुमुद्यतो नवमेघो न दृप्तराक्षसः । अयं मेघो राक्षसो न अपि तु स एवेति काकुरिति कश्चित् , तन्न प्रकृते निषेधार्थत्वेनोपन्यासायोगात् । एवमिन्दमिन्द्रे धनुरेव न तु तस्य दुष्टस्य शरासनम् । पटुस्तीव्रो धारावर्षो येन तस्य बाणधारा । कनकस्य निकषः उपलः यद्वा निकषो घर्षणरेखा तद्वत् स्निग्धा दीप्तिमती विद्युदियम् । न तूर्वशी मम प्रियेत्यर्थः । अत्र समासाभावान्नञर्थो निषेधप्राधान्याद् विधेयः । तदुक्तम्-'तत्राभावो विधीयते' इति । तेनादुष्टत्वमित्यर्थः । अतो न काकुः । ननु पूर्वपक्षे अयुक्तेत्यत्र पर्युदासादनुवादोऽस्तु न प्राधान्याद्विधिरत आह - न त्विति । तुरप्यर्थे ।

विधेयान्तरसत्वेऽपि ह्यनुवादात् पर्युदासो दृष्टो नान्यथेत्याह-यथेति जुगोपेति । स दिलीपो निर्भीकः सन्नात्मानं ररक्ष, नीरोगोऽपि धर्मं निषेवे, अलुब्धोऽर्थानाददे, आसक्तिहीनो सुखानुभवं चक्रे ।

अत्रास्तताद्यनुवादेन धैर्याद्यैस्त्रिवर्गसेवोच्यते । तत्र पर्युदासे गुणीभूतोऽपि निषेधोऽनुवाद्यो दृष्टो न विधेयः । अमुक्तत्वानुवादे च 'नेक्षेतोद्यन्तमादित्यम्' इतिवद् विधिश्रवणात् सङ्कल्पवद्विधेया- न्तराभावान्निषेधो विधेयः । स च समासे पर्युदासत्वादयुक्तः इत्यर्थः । तेन पर्युदासार्थो विधेय इत्यपि निरस्तम् । न चासूर्यम्पश्या राजदाराः 'अश्राद्धभोजी विप्रः' इतिवत् गुणत्वेऽपि प्राधान्यम् पक्षसमत्वात् । तत्त्वन्तु सूर्यं न पश्यन्तीति क्रियान्वयात् प्राधान्यमेव । न चामानो ना प्रतिषेध इति नञ्भिन्नोऽकारो निषेधार्थो भिन्नपदमिति वाच्यम् । पर्युदाससन्देहात् नञ्भिन्नस्याभावात् केवलस्याप्रयोगाच्च अर्थाज्ञानमनन्वयश्च दोषत्वे बीजमिति दिक् ।

समासेऽन्यं दोषमाह - विरुद्धेति । सुधाकरेति- । चन्द्रकिरण सदृशमुज्ज्वलं विशारदं विस्तृतं चेष्टितं यस्यासावेकोऽकार्यमित्रं प्रयोजनं

श्रुतिकटु समासगतं यथा -

सा दूरे च सुधासान्द्रतरङ्गितविलोचना ।
बर्हिर्निर्ह्लादनार्होऽयं कालश्च समुपागतः ।। १६९ ।।

कमलाकरी

विनाऽकृत्रिमः सुहृत् तस्य किं चरित्रं कथयामः ।

अत्रेति- अकार्यशब्दो न कार्याभावं ब्रूते किन्तु नञ्समासे पर्युदासो दुष्टकार्ये रूढः । 'अकार्यकरणाद् रक्षेत्' 'क्वाकार्यं शशलक्ष्मणः क्व च कुलम्' इत्यादौ तथैव प्रयोगात् । तदुक्तम् -

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ।। इति ।

अभावः केवले । अन्ये समासेऽर्थाः ।

रूढया विरुद्धमतिकृदाह - चिरेति । चिरकालेन प्राप्ता कान्तालोचनानन्दकर्तुः कान्तस्य गलग्रहमालिङ्गनं करोति । अत्र गलग्रहे रूढ्या रोगविशेषप्रतीतेः कण्ठग्रहमित्यर्हम् । 'छन्दोभङ्गात् तदपि नेति दुष्टमित्यर्थः ।

अन्यदप्याह -तथेति । न त्रस्तमिति । भार्गवोक्तिः । धनुर्व्यारुजता भञ्जयता तेन रामेण । रोषात्तन्नामग्रहणम् । भूतेषु प्राणिषु करुणा दया तस्याः सन्तानेन समूहेन शान्तात्मनः क्रोधहीनात् भगवतो भवानीपतेः देवाच्छम्भोः सकाशात् । 'भीत्रार्थानां भयहेतुः' (अ.) इत्यपादानत्वात् पञ्चमी । यदि नाम न त्रस्तं मा त्रस्यताम् । तस्य दयालुत्वादित्यर्थः । मदान्धो यस्तारकोऽसुरः तद्वशात् विश्वस्य दत्तोत्सवः तस्य शम्भोः पुत्रस्तु स्कन्दोऽथवा स्कन्द इव प्रियोऽहं शिष्यो वा कथं तेन विस्मृतः । स्कन्दात् मत्तो वा तस्य भीः कथं नाभूदित्यर्थः ।

अत्र 'पुँयोगादाख्यायाम्' (अ.४।१।४८) इति ङीपि 'इन्द्रवरुणे' (अ.४।१।४०) .ति आनुकि च भवस्य पत्नी भवानी तस्याः पतिरिति चैत्रपत्न्याः पतिरिति पत्यन्तरं प्रतीयते तस्यैवोक्तौ वैयर्थ्यात् , तेन विरुद्धमतिरित्याह-अत्रेति । ननु 'पुँयोगादाख्यायाम्' (अ. ४।१।४८) इति संज्ञोक्ते 'शिवा भवानी रुद्राणी' (अ.) इति कोशात् 'अविदितविभवो भवानीपतिः ' इति महाकविप्रयोगाच्च भवानीपतिशब्दो रुढ एव । आनुक् तु गोशब्दे 'गमेर्डोः' इतिवत् साधुत्वमात्रार्थः, तेन पत्यन्तरधीः कुचर्चामात्रमत आह- यथा वेति । गोरपीति - सः प्रसिद्धक्रूरो गौर्याः सिंह यस्य शम्भोर्वाहनतां प्राप्तवतः गोर्वृषस्यापि सविधे समीपे

एवमन्यदपि ज्ञेयम् ।

अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषा सन्त्येते पदस्यांशेऽपि केचन ।। ५२ ।।

केचन न पुनः सर्वे । क्रमेणोदाहरणानि-

सोऽध्यैष्ट वेदाँस्त्रिदशानयष्ट पितॄनपारीत् सममँस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ।। १७०।।

स रातु वो दुश्च्यवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान् ।। १७१ ।।

कमलाकरी

निरहङ्कारः सौम्यः सोऽम्बिकारमणः गौर्याः रमणः पतिः शिवः । 'मृडानी चण्डिकाम्बिका' (अ.) इत्यमरः । वः पायात् । अम्बिका माता तस्याः रमणो जारः इति विरूद्धां मतिमाह-अत्रेति । अभवन्मते तु इष्टान्वयाबोधः अत्र त्वनिष्टबोध इति भेदः । क्लिष्टादित्रयं समासगतमेव श्रुतिकट्वादि तु समासगतमेवेत्युक्तम् । तत्र केवलानि उक्तानि । अत्र तानि समासगतान्याह-यथेति ।

स। दूर इति । अमृतेनार्द्रे तरङ्गिते नेत्रे यस्या सा कान्ता दूरे स्थिता मयूररवयोग्यो वर्षाकालश्चागतः । आभ्यां तुल्ययोगिता । अत्र बर्हिरित्यादि समासगतं श्रुतिकटु माधुर्याभावात् ।

समासे च्युतसंस्कृत्यादि स्वयं ज्ञेयमित्याह- एवमिति । उक्तान् पददोषान् वाक्ये पदैकदेशे च काँश्चिदाह-अपास्येति । च्युतसंस्कृत्यसमर्थं निरर्थकञ्चापास्य विहाय वाक्येऽप्येते पूर्वदोषाः सन्ति । वाक्ये हि नैकप्रत्ययादिसम्भवः । असामर्थ्ये निरर्थके च वाक्यत्वमेव नेति, नैते वाक्ये दोषा इत्यर्थः । नन्ववाचकमसमर्थतुल्यं कुतो नापास्तम् , शृणु । नानापददुष्टत्वे वाक्यवृत्तित्वेन प्रतीतौ वा वाक्यदोषत्वम् । न च नानापदेष्वेकं वाक्यमस्ति येनावाचकं वाक्यवृत्तिः स्यात् । असामर्थ्यन्त्वन्वयायोग्यार्थत्वं तत्राप्यस्ति । वर्णदोषे पदैक[1]देशदोषः नानावर्णदोषे पददोषा एवति ।

वाक्ये श्रुतिकटुत्वमाह - सोऽध्यैष्टेति । सः दशरथो वेदानध्यैष्ट अधीतवान् देवानपूजयत् , पितॄनतर्पयत् , बन्धून् सुहृदः समानयत् ।

---

१. पदैकदेशः-अ.।

अत्र दुश्चवन इन्द्रः, अनेडमूको मूकबधिरः ।

सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः ।
अब्जरुचिभास्वरस्ते भातितरामवनिप श्लोकः ।। १७२ ।।

अत्र सायकादयः शब्दाः खड्गाब्धिभूचन्द्रयशः पर्यायाः शराद्यर्थतयाप्रसिद्धाः ।

कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथाऽपि त्वत्कीर्तिभ्रमति विगताच्छादनमिह ।। १७३ ।।

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन्नुपश्लोक्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थम् ।

कमलाकरी

'कामो क्रोधश्च लोभश्च मोहो मानो मदस्तथा" इति षड्वर्गं व्यजैषीत्; नीतावरँस्त रेमे, अरीन् समूलं हतवान् इति भट्टिकाव्ये क्रियाकारकयोर्व्याप्तेर्वाक्यदोषः । अतः वैयाकरणस्य कौशलं गुण एव । स रात्विति । दुश्चवन इन्द्रः भावुकानां कल्याणानां परम्परां सन्ततिं वो युष्माकं रातु ददातु । रा आदाने । पात्विति पाठे पालयतु । असम्मतान् शत्रून्, एडःमूको बधिरो यस्मादिति मूकबधिरस्तदाद्यैर्दोषैः द्यतु खण्डयतु । दोऽवखण्डने धातुः ।

सुशब्दा अपि न कैश्चित् प्रयुक्ता इत्याह- अत्रेति ।

सायकेति - । हे नृप, सायकः खड्गः शरश्च सहायो यस्य स बाहुर्यस्य । मकरध्वजेन समुद्रेण कामेन च नियमिता वेष्टिता रुद्धा च क्षमा भूः क्षान्तिश्च तस्याः स्वीकर्तुस्तव । अब्जश्चन्द्रः पद्मञ्च तस्य कान्तिवद् भास्वरः शोभमानः श्लोकः पद्यं यशश्च शोभतेतरामिति ।

अत्राप्रसिद्धार्थे प्रयोगो दोष इत्याह - अत्रेति । सायकमकरध्वजक्षमाब्जश्लोकशब्दाः इत्यर्थः ।

अनुचितार्थतामाह - कुविन्द इति । हे विभो, कुं पृथिवीं विन्दतीति कुविन्दो भूमिपस्तन्तुवायश्च । गुणानां शौर्या[1]दीनां तन्तूनाञ्च समूहं पटयसि पटुंकरोषि वस्त्रीकरोषि च । एते दिशि नग्ना वन्दिनो

---

१. गुणानां शौर्याणां-अ.।

प्राभ्रभ्राड्विष्णुधामाप्यविषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणम् ।। १७४ ।।

अत्र प्राभ्रभ्राड्-विष्णुधाम-विषमाश्व-निद्रा-पर्णशब्दाः प्रकृष्टजलद-गगन-सप्ताश्व- सङ्कोच-दलानामवाचकाः ।

भूपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ।। १७५ ।।

अत्रोपसर्पण,प्रहरण-मोहनशब्दाः व्रीडाव्यञ्जकत्वादश्लीलाः ।

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्तनम् ।। १७६ ।।

अत्र वान्तोत्सर्गप्रवर्तनशब्दाः जुगुप्सादायिनः ।

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे ।।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ।।१७७।।

कमलाकरी

वस्त्रहीनाश्चाभितः सर्वतः यशः कीर्तिमयशश्च गायन्ति । 'वनस्था' इति पाठे वनस्थाः किन्नराः । 'वनस्थः किन्नरो धीरः ' इति कोशात् । तथाप्येवं वैभवेऽपि त्वत्कीर्तिः शरदि ज्योत्स्नावद् गौराणि श्वेतानि स्फुटानि दृश्यानि विकटानि सुन्दराणि । 'विकटः सुन्दरे प्रोक्तः' इति विश्वः । सर्वाङ्गानि स्तनादीनि यस्या सा चासौ सुभगा सुन्दरी शोभनगुह्याङ्गा च । विगतमाच्छादमवरोधावगुण्ठनं वस्त्रं वा यत्र । यद्वा वीनां पक्षिणां गतं यत्राकाशे आच्छादनमनावृतं भ्रमतीति ।

अत्रोपमायां रूपके वा विश्रान्त्या जलदविषादिपदव्यञ्जनया वान्यार्थधीरुपश्लोक्यस्य स्तुतस्य राज्ञो निन्दां लज्जां वा करोतीत्याह-अत्रेति ।

अवाचकमाह- प्राभ्रेति । विषमाश्वः सप्ताश्वः सूर्यः प्रकृष्टैः अभ्रैर्मेघैः भ्राजत इति । अभ्रे भ्राजते इति अभ्रभ्राट् जलदः । प्रगतः अभ्रभ्राट् यत्रेदृशं विष्णोर्धाम पदं व्योम प्राप्य सहस्रपर्णानां निद्रां सङ्कोचं पलायनयुक्तां करोति ।

अत्र प्राभ्रभ्राड् इत्यादीनि पदान्यवाचकानीत्याह - अत्रेति ।

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीतावमङ्गलार्थम् ।

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विराजते ।। १७८ ।।

अत्र सुरादिशब्दाः किं देवसेनाशरविभूत्यर्थाः किं वा मदिराद्यर्थाः इति सन्देहः ।

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः सः फलितः सखे ।। १७९ ।।

अत्राधिमात्रोपायादयः शब्दाः योगशास्त्र मात्रप्रयुक्तत्वादप्रतीताः ।

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा ।। १८० ।।

कमलाकरी

बहुपददोषे वाक्यस्यैकपददोषे च पदस्य दोष इति भेदः ।

अश्लीलेषु व्रीडामाह- भूपतेरिति । राज्ञः सकाशात् गच्छन्ती रतार्थमागता च वामे वक्रे भ्रुकुटी विषमे लोचने यस्याः । कान्ता सेना च तैस्तैः प्रहरणैः शस्त्रैः स्त्रीपुँव्यञ्जनैः भगादिभिश्चोत्साहवती कम्पना सेना कम्पयुता स्त्री च मोहनं शत्रुमूर्च्छां सुरतञ्च चक्रे । असभ्यार्थप्रतीतेरश्लीलमाह-अत्रेति ।

जुगुप्सामाह - तेऽन्यैरिति । इतरस्य परैरक्तस्यार्थस्य ग्रहे येषां कवीनां प्रवर्तनं प्रवृत्तिरधोवायुविसर्गश्च स्यात् तेऽन्यैर्वान्तं त्यक्तं छर्दितञ्चाश्नन्ति, परोत्सर्गं पुरीष भुज्यते ।

अश्लीलान्याह - अत्रेति ।

अमङ्गलाश्लीलमाह- पितृवसतिमिति । स्नुषोक्तिः । परिवारजनेन सखीजनेन सह पितृवसतिं पितृगृहं स्मशानञ्च गच्छामि । यत्र पावके शुद्धेऽन्वये शुद्धानां सम्बन्धे वा अग्निसम्बन्धे वसति । अशेषितो गतश्शोक एव शल्यं यत्र, सम्पूर्णशोकशल्ययुतञ्च हृदयं भवति । अमङ्गलमाह- अत्रेति ।

सन्दिग्धामाह - सुरेति । सुरालयो देवप्रासादः स्वर्गो वा- तस्योल्लासे उत्थाने हर्षे च पुरः सुरालये मद्यगृहे उल्लासो मदभ्रमश्च ।

अत्र गल्लादयः शब्दाः ग्राम्याः ।

वस्त्रवैदूर्यचरणैः क्षतसत्वरजःपरा ।

निष्कम्पा रचिता नेत्रद्वन्द्वं बोधय साम्प्रतम् ।। १८१ ।।

अत्राम्बरलपादैः क्षततमा अचला भूः कृता, नेत्रद्वन्द्वं बोधयेति नेयार्थता ।

धम्मिल्लस्य न कस्य प्रेक्ष्यनिकामं कुरङ्गशावाक्ष्याः ।

रज्जत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ।। १८२ ।।

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वम् ।

कमलाकरी

प्राप्ता पर्याप्ता समृद्धा कम्पना सेना कम्पनं वा येन, मार्गणा बाणाः मार्गणायां वाचां तत्र प्रवणः रतः । भास्वती उज्ज्वला भूतिः समृद्धिर्भस्म च यस्य सोऽयं राजा विलोक्यताम् । अत्रार्थान्तरात् सन्देहमाह-अत्रेति ।

अप्रतीतमाह -तस्येति । कामिनोः संयो[1]जने कृतयत्नं मित्रं प्रत्युक्तिः । हे सखेऽधिमा[2]त्र उत्तमः उपायः कारणमुपायाः यम-नियमादयश्च यस्य, तीव्रः सं[3]योगो वैराग्यं तद्वतः । प्रियस्य मोक्षस्य सुखस्य च प्राप्तौ दृढा भूमिः रचना संस्कारश्च यस्य स यत्नः फलितः । योगशास्त्रे हि योगी त्रिविधः मृदूपायो मध्योपायोऽधिमात्रोपायश्च । सोऽपि प्रत्येकं त्रिधा-मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति नवभेदाः । एतेषु अधिमात्रोपायस्तीव्रसंवेगसिद्धः इत्युच्यते । अधिमात्रः समाधिलीनः तीव्रः परमः संवेगः वैराग्यं तद्युक्तः । विशेषो मत्कृते वेदान्तकौतुके ज्ञेयः ।

एते शब्दाः क्वापि न ज्ञाता इत्याह-अत्रेति । ग्राम्यमाह-ताम्बूलेति । भृतः पूर्णो गल्लो मुखपार्श्वो यस्य सोऽयं मानवः यथा खादनं पानं करोति तथा भल्लं शोभनं वदति । अत्र भल्लादयो ग्राम्या इत्याह-अत्रेति ।

नेयार्थमाह-वस्त्रेति । प्रभाते कान्तां प्रत्युक्तिः । हे प्रिये,

---

१. संयोगे-अ.।

२. धिमात्र उत्तम अधिकमानः उपायः कारण-ब.।

३. संवेगो-ब.।

न्यक्कारो ह्ययमेव मे यदरयः तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग् धिग् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ।। १८३ ।।

अत्रायमेव न्यक्कार इति वाच्यम् उच्छूनत्वमात्रञ्चानुवाद्यं, न वृथात्वविशेषितम् । अत्र च रचना विपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य ।

कमलाकरी

वस्त्रमम्बरमाकाशं तस्य वैडूर्यं रत्नं मणिः सूर्यस्तस्य चरणैः पादैः किरणैः निष्कम्पा निश्चला भूमिः । क्षतो निरस्तः सत्वरजसोः परः तमोगुणो यस्यां सा तमोहीना कृता । नेत्रयोर्द्वन्द्वं साम्प्रतं प्रभाते वेदय बोधय । प्रभातं जातमुत्तिष्ठेत्यर्थः । अत्र वस्त्रवैदूर्यादिशब्दाः अम्बरादि-शब्दैरेकार्थतासम्बन्धेनाकाशादिपदार्थबोधाद् द्विरेफादि-वल्लक्षितलक्षणया व्याख्येयार्थाः । तत्र तत्र रूढिः प्रयोजन वा येनार्थान्तरसङ्क्रमितादिः स्यात् । क्लिष्टमाह-धम्मिल्लस्येति-। हरिणनेत्राया अपूर्वाऽद्भुता बन्धे व्युत्पत्तिः [१]कौशलं रचना वा यस्य तस्य धम्मिल्लस्य केशपाशस्य शोभां प्रेक्ष्य कस्य पुंसो मानसं न रज्यति हृष्यतीत्यर्थः । व्यवहितान्वयादत्र क्लिष्टमाह- अत्रेति ।

अविमृष्ट विधेशांशमाह- न्यक्कारेति । मन्दोदरीं प्रति रावणोक्तिः । मे मम रावणस्यारयः इति यद् अयमेव न्यक्कारो धिक्कारः । पूर्वमेकोऽप्यरिर्नाऽभूदिदानीं वानराः बहवः । कुत्र -तत्र तेषु मध्ये तापसो युद्धानभिज्ञोऽसौ रामः । सोऽप्यत्रैव मत्समक्षं कुलं नैकम् । तेनाक्षादिस्वीयबालघाते न्यक्काराधिक्यम्, खरादिवधे तु परोक्षमस्तु । अहो एवमपमानेऽपि जीवनमाश्चर्यम् । यद्वा अहो इति खेदे । जीवति काक्वा न जीवतीत्यर्थः । इन्द्रजितं धिग्धिगिति वीप्सया जीवतः कार्याक्षमत्वादिना निन्दातिशयः । प्रबोधितं प्रबोधस्तद्वता । भावे क्तान्तान्मतुप् । कुम्भकर्णेन किम् - कार्याक्षमत्वाद्वरं निद्रैवेत्यर्थः । स्वर्ग एव ग्रामटिकाऽल्पग्रामस्तस्य विलुण्ठनमपि वृथा श्रममात्रम् । एभिर्बाहुभिः । शत्रोर्भुजद्वयं मम तु बहवो वृथा । भुजोच्छूनत्वमपि

---

१. कुशलं-अ.।

यथा वा-

अपाङ्गसंसर्गितरङ्गितं दृशोर्भ्रुवोररालान्तविलासि चेष्टितम् ।
विसारि रोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ-
सुभगे तवागतः ।। १८४ ।।

अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृत् । तथाहि-प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो-यच्छब्दोपादानं नापेक्षते । क्रमेणोदाहरणम् ।

कातर्यं केवलानीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ।। १८५ ।।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च
नेत्रकौमुदी ।। १८६ ।।

कमलाकरी

वृथेत्युत्तरोत्तरं न्यक्काराधिक्यम् । अरिसत्वमनूद्य न्यक्कारो विधेयः । अत्र तु प्राथम्यान्न्यक्कारमनूद्यारि[1]सत्वे विधेयमुक्तमिति विपर्ययः ।

"यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् । तच्छब्दयोगः पश्चात्वं साध्यत्वञ्च विधेयता ।।" इति वार्तिकोक्तेरित्याह-अत्रेति । अयमित्यरिसत्वोक्तिः । तदुक्तम् -

"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ।।"

अयं न्यक्कार इति पदयोर्दुष्टत्वाद् वाक्यदोष । लोकेऽपि पर्वतो वह्निमानित्युच्यते, न व्यत्यये इत्यर्थः ।

ननु वृथोच्छूनत्वं व्यर्थं किमेभिरित्यनेन वृथात्वासिद्धेरत आह-उच्छूनत्वेति । उच्छूनत्वमनूद्य किमेभिरिति वृथात्वं सिद्धमतो वृथात्वं व्यर्थमेवेत्यर्थः । तत्त्व[2]न्तु भुजैः किमिति भुजानामेव वृथात्वं विधेयम् उच्छूनत्वानुवादात्तद्गतं वृथात्वं तच्छब्देन विधेयमिति विषयभेदान्न पौनरुक्त्यमिति वयम् । तच्च वृथात्वं समासे गुणत्वेनोक्तमिति प्रसङ्गात् पददोषोक्तिः ।

---

१. द्यारित्वं विधेय-ब.।
२. तत्त्वं तु किमितिभुजा-अ.।

उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती ।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्धितेन दहनेन न वीक्षिताऽसि ।। १८७ ।।

यच्छब्दस्तूत्तरवाक्यानुगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यानुगतस्य तच्छब्दोपादानं नापेक्षते । यथा-

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ।। १८८।।

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्षः, यथाऽत्रैव श्लोके आद्यपादयोर्व्यत्यासे । द्वयोरुपादाने तु निराकाङ्क्षत्वं प्रसिद्धम् । अनुपादेऽपि सामर्थ्यात् कुत्रचिद् द्वयमपि गम्यते । यथा-

कमलाकरी

नन्वत्र वैपरीत्येन प्रत्ययादर्थस्य दोषोऽयं न वाक्यस्येत्यत आह - अत्रेति । रचनायाः शब्दगतत्वाच्छब्दव्यत्ययेऽप्यर्थसाम्याच्छब्ददोष एवेत्यर्थः । अथोद्देश्यविधेययोर्यच्छब्दाभ्यां बोधे वैचित्र्यं वस्तुमाह- अपाङ्गेति । हे सुभगे, यस्तव दृशोरपाङ्गो नेत्रान्तस्तल्लग्नं तरङ्गितं चलनं तनोति । भ्रुवोररालो वक्रोऽन्तस्तत्र विलासेन वेल्लनं नर्तनं तनोति । तनोर्विसारि विस्तृतं रोमाञ्चनं कण्टकितमेव कञ्चुकं चोलिकां तनोति असावागतः ।

अत्रेति - यच्छब्दः प्राप्तार्थत्वादनुवाद्यार्थः, तस्य तच्छब्दापेक्षत्वेऽपि तदनुक्तेरदःशब्दो विधेयार्थोऽभिप्रेतः । तत्र योऽसाविति सहोच्चारणादनुवाद्यमेव प्रतीयतेऽतो विधेयानुक्तेरविमृष्टत्वमित्यर्थः । ननु यत्तदोरेकैकप्रयोगदर्शनात् सापेक्ष[१]त्वासिद्धेर्नायं दोष इत्याशङ्क्य सापेक्षत्वमाह-तथा हीति । अयम्भावः - यत्तदोर्नित्यः एव सम्बन्धः । स क्वचिदार्थः क्वचिच्छाब्द इति । तत्र दृष्टान्तार्थं स्थलत्रये सामर्थ्यात् सिद्धेस्तच्छब्दे यच्छब्दानपेक्षामाह-प्रक्रान्तेति । प्रक्रान्तः प्रसिद्धोऽनुभूतो वार्थो विषयो

१. सापेक्षत्वसिद्धे -ब.।

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नेष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।। १८९ ।।

अत्र य उत्पत्स्यते तं प्रतीति ।

एवञ्च तच्छब्दानुपादानेऽत्र साकाङ्क्षत्वम् । न चासाविति तच्छब्दार्थमाह –

असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः ।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो
हनुमानिवागतः ।। १९० ।।

कमलाकरी

यस्येदृशस्तच्छब्दो न यच्छब्दापेक्षः । प्रक्रमो ग्रन्थे प्रसिद्धेर्लोके अनुभूतः स्व[१] स्येति भेदः ।

प्रकान्तार्थमाह – कातर्यमिति । रघुवंशे राज्ञोऽतिथेर्वर्णनम् । केवला शौर्यहीना नीतिः कातर्य[२]मधैर्यं केवलं नीतिहीनः शौर्यं श्वापदानां व्याघ्रादिपशूनां चेष्टितमतः सोऽतिथिः राजा द्वाभ्यां संयुक्ताभ्यां कार्यसिद्धिमियेष । अत्र राज्ञः प्रक्रमात् तच्छब्दो यच्छब्दं नापेक्षते । यथा वा–'स राज्यं गुरुणा दत्तम्' (रघु.४।१) इति ।

प्रसिद्धार्थमाह – द्वयमिति । गौरीं प्रति शिवनिन्दोक्तिः । सा प्रसिद्धा कलावतश्चन्द्रस्य कला अस्य लोकस्य च नेत्रचन्द्रिका ज्योत्स्ना त्वञ्चेति द्वयमस्थिधारिणः शिवस्य सङ्गवाञ्छया शोच्यतां गर्ह्यतां गतम् प्राप्तम् । अत्र सेति प्रसिद्धापेक्षो यच्छब्दं नापेक्षते ।

अनुभूतार्थमाह –उत्कम्पिनीति । दग्धां वासवदत्तां श्रुत्वा वत्सराजोक्तिः । हे प्रिये, उत्कम्पिनी सकम्पा भयेन स्खलितो वस्त्रप्रान्तो यस्याः सा । विधुरे मया हीने ते अनुभूते लोचने प्रतिदिशं क्षिपन्ती क्रूरेण दहनेन दारुणतया दग्धा मया न वीक्षितासीत्यर्थः ।

अत्र ते इति अनुभूतपरत्वात् न यच्छब्दापेक्षा । यथा वा–'तेन तेन वचसैव मघोनः' (नै च.५।) इति नैषधे च ।

---

१. तस्येति–अ.।
२. कातर्यं स्वधैर्य–अ.।

अत्र हि न तच्छब्दार्थप्रतीतिः ।

प्रतीतौ वा -

करवालकरालदोः सहायो युधि योऽसौ विजयार्जुनैकमल्लः ।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं
कृतं स्यात् ।। १९१ ।।

अत्र स इत्यस्यानर्थक्यं स्यात् ।

कमलाकरी

यच्छब्देऽपि क्वचित्तच्छब्दानपेक्षेत्याह- यच्छब्द इति । पद्मैः साधु कृतं यच्छोभाधिके चन्द्रे सति मीलितं मुकुलितं, जयिनि कान्तमुखे सति उद्यतोदितेन तेन चन्द्रेण तु महत्साहसं धाष्टर्यमनुष्ठितं कृतम् । अत्र यन्मीलितमित्युत्तरवाक्ये यच्छब्दो हेतुमात्रार्थत्वान्न तच्छब्दापेक्ष इत्यर्थः । पूर्ववाक्यस्थस्तु यच्छब्दस्तच्छब्दापेक्ष इत्याह- प्रागिति । यथात्रैव मीलितमित्यस्य पूर्वं साध्वित्यस्य पश्चात् पाठे साकाङ्क्षत्वमित्यर्थः । द्वयेर्यत्तच्छब्दयोरुपादाने तु निराकाङ्क्षत्वं- प्रसिद्धमेवेत्यर्थः ।

क्वचिद् द्वयोरनुपादानेऽपि सामर्थ्यात् तत्प्रतीतिमाह-अनुपादाने इति । उभयमर्धद्वयेनाह - ये नाम इति । अनुभूतेरुक्तिः । नामेत्यभिमाने । ये पण्डितम्मन्याः इह काव्ये नो मम । 'अस्मदो द्वयोश्च' (अ.) इति एकत्वे बहु[१]वचनम् । अतो ममेत्यविरोधः । अवज्ञां कुर्वन्ति ते किमपि अद्वयं वस्तुं जानन्ति यद्वा कावाक्वा न किमपि जानन्ति किमप्यल्पमपीति वा, अतस्ते हसन्तु । तान् प्रति नायं यत्नः । कोप्येको यः मम समानधर्मा उत्पत्स्यते ऽस्ति वा तं प्रति यत्न इत्यर्थः । क्रमेण हेतुरयं कालो निरवधिः पृथ्वी च विपुलाऽनन्ता । तेन क्वचिद्देशे काले वा मत्समो यस्तं प्रत्येवैष यत्नः ।

अत्र पूर्वार्धे यत्तदोरुक्तिः, अन्त्येऽर्द्धेऽनुक्तिः, तेन योऽसौ सुभगे इत्यत्र तच्छब्दाभावादविमृष्टविधेयांशत्वं सिद्धमित्याह-एवञ्चेति । तत्र पूर्वोक्ते । ननु योऽसावित्यदः शब्द एव तच्छब्दार्थोऽस्तु को दोष इत्याह - न चेति । चो ह्यर्थे । असाविति शब्दस्तच्छब्दार्थे नहि आहेत्यर्थः । हेतुमाह - असाविति । हे प्रिये, असौ वसन्तकालः हनुमानिवागतः । कीदृशः-मरुता वायुना पित्रा च चुम्बितानि स्पृष्टानि घ्रातानि च चारूणि

---

१. बहुत्वम् -ब.।

अथ-

योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः ।
आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः
कुतो भयम् ।। १९२ ।।

इतीदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्ते इत्युच्यते, तर्ह्यत्रैव वाक्यान्तरे उपादानमर्हति न तत्रैव । यच्छब्दस्य हि निकटे स्थितस्तच्छब्दः प्रसिद्धिं परामृशति । यथा-

कमलाकरी

केसराणि बकुलपुष्पाणि सटाश्च यस्य । प्रसन्नं यत् ताराधिपस्य चन्द्रस्य मण्डलं तदेवाग्रणीरग्रेसरो यस्य । पक्षे – प्रसन्नः प्रीतः ताराधिपः सुग्रीवः तस्य मण्डलं राष्ट्रं सैन्यं वा तस्याग्रणीर्मुख्यः । वियुक्तारामाः कान्तास्ताभिः सीतावियुक्तेन रामेण च आतुरया व्याकुलया दृष्टया वीक्षितो दृष्टः । 'अत्रादःशब्देन प्रत्यक्षत्वोक्तेर्न परोक्षार्थतच्छब्दार्थधीरित्याह – अत्रेति । प्रतीतिकलहे दोषमाह- प्रतीतौ चेति ।

करवालेति । करवालेन खड्गेन कराल उग्रः दोर्बाहुरेव सहायो यस्य । युधि विजयस्यार्जुने एकवीरः, विजयेऽर्जुनेन सहैकमल्लस्तुल्य इति वा । भूपतिना स वीरस्तत्र कार्ये विनियुज्येत ततः कृतं कार्यं कृतं युक्तं स्यादित्यर्थः । अत्रासावित्यस्य तच्छब्दार्थ[१]त्वे स इति व्यर्थः स्याद्यदित्यत आह- अत्रेति । नन्विदं शब्दस्तच्छब्दार्थे दृष्टस्तद्वददश्शब्दोऽपि स्यात् इदमेतदसां तुल्यार्थत्वादिति शङ्कते- अथेति । प्रयोगमाह –यः इति । हे ईश, अविकल्पं निस्संशयो यो निखिलं सर्व अर्थमण्डलं पदार्थजातं प्रपञ्चं भवद्वपुः तव स्वरूपत्वेनाद्वितीयं जानाति, नित्यसुखिनोऽस्य तस्य योगिनः स्वात्मपक्षः आत्मैक्यं तेन पूरितेऽद्वितीये जगति भयं कुतः, नैवेत्यर्थः । 'द्वितीयाद्वै भयं भवतीति' श्रुतेः । अत्र-अस्येतीदंशब्दवद् योऽसावित्यत्रादःशब्दः ।

एतच्छब्दश्च तच्छब्दार्थे स्यादिति शङ्कार्थमाह- इतीति । दूषयति-तर्हीति । अस्येतीवदसावित्यस्य वाक्यान्तरे प्रयोगः स्यात् । तत्रैवैकवाक्ये यच्छब्देन सह प्रयोगो न स्यादित्यर्थः । सह प्रयोगे किं

---

१. च्छब्दार्थसत्त्वे –अ.,क.।

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताक्षैस्तदानेन नूनं तदपि हारितम् ।। १९३ ।।
इत्यत्र तच्छब्दः । ननु कथम् -
कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवान् भूयसे मङ्गलाय ।। १९४ ।।

कमलाकरी

स्यात्तत्राह-यच्छब्दस्येति । सिद्धिं व्याप्तिं वदति नासिद्धिं विधिमित्यर्थः ।

तत्र वेण्यां प्रयोगमाह- यत्तदिति । अस्य युधिष्ठिरस्य राज्ञो यत्तत्प्रसिद्धं तीव्रं क्षात्रं तेजस्तदा सभायामक्षैः पाशैर्दीव्यता क्रीडता तेन राज्ञा तत्तेजोऽपि नूनं शत्रुभिर्हारितं गृहीतम् । अत्र पूर्वार्धे यच्छब्दसहितस्तच्छब्दः यथा प्रसिद्धिं परामृशति इति पूर्वेणान्वयः । अत्र तच्छब्दः प्रसिद्धार्थः, अन्यथा विधेयार्थद्वितीयतच्छब्दवैयर्थ्यादि-त्यर्थः । तेनादःशब्दोऽपि तथेत्यर्थः ।

यच्छब्दस्य नित्यं तच्छब्दापेक्षत्वे व्यभिचारं शङ्कते - नन्विति । कल्याणानामितिः-भवभूतेः सूर्यप्रार्थनेयम् । हे विश्वमूर्ते सूर्यात्मक, "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः । त्वं कल्याणानां तद्धेतूनां महसां तेजसां भाजनं स्थानमसि । "सैषा त्रय्येव विद्या तपतीति" श्रुतेः । 'त्वमिहमहसामीशिषे' इति पाठे तेषां स्वामी । ' अधीगर्थदयेशाम्' (अ.) इति कर्मणि षष्ठी । अथातो मयि पुण्यां धुर्यां श्रेष्ठां वा लक्ष्मीं दृशं कृपादृष्टिश्च धेहि धारय । देहीत्यपपाठः मह्यमिति चतुर्थ्यापत्तेः । जगन्नाथत्वान्ममापि नाथः । नम्रस्य शरणागतस्य मे यद्यन्नानाप्रकारं पापं तच्छिन्धि । भूयसे मङ्गलाय भद्रं भद्रमुचितोचितं वितर कुरु । तेन भृत्ये प्रसाद एवोचितः इत्यर्थः । अत्र यद्यदिति निरुक्त्या तन्मे इति सकृत् कथमुक्तमित्यन्वयः । वीप्सयाऽवान्तरप्रकारोक्तेः पापजातीयैक्याच्चैक्यं तत् पदं युक्तमित्युत्तरमाह-उच्यते इति । य[1]त् पदार्थमात्रं तदोच्यते, न तु तेनैवरूपेणेति नियमो मानाभावादित्यर्थः । 'नित्यवीप्सयो' रिति द्विर्भावाद् यद्यदित्येकं पदमिति कश्चित् तन्न एकपदे रूढौ च

१. सत्पदार्थमात्रं-क.,अ.।

अत्र यद्यदित्युक्त्वा तन्मे इत्युक्तम्। उच्यते- यद्यदिति येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तम्, तथाभूतमेव तच्छब्देन परामृश्यते।

यथावा-

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम्।। १९५।।

अत्रार्यस्येति तातस्येति च वाच्यं, न त्वनयोः समासे गुणीभावः कार्यः। एवं समासान्तरेष्वप्युदाहार्यम्।

विरुद्धमतिकृद्यथा-

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः।। १९६।।

अत्र क्षमादिगुणयुक्ताः सुखामासते इति विवक्षिते हता इति विरुद्धा प्रतीतिः। पदैकदेशे यथासम्भवं क्रमेणोदाहरणम्-

कमलाकरी

मानाभावात्। साकल्यञ्चैकेनैव तदुच्यते। न च विनिगमकाभावः प्राथम्यस्य तत्त्वम्। अतएव-' यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां, यो यः पाञ्चालगोत्रे शिशुरधिकवयाः गर्भशय्यां गतो वा। यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः, क्रोधान्धः तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्।।" (वे.सं.) इति यच्छब्दाष्टके तस्य तस्येति द्विरेव तदुक्तिः। व्यक्तिभेदे तु द्वयोर्वीप्साप्यविरुद्धेति भावः।

समासेऽविमृष्टविधेयमन्यत्राह - तथेति। किं लोभेनेति। वने श्रीरामे निद्रिते लक्ष्मणोक्तिः। सः रामभक्तोऽपि भरतो लोभेन विलङ्घितः आक्रान्तः। किं येन भरतेन मात्रा मातृद्वारा एतद्रामस्य वनगमनमेवं कपटेन कृतम्। यद्वा येन पुत्रलोभेन हेतुना मात्रा कैकेय्या एवमकार्यं कृतमित्यर्थः। अथवा मे मध्यममाता कैकेयी एव पुत्रानुमतिं विना स्त्रीणां लघुतां नीचतां प्राप्ता। 'स्त्रीबुद्धिः प्रलयङ्करी' त्युक्तेः। इदं द्वितयमपि मम चिन्तितमिति हेतोर्मिथ्या, न घटते इत्यर्थः। असौ

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः ।
इति यदि शतकृत्वस्तत्वमालोचयामः
तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ।। १९७ ।।

अत्र त्वादिति । यथा वा-

तद्गच्छ सिद्धयै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव ।
अपेक्षते प्रत्ययमंगलब्ध्यै बीजाङ्कुरः-
प्रागुदयादिवाम्भः ।। १९८ ।।

अत्र द्धयै ब्ध्यै इति कटु ।

कमलाकरी

गुरुर्भरत आर्यस्य रामस्यानुजः । मयि पोष्यत्वात् रामे ज्येष्ठत्वात् च न तत्रेदं योग्यम् । माता कैकेयी तातस्य कलत्रं जननीत्वात् तातसम्बन्धाच्च तत्रापिं नेदं युक्तमित्यर्थः । तर्हि कथमेतत् तत्राह -मन्ये इति । विधात्रेदमनुचितं कृतमिति मन्ये इत्यर्थः । अत्रार्यस्य तातस्येति वाऽनौचित्याभावार्थं प्राधान्यं योग्यं, समासे च गुणत्वे तदभावाद्विधेयं नेत्यर्थः ।

नन्विति- । अनयोरार्यतातयोः समासे गुणभावस्तु न कार्यः कर्तुमर्हः प्राधान्यादित्यर्थः । समासान्तरेष्वप्याह- एवमिति । सर्वत्र हि समासे विशेषणविशेष्यभावाद् व्यत्ययो नार्हः, तत्र बहुव्रीहौ मिथ्यामहिमत्वे उक्तम् 'प्रदक्षिणक्रियातीतः' इत्यत्र क्रियामतीतः इति । 'तस्यावमत्य गुरुदत्तमिमं कुठारम्' इत्यत्र गुरुणा दत्तमिति । "धात्रा स्वहस्तलिखितानिललाट-पट्टे कोऽवाक्षराणि परिमार्जयितुं समर्थः" इत्यत्र हस्तेनेति । आसमुद्रक्षितीशानाम्' इत्यत्र समुद्रादिति । 'अन्यसङ्क्रारान्तसौभाग्यस्य' इत्यत्रान्यत्रेति । 'निष्प्रत्यूहमुपास्महे' इत्यत्र प्रत्यूहाभावमिति । द्वन्द्वे सीताया ऊर्मिलायाश्च सदृशौ रामलक्ष्मणौ इति । अत्र रामो लक्ष्मणश्चेति । द्विगौ-'ब्रह्माविष्णुश्च रुद्रश्च त्रिलोकीमधिकुर्वत' इत्यत्र त्रीन् लोकानिति ज्ञेयम् ।

विरुद्धमतिकृदाह - श्रितेति । अद्य ते राजानः श्रिता क्षमा क्षान्तिर्यैं भूपतिताश्च । रक्ताऽनुरक्ता भूर्येषां रुधिरा च । शिवैः कल्याणैः सम्बद्धदेहा पक्षे शिवाभिर्विग्रहे श्रृगालीभिर्विरोधो देहश्च तस्य क्षपणेन नाशेन गतमसुखं दुःखं गता असवः प्राणाः खानीन्द्रियाणि च येषां ते शेरते

यश्चाप्सरोविभ्रममण्डलानां सम्पादयित्रीं शिखरैर्बिभर्त्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव-
धातुमत्ताम् ।। १९९ ।।

अत्र मत्ताशब्दः क्षीबार्थे निहतः ।

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ।। २०० ।।

अत्र दृशामिति बहुवचनं निरर्थकम् । कुरुङ्गेक्षणाया एकस्या एवोपादानात् । न च-

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।

कमलाकरी

आसते मृता इति विपरीता धीः । अत्र न्यायविरुद्धं सिद्धान्तविरुद्धञ्च ज्ञेयम् । यथा नैषधे- "राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयेव राज्यम् । भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्वहोशेषमशेषमन्त्यम् ।।" (नै. ३।२४) अत्र यागी याज्यशेषस्य भक्षणं मीमांसान्यायविरुद्धम् । तृतीये 'ह्याज्याच्च सर्वसंयोगात्' इति आज्ये इडादि-विशेषकार्यलोपः उक्तः । न चाग्निहोत्रादौ शेषभक्षपरं शब्दान्तरन्यायेन यागहोमयोर्भेदात् । तथा- "मीमांसयेव भगवत्यमृतांशुमोलौ तस्मिन् महीभुजि तयानुमतिर्न भेजे" (नै.११।६४) इति भाट्टसिद्धान्तविरुद्धम् । तत्र हि -'विशुद्धज्ञानदेहाय' अपि च 'व्योमरूपोऽपि परमात्मा श्रुतौ श्रुतः' इत्यादिः । वार्तिकराणकदीपिकादावीश्वरोऽङ्गीकृतस्तद्विरोधेन दोषः एव ।

अथ पदैकदेशेषु श्रुतिकटुत्वादीनाह- अलमिति । मकरन्दं प्रति माधवोक्तिः । स्वप्नश्चित्तवृत्तिः । मायेन्द्रजालं तत्तुल्यत्वादतिचपलत्वम स्थिरत्वं तस्मात् परिणामे विरसत्वात् विरहे खेदादङ्गनायाः मालत्याः सङ्गमेनालं पूर्यताम् । इति यद्यपि शतधा तत्वं विचारयामस्तथाप्यन्तरात्मा जीवो मृगाक्षीं मालतीं न विरमतीत्यर्थः । अत्र त्वादित्यसकृद्दोषः ।

अनुभवविरोधात् विप्रतिपत्तावाह - यथा त्वेति । तदगन्धेति ।

हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः ।
कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ।। २०१ ।।

इत्यादिवद् व्यापारभेदाद् बहुत्वम्, व्यापाराणामनुपात्तत्वात्। न च व्यापारेऽत्र दृक्शब्दो वर्तते। अत्रैव 'कुरुते' इत्यात्मनेपदमनर्थकम् । प्रधानक्रियाफलस्य कर्त्रभिप्रायक्रियाफलाभावात् ।

चापाचार्यः स्त्रिपुरविजयी कार्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः ।

कमलाकरी

कुमारसम्भवे कामं प्रति देवेन्द्रोक्तिः । हे काम, तत्तस्मात् सिद्धयै गौरी-पुत्रोत्पत्यै गच्छ देवकार्यं तारकवधरूपं कुरु । अयमर्थः वधरूपोऽर्थान्तरेण शिवगौरीसङ्गेनैव लक्ष्यः, अतोऽङ्गलब्ध्यै स्वरूपसिद्धयै बीजाङ्कुरः प्रागुत्पत्तेः आरम्भ इव प्रत्ययः कारणमपेक्षते इत्यर्थः ।

निहतार्थमाह - यश्चाप्सरोविभ्रमेति । यो हिमालयः अप्सरसां विलासार्थं मण्डलान्यङ्कास्तेषां कर्त्री मेघखण्डैर्विच्छिन्नलौहित्यां सन्ध्यामिव शिखरैर्धातुमत्तां बिभर्त्तीत्यर्थः । अत्र मत्ताशब्दः क्षीबपरः ।

निरर्थकमाह - आदाविति । मृगाक्षी पूर्वं कज्जललेपरुपाणां ततोऽनन्तरं श्वासवायुना सन्धुक्षितः वृद्धो यो विरहाग्निस्तेन तापितानां दृशामश्रुजलेन कामस्य देवस्य भल्लीनां शस्त्रीणां शराणां वा निषेकरूपं पानकर्म शस्त्रतैक्ष्ण्यमिव साम्प्रतं कामं प्रचुरं कुरुते । लोहकारो हि शस्त्रं पङ्केन लिप्त्वाऽग्नौ प्रताप्य जले निर्वापयतीति । शस्त्रे पानकर्म प्रसिद्धम्। अत्र स्त्रिया एकत्वात् ददृशोर्द्वित्वे वाच्ये बहुत्वं व्यर्थमित्याह अत्रेति । न च 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' (अ.) इत्यत्र पाशानित्येकत्वे बहुत्वाद्द्वित्वेन बहुत्वं श्रुतं येन सार्थकः स्यादित्याशयः ।

ननु द्वित्वेऽपि दृशोर्व्यापारभेदाद्बहुत्वं दृष्टामत आह- न चेति । अलसेति - । अलसमालस्यम्। आर्द्रैः स्तिमितैः । भावो रतिस्तेनाकूतं स्नेहं वमद्भिरुद्गिरद्भिः । अत्रालसस्तिमिताभिमुख्यलोलहृन्नि-धानवमनैर्मुकलत्वप्रेमलज्जोत्कण्यौत्सुक्यगोपनपूर्णत्वरूपव्यङ्ग्यभेदाद्-व्यापारबहुत्वं सुकृतीति कृतार्थत्वञ्चोच्यते ।

अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः ।। २०२ ।।

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः ।

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः सहृदयं वहति पुनः कालकूटघटितमिव ।। २०३ ।।

अत्र पेलवशब्दः ।

कमलाकरी

न चात्र तथेत्याह - व्यापाराणामिति । न चेक्षणशब्दस्य नेत्रव्यापारवाचित्ववत् दृक्पदं तद्व्यापारवाचकं येन तत्परं बहुत्वं स्यात्, किन्तु नेत्रपरमेवेत्याह - न चेति । तेन नेत्रे बहुत्वं व्यर्थमित्यर्थः । इदन्तु चिन्त्यम् । 'सूर्यं चक्षुर्गमयता' दितिवदधिष्ठानभेदेऽपीन्द्रियैक्याद् एकस्मिन् पाशानिति बहुत्वस्य साधुत्वात् । अतो नेदं द्वन्द्वयोर्बहुत्वं 'दृशोर्द्वयीति' विधिर्नास्ति । वञ्चिते त्वधिष्ठानपरं द्वित्वम् ।

अत्रैव श्लोके पदान्तरेऽप्यंशे ऽनर्थकमाह- अत्रैवेति । कुतोऽनर्थकं तत्राह- प्रधानेनेति । 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (अ...) इत्यत्र कर्तृसम्बन्धे इति व्याख्यानान्न दृशोरश्रुसेकस्तज्जन्यं किञ्चित् फलं वा कान्तासम्बद्धं तदभिप्रेतं वाऽस्तीत्यर्थः । न च नाथते इतिवदसाधुत्वेन गतार्थम् । तत्र हि प्रकृतिप्रत्यययोरर्थसत्वेऽपि घटः कर्मत्वमितिवदन्वयायोग्यत्वादसाधुत्वम् । अत्र तु तत्सत्वेऽप्यर्थाभावान्निरर्थकत्वमिति देवनाथः । अंशेऽनर्थकत्वं पदे[1] त्वसाधुत्वमित्यन्ये । द्वयोसाङ्कर्येऽपि येन रूपेणोपस्थितिस्तस्यैव दोषत्वं मम हि गौरीतिवदक्षतमेव । दूषकताबीजभेदाद् हेत्वाभास[2] साङ्कर्यादुपधेयसङ्करेऽप्युपाधिभेदादिति वयम् । एवमग्रेऽपि ।

अवाचकमाह - चापाचार्येति । भार्गवं प्रति श्रीरामोक्तिः । तव शिवो धनुर्विद्यागुरु। कार्तिकेयः स्कन्दः विजयो[3] विजितः । 'कार्तवीर्यं' इति युक्तः पाठः । स्कन्दाप्रसक्तेः शस्त्रोत्सारितस्समुद्रस्तव गृहम् । इयं भूर्हन्तकारो देयभिक्षा- एतत्तवास्त्येव किमु किन्तु रेणुकायाः मातुः स्त्रियाश्च कण्ठच्छेदं पुरुषार्थं कृतवता परशुना धृतस्पर्धस्ते चन्द्रहासः

---

१. पदे साधुत्वमि-अ.,क.।
२. हेत्वाभाससाङ्कर्यं-ब.।
३. विजेयोजितः ब.।

यः पूयते सुरसरिन्मुखतीर्थ सार्थ -
स्नानेन शास्त्रपरिशीलनकीलनेन ।
सौजन्यमान्यजनिरूर्जितमूर्जितानां
सोऽयं दृशोः पतति कस्यचिदेव पुंसः ।। २०४ ।।

अत्र पूयशब्दः ।

विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ।। २०५ ।।

अत्राभिप्रेतशब्दः ।

कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ।। २०६ ।।

कमलाकरी

खड्डो लज्जते । स्वयं तद्वत्पुरुषार्थकरणेन न्यूनत्वात् स्पर्धाभावादित्युपहासः ।

अत्रेति । विजेय इति यत्प्रत्ययः कृत्यः , स च 'तयोरेव कृत्यर्थखलर्थाः' (अ. ३।४।७०) इति भावकर्मणोरुक्तेर्जेतव्य इत्यर्थबाधाज्जित इत्यतीतार्थवाचको[१] नेत्यर्थः ।

व्रीडाश्लीलमाह - अतिपेलवेति । शठः खलोऽतिसुन्दरं स्वल्पाक्षरं नीचस्वरञ्च वदति । तत्वतस्तु स[२] विषघटितमिव हृदयं वहति । अत्र पेलवशब्दो लाटेषु वृषणवाचीत्याह- अत्रेति ।

जुगुप्सामाह - यः पूयते इति । यो गङ्गादितीर्थस्नानेन शास्त्राभ्यासदृढ़ंत्वेन च पूयते पूतो भवति । सौजन्यमानयोर्जनिः स्थानं तेजस्विनां तेजस्वी सोऽयं राजा कस्यचिदेव भाग्यवतः पुंसो दृशोः पतति नेत्रग्राह्यो भवतीत्यर्थः । अत्र पूयशब्दो वसावाची ।

अमङ्गलमाह - विनयेति । सखीं प्रति नायिकोक्तिः । अङ्ग हे सखि, यः समानप्रीत्योः स्थानं सर्वदा आसीत् सः तादृशः एष तस्याः सपत्न्याः ईप्सितं स्थानं तस्याभिप्रेतं पदं सपत्नीं वा गतः प्राप्तः सन् कथं तद्वत् प्राग्वत् त्वया दृश्यते । नात्र मित्रत्वं योग्यमित्यर्थः । अत्र प्रेतशब्दः शवस्य पदं श्मशानञ्चाहेत्यर्थः ।

---

१. तीव्यार्थवाचकतेत्यर्थः-ब.।
२. सविषयघटित-अ.।

अत्र पूर्वं साधुः, उत साधुषु चरतीति सन्देहः ।

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ।

सुदुलभं वचोबाणैस्तेजो यस्य विभाव्यते ।। २०७ ।।

अत्र वचःशब्देन गीःशब्दो लक्ष्यते । अत्र खलु न केवलं पूर्वपदं यावदुत्तरपदमपि पर्यायपरिवर्तनं न क्षमते । जलध्यादावुत्तरपदमेव वडवानलादौ पूर्वपदमेव ।

यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भेदास्तथाप्य-न्यैरालङ्कारिकैर्विभागेनप्रदर्शिता इति, भेदप्रदर्शनेनोदाहर्तव्या इति च विभज्योक्ताः ।

कमलाकरी

सन्दिग्धमाह - कस्मिन्निति । अस्यात्र कर्मणि सामर्थ्यं भृशं नोदेति । अयं साधुषु चरति तस्मादिह पुंसि नतिरेव गतिरित्यर्थः । अत्र भूतपूर्वे चरडित्युक्तेः पूर्वं साधुरिति वा चरेष्टः इति साधुषु चरतीति वा सन्देहमाह - अत्रेति ।

नेयार्थमाह - किमिति । अस्य राजमौलिमणेः किं वक्तव्यं यस्य तेजो वचोबाणैर्गीर्वाणैर्देवैरपि दुष्प्रापं ज्ञायते ।

अत्र वचःशब्देन गीःशब्दो लक्ष्यते न गीर्वाणसंज्ञा लक्ष्येति नेयार्थमाह-अत्रेति । अत्र गीर्वाणपदे पूर्वपदमेव गीरूपं केवलं न परिवृत्यसहं यावत् किन्तुं उत्तरं बाणपदमपि पर्यायसहम् । वचोबाणवद् गीःसायकैरित्यपि नेयार्थमित्यर्थः ।

तर्हि कुत्रोत्तरपदं कुत्र वा पूर्वपदं पर्यायासहं तदाह- जलध्यादाविति । जलधि-दिनकरादिपदे जलाधार[१]- दिनजनके त्याद्युत्तरपदमेव पर्यायसहं न पूर्वपदम् । तोयधि -दिवसकरादौ तत् प्रतीतेः । वडवानलादावश्वानल -हयानलेत्यादौ पूर्वपदमेव पर्यायासहं तदर्थाप्रतीतेरित्यर्थः ।

ननु अप्रयुक्तादिकमसमर्थ एवान्तर्भूतमस्त्वित्यत आह- यद्यपीति । अप्रयुक्ते[२] आदिपदादवाचक-निहतार्थ नेयार्थेष्वप्यप्रतीते-रर्थाप्रसिद्धेरसामर्थ्यं तुल्यं तथाप्युक्तरीत्या किञ्चिदवान्तरभेदात्

---

१. जलधारादिन-अ.।

२. अप्रयुक्तः आदिपदा-क.,अ.।

प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपदं पदत्प्रकर्षं समाप्तपुनरात्तम् ।।५३।।
अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ।।५४।।
भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा ।

रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं प्रतिकूलवर्णम् ।

यथा शृङ्गारे -

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठिं माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धर ।। २०८ ।।

रौद्रे यथा-

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।

कमलाकरी

कविकौशलार्थं पृथगुक्तिरित्यर्थः ।

एवं पद-तदंश-वाक्यदोषानुक्तवा वाक्यमात्रे दोषानाह- प्रतिकूलेति-वाक्यमेवासमासे तथा दुष्टं न पदादीत्यर्थः । रूढियोगाभ्यां लक्ष्यलक्षणभावो लक्ष्यतावच्छेदकं वा लक्षणं प्राग्वत् । प्रातिकूल्यमानुकूल्यभावः इत्यानुकूल्यमाह - रसेति । वक्ष्यतेऽष्टमोल्लासे ।

अकुण्ठेति - । दूतीं प्रति कामुकोक्तिः । हे कलकण्ठि मधुरस्वरे, अकुण्ठा निरवधिरुत्कण्ठा तया आकण्ठं पूर्णम्भरितं मां कम्बुश्शङ्खस्तद्वदूर्द्धं निम्नः कण्ठो यस्यास्तस्याः कण्ठे मां कुरु कण्ठार्त्तिं हरेत्यर्थः । अत्र 'अटवर्णा रणौ लघू' इति शृङ्गारे टवर्गनिषेधात् प्रतिकूलवर्णत्वम् । रौद्रेऽप्याह-रौद्रे इति । अश्वत्थामोक्तिः । रामेण परशुरामेण यस्मिन् देशे कुरुक्षेत्रे शत्रुरुधिरोदकैः पञ्चह्रदाः पुरिताः, स एवायं देशः । क्षुद्रान्नीचात् कृतघ्नादेव क्षत्रियादिति वा पाठः । कार्तवीर्याद् धृष्टद्युम्नाच्च तातस्य जमदग्ने द्रोणाचार्यस्य च केशग्रहात् तथाविध एकपरिभवः शिरच्छेदरुपः अहितानां शत्रूणां हेतयः शस्त्राणि तेषां घस्मराणि भक्षकानि गुरुणि श्रेष्ठान्यस्त्राणि ब्रह्मास्त्रादीनि तान्येव यानि द्रोणेन भार्गवात् प्राप्तानि । अतो यद्रामेण गुरुवैरनिर्यातनं कृतं तदेव

तान्येवाहितहेतिघस्मरगुरुण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः कोपनः ।। २०९ ।।

अत्र हि विकटवर्णत्वं दीर्घसमासत्वञ्चोचितम् । यथा -

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत् -
क्रोधप्रेरितभीमभार्गवभुजस्तम्भावपविद्धः क्षणात् ।
उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ।। २१० ।।

यत्र तु न क्रोधस्तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः ।

उपहत उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् । यथा-

धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ।। २११ ।।

विसन्धि सन्धेर्वैरूप्यमविश्लेषोऽश्लीलत्वं कष्टत्वञ्च । तत्राद्यं यथा-

कमलाकरी

क्रोधशीलो द्रोणपुत्रो मल्लक्षणः कुरुते । कृञः 'स्वरितञित' इत्यात्मनेपदात् कृतिफलभागित्यर्थः ।

अत्रेति । 'टादिः[१] शषौ वृत्तिदैर्घ्यम्' इति रौद्रे टवर्गाद्युचितम् तदभावात् प्रतिकूलत्वमित्यर्थः । टादेः कुत्र रौद्रानुगुणंत्वं दृष्टं तदाह यथेति - । प्रागप्राप्तेति - रामं प्रति भार्गवोक्ति । हे राम, पूर्वमप्राप्तो निशुम्भो नमनं भङ्गो वा येन तादृक् शाङ्करं धनुस्तस्य द्वेधा द्वैधीकरणं तेनाविर्भवन् यः क्रोधस्तेन प्रेरितो भीमो यो भार्गवस्य भुज एव स्तम्भः पृथुत्वात्तेनापविद्धः क्षिप्त उद्गतज्ज्वालोऽयमशिथिलो दृढः । समस्तपाठे कण्ठविशेषणम् । परशुस्तव कण्ठपीठस्यातिथिरर्च्योऽस्तु । पीठे ह्यासनदानादतिथिः पूज्यते । 'अतिथेः स्वागतासने' इति-स्मृतेः । अतिथेश्च पीठे विश्रान्तिः । अस्यापि त्वत्कण्ठादित्यर्थः । येनानेन हरो देवः खण्डपरशुरित्याख्याप्यते । स्वपरशोः खण्डो हरेण भार्गवाय दत्तः तेनेयं संज्ञेति प्रसिद्धिः । हरधनुस्त्वया खण्डितं तेन त्वहं परशुना त्वत्कण्ठं खण्डयिष्ये इत्यर्थः ।

---

१. रादिः शब्दौ-अ.।

राजन् विभान्ति भवतश्चरितानि तानि ।
इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः ।
धीदोर्बले अतितते उचितानुवृत्ती
आतन्वती विजयसम्पदमेत्य भातः ।। २१२ ।।

कमलाकरी

नन्वत्र चतुर्थपादे कथं कोमलवर्णा अत आह-यत्र त्विति । चतुर्थपादे शिवरूपगुरुस्तुतौ क्रोधभावान्न विकटावर्णा किन्तु कोमला एव युक्ता इत्यर्थः । श्रुतिकटुत्वं पदवृत्तिः इदन्तु वाक्य[१]व्यापीति भेदः । रसविरोधो दोषत्वे बीजम् । अत्र समासे पददोषत्वमेव, असमासे वाक्यदोषत्वमिति ज्ञेयम् ।

द्वितीयं दोषं विवृणोति-उपहत इति । उपहतविसर्गं लुप्तविसर्गञ्चेत्यर्थः । अनेके विसर्गा निरन्तरा यत्रोपहता उत्वं प्राप्ता लुप्ताः वा, न त्वेकोऽन्यथा वाक्यदोषत्वायोगात् ।

द्वयमेकदैवाह -धीर इति । अत्र जगति यस्य भृत्या बलदृप्तादय स एव धैर्यादिगुणयोगी नृप इत्यर्थः । अत्र परुषे बन्धे उद्वेग एव दोषः, सातत्ये जामि[२]जादोषः 'जामि वा एतद्यज्ञस्ये 'तिवत् । यमके त्वदोषः यथा-पिको'ऽपि कोपि कोवियोगिनीरभर्त्सयत् , इति ।

विसन्धि त्रिधाऽह- विसन्धीति । सन्धिः 'परसन्निकर्षः तदभावे विश्लेषः सन्ध्यभावः सोऽपि द्वेधा- ऐच्छिकः प्रगृह्यादौ शास्त्रीयश्च । द्विविधं विश्लेषमेकत्राह - राजन्निति । हे राजन् भवतो यानि चरितानि पाताले कुहरेऽप्यन्तर्मध्ये इन्दोर्द्युतिं दधति तानि शोभन्ते । एषु चरितेष्वतितते विस्तीर्णे योग्यार्थवृत्तिनी विजयसम्पदश्च कुर्वाणे धीदोर्बले भातः शोभेते विजयसम्पदमेत्येति वा पाठः । अत्र पूर्वार्धे तानि इन्दोरित्यैच्छिकः सन्धिभावोऽन्तेऽर्धे 'ईदूदेद्द्विवचनं प्रगह्यम्' (अ.१।१।११) इति शास्त्रीयोऽपि दोषः ।

बिसर्गलोपेऽप्याह -यथा वेति । तत इति । उदारा महती हारेण मनोहरा द्युतिर्यस्य सः उदयाद्रेरिन्दुरिव निजवंशेऽनर्ध्योऽमूल्यः मुक्तामणिरिवोदितः सन् चकास्ति शोभते । अत्र पूर्वार्धे तत ऽउदित इति

---

१. वृत्तीतिभेदः -अ.
२. जामितादोषः-ब.।

यथा वा-

तत उदित उदारहारहारिद्युतिरुच्चैरूदयाचलादिवेन्दुः ।
निजवंश उदान्तकात्तकान्तिर्वत -
मुक्तामणिवञ्चकास्त्यानर्घः ।।२१३।।

संहितां न करोमीति स्वेच्छया सकृदपि दोषः, प्रगृह्यादिहेतुकत्वे त्वसकृत् ।

वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु ।। २१४ ।।

अत्र सन्धावश्लीलता ।

ऊर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।
नात्रार्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ।। २१५ ।।

कमलाकरी

विसर्गलोपद्वयम् । वंश उदारेति शास्त्रीयमपि दोष इत्यर्थः ।

पूर्वपद्येऽपि सिंहावलोकितेनाह -स्वेच्छया सकृदपि सन्ध्यकरणं दोषः, शास्त्रीयं प्रगृह्यादिना सन्ध्यकरणं त्वसकृदेव दोषो न सकृत् ।

सन्ध्यावश्लीलमाह - यथेति । वेगादिति । काचित् सङ्केतस्थले सन्तं कान्तं दर्शयन्ती नायिकामाह- अयं वेगादुड्डीय गगने चलन् गच्छन् डा[१]मरं वाद्यं तद्वच्चेष्टितं यस्य । डामरमुद्भटमित्यन्ये । उत्तपते शोभते तेनात्रैव रुचिं प्रीतिं कुरु । अत्र चलन्निति शत्रन्तं 'नश्चापदान्तस्य झलि' (अ.८।३।२४) इत्यनुस्वारे सन्धौ चलण्डा इति शिश्नधीः । चिङ्कु इति योन्यङ्कुरधीरित्यश्लीलं विसन्धि । तृतीय-कष्टमाह - ऊर्व्यासाविति । अत्र मरुदेशस्यान्ते समीपे चारुरवस्थितिर्यस्या सा गुर्वी महती तरुणामालिः पङ्क्तिरस्ति तेन ऋजु ऊर्ध्वमत्र गन्तुं न शक्यते। तत् तस्मात् मनाक् शीघ्रमीषत् शिरो नम्री कुरु । अत्रसन्धौश्रवणे क्लेशः ।

हतवृत्तं त्रिधाह - हतमिति । वृत्तं छन्दः अश्रव्यं यतिभङ्गादौ । अप्राप्तेति-'वा पादान्ते त्वसौ ग्वक्रः' इत्युक्तेरप्राप्तो गुरुभावो गुरुत्वं येन सः । अन्ते लघुर्वर्णो यस्येति बहुव्रीहिगर्भो बहुव्रीह्टिः । पादान्त्याक्षरे

---

१. डामरं मुद्गरमि-अ.।

हतं लक्षणानुसरणेऽप्यश्रव्यम् अप्राप्तगुरुभावान्तलघु रसाननुगुणं च वृत्तं यत्र तत् हतवृत्तम्। क्रमेणोदाहरण् -

अमृतममृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात्।। २१६ ।।

अत्र 'यदिहान्यत् स्वादु स्वादित्यश्रव्यम्। यथा वा-

जं परिहरिउं तीरइ मणअं पि ण सुंदरत्तणगुणेण।
अह णवरं जस्स दोसो पडिवरुखेहिं पि पडिवण्णो।। २१७।।

अत्र द्वितीयतृतीयगणौ सकारमकारौ।

विकसितसहकारतारहारि-परिमलगुञ्जितपुञ्जितद्विरेफः।
नवकिललयचारुचामरश्रीर्हरति मुनेरपि -
मानसं वसन्तः।। २१८ ।।

अत्र हारिशब्दः। 'हारिप्रमुदितसौरभ' इति पाठो युक्तः। यथा वा -

कमलाकरी

गुरु[1] त्वाभावे द्वितीयं, रसविरुद्धं वृत्तं तृतीयम्, तेन वृत्ते हतत्वं त्रिधेत्यर्थः।

आद्यमाह - अमृतमिति। अमृतममृतमेव गगनं गगनाकारमिति वदनुपममित्यर्थ। मधून्यप्यन्यथा न, अनुपमानीत्यर्थः। चूतस्याम्रस्य फलमप्यधिकं मधुरमित्यत्र कः सन्देहः। त्रयं प्रसिद्धमेवेत्यर्थः। रसस्यान्तरं विशेषं वेत्ति इति वित्, जलनिधेश्च तदाभवदन्तरं महदितिवत् सज्जनस्तु मध्यस्थः सन् पक्षपातहीनः सन् वदतु, न ग्राम्यः पृच्छयते। इह त्रयमध्ये सकृदेकमपि अन्यथा कान्तादन्तच्छदात् स्मित विकसितोष्ठाद् स्वादु तद्वदतु। यद्वा सकृदपि वदतु किं बहुजल्पनेनेत्यर्थः। इहान्यदिति दीर्घे यतिभङ्गाद् दोषः।

आर्यायां मात्रावृत्तभङ्गमाह-यथा वेति। यत् परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन। अथ केवलं यस्य दोषः प्रतिपन्नैरपि प्रतिपन्नः।। इति संस्कृतम्। अथ नवरतस्येति वा पाठः। सौन्दर्यगुणेन मनागीषदपि

---

१. गुरुत्वाभावाद् द्विती-अ.,क.।

अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढ़मनसामस्त्राणि वस्त्राणि च ।। २१९ ।।

अत्र वस्त्राण्यपीति पाठे लघुरपि गुरुतां भजते ।

हा नृप हा बुध हा कविबन्धो विप्रसहस्रसमाश्रय देव ।
मुग्ध विदग्ध सभान्तररत्न कासि गतः क वयं च -
तवैते ।। २२० ।।

न्यूनपदं यथा-

तथा भूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां

कमलाकरी

यं दोषं परिहर्तुं कामप्रतिपक्षैर्यत्यादिभिरपि प्रतिपद्यतेऽङ्गीकृतः । मुनयोऽपि रतं न त्यजन्तीत्यर्थः । अत्र 'हरिउ'मित्यन्तगुरु सगणो द्वितीयः तीर इत्यादि गुरुस्तृतीयो भगणः तावेव सकारभकारौ शास्त्रे दुःश्रवत्वादमङ्गलत्वाच्च निषिद्धावित्यर्थः ।

पादान्तलघोर्गुरुत्वाभावमाह - विकसितेति । फुल्लचूतानां तारोऽधिको यो हारी मनोहरः परिमलो गन्धो तेन गुञ्जिताः सशब्दा गुम्फिताः सम्बद्धाः गुञ्जिता वा द्विरेफा यत्र । नवपल्लवा एव चामराणि तैः श्रीर्यस्य सः । वासन्तो मुनेरपि मनो हरतीत्यर्थः । अत्रेति । हारिपदे पादान्ते 'वा पदान्त' इति शास्त्रतो गुरुत्वेप्युच्चारणे गुरुकार्याक्षमत्वाच्छन्दोभङ्गः । न च वा पदान्त इति शास्त्रं व्यर्थम्, तस्य द्वितीयचतुर्थपादान्तपरत्वात् । 'प्रमुदितेति' पाठे तु संयोगे प्रपूर्वस्य गुरुत्वान्न दोष इत्यर्थः ।

अन्यदप्याह-यथा वेति । अन्यास्ता इति । विधिना यैः सम्भारैः पार्थिवोऽयं युवा सृष्टस्ते गुणा एव रत्नानि तेषां रोहणो रत्नपर्वतस्तस्य भूमयोऽन्या विलक्षणा एव । तत्रत्या सा मृदुपादानभूताऽन्यैव । ते सम्भारा असमवायि-निमित्तादयः सम्भारा अप्यन्ये एव । यत्र यस्मिन् दृष्टे लक्ष्मीः कान्तिभाजां मूढ़ं भयात् कामाच्च विसंज्ञं वश्यञ्च मनो येषां तेषां शत्रूणां करतलादस्त्राणि स्त्रीणां नितम्बाद् वा सुरतेच्छया वस्त्राणि च पतन्ति । नग्ना भवन्तीत्यर्थः । अत्रान्ते गुरुत्वाभावाल्लघुत्वं दोषः । वस्त्राण्यपीति

वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरु खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ।। २२१ ।।
अत्रास्माभिरिति, खिन्ने इत्यस्मात् पूर्वमित्थमिति च ।

अधिकं यथा -

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसङ्क्रान्तनिशातशास्त्रतत्वः।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लासमयोदयः
स कोऽपि ।। २२२ ।।

अत्राकृतिशब्दः । यथा वा -

कमलाकरी

पाठे तत्वेऽपि संयुक्तात् परे गुरुत्वमेवेत्यर्थः । इयं राजाज्ञेति भाति ।

रसाननुगुणं हतवृत्तमाह - हा नृपेति । राज्ञि मृते भृत्यानां विलापः । मुग्ध सुन्दर विदग्ध । हापदं प्रत्येकमन्वेति । त्वं मृतोऽसि । एते वयं जीवामः । अत्र शोके करुणे हास्योचितं वृत्तं दोष इत्याह -हास्येति । तच्च श्लोकेऽनुगुणमित्यर्थः ।

न्यूनपदमाह - यथेति । अत्रोषितमित्यत्रास्माभिरिति न्यूनं खिन्ने इत्यत्रेत्थं खिन्ने इति न्यूनं तेन विना कर्तृकर्माभावे साकाङ्क्षात्वादित्याह अत्रेति ।

अधिकपदमाह - स्फटिकेति । स्फटिकाकृतिवच्छुद्धोऽत्यर्थं ज्ञात तीक्ष्णतत्वोऽविरुद्धेऽर्थे समन्विता सम्बद्धा उक्तयो युक्तयो यस्य । प्रतिमल्लानां शत्रूणामस्तमयो नाशो यस्मात् सः उदयो यस्य शत्रुनाशप्रचुरो वोदयो यस्य सः कोऽप्यस्ति । अत्र स्फटिकनिर्मल इत्येवसिद्धे आकृतिपदाधिक्यं दोषमाह- अत्रेति ।

अत्रैवान्यदाह - यथा वेति । इदमिति - इह जगति पुंसां जरास्वपि वृद्धावस्थास्वपि कामचेष्टेति यदिदमन्याय्यं लोकविरुद्धञ्च । यच्च कान्तानां जीवितं रतं व कुचपतनपर्यन्तं न कृतं तदप्यनुचितं लोकगर्हञ्चेत्यर्थः । रतं कुचपातावधि नेत्येव सिद्धे कृतपदमधिकमित्याह- अत्रेति । पूर्वार्द्धे कृत-पदाभावात् प्रक्रमभङ्गश्चेत्याह- प्रत्युतेति । प्रत्युत विपरीतं कर्तुरनुक्तेः । साकाङ्क्षात्वञ्च[1] दोषं वक्तुं पाठान्तरे तदभावमाह-तथा चेति ।

---

१. चेद्दोषंवक्तुं-अ.।

इदमनुचितमक्रमश्च पुंसा यदिह जरास्वपि
मान्मथा विकाराः ।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि
जीवितं रतं वा ।। २२३ ।।

अत्र कृतमिति । 'कृतं' प्रत्युत प्रक्रमभङ्गमावहति । तथा च -'यदपि च न कुरङ्गलोचनानाम्' इति पाठे निराकाङ्क्षैव प्रतीतिः ।

कथितपदं यथा -

अधिकरकरतल्पं कल्पितस्वापलीला
परिमिलन-निमीलत्पाण्डिमा गण्डपाली ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् ।। २२४ ।।

अत्र लीलेति ।

कमलाकरी

एकस्य पदस्य द्वि-प्रयोगे कथितपदमाह -अधिकेति । नायिकां प्रति सख्युक्तिः । हे सुतनु तव करतलमेव तल्पः शयनम् अधि तव कृतनिद्रालीला सङ्घर्षेण[1] निमीलन्नश्यत् सङ्घर्षे रक्तिमोदयात् पाण्डिमा यस्यां सा गण्डस्थली अञ्जसा तत्वतः कामनृपस्य क्रीडाया यौवराज्येऽभिषेकं व्यञ्जयति । कथय सुरतक्रीडायां को मूर्धन्यो भवितेत्यर्थः । अत्र लीलेति कथितं द्विःप्रयुक्तमित्यर्थः । पूर्वमिदञ्च वैमुख्यादनित्यः दोषः ।

पतन् ह्रसन् प्रकर्षो बन्ध उत्कर्षो वा यत्रेति पतत्प्रकर्षमाह- कः क इति । घुर्घुरायिता घुर्घुरशब्दवती या घुरी वाद्यं योत्रं वा तद्वत्तेन वा घोरो भीषणः कः कः शूकरः कुत्र न घुरेत् शब्दं कुर्यात् । अपि तु सर्वत्रेत्यर्थः ।'घुरभीमार्तशब्दयो' इति विश्वः । कः कः करी गजः कं कं कमलाकरं पद्महीनं कर्तुं नोद्यतः । के केऽरण्यमहिषाः कानि कानि वनानि नोन्मूलयेयुः । अपि तु सर्वेऽपि कुर्युः । यतः सिंहीस्नेहविलासाभ्यां बद्धा वयतिर्येन सः पञ्चाननः सिंहो वर्तते । अत्र सूकरादौ विकटवर्णानुप्रासदीर्घसमासादिबन्धप्रकर्षश्च सिंहेन कृत इत्यर्थः ।

---

१. कृतानिनिद्रालीलासङ्घर्षेण-अ .क.।

पतत्प्रकर्षं यथा-

कःकः कुत्र न घुर्घुरायितघुरीघोरो घुरेत् सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ।। २२५ ।।

समाप्तपुनरात्तं यथा

क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवः
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ।। २२६ ।।

द्वितीयार्धगतैकवाचकशेष-प्रथमार्धं यथा-

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि धर्मः कठोरः ।

कमलाकरी

समाप्तं पूर्णं वाक्यं पुनः शेषोक्त्या आत्तं स्वीकृतं तदर्थविशेषणोपादानमित्यन्ये तन्न 'प्रागप्राप्त' (का.प्र.) इत्यादौ वाक्यान्तरे तदभावात् । तं दोषमाह -क्रेङ्कार इति । तन्वाश्चोलिकानिष्कासने भुजयोराक्षेपो धूननं तत्र स्खलतां चोलिकान्तर्लग्नानां कङ्कणानां क्वाणाः शब्दः वो विरहिणां युष्माकं प्रेम सुखं तनोतु । कीदृशः कामधनुषः क्रेङ्कारः । रणत्कारः सुरते क्रीड़ा स्मितहर्षताडनाद्यास्ता एव पिक्थः उद्दीपकत्वान्मञ्जुलत्वाच्च तासां र[1]व इति सर्वत्र रूपकम् । रतिः सुखमेवानेकसुखप्ररोहन्मञ्जरी तस्यां मधुलिहो लम्पटाः कामुकाः तेषां चुम्बनादिध्वनिरूपो झङ्कारस्तद्धेतु । कुचमर्दनचुम्बनादिलीला एव चकोर्यः मुखचन्द्रस्य हर्षहास्यतोषात् तासां ध्वनिरूपः । नवं वयस्तारुण्यं यस्या सा त[2]स्यां लास्याय सुरतरूपनृत्याय यद्वा यौवनस्यैव नृत्यं सूरतरूपं वयसां पक्षिणां हि मयूरादीनां नृत्यं वंशीरवेण प्रसिद्धं तथा सुरतस्याप्यनेनाधिक्यात् । वेणुस्वनो वंशीनिनादरूपस्तेन तस्य पोषादिति

१. रस्वन इति-अ.,क.।
२. तस्य लास्याय- अ.।

तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ।। २२७ ।।

अभवन्मतः योगः सम्बन्धः यत्र तत। यथा-

येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभिः
लीलापानभुवश्च नन्दनवनच्छायासु यैः कल्पिताः।
येषां हुङ्कृतयः कृतामरपतिक्षोभा क्षपाचारिणां
किन्तैस्त्वत्परितोषकारि विहितं किञ्चित्
प्रवादोचितम् ।।२२८।।

अत्र 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इत्युक्तनयेन यच्छब्दनिर्देश्यानामर्थानां परस्परमसमन्वयेन यैरित्यस्य विशेष्यस्याप्रतीतिरिति । 'क्षपाचारिभिरिति पाठे तु युज्यते समन्वयः । यथा वा -

कमलाकरी

रूपकम्। अत्र तनोतु वः इत्यनेन वाक्ये निराकाङ्क्षे पुनर्नवं वय इत्यादि शेषोपादानमाकाङ्क्षाभावेऽन्वयाद्दोष इत्यर्थः।

अर्धान्तरेति व्याचष्टे- द्वितीयेति । द्वितीयार्द्धे गतं यदेकं वाचकं प्रधानं तदङ्गं प्रथमार्द्धे पूर्वार्द्धे वाचकं शेषं द्वितीयार्द्धे वेति द्विविधम्। तत्राद्यमाह-मसृणेति । हे बाले, भूः सदर्भास्तत् तस्मात् मसृणो लघुश्चरणपातो यत्र यथा गम्यताम्। आतपस्तीव्रस्तत् तस्मात् मूर्ध्नि सिचयान्तं वस्त्रान्तं निधेहि । इति जनकपुत्री सीता पान्थ-वधूभिः शिक्षिताऽश्रुपूर्णैर्लोचनैर्वीक्षिता चेत्यर्थः । अत्रोत्तरार्धे तदिति पूर्वार्धशेषमित्यर्थः । पूर्वार्धेत्वर्धशेषन्तु-"वक्षःस्थलं मुकुन्दस्य कौस्तुभाङ्कं कपर्दिनः । चूडालो बालचन्द्रेण जटाजूटश्च पातु वः ।।" इति ज्ञेयम् । अत्र दूरान्वये चित्तविक्षेपो नैराकाङ्क्ष्यञ्च दोषहेतुः ।

अभवन्नित्यस्यार्थमाह - अभवन्निति । मते स्वमते इष्टोऽभिप्रेतो योगः सम्बन्धोऽभवन्नविद्यमानो यत्रेत्यर्थः । तदाह-येषामिति । येषां क्षपाचारिणां प्रतापस्योष्माभिरर्चिभिस्त्रिदशेभानामैरावतादीनां दाननद्यः शोषिताः, यैश्चन्दनवनवृक्षच्छायासु पानभूमयः कृता, येषां हुङ्काराः कृतेन्द्रभयास्तैः प्रवादोचितं जनख्यापनार्हं त[1]व तोषकारकं कि

१. तत्रतोषकारकं-क.,अ.।

त्वमेवं सौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं यत् स्याज्जितमिह तदानीं गुणितया ।। २२९ ।।

अत्र यदित्यत्र तदिति, तदानीमित्यत्र यदेति वचनं नास्ति । चेत् स्यादिति युक्तः पाठः । यथा वा-

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ।। २३० ।।

अत्राकर्णनक्रियाकर्मत्वे कोदण्डं शरानित्यादि वाक्यार्थस्य कर्मत्वे कोदण्डःशरा इति प्राप्तम् । न च यच्छब्दार्थस्तद्विशेषणं वा कोदण्डादि । न च केन केनेत्यादि प्रश्नः । यथा वा -

कमलाकरी

ञ्चिद्विहितं किम् -अपि तु न किञ्चित् कृतम् । अत्र यैस्तैरित्यनयोः क्षपाचारिणो विशेष्यत्वेनेष्टाः न च तेषां षष्ठयन्तानां तृतीयान्ते विरुद्धविभक्तियोगे विशेष्यत्वं घटते इत्यर्थः ।

ननु यैर्लीलापानभुवः कल्पितास्तेषां प्रतापोष्मभिस्तेषां येषां हुङ्कृतयस्तेषामिति यत्तच्छब्दयोरेव व्यत्ययेनान्वयात् तद् द्वयोर्विशेष्यान्तरमत आह- अत्रेति । द्वयोर्यत्तच्छब्दयोर्विशेषापेक्षायां क्षपाचारिणो विशेष्या तेन 'गुणानामङ्गानां परार्थत्वात् समत्वात् विनिगमनाविरहादन्योन्यमसम्बन्धः इति तार्तीय-जैमिनिन्यायेन निविदां सामधेनीनां वाग्निसमिन्धानामङ्गत्वादरुणैकहायन्योश्च क्रियार्थत्वा-दन्योन्यं यथा नाङ्गत्वं तथा यत्तच्छब्द- योरन्याङ्गत्वान्नान्योन्यमन्वयः । तच्छब्दे च सर्वत्र यच्छब्दार्थप्रतिनिर्देशादेकरुप्येण भाव्यम् । न[१] वैरूप्येण न तद्वदार्थिकोऽन्वयः विभक्तिभेदे तदयोगात् । अविमृष्टविधेये ऽप्यन्वयोऽस्ति' अत्र तु स एव नेति भेदः । 'समन्वय' इति पाठ-स्त्वयुक्तः । कथं तर्हि युक्तमत आह- क्षपेति । यत्तदोर्विशेष्य-विभक्तियोगा दन्वय इत्यर्थः । न्यूनत्वादपि दोषमाह- त्वमेवमिति ।

---

१. न चैकरूप्येण-अ.क.।

चापाचार्यस्त्रिपुर विजयी इत्यादि ।। २३१ ।।

इत्यादौ भार्गवस्य निन्दायां तात्पर्यम् । 'कृतवता' इति परशौ सा प्रतीयते । 'कृतवतः' इति तु पाठे मतयोगो भवति । यथा वा-

चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
सङ्ग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दन्दुभिः ।। २३२ ।।

अत्राध्वरशब्दः समासे गुणीभूतः इति न तदर्थः सर्वैं संयुज्यते ।

कमलाकरी

क्रुद्धां प्रति सखीवाक्यम् । एवमनिर्वचनीयं सौन्दर्यं यस्यास्तादृशी त्वं स च कान्तः सौन्दर्यस्य योग्यः इह संसारे तु युवामेव भवतामेव कलानां सुरतकोशलानां सीमानं काष्ठां भजथः सेवेथे । हे सुभगे, वां युवयोरित्येवंविधं तदन्द्व दिष्टया भाग्येन संवदत्यपि तत्तस्मादिति वा । अत्र इह द्वन्द्वे शेषमधिकं रतलीलादिकं यत्तद्यदा स्यात्तदानीं गुणितया जितं स्यात्, तदभावे तु व्यर्थमित्यर्थः । अत्र यदित्यत्र तत्पदाभावात् तदानीमित्यत्र यदेत्यभावाच्च नेष्टः सम्बन्धः इत्यर्थः । न च तदिति पूर्वस्यात्रानुषङ्गः अथादिवदतः शब्देन व्यवायान्नानुषज्जेतेति न्यायात् । कथं तर्हि पाठोऽक्तोऽत आह- चेदिति । 'चेत् स्यादिति' पाठे चेदिति यदेत्यर्थेऽतो न न्यूनत्वम् । न च न्यूनत्वं पदेन गतत्वम्, अत्राक्षेपाद्विलम्बेऽप्यर्थबोधात् तत्र च बा[१] धाभावादित्यर्थः ।

अन्यदप्याह - सङ्ग्रामाङ्गणेति । हे राजन् युद्धभूगतेन भवता चापेऽधिज्ये कृते सहसा झटिति येन येन यद्यत् सपदि प्राप्तं तदाकर्णय धनुषा शराः प्राप्ता, शरैररिशिरः प्राप्तं, तेन शिरसा भूमण्डलं प्राप्तं, तेन भूमण्डलेन त्वं प्राप्तस्त्वया च कीर्तिः प्राप्ता तया च लोकत्रयं प्राप्तमिति विप[२] रिणतसमासादितपदानुषङ्गेणार्थः ।

१. चाभावादित्यर्थः-अ,क.।
२. विपरिणतया समा-अ.क.।

यथा वा -

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसराली करालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो
भवान्याः ।। २३३ ।।

अत्र दण्डपादगता निजतनुः प्रतीयते, भवान्या, सम्बन्धिनी तु विवक्षिता ।

कमलाकरी

अत्र येन येनेत्युद्देश्यं तदाकर्णयेति विधिः । तत्र कोदण्डशरादेर्विधेयत्वमुद्देश्यत्वं वा, तत्राप्याद्ये आकर्णनमेतेषां कर्तृत्वं कर्मत्वं वा पदार्थानां वाक्यार्थस्य वाक्यार्थसमुदायस्य वा रूपान्तरा[1]सम्भवात् । नाद्यः इत्याह-अत्रेति कर्मत्वे कोदण्डं शरानाकर्णयेति द्वितीयैव स्यादित्यर्थः । नान्त्यः इत्याह भावात् प्रातिपदिकार्थमात्रविवक्षया प्रथमैव वाक्यार्थस्येति । उभयत्र समूहस्य कर्मत्वे प्रत्येकं कर्मत्वादित्यर्थः । अन्त्ये कोदण्डेन प्राप्तान् शरानाकर्णयेति स्यान्न शरा इति ज्ञेयम् । उद्देश्यत्वे कोदण्डादिर्यच्छब्दार्थो वा, तस्य विशेषणं विशेष्यं वा । नाद्यावित्याह - न चेति । आद्ये कोदण्डे शक्त्यभावात् पुनस्तच्छब्दवैयर्थ्यमित्यथः । द्वितीये येन कोदण्डादिना यच्छरादि प्राप्तं तदाकर्णयेति उक्तौ शरप्राप्ति[2]भिन्नाकर्णनीयान्तराभावादसङ्गतिः । नहि विशेषे बुद्धे विशेषान्तरमस्ति यस्याकर्णनं स्यात् । यदित्यस्य विशेषणत्वे शरास्त्वं कीर्तिरित्यैतैरन्बयाच्च । नान्त्यः- उक्तदोषादेवेति भावः ।

वाक्यसमुदायं दूषयति । न चेति । येन यदिति सामान्यतोऽन्वयः । केन किमिति विशेषः प्रश्नः कोदण्डेन शरा इति विशेषरूपेणो[3]त्तराणीति नानावाक्यान्यपि न तादृशप्रश्नाश्रवणादित्यर्थः । ननु येन येन प्राप्तं तदाकर्णय यद्यच्च प्राप्तं तदाकर्णयेति प्रश्नं विनापि यु[4]क्तमिति चेन्न

---

१. रूपान्तराभावात् -अ.क.।
२. शरप्राप्तिभिन्ना कर्म-अ.।
३. विशेषरूपोत्तरा-अ.।
४. युक्तमिति च्चेन्न विपरिणा-अ.,ब. ।

अवश्यवक्तव्यमनुक्तं यत्र । यथा -

अप्राकृतस्य चरितातिशयैश्च दृष्टै-
रत्यद्भुतैरपहृतस्य तथापि नास्था ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
सौन्दर्यसारसमुदायमयः पदार्थः ।। २३३ ।।

अत्र 'अपहृतोऽस्मि' इत्यपहृतत्वस्य विधिर्वाच्यः । 'तथापि' इत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः ।

कमलाकरी

विपरिणामेनासादितपदान्वये वाक्यभेदात् किञ्च यत्तदोरेकार्थत्वाद्यत्तच्छब्दार्थः शरा एव आसादनाकर्णनक्रियाकर्मापि तदेव । न च वाक्यार्थकर्मत्वे तद्युक्तम् । किञ्चाकर्णनं श्रौत्रं प्रत्यक्षं शब्दस्येव न द्रव्यस्येति शब्दपरता वाच्या । न च तस्यासादनं कर्मत्वं वा युज्यते, अद्रव्यत्वादमूर्तत्वाच्च । न वा तत्र कर्मत्वं श्रुतं येन यदासादितं द्रव्यं तस्याकर्णनम् , यस्याकर्णनं शब्दस्य, तस्य प्राप्तिस्तेना[१]नन्वयः इति वयम् ।

व्यङ्ग्यस्येष्टयोगाभावमाह - चापेति । 'कृतवता' इतिपाठे इष्टा भार्गवनिन्दा न प्रतीयते इत्यन्वयायोग इत्यर्थः । परशुनिन्दायामपि तस्या ज्ञेयत्वात् जेयत्वात्तु तन्निन्दैवोचिता । परशुसम्बन्धाद् यद्यपि तन्निन्दा तथापि शस्त्रान्तरेण युद्धसम्भवान्न तथा । 'कृतवतः' इति षष्ट्यन्तपाठे तु युक्तोऽन्वयः इत्यर्थः ।

समासे इष्टयोगाभावादाह - चत्वारो वयमिति । वेणीसंवरणे युद्धार्थं दन्दुभौ हते भीमोक्तिः । सङ्ग्रामो यज्ञत्वेन वर्ण्यते । वयं चत्वारो भ्रातरो महर्त्विजः अतो दीक्षितस्य ऋत्विक् षोडशत्वेऽपि ऋत्विक्चतुष्ट्व विरोधः । सः सर्वज्ञः हरिः श्रीकृष्णः कर्मोपदेष्टा सदस्यः । 'सदस्यं सप्तदशं कौषीतकिनः समामनन्ति । स कर्मणामुपद्रष्टा भवतीति सूत्रात् । राजा युधिष्ठिरः सङ्ग्राम एवाध्वरस्तत्र दीक्षितो गृहीतनियमः । राजा 'सार्वभौमोऽश्वमेधेन यजेत' इति श्रुतेः । पत्नी द्रौपदी दुर्योधनवधावधि गृहीतं व्रतं वेणीसंयमनरूपं यया सा । दीक्षितेत्यर्थ । कौरव्याः शतं धार्तराष्ट्राः पशवः अश्वमेधे मध्ययूपे शतवधात् इति । प्रिया द्रौपदी

१. इत्यन्वयायोग इत्यर्थः-ब.।

यथा वा-

एषोऽहमद्रितनयामुखपद्मजन्मा
प्राप्तः सुरासुरमनोरथदूरवर्ती ।
स्वप्नेऽनिरुद्धघटनाधिगताभिरूप
लक्ष्मीफलामसुरराजसुतां विधाय ।। २३५ ।।

अत्र मनोरथनामपि दूरवर्ती इत्यप्यर्थो वाच्यः। यथा वा-

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यासि त्यजसि मानिनि
दासजनं यतः ।। २३६ ।।

कमलाकरी

तस्याः परिभवः केशाकर्षणनग्नतादिः तज्जन्यदुःखनाशः 'तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इत्येवं रूपं फलम् । अन्यथा तन्मरणेऽस्माकं जीवनाभावाद् एवंविधेऽध्वरे यशसो दन्दुभिः राजाह्वानाय स्फीतं स्निग्धं यथा तथा रसति शब्दं करोतीत्यर्थः । अध्वरसम्बन्धे हि भीमादौ ऋत्विक्त्वादिरूपकनिष्पत्तिः ।

न च स[1]मासे गुणभूतस्याध्वरस्येष्टस्तद्गम्यत इत्याह-अत्रेति । अन्यत्रापि समासे आह - जङ्घेति । पूर्वं व्याख्यातमिदम् । अत्रेति । निजपदं हि प्रधानदण्डपादपरं न तु गुणभूतभवानीपरमिति । अनिष्टो योगः इत्यर्थः । इष्टधीविरहो बीजम्, नित्यदोषः ।

अनभिहितवाच्यं व्याचष्टेऽवश्येति । वाच्यमवश्यवक्तव्यं यत्र नोक्तमित्यर्थः ।

अप्राकृतस्येति । जनकोक्तिः-अप्राकृतस्य लोकोत्तरस्य रावणस्य दृष्टैर्भिन्नक्रम चकाराच्छ्रुतैरत्यद्भुतैः अमानुष्यैश्चरितातिशयैश्चेष्टोत्कर्षैः कैलासान्दोलनाद्यैरपहृतस्य वशीकृतस्य मम तथाप्यनास्था तत्रानादरः । एष वीरशिशुकाकृतिः अनुपमसामर्थ्यबलसमूहरूपः कोऽप्यनिर्वचनीयः पदार्थः श्रीरामो यस्तत्रैवास्थेत्यर्थः ।

अत्रापहृतोऽस्मीति भिन्नमवश्यं वाच्यमन्यथैकवाक्यत्वे तथापीत्यस्य वैयर्थ्यापातादित्याह - अत्रेति । नवाविमृष्टविधेयेन सिद्धिः तथापीतिपदवैयर्थ्यदोषाधिक्यात् । तद्वशेनापहृतस्य विधेयत्वेन

---

१. समासस्य गुणभूत-अ.।

अत्र 'अपराधस्य लवमपीति वाच्यम् ।

अस्थानस्पदं यथा -

प्रियेण सङ्ग्रथ्य विपक्षसन्निधा
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुषु ।। २३७ ।।

अत्र काचिन्न विजहौ इति वाच्यम् । यथा वा-

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तः कपोलस्थलम् ।
पार्वत्या नखलक्ष्मशङ्कितसखीमर्मस्थितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः ।। २३८ ।।

अत्र नखलक्ष्म इत्यतः पूर्वः कुटिलाताम्र इति वाच्यम् ।

कमलाकरी

प्राणसिद्धेश्च । अस्वरसादेवासङ्कीर्णमाह - एषोऽहमिति । उदाहरणे कामवाक्यम् । कामदाहानन्तरं हरेण वरदानाद् गौरीमुखदर्शनात् कामोत्पत्तिरिति पुराणकथा । गौरीमुखपद्माज्जन्म यस्य सुरासुरमनोरथानामपि दूरवर्ती दग्धत्वेनासत्वात् । एषोऽहमसुरराजस्य बाणस्य सुतामुखं स्वप्नेऽनिरुद्धस्य प्रद्युम्नपुत्रस्य घटनां सम्भोगस्तेना[१]धिगतं प्राप्तमभिरूपं योग्यं लक्ष्मी शोभा तस्याः फलं यया तादृशीं कृत्वा प्राप्तः बाणयुद्धे आगतोऽस्मीत्यर्थः । अत्रेति -अन्यथा वस्तुसद्भावापत्तेरित्यर्थः ।

असमासेऽप्याह -त्वयीति । हे मानिनि, त्वयि निलीनरतेः, मधुर वादिनः प्रीतिभङ्गभीरोः अतो नान्यासक्त परुषवादित्वात् प्रीतिभङ्गाद्वा त्यागो मम कमपराधस्य लवमंशमपि । पूर्णो दूरापास्तः पश्यसि यतो दासजनं मां त्यजसीत्यर्थः । अत्र लवमपीति वाच्यमन्यथा क्षुद्रापराधाभावेऽपि स्थलसत्ता स्यादित्याह - अत्रेति । विरुद्धधीरेव दोषत्वबीजम् अतो नित्यः ।

अपदस्थेत्यत्र पदशब्दः स्थानवाचीत्याह - अस्थानेति ।

---

१. स्तेनाभिगतं प्राप्त-अ.।

अस्थानस्थसमासं यथा-

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिरसरदलिश्रेणिकृपाणं शशी ।। २३९ ।।

अत्र क्रुद्धस्योक्तौ समासो न कृतः कवेरुक्तौ तु कृतः ।

सङ्कीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति । यथा -

कमलाकरी

अस्थानस्थपदमस्थानस्थसमासञ्चेति द्वेधा । तत्राद्यमाह-प्रियेणेति । माघे जलक्रीड़ावर्णनम् । काचित् कान्ता कान्तेन सपत्नीसमक्षं ग्रथितो[१]न्नतस्तने हृदि निहितां जलदूषितामपि स्रजं सपत्नीस्पर्द्धया न तत्याज । हि यतः गुणाः प्रीतौ तिष्ठन्ति न वस्तुनि । प्रीत्या दत्तमनिष्टमपि वरमित्यर्थः ।

नकारः काचित् पदात् पूर्वार्हो न पूर्वुमित्याह -अत्रेति । अयम्भावः-काचित्पदमेकापरं नञा[२]न्वये पर्युदासासत्वादनेकाः सर्वाः विजहुरित्यर्थे सर्वसाम्यान्न प्रेमाधिक्यम् । न विजहाविति क्रियान्वये तु- 'न कलञ्जं भक्षयेे' दितिवत् क्रियामात्रनिषेधादेकैव न विजहावित्यर्थे सर्वोत्कर्ष इति ।

अन्यदप्याह -लग्न इति । प्रीतिकलहे गौर्या हरजटामाकृष्य चन्द्रखण्डं कपाले दत्वा शयितां तस्य गल्ले दृढ़मुद्रां दृष्ट्वा नखक्षतभ्रान्त्या सखी हास्यलज्जितया गौर्या हस्तेनोन्मृष्टोऽत्र चन्द्रखण्डो वर्ण्यते । क्रीडाकेशग्रहे श्लथा या जटा तस्यां लम्बते तेन शितिकन्धरो हरस्तस्येन्दुखण्डेन गौर्याः कपोलस्थलमध्ये वक्रा रक्ता च कान्तिर्यस्य स निद्रामध्ये लग्न उत्पन्नो गौर्या मुद्राङ्कः मुद्रारूपं चिह्नं वः पातु । कीदृशः-नखक्षतशङ्कायुक्ता सखीलीलाहास्येन लज्जितया पार्वत्या हस्तेन मार्जितः खण्डेन्दुमुद्रा [३] त्वाद् वक्रत्वं गल्लनिपीडनाच्च ताम्रत्वम् । नखक्षतशङ्कायां कारणत्वात् पूर्वमर्हं नोत्तरं तेनास्थानस्थमित्याह -अत्रेति उद्दिष्टधीविधाताद्रसभङ्गाच्च नित्यदोषोऽयम् ।

---

१. ग्रन्थित्वोन्नत-अ.।
२. तत्रान्वये-अ.,क.।
३. खण्डेन्दुमुद्रा स्यात्-अ.।

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम् ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ।। २४० ।।

अत्र "पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि इमं कण्ठे गृहाण मनसमस्तमोरूपं कोपं मुञ्च" इति । एकवाक्यतायान्तु क्लिष्टमिति भेदः ।

गर्भितं यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति । यथा–

परापकारनिरतैः दुर्जनैः सह सङ्गतिः ।
वदामि भवतस्तत्वं न विधेया कदाचन ।। २४१ ।।

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः । यथा वा–

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।

कमलाकरी

अस्थानस्थसमासमाह – अद्यापीति । अद्यापि मयि उदितेऽपि एष मानः कुचगिरिदुर्गकठिनेऽपि कान्तानां हृदि जातु स्थातुमित्येव न तु गतः । धिगिति नायकागमे जारस्थितिः । कथमिति क्रोधादिवारक्तः उद्यतः दूरं विस्तारितः करो बाहुश्च येनासौ शशी तदैव विकासिकुमुदान्येव चर्मकोशः तस्मान्निर्गच्छद् भृङ्गपङ्क्तिरेव खङ्गः मानस्य वधार्थं कर्षति निस्सारयति ॥ यथा कान्तो जारवधार्थमित्यर्थः । अत्रेति । पूर्वार्धे क्रुद्धचन्द्रोक्तौ न समासः अन्त्यार्धे कवेरुक्तौ तु कृतो[१] न युक्त इत्यर्थः । वैरस्यमत्र दोषबीजम् ।

सङ्कीर्णं व्याचष्टे –सङ्कीर्णमिति । किमिति । कान्तां प्रति सखीवाक्यम् । पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाण, मनसस्तमोरूपमान्ध्यहेतुं कोपं मुञ्च । अत्र वाक्यत्रयेऽन्यपदप्रवेशात् सङ्कीर्णमेकवाक्ये तु श्लिष्टमिति भेदमाह –अत्रेति । इष्टबोधविलम्बाद् रसभङ्गो दोषबीजम् ।

गर्भितमर्थ्योक्तिपूर्वमाह – गर्भितमिति । वाक्यान्तरं महावाक्ये प्रविष्टमित्यर्थः । परेति – परपीडारतैः दुष्टैः सह सङ्गः कदापि न कार्यः । तव तत्वं वदामीत्यर्थः । अत्र वदामीत्यादिवाक्यान्तरं स्वतन्त्रं मध्येऽसम्बद्धा पूर्वधीविच्छेदाद् दुष्टमित्याह–अत्रेति ।

---

१. कुतो न-अ.कृतो न गत-ब.।

तत्सक्तोऽयं न किञ्चिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गतेत्यम्बुधिं
यस्य कीर्तिः ।। २४२ ।।

अत्र 'विदितं तेऽस्तु' इत्येतत्कृतम्, प्रत्युत लक्ष्मीस्ततोऽपसरतीति विरुद्धमतिकृत् ।

मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति ।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम् ।।'

इतिं प्रसिद्धिमतिक्रान्तम् यथा-

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुनः ।। २४३ ।।

अत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे ।

कमलाकरी

लग्नमिति । निन्दामुखा स्तुतिः । लक्ष्मीसन्देशात् तत्पितरं प्रतीति वक्तुमिव यस्य राज्ञः कीर्तिः समुद्रं प्रति गतेति किम् । हे अम्बुधे, रागो लौहित्यं प्रीतिश्च तेनावृतमङ्गं रेखाविशेषाः देहश्च यस्यास्तया । यया खड्गयष्ट्या गाढमरिकण्ठे लग्नम् । अथ ततः इह स्वसमक्षं मातङ्गा गजाश्चाण्डालाश्च तेषामुपरि पतन्ती परैः शत्रुभिरन्यपुरुषैरपि दृष्टा । अतो नोद्धो [१] षमात्रं, तस्यामसियष्ट्यां सक्तोऽयं नृपः किञ्चिदपि मां न गणयति इति ते विदितमस्तु । तेन राज्ञाऽहं श्रीः भृत्येभ्यो दत्तेति । अत्र विदितमित्यादिवाक्यं महावाक्यार्थधीविच्छेदकमित्याह - अत्रेति । दोषान्तरमपीत्याह-प्रत्युतेति । प्रत्युत विपरीतं त्यागान्निःश्रीक [२] त्वे तस्या जारिणीत्वञ्च विरुद्धं प्रतीयते इत्यर्थः ।

प्रसिद्धिहतं वस्तुमादौ प्रसिद्धिमाह - मञ्जीरेति । मञ्जीरादौ नूपुरादौ रणितप्रचुरं पक्षिषु चकारान्मण्डूकादौ कूजितरव-वासितादिरूपं सुरते स्तनितमणितादिरूपं मेघसिंहादिषुं गर्जित-रसितादिरूपं शब्दं प्रयुञ्जीतेत्युक्त्वा प्रसिद्धिमतिक्रान्तमित्यर्थः । तदाह- यथेति ।

१. नोब्दोधमात्रं-अ.।
२. निःश्रीकत्वं -अ.।

भग्नः प्रक्रमः प्रस्तावो यत्र । यथा-

नाथे निशाया नियतेर्नियोगादस्तङ्गते हन्त निशापि याता ।
कुलाङ्गनानां हि दशानुरूपां नातः परं भद्रतरं -
समस्ति ।। २४४ ।।

अत्र 'गता' इति प्रक्रान्ते 'याताः' इति प्रकृतेः । 'गता निशाऽपि' इति पाठे तु युक्तम् ।

ननु 'नैकं पदं द्विः प्रयोज्यं प्रायेण' इत्यन्यत्र 'कथितपदं दुष्टम्' इति चेहैवोक्तं तत्कथमेकस्य पदस्य द्विः प्रयोगः । उच्यते-

कमलाकरी

महाप्रलयेति । महाप्रलये मारुतेन क्षुभिता ये पुष्करावर्तका महामेघास्तेषां प्रचण्डं घनं यद् गर्जितं तस्य प्रतिशब्दतुल्यः कर्णकठोरः स्थगितं व्याप्तं रोदस्योर्द्यावापृथिव्योः कन्दरं मध्यो येन सोऽयमभूतपूर्वो रवः सिंहनादः पुनर्मुहुः कृतो युद्धाम्बुधेरस्तीति शेषः। पुर इति पाठेऽग्रे । रवशब्दो मण्डूकादिनीचशब्दे प्रसिद्धो न सिंहनादे इत्याह- रव इति ।

भग्नो नष्टः प्रक्रम उपक्रमो यत्रेत्यर्थमाह- भग्न इति । सः प्रकृति प्रत्ययभेदादनेकधा । तत्र प्रकृतेराह - नाथेति । नियतेर्विधेर्निदेशात् निशायाः कान्ते चन्द्रेऽ स्तङ्गते । हन्त खेदे । निशाप्यस्तं याता । कुल-वधूनां ह्यतः परं श्रेष्ठं दशा भर्त्तुरवस्था तदनुरूपं श्रेयो नान्यत् समस्ति युज्यते । 'आर्त्तार्त्ता मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा स्त्रीज्ञेया पतिव्रता' ।। इति स्मृतेः ।

अत्रेति- । गते इति गमिधातौ प्रक्रान्ते यातेति । या प्रापणे इति प्रकृतेः प्रयोगो दोष इति शेषः । भिन्नवृत्या स्वाम्यवस्थासाम्या भावादित्यर्थः । पाठान्तरे तु न दोष इत्याह-गतेति । नन्वस्मिन् पाठे द्विःप्रयोगो दोष इति शङ्कते । नन्विति । अन्यत्र वामन-काव्यालङ्कारे उक्तमित्यग्रेऽन्वयः । यमकनिवृत्यर्थं प्रायेणेत्युक्तम् । स्वग्रन्थविरोधञ्चाह- कथितेति । इहैव त्वयोक्तमित्यर्थः । विषयभेदेनाविरोधमुत्तरमाह- उद्देश्येति । पूर्वप्राप्तमुद्देश्यं विद्धयन्वितं प्रतिनिर्देश्यं तद्भिन्नो द्विःपदप्रयोगो निषेधस्य विषयः तद्वति उद्देश्यप्रतिनिर्देश्यवति तु विषये द्विःपदप्रयोगं तद्वाचि सर्वनामं विना वा दोष इत्यर्थः ।

उद्देश्य-प्रतिनिर्देश्य-व्यतिरिक्तो विषय एकपदप्रयोगनिषेधस्य तद्वति विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथा हि-

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।। २४५ ।।

अत्र 'रक्त एवास्तमेति' इति यदि क्रियते तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्थगयति। यथा वा-

कमलाकरी

कथितपदस्यादोषत्वे दृष्टान्तमाह -उदेतीति । ताम्र [1]रक्तयोः पर्यायत्वेऽप्यग्रे रक्तपदप्रयोगे सामान्यवांचकत्वादर्थान्तरे भ्रान्त्या वा एक्यरूपभङ्गाद् द्विःप्रयोगे न दोषः प्रत्युत गुण एवेत्यर्थः। प्रतीतिमेकरूप्यप्रतीतिं स्थगयति तिरोधत्ते। अतएव अनुमानवाक्ये तस्माद् वह्निमानित्येव निगमनं न तु पावकवानितीत्यर्थः।

प्रत्यये प्रक्रमभङ्गमाह - यथा वेति। यशोऽधिगन्तुमिति। किराते द्रौपदीवाक्यम्। यशः प्राप्तुं सुखस्य लिप्सा लब्धुमिच्छा तया वा मनुष्यगणनामतिक्रामितुममानुषकर्मणा सर्वोत्कर्षं लब्धुं वा नितरामुत्सुकानामभियोग उद्योगस्तद्वतां पुंसां सिद्धिः समुत्सुका कान्तेवाङ्कं प्राप्नोति।

अत्राद्यन्तयोस्तुमुन्-प्रयोगान्मध्ये लिप्सयेति सन्प्रत्ययात् क्रमभङ्गो दोषः इत्यर्थः। तुमुनः सनश्च भिन्नार्थत्वेन प्रकारभेदात् युक्तं पाठमाह 'सुखमीहितुं वा' इति।

सर्वनाम्नः क्रमभङ्गमाह - ते हिमालयमिति। कुमारे। ते ऋषयः हिमालयं पृष्टवा पुनः शिवं दृष्ट्वाऽस्मै शिवाय सिद्धमर्थं गौरीविवाहं निवेद्य तेन शिवेनाज्ञप्ताः खमुत्पेतुः। अत्रास्मै इतीदंशब्देन प्रक्रमे तद्विशिष्टा इति तच्छब्दप्रयोगाद् भङ्ग इति आह- अत्रेति। सर्वनाम्नः क्रमभङ्ग इति शेषः। तदिदमोः परोक्षापरोक्षार्थत्वेनार्थभेदादित्यर्थः। युक्तं पाठमाह-अनेनेति। इदंशब्देनोक्तेरित्यर्थः।

पर्याये क्रमभङ्गमाह-महीभृत इति। कुमारसम्भवे। पुत्रवतोऽपि

---

१. ताम्रारक्तयोः-अ.।

यशोऽधिगन्तु सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति
सिद्धिः ।। २४६ ।।

अत्र प्रत्ययस्य । 'सुखमीहितुम् ' इति युक्तः पाठः ।

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धञ्चास्मै निबेद्यार्थं तद्विसृष्टाः समुद्ययुः ।। २४७ ।।

अत्र सर्वनाम्नः । 'अनेन विसृष्टा ' इति वाच्यम् ।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला -
सविशेषसङ्गा ।। २४८ ।।

अत्र पर्यायस्य । 'महीभृतोऽपत्यवतोऽपींति युक्तम् । अत्र सत्यपि पुत्रे कन्यारूपेऽप्यपत्ये स्नेहोऽभूदिति केचित् समर्थयन्ते ।

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ।। २४९ ।।

कमलाकरी

तस्य महीभृतः शैलस्य दृष्टिस्तस्मिन् गौरीरूपेऽपत्ये तृप्तिं नाप । हि यतोऽनन्तपुष्पस्य मधोर्वसन्तस्य भृङ्गमाला आम्रे तरौ सविशेषात् सङ्गा सातिशयप्रीतिर्भवति । अत्रापत्यपर्यायस्य पुत्रशब्दस्य प्रक्रमो भङ्ग इत्याह अत्रेति। अपत्यवहुत्वेऽपि कन्यापत्ये प्रेमातिशयः इष्टः । तत्र पुत्रपदान्नापत्यमात्रधीरतो दुष्टमित्यर्थः । यद्यपि 'पुमान् पुत्रो जायत' इति श्रुतौ 'जनयन् बहुपुत्राणि' इति लिङ्गान्महाभाष्यादावुक्तेश्च पुत्रशब्दोऽपत्यमात्रकधीरेव क्रमभङ्गे दोषः । गता यातेतिवत् ताम्ररक्तवच्च सोऽत्राप्यक्षत एव प्रकारमात्रे वैचित्र्यमिति तु वयम् । युक्तं पाठमाह महीभृत इत्यादि । अन्यमते स्थितं पाठं समर्थयति-अत्रेति । पुत्रे मैनाके । पुत्रादिकन्यापत्ये स्नेहातिशयार्थं तथोक्तिरिति चण्डीदासादयः । केचिदित्यस्वरसः । तद्बीजन्तु पुत्रतुल्ये चूते द्विरेफासङ्गत्या दृष्टान्तवैषम्यम् । तत्र सामान्यविशेषभावे तु प्रकृतेरपि तदौचित्यम् । उपसर्गपर्याययोर्भङ्गमाह - विपद इति । विपदो विक्रमहीनं नरमभिभवन्ति । आयतिः फलकाल आपदुपेतं रहयति त्यजति ।

अत्रोपसर्गस्य पर्यायस्य च । 'तदभिभवः कुरुते निरायति, लघुतां भजते निरायतेर्लघुतावान्न पदं नृपश्रियः' इति युक्तम् ।

काचित्कीर्णा रजोभिः दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी-
रश्रीकाः काचिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः
शशंसुः ।। २५० ।।

अत्र वचनस्य । 'काश्चित्कीर्णा रजोभिर्दिवमनु विदधुर्मन्दवक्त्रेन्दुशोभा, निःश्रीकाःइति 'कम्पमाना' इत्यत्र 'कम्पमापुरिति च पठनीयम् ।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यताम् ।

कमलाकरी

निरायतेःफलहीनस्य लघुता नीचता नियता । गौरवहीनो राजश्रियः पदे योग्यो न । विपदापदोर्व्याङुपसर्गभेदात् प्रक्रमभङ्ग । लघुता-पर्यायोऽगरीयानित्युक्ते पर्यायस्य च क्रमभङ्गो दोष इति शेषः । द्वितीयादिपादत्रये युक्तं पाठमाह - तदिति । तदिति युक्तमित्यन्वयः । छन्दोभङ्गात्वसम्भवे दोष एव फलित इति भावः ।

वचने क्रमभङ्गमाह - काचिदिति । माघे सैन्ययानवर्णनम् । काचित् रजोभी रेणुभिरार्तवेन च कीर्णा व्याप्ता रजस्वला मन्दवक्त्रेन्दुलक्ष्मी कान्तादि ममाकाशमनुचकार । द्वयोः रजोयोगात् साम्यम् । काचिच्छोभाहीना उद्भ्रान्तसत्वा गतधैर्या भ्रमत्यक्षादिप्राणियुताश्च नार्यो दिश इवान्तर्दाहं तापं दिग्दाहञ्च दधुः । अन्या वात्या इव प्रतिपदं भ्रेमुः । अपरा भूमिवत्कम्पमाना आसन् । इति नार्यो राज्ञां युद्धनिर्याणे भाव्यशुभं पुरोऽग्रे शशंसुरित्यर्थः ।

अत्र काचिदित्येकत्वोपक्रमात् काश्चिदिति बहुवचनात् प्रक्रमभङ्गमाह - अत्रेति । क्रमभङ्ग इति शेषः । युक्तं पाठमाह - काश्चिदित्यादि । कम्पमाना इति शानचि द्रव्यप्राधान्यात् पूर्वञ्च तिङन्तक्रियापदप्राधान्ये प्रक्रमभङ्गात् कम्पमीयुरिति युक्तमित्यर्थः ।

कारकप्रक्रमभङ्गमाह- गाहन्तामिति । शाकुन्तले दुष्यन्तवाक्यम् ।

विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रान्ति लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ।। २५१।।

अत्र कारकस्य । 'विश्रब्धा रचयन्तु शूकरवरा मुस्ताक्षतिम्' इत्यदुष्टम् ।

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिगच्छति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे ।
स्फुरति रभसात् पाणिः पादोपसङ्गृहणाय च ।। २५२ ।।

अत्र क्रमस्य 'पादोपसङ्ग्रहणाय' इति पूर्व वाच्यम् । एवमन्यदप्यनुसर्तव्यम् ।

अविद्यमानः क्रमो यत्र । यथा-

कमलाकरी

शृङ्गैराहतं निपीयतेऽस्मिन्निति निपानं तडागस्तस्य सलिलं महिषाः क्षोभयन्तु । छायायां बद्धं कदम्बकं यूथं येन तन्मृगकुलं स्त्रीबालादियूथं रोमन्थं भुक्तचर्वणमभ्यस्यतु । विस्त्रस्तं यथा तथा वराहपतिभिः पल्वले मुस्ताक्षतिः मुस्ताखण्डनं क्रियताम्'। इदञ्च शिथिलो मुक्तः ज्याबन्धो यस्य तदस्मद्धनुर्विश्रामं लभताम् । अत्र महिषाः मृगकुलमित्ति प्रथमान्तेनोपक्रमाद्विस्त्रब्धैरिति तृतीया प्रयोगात् , गाहन्तमिति प्रकमात् क्रियतामिति कर्मकारकात् क्रमभङ्गमाह- अत्रेति । कारकस्य क्रमभङ्ग इति शेषः । युक्तं पाठमाह - विस्त्रब्धा इति 'रचयन्तु सूकरवरा मुस्ताक्षतिः पल्वले' इति पाठे ज्ञेयः ।

क्रमभङ्गमाह - अकलितेति । भार्गवं प्रति श्रीरामोक्तिः । अकलितोऽविज्ञेयः तपस्तेजोवीर्याणां प्रथिमा महत्वं यस्य । यशसो निधौ स्थानेऽवितथेनाकुण्ठितेन मदेनाध्माते प्रदीप्ते मुनौ भार्गवे रोषादभिमुखं धावत्यागच्छति सति केमे पाणिः रभसात् हर्षान्नूतनधनुर्विद्यायोग्याय कर्मणे युद्धाय पादोपसङ्ग्रहणाय गुर्वभिवादनाय च स्फुरति उद्युक्तो भवति । अत्र तपोवीर्यादिः पूर्वं निर्देशात्' यथासंख्यमनुदेशः समानाम्'(अ.) 'क्रमश्च देशसामान्यात्' इति न्यायात् पादोपसङ्ग्रहः पूर्वं वाच्यः पश्चाद् धनुर्ग्रहः । अत्र विपर्ययात् क्रमस्य भङ्ग इत्याह-अत्रेति । भङ्गः शेषः तदेवाह - पादेति ।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य -
च नेत्रकौमुदी ।। २५३ ।।

अत्र त्वं शब्दानन्तरं चकारो युक्तः ।

यथा वा-

शक्तिर्निस्त्रिशजेयं तव भुजयुगले नाथ दोषाकरश्रीः
वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुरः किं मया वृद्धया ते
प्रोच्येवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्या
प्रयातम् ।। २५४ ।।

अत्र 'इत्थं' प्रोच्येव' इति वाच्यम् । तथा 'लग्नं रागावृताङ्गङ्या' (२४२) इत्यादौ 'इति श्रीनियोगा' दिति वाच्यम् । ०

कमलाकरी

क्रमो द्विविधः पाठक्रमोऽर्थक्रमश्चेति । आद्ये उक्तमन्त्ये आह - एवमिति । यथा 'गाहन्तां महिषा' इत्यत्र धनुर्विश्रामोत्तरं महिषादेर्यथेष्ट व्यवहारादग्निहोत्रहोमयवागूपाकवत् कारणप्राथम्यानुक्तिर्दोषः । अत्रैकरूपबुद्धेर्विघातो दोषबीजम् ।

अक्रमं व्याचष्टे - अविद्यमान इति । उचितदेशादन्यत्रपदप्रयोगे इत्यर्थः । द्वयमिति- इदं व्याख्यातम् । त्वंशब्दार्थस्य गौर्या एव शोच्यतायां समुच्चयाल्लोके तदभावादित्यर्थः । तत्र प्रतीत्यनन्तरमत्र तु तस्यैव विलम्बेन धीरिति सुबुद्धि-मिश्राः । तत्र धीजनकत्वमस्ति चादीनां तु गौश्चाश्वश्चेतिवदव्यवहितेष्वेव समुच्चयादि-बोधकत्वात्तदभावे बोधकत्वमेव नास्ति । "अतएव व्यवहितैर्बुधा नेच्छन्ति चादिभिः । सम्बध्यन्ते स्वशक्ति हि उपदध्युरनन्तरे" इति तत्वम् । देवनाथोऽप्येवम् ।

एवमित्थमादिपदेषु च क्रममाह- यथा वेति । शक्तिरिति । हे नाथ तव भुजयुगे इयं निस्त्रिशज खड्गजन्या क्रूरजा[१] च शक्तिः सामर्थ्यम् । अतो न खड्गयष्ट्या पौनरुक्त्यम् । वक्त्रे मुखे दोषाकरश्चन्द्रो दोषनिधिश्च तस्य श्रीर्वसति । तव पार्श्वे एषा कुट्टयति मर्दयति इति कुट्टिनी

१. क्रूरा च शक्तिः-अ० ।

अमतः प्रकृतविरुद्धः पदार्थो यत्र । यथा-

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ।। २५५।।

अत्र प्रकृते रसे विरुद्धस्य शृङ्गारस्य व्यञ्जको ऽ परोऽर्थः ।

अर्थदोषानाह -

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ।।५५।।

कमलाकरी

शम्भलीव खड्गयष्टिर्वसति । सर्वगा विश्वगा जारिणीव चेयमाज्ञा दृश्यते । वृद्धया समृद्धया जरत्या च मया किं ते फलम् । न किमपि । कोपादित्थमुक्त एव चन्द्रकरश्वेतया यस्य राज्ञः कीर्त्या प्रयातं गतम् ।

इत्थं पदस्याव्यवहितशक्तेः पादत्रयान्ते पाठो युक्तोऽर्हः इत्याह-अत्रेति । एवमुक्ते श्रीनियोगाद् गदितुमिव गतेंत्यम्बुधिं यस्य कीर्तिरिरिति गर्भिते इतिपदव्यवहितार्थत्वात् श्रीनियोगात् पूर्वमर्हमित्याह-तथेति । अमतपरार्थमाचष्टे- अमत इति अमतोऽसम्मतः परार्थो द्वितीयो विरुद्धोऽर्थो यत्र । रसयोर्हि विरोधः श्रूयते । 'ज्ञेयौ शृङ्गारबीभत्सौ तथा वीरभयानकौ । रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ।।' इति ।

तत्र विरुद्धधिया प्रकृतस्य बाधः । तदाह - राममन्मथेति । मन्मथो मनोमथनहेतुः कामश्च तस्य बाणेन हृदि विद्धा[1] निशाचरी रक्षसी ताटका अभिसारिणी च गन्धवद्धिरं रक्तमेव चन्दनं रुधिरचन्दनं रक्तचन्दनं वा तेन युक्ता, जीवितेशः । यमः क्रान्तश्च 'जीवितेशः परेतराट् (अ. १।१।५९) इत्यमरः तस्य गृहं जगाम ।

अत्रेति - प्रकृते बीभत्से श्रृङ्गारस्य विरुद्धस्य प्रतीतेरित्यर्थः । अर्थदोषानिति - अर्थस्य शब्दायत्तत्वादानन्तर्यम् । अपुष्टः पोषहीनः, बाधहेत्वभावः पुष्टत्वम् । तदभावो द्विधा-अप्रयोजकादर्थलभ्यत्वाद् वा । तदुक्तम् - "व्यर्थमाहुर्गतार्थं यद्यच्च स्यान्निष्प्रयो[2]जकम् इति" एते पदार्थे वाक्यार्थे च यथायोगं ज्ञेयाः ।

अपुष्टमाह - अतिविततेति । अतिविस्तृतगगनमार्गे चलनेन त्यक्तविश्रामसुखो मरुता वायुना प्रसारितं सौरभं यस्य तस्य पद्मयूथस्य

१. विद्ध हता - अ० ।
२. न्निप्रयोजनम्-ब.।

सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ।
अनवीकृतः सनियमानिमविशेषाविशेषपरिवृत्ताः ॥५६॥
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः ॥५७॥

दुष्ट इति सम्बध्यते । क्रमेणोदाहरणम् -

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः ।
मरुदुल्लासितसौरभकमलाकरहासकृद् रविर्जयति ॥ २५६॥

अत्रातिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्ते इत्यपुष्टाः न त्वसङ्गताः पुनरुक्ताः वा ।

सदा मध्ये यासामियममृतनिस्स्यन्दसुरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम् ।
प्रसादं ता एता घनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ॥ २५७ ॥

अत्र यासां कविरुचीनां मध्ये सुकुमार-विचित्र-मध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति ताः

कमलाकरी

विकासकृद् रविर्जयति । गगने विभुत्वाद्वैतत्यं गमने विश्रमाभावः[१] पद्मविकासात् सौरभञ्च प्रसिद्धमेवेति ।

वह्निपदादौष्ण्यवत् तदभावेऽपि प्रतीतेव्यर्थविशेषणत्वादपुष्ट इत्यादि -अत्रेति । नन्विदमसङ्गते पुनरुक्ते वान्तर्गतं स्यादत आह- न त्विति । शब्दादन्वयप्रतीतेर्नाद्ये सामर्थ्यसिद्धेः शब्दान्तरादुनुक्तेश्च नान्त्येऽन्तर्भावः इत्यर्थः । अर्थपौनरुक्त्यन्त्वपुष्टार्थमेव । न च स्फटिकाकृतीतिवद [२] धिकपदेऽन्तर्भावः । विवक्षितार्थोक्तौ यत्र दोषः सोऽर्थदोषःतदभावे शब्ददोषः अविवक्षितस्याप्यन्वयबोधेऽधिकपदत्वम् वैतत्ये विवक्षितेऽपि सामर्थ्यलभ्ये त्वपुष्टत्वम् । वैयर्थ्यमेव दोषबीजम् । कष्टं दुर्ज्ञेयम् । तदाह-सदेति । यासां रुचीनामिच्छादीनां दीप्तानाञ्च मध्ये सदामृतं सुधाजलञ्च तस्य निस्स्यन्दः प्रवाहस्तेन सरसा

---

१. विश्रामाभावः-अ.।
२. तीति तदधिकपदे-अ.।

गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवन्तु । यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति ताः मेघपरिचिताः कथं प्रसन्ना भवन्तीति सङ्क्षेपार्थः ।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकःस एव महोत्सवः ।। २५८ ।।

अत्रेन्दुकलादयो यं प्रति पस्पशप्रायाः स एव चन्द्रिकात्वमुत्कर्षार्थमारोपयतीति व्याहतत्वम् ।

'कृतमनुमतम्' इत्यादि । अत्र अर्जुनार्जुनेति भवद्भिरिति चोक्ते

कमलाकरी

मधुररसयुता शृङ्गारादियुता च बहुमार्गाऽनेकप्रकाराऽनेकपथा च । इयं सरस्वती वाणी प्रवाहवती नदी गङ्गा च । 'सरस्वती नदीभेदे भूवाग्देवतयोरपि । स्त्रीरत्ने चापगायाञ्च' इति विश्वः । परिमलं चमत्कारं सुखञ्च वहति वहति करोति । घनं निविडं परिचिता अभ्यस्ता मेघैश्छन्नाश्च ता एता महतां कवीनां सूर्यादीनाञ्च रुचयः कवीच्छाः दीप्तयश्च, महाकाव्यमेव व्योम गगनं तत्र केन प्रसादं नैर्मल्यं यातु, न केनापीत्यर्थः ।

अत्र दार्ष्टान्तिके काव्येऽर्थमाह - अत्रेति । रूपकेण सूर्यप्रभापक्षेऽर्थमाह- यासामिति । यासां सूर्यकान्तीनां मध्ये गङ्गा सुरनदी वहति । मेघच्छन्नास्ता न केनापि प्रसादं यान्ति तथा कविगिरोऽपि इच्छानुरूपं प्रसादं न प्राप्नुवन्तीति कष्टमित्यर्थः ।

व्याहतत्वमपकृष्टस्योत्कृष्टत्वम् तदाह - जगतीति । माधवोक्तिः । ये नवेन्दुकलादयो जयिन्नः जयशीला मनो मोहयन्ति ते ते प्रकृतिमधुराः स्वभावसुन्दराः जगति प्रसिद्धाः भावाश्चन्द्रादयः सन्त्येव । मम तु लोचनयोश्चन्द्रिकेयं मालती नेत्रगोचरं यत् प्राप्ता, अयमेव जन्मन्येकोऽनुपमो महोत्सवः । अत्रेन्दुकलादयो यं माधवं प्रति अप्रशस्यप्रायाः असारभूताः स माधव एव मालत्याः उत्कर्षं चन्द्रिकात्वेन वदतीति व्याघातमाह - अत्रेति । हेयोपादेयत्वविरोधो दोषबीजम् ।

अर्थोक्तमुक्तमपुष्टं शब्दोक्तं पुनरुक्तम् । तत्पदार्थवाक्यार्थभेदाद् द्विविधम् । तत्रान्त्यमाह-कृतमिति । अत्र वेणीसंवरणेऽर्जुन न युक्तम्

सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः । यथा वा-

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णाऽलं सम्भ्रमेण व्रज कृप समरं मुञ्च हार्दिक्यशङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ।। २६० ।।

अत्र चतुर्थपादवाक्यार्थः पुनरुक्तः ।

भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव ।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम् ।। २६१ ।।

अत्र मातङ्गस्य प्राङ्निर्देशो युक्तः ।

कमलाकरी

ईदृशो मम तातस्य सुतशोकभ्रान्त्या न्यस्तशस्त्रस्य केशाकर्षणरूपः पराभव इति चूर्णिकान्तेऽयं श्लोकः । इदं द्रोणगुरुवधरूपं पातकमुद्यतशस्त्रैर्भवद्भिर्मनुजैरेव पशुभिर्यैर्भवद्भिः निर्मर्यादैः पार्थाद्यैः[1] कृतं कृष्णाद्यैरनुमतमन्यैर्द्रष्टम् । नरकरिपुः कृष्णस्तेन सह भीमार्जुनसहितानां रक्तवसामांसैरयं विख्यातोऽऽहं दिशां बलिं करोमि । अत्र चूर्णिकायां भवद्भिरिति चोक्तेः पौनरुक्तयमाह- अत्रेति ।

आद्यमाह - अस्त्रज्वालेति । अश्वत्थामोक्तिः-अस्त्राण्येव ज्वालास्ताभिर्व्याप्तो यः शत्रुसैन्यमेव जलधिस्तस्यान्तर्मध्ये और्वायमाणे बडवानलतुल्ये सर्वधनुर्द्धराणां गुरौ मम पितरि द्रोणाचार्ये सेनापतौ स्थिते सति । हे कर्ण, सम्भ्रमेण भयेनालम् । मा कुर्वित्यर्थः । हे कृप युद्धं व्रज । हे हार्दिक्य, कृपवर्मन् शङ्कां त्रासं मुञ्च । यतश्चापयुते ताते द्रोणे रणधुरं वहति सति भयं कुत्र, नैवेत्यर्थः । अत्र कर्णालं सम्भ्रमेणेत्यादिना तुर्यपादः पुनरुक्त इत्याह - अत्रेति । वैयर्थ्ये वैमुख्यं दोषबीजम् ।

दुष्क्रमं लोकशास्त्रविरुद्धं क्रमम् । तदाह- भूपालेति । हे भूपाल, रत्नान्नां निर्दैन्यं ससम्भ्रमं यत् प्रदानं तेन प्रसिद्धकीर्ते मेऽश्वं गजं वा देहीति । अत्र गजस्योत्कृष्टत्वज्ञानान्मौर्ख्यं दोषः । यत्र गजा सुलभाः तत्र न दोषः, तेनानित्योऽयम् ।

ग्राम्यम् । "स ग्राम्योऽर्थो नीरसादिः पामरैर्यत्र कथ्यते ।
वैदग्ध्यविक्रमबलं हित्वैवं वनितादिषुः ।।" इत्युक्तलक्षणम् ।

---

१. पार्थादिभिः-अ.।

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं -

किमपैति ते

तदपि साम्प्रतमाहर कूर्परं त्वरितमूरुमुदञ्चय -

कुञ्चितम् ।। २६२ ।।

एषोऽविदग्धः ।

मार्त्सर्यमुत्सार्येत्यादि ।। २६३ ।।

अत्र प्रकरणाद्यभावे सन्देहः शान्तशृङ्गार्यन्यतराभिधाने निश्चयः ।

गृहीतं येनासीः परिभवभयान्नोचितमपि

प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।

परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयात्

कमलाकरी

तदाह । स्वपितीति । वेश्यां प्रति कस्यचिदुक्तिः । अयं भवल्लक्षणो जनो यावत् स्वपिति निद्राति तावदहं स्वपिमि । स्वापो रतोद्योगः । तथापि साम्प्रतम् राणकमाह 'गृहाण कूर्परमिति' पाठे जङ्घां दर्शयेत्यर्थः । सङ्कुचितमूरूं त्वरितं प्रसारय । एष इति । एष नायकोऽविदग्धः पामरस्तेन ग्राम्यत्वम् । विटविदूषकादौ न दोषस्तेनानित्यः ।

सन्दिग्धमाह-मात्सर्यमिति । अत्र प्रकरणाद्यभावे शान्तशृङ्गार्योः सन्देहः। प्रकरणाद्वक्तृवशाब्दार्थनिश्चयेऽयं दोषः । निर्हेतुराकाङ्क्षादि शून्यस्तमाहगृहीतमिति । द्रोणे हते अश्वत्थामोक्तिः । हे शस्त्र, ब्राह्मणस्य नोचितमपि परिभवभयाद् येन गृहीतासीः । यस्य द्रोणस्य प्रभावाच्च तव कश्चिदविषयो नाऽभूत् । निषेधार्थ-नकारसमासो नैकधेतिवत् । हे शस्त्र तेनाचार्येण त्वमश्वत्थामा हत इति मिथ्या श्रुत्वा । मच्छोकात् परित्यक्तमसि भयान्न तु । अतोऽहमपि यतः यत्र भवते स्वस्ति तत्र विमोक्ष्ये । 'नमःस्वस्ती' (अ.) ती चतुर्थी । अत्र स्वस्य शस्त्रविमोचने द्रोणस्य शोक इव हेतुर्नोक्त इत्याह- अत्रेति-पितुः शस्त्रत्यागश्च न शब्देन हेतुरुक्तः । ननु हेतुःप्रतीयते न वा । आद्ये दोषाभावः अन्त्ये दोषाकाङ्क्षत्वम् । नैवं हेत्वपेक्षायां निर्हेतुत्वं तदन्यापेक्षायां साकाङ्क्षत्वम् । एकस्य परेणान्वये साकाङ्क्षत्वमनुपादाने निर्हेतुत्वमित्यन्ये । प्रतीत्यभावो दोषबीजम् । अपक्षेपाद् बाधे त्वदोषः, तेनानित्यः ।

विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ।। २६४ ।।

अत्र द्वितीय-शस्त्रविमोचने हेतुर्नोपात्तः ।

इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम् ।
इदं तद्दुसाध्याक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ।। २६५ ।।

अत्र कामस्य चक्रं लोकेऽप्रसिद्धम् । यथा वा-

कमलाकरी

लोकशास्त्रप्रसिद्धिविरुद्धमाह- इदन्ते इति । हे पद्मभयदायिमुखे, एतस्मिन् कङ्कणे हेम्नः कटकमिति यद्धियं धत्से धारयसि, इदं ते केनोक्तं कथय । नैतत् कटकं किन्तु सुमनोभुवा दुःखेन साधयितुं शक्याः दुःसाध्याः प्रबलाः पुरुषास्तेषामाक्रमणे वशीकारे परमास्त्रं तव करमूले प्रीत्या निहितम् ।

अत्र कामस्य चक्रमप्रसिद्धमित्याह -अत्रेति ।

अन्यदप्याह - उपेति । हे अध्वगाः । पान्थ्याः गोदावर्याः वरिसरः । 'पर्यन्तभूः परिसरः' (अ,२।१।१४) इत्यमरः । तत्समीपे सरणिं मार्गं त्यजत । अन्यो मार्गो भवद्भिः दृश्यताम् । हि यत् इहमार्गे हताशया कयापि रक्ताशोकः पादपद्मघातेनोत्पन्ननवाङ्कुरवेष्टनः कृतोऽस्ति । स्वस्य तदप्राप्त्या दुःखाधिक्याद् हताशोक्तिः । अन्येषामपि स्त्रीविरहदुःखकातर्यमात्मवत् सम्भाव्य हतोक्तः । वरं तादृशस्यादर्शनमेव येन कान्तास्मृतिदुःखमपि न स्यादित्यर्थः । अत्र कान्तापादाघातात् पुष्पोद्गमो द्रष्टो नाङ्कुरोद्गमः । अतोऽप्रसिद्धमित्यर्थः ।

क्वचिदप्रसिद्धिमदोषमाह - सुसितेति । हे नृप कदापि कौमुदीमहसि चन्द्रज्योत्स्नायां श्वेतवस्त्रालङ्कारयुतायां सुदृशि अभिसारिण्यां स्वैरं गृहं यान्त्यां विधुश्चन्दोऽन्तंगतोऽभूत, तदनु तदन्तरं भवतस्तव कीर्तिः केनाप्यगीयत, येन त्वत्कीर्तिप्रकाशनेन सा निर्भयं कान्तगृहमगात् । अतः क्व कस्मिन् देशे काले वा शुभदो नासि, अपि तु सर्वत्रेत्यर्थः । प्रकाशत्वं मूर्ते प्रसिद्धममूर्तायां कीर्तात्वप्रसिद्धमपि कविप्रसिद्धेर्न दुष्टमित्याह-अत्रेति ।

उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरवेक्ष्यताम् ।
इहं हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥ २६६ ॥

अत्र पादाघातेनाशोकस्य पुष्पोद्गमः कविषु प्रसिद्धो न पुनरङ्कुरोद्गमः ।

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः ॥ २६७ ॥

अत्रामूर्तापि कीर्तिः ज्योत्स्नावत्प्रकाशरूपा कथितेति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टम् ।

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च श्रृणोति च ॥ २६८ ॥

अत्र ग्रहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रेण विरुद्धम् ।

कमलाकरी

शास्त्रविरुद्धमाह- सदेति । बुधः पण्डितः सदा रात्रौ स्नात्वा सर्वंदिनं शास्त्राणि व्याचष्टे शृणोति च । शास्त्रे हि 'रात्रौ स्नानं न कुर्वीत राहोरन्यत्र दर्शनात्' इति निषिद्धमित्याह-ग्रहेति । अत्रैवान्यदाह- अनन्येति । यस्य भुजबलमतुलं दृश्यते तस्य सा प्रसिद्धा 'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' इति षाड्गुण्यस्यानुसृतिर्निष्फलेति सिद्ध[१]म् । एतदर्थं शास्त्रेण विरुद्धमित्यनुषङ्गः । समर्थं प्रत्येव षाड्गुण्योपदेशादित्यर्थः ।

कामशास्त्रविरुद्धमाह - विधायेति । अङ्गना कामचिह्नम् । अनङ्गाङ्गदमिति पाठे कामपुष्टिदम् । केयूरमङ्गदं दूरे कृत्वा कान्तेन कृतां नखक्षतिं दधार । कामशास्त्रे केयूरस्थाने नखक्षतं न प्रसिद्धमित्याह केयूरेति । "कक्षा-कसेरू-जघन-स्तन-पृष्ठपार्श्व-हृत्कन्धरासू नखराः

---

१. सत्यम् -ब.।

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ।
षाङ्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना ।। २६९ ।।

एतदर्थशास्त्रेण ।

विधाय दूरे केयूरमनङ्गाङ्गणमङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम् ।। २७० ।।

अत्र केयूरपदे नखक्षतं न विहितमिति, एतत्कामशास्त्रेण ।

अष्टाङ्गयोगपरिशीलनकीलनेन
दुःसाध्यसिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेक -
ख्यातिं समाधि धनमौलिमणिर्विमुक्तः ।। २७१ ।।

अत्र विवेकख्यातिस्ततः सम्प्रज्ञातसमाधिः पश्चादसम्प्रज्ञातस्ततो मुक्तिः न तु विवेकख्यातौ । एतद् योगशास्त्रेण ।

एवं विद्यान्तरैरपि विरुद्धमुदाहार्यम् ।

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ।। २७२ ।।

अत्र ततः किमिति न नवीकृतम् । तत्तु यथा

कमलाकरी

करवेगयों स्युः । अप्य[१]न्ययोर्नवरते कलहे च शान्ते पुष्पोद्‌गमे प्रवसने विरहे च योज्याः ।।" इत्युक्तेरित्यर्थः ।

योगशास्त्रविरुद्धमाह - अष्टाङ्गेति । यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधयोऽष्टाङ्गानि यस्य स योगश्चित्तवृत्तिनिरोधः । तस्य परिशीलनमभ्यासस्तस्य कीलनं स्थिरीकरणं तेन दुःसाध्या दुष्प्राप्या सिद्धिर्मोक्षरूपा तस्याः सविधं निकटस्थमसम्प्रज्ञातयोगं विदूरे कुर्वन् । इष्टां विवेकख्यातिं

---

१. अप्यन्वयो-अ.।

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव -
सतामविषादिता ।। २७३ ।।
यत्रानुल्लिखितार्थमेव निखिलं निर्माणमेतद्विधेः
उत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा ।
याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत् सम्पद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ।। २७४ ।।

अत्र 'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति सनियमत्वं वाच्यम् ।

कमलाकरी

प्रकृतिपुरुषयोर्भेदज्ञानं प्राप्नुवन् कश्चित् समाधिधनानां योगिनां मौलिमणिश्चूडामणिः कश्चिदधुना विमुक्त इत्यर्थः ।

अत्र योगशास्त्रविरो[१]धमाह -विवेकेति । आदौ विवेकख्यातिः तत अविद्यास्मितादियुक्तः सम्प्रज्ञातयोगः, ततः परमवैराग्यज्ञान-जन्योऽन्तःकरण[२] वृत्तियोगजन्योऽसम्प्रज्ञातयोगस्ततो- मुक्तिरिति हि योगशास्त्रे क्रमः । न तु विवेकख्यातौ मुक्तिरित्यनुषङ्गः तेन तद्विरुद्धमित्यर्थः ।

एवं सङ्गीतादिविरुद्धं ज्ञेयमित्याह-एवमिति । यथा माघे 'रणद्भिराघट्टनया नभस्वतः' (शि.व.१) इत्यत्र सप्तस्वराणां क्रमेणोत्पत्तेः स्वरसन्धिरूपमूर्च्छनानां यं स्फुटीभावः सः शास्त्रविरुद्धः । एवमेव नैषधे-'पूर्वन्त्वहो शेषमशेषमन्त्यम्' (नै.च.३१) इत्याज्ये शेषभक्ष्यः' मीमांसयैव भगवत्यमृतांशुमौला' वित्यत्र निरीश्वरत्वञ्च मीमासाशास्त्र विरुद्धम् ।

पर्यायेणोक्तं नवीकृतं यद्यत्र न तदनवीकृतम् । तदाह- प्राप्ता श्रिय, इति । सर्वकामदाः श्रियः प्राप्ताश्चेच्छत्रूणां मूर्ध्नि पदं न्यस्तञ्चेत् सुहृदो धनैस्तोषिताश्चेत् देहैराकल्पं स्थितं जीवितञ्चेत् ततस्तेन किम् । सर्वस्य विनाशित्वादिति वैराग्ये भर्तृहरिः । तदुक्तम् 'संसृतेःपरिणामित्वादाविरञ्च्यादमङ्गलम्' इति । अत्र 'ततः

---

१. विरुद्ध-अ.क.
२. निवृत्तियोग - ब. ।

वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः ।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
स्वच्छेऽन्तर्मानसेऽस्मिन् कथमवनिपते -
तेऽम्बुपानाभिलाषः ।। २७५ ।।

अत्र शोण एव इति नियमो न वाच्यः ।

कमलाकरी

किमित्येकशब्दस्यासकृदित्युक्तेर्दोष इत्याह- अत्रेति । अत्र वाक्यभेदान्न कथितपदेऽन्तर्भावः, तस्यैकवाक्यनिष्ठत्वात् । अत्र सहृदयोद्वेगो दोषबीजम् । पर्यायोक्तौ तु नवीकृतमित्याह- तत्त्विति । यदीति सतामविषादिता धीरता प्रकृतिः स्वभाव एव । तत्र त्रयो दृष्टान्ताः-अग्निश्चेत् दहति किमाश्चर्यम् । यदि च गिरिषु गौरवं गुरुत्वं ततः किम्। जलधेर्जलं हि सदैव क्षारं नाहार्यम्। यथा अत्र किमद्भुतम्। ततः किं पर्यायशब्दान्नवीकरणाददोष इत्यर्थः ।

सनियमानियम विशेषाविशेषपरिवृत्ता इत्यत्र परिवृत्तपदस्य चतुर्भिः प्रत्येकमन्वयः । तेन सनियमात् परिवृतो विपर्यस्तः। अनियमात् विशेषात् अविशेषाच्च निपर्यस्त इति चत्वारोऽर्थदोषाः । तत्राद्यमाह- यत्रेति । यत्र चिन्तामणौ विधेः । सृष्टुरप्यनुल्लिखितोऽज्ञातोऽर्थः फळं यस्य ।'आख्यमिति पाठेऽज्ञातनामकं ब्रह्मणाप्यनिर्वाच्यम् । एतन्निर्माणं सृष्टिः य उपादानादिकं विना क्षणात् सर्वं सृजतीत्यर्थः । यत्र चोत्कर्षस्य प्रतियोगी प्रतिसम्बन्धी सदृश इति यावत् । तत्कल्पनमपि परा न्यक्कारस्य धिक्कृतस्य काष्ठा । अनुपमत्वहानेरित्यर्थः । यस्य मणेः सम्पदः। प्राणिनां मनोगतीरुल्लङ्घ्य याताः । मनसाप्यचिन्त्यास्तस्य चिन्तामणेर्निधेराभासेन कान्तिसाम्येन भ्रमेण वा । अमणय एव मणित्वेन कल्पिताः येऽश्मानः काचादयस्तेषु मध्येऽश्मत्वमेवोचितम् । येन सर्वसाम्येन प्राकृतमणिमध्येऽपि गणना भवत्यन्यथा साऽपि दुर्लभेत्याशयः ।

अत्रेतर-मणीनां गुणव्यवच्छेदेन निन्दातिशयप्रतीतेतेस्तस्य छायामात्रेण मणयो न वस्तुत इत्येवकारेण मात्रपदेन वा गम्यत्वात् सनियममर्हमित्याह- अत्रेति । आभासवाच्यच्छायातः परं मात्रापदेन सनियमत्वं वाच्यं ततो विपर्यस्तमिदं दुष्टम् । न चैवकारात् तत्सिद्धिः,

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैः
मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोपलानां श्रियम् ।
चन्द्रं चूर्णयत क्षणाच्च क्रमशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दश दिशस्तद्वक्त्रमुद्राङ्किताः ।। २७६ ।।

अत्र ज्यौत्स्नीमिति श्यामाविशेषो वाच्यः ।

कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकरालय मावमंस्थाः ।
किं कौस्तुभेन विहितो भवतो न नाम
याञ्चा-प्रसारित करः पुरुषोत्तमोऽपि ।। २७७ ।।

अत्र 'एकेन किं न विहितो भवतः स नाम' इति सामान्यं वाच्यम् ।

कमलाकरी

तस्यापदस्थत्वात् । न च मणीकृतेति च्विप्रत्ययात्तल्लाभः यस्यामणित्वाभासस्तस्य बाधाभावात् । बाधे वा विवेकग्रहे निन्दाभावात् । तेन यैर्भ्रान्तैश्छायामात्रेणाश्मनो मणीकृतः न तद्गुणयोगात्तान् प्रति चिन्तामणेरश्मत्वमेवोचितमिति कवेरुक्तिरिति वयम् ।

अनियमविपर्यस्तमाह - वक्त्रेति । हे भूपते, सरस्वती वाणी नदी च ते मुखपद्ममधितिष्ठिति । तेऽधर ओष्ठ शोणोऽ रुणो नदश्च । रामवीर्यस्य विरोधात् स्मृतिकरणे समर्थस्तेन दक्षिणसमुद्रबन्धनात् ते दक्षिणो बाहुः समुद्रः मुद्रायुतो जलधिश्च । एता वाहिन्यः सेना नद्यश्च क्षणमपि त्वत्समीपं नैव त्यजन्ति । अन्तः स्वच्छे [१]स्मिँस्ते मानसे चित्ते सरसि चाम्बुपानाभिलाषः कथमस्ति । जलात्मके पिपासायोगादित्यर्थः । अत्र शोण एवेत्यत्र श्वेतकृष्णादिव्यवच्छेदेन कुष्ठाद्यसभ्यार्थप्रतीतेरनियम एव युक्तस्ततो विपर्यस्तमित्याह-अत्रेति ।

विशेषविपर्यस्तं तृतीयं भेदमाह - श्यामामिति । विरहिण्या सखीं प्रत्युक्तिः । भो सख्यः सान्द्रैर्घनैः मसीनां कूर्चकैः कर्दमैः तूलिकाभिर्वा श्यामां कुष्णपक्षरात्रि श्यामलत्वमानयत । अथ मन्त्रं तन्त्रं वा

१. स्वस्थेऽस्मिँस्तेऽ मानसे-अ.।

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभो प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षश्च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नञ्च जगत्पतिर्दशमुखो देवः कथं मृष्यते ।। २७८ ।।

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षति । नहि परस्येत्यनेन सम्बन्धो योग्यः ।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लक्ष्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ।। २७९।।

अत्र 'स्याच्चेदेष न रावणः' इत्यन्तमेव समाप्यम् ।

कमलाकरी

वैद्यकशास्त्रम् तदुक्तं भेषजं प्रयुज्य श्वेतपद्मानां श्रियं हरत । चन्द्रं शिलापट्टे कृत्वा क्षणेन कणशःचूर्णयत, येनाहं विरहिमोहकानामेषां नाशाद् दश दिशः कान्तायास्तस्या वक्त्रस्य मुद्राचिह्नं तेनाङ्किता द्रष्टुंशक्नोमि । अत्र शुक्लानां श्यामीकरणाच्छ्यामायाः श्यामीकरणयोगाज्ज्योत्स्नामितिविशेष[1]णानुक्तेर्विपर्यस्तमित्याह-अत्रेति ।

अविशेषे विशेषविपर्यस्तं चतुर्थमाह- कल्लोलेति । हे मकरालय समुद्र वीचिक्षिप्तपाषाणानां [2] कठोरप्रहारैरमूनि रत्नानि मावज्ञासीः । कौस्तुभेन तव याञ्चाप्रस्तरितकरः विष्णुरपि किं न कृतोऽपि तु कृत एव । अत्र कौस्तुभेनेति विशेषोक्तेरन्येषां तुच्छत्वं स्यादित्यविशेष एव सामान्यतो वाच्यस्तद्विपर्यस्तमिदमित्याहात्रेति ।

साकाङ्क्षमाहार्थित्वे इति- । सीतां प्रति रावणदूतवाक्यम् । प्रभोः रावणस्य कामुकत्वेनार्थित्वे प्रकटीकृतेऽपि फलप्राप्तिः सीतालाभो न प्रत्युत विपरीतं द्रुह्यन् खरादिवधेन द्रोहं कुर्वन् विरुद्धचरितो यज्ञरक्षणाद दाशरथिः रामस्त्वयाऽस्मत्कन्यारूपया अयुक्तः वियुक्तश्च ततोऽपि त्वं भ्रष्टैव । तेन जगत्पतिर्दशमुखः परस्य वैरिण उत्कर्षमात्मनः मानयशसो

---

१. विशेषानुक्ते-अ.।
२. पाषाणकठोर प्रहारै-अ.।

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा।
निशा शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता ।। २८० ।।

अत्र स्तुतादिभिरुत्कृष्टैः सहचरितैर्व्यसनमूर्खतयोर्निकृष्टयोर्भिन्नत्वम् ।

'लग्नं रागावृताङ्ग्या' ।। २८१ ।।

कमलाकरी

विस्त्रंसनं नाशम्। विभ्रंशनमिति वा पाठः । त्वद्रूपं स्त्रीरत्नञ्च कथं मृष्यते सहते । त्वद्दानात् त्रयं सोढुं न शक्त इत्यर्थः ।

अत्र स्त्रीरत्ने[१] वाञ्छयामर्षाभावान्नाक्षमा किन्तु तदुपेक्षायाम्। अतः उपेक्षितुमित्याकाङ्क्षितमित्याहात्रेति ।

ननु परस्य स्त्रीरत्नमित्यन्वयात्तत्रामर्षादक्षमा घटत एवेत्याह- न हीति । परस्यैवोत्कर्षेऽक्षमया परपदस्योत्कर्षान्वयोऽवश्यं वाच्यः । अत्राप्यन्वये आवृत्तिप्रसङ्गनैराकाङ्क्ष्याद् व्यवधानाच्च न सम्बन्धो योग्यः, आकाङ्क्षाभावादित्यर्थः । न चाभवन्मतयोगः उपेक्षितुं पदयोगस्यावश्यकत्वात्, नापि न्यूनपदं, तेन विनाप्यन्ययबोधात् नाप्यपदस्थपदं[२] तेनाप्यन्वयात्, नापि समाप्तपुनरात्तम[३]र्थासमाप्तेः अर्थासमा[४]प्त्या तु नित्यदोषोऽयमिति दिक् ।

अपदेऽस्थाने युक्तम् । तदाह-आज्ञेति । सीतास्वयम्बरे जनकवाक्यम्। यस्य रावणस्याज्ञा इन्द्रचूडामणिप्रीतिमती तस्य नम्रत्वात् शास्त्राण्येव नवमशीर्णं चक्षुः। भूतपतौ शिवे भक्तिः । लङ्केति दिव्या पुरी पदं वासस्थानम् । ब्रह्मावंशे उत्पत्तिः । तत्तस्मादहो आश्चर्यम् । ईदृग्वरो न लभ्यते यद्येष रावणो विद्रावको न स्यात, सर्वे गुणाः सर्वत्र क्व, नैवेत्यर्थः । अत्र न रावण इति दुर्जनत्वे उक्ते क्व पुनरिति तत्समाधानाभावादस्थाने उक्तमित्याह- अत्रेति । समाप्यं न त्वग्रे वाच्यमित्यर्थः ।

---

१. स्त्रीरत्नवाञ्छया-अ.।
२. नान्यपदस्थ पदान्तेनाप्यन्व-अ.।
३. मर्थापरिसमाप्ते,-अ.।
४. समाप्तेस्तु अनित्य-क,अ.।

इत्यत्र 'विदितं तेऽस्त्वित्यनेन श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते ।

प्रयत्नपरिबोधितः श्रुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निस्सोसकम् ।
इयं परिसमाप्यते रणकथाद्य दोःशालिनां-
मपैतु रिपुकाननातिगुरुरद्य भारो भुवः ।। २८२ ।।

अत्र 'शयितः प्रयत्नेन बोध्यसे' इति विधेयम् ।

यथा वा-

वाताहारतया जगद्विषधरैराश्वास्य निश्शेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः ।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ।। २८३ ।।

कमलाकरी

सहचरेषु भिन्नं विजातीयम् । तदाह -श्रुतेनेति । श्रुतेन बुद्धिः अलङ्क्रियते इति सर्वत्र स[1]म्बन्धः। व्यसनेन द्यूतादिना मूर्खता मदेन नारी जलेन नदी । चन्द्रेण रात्रिः समाधिना धर्मचिन्तया धृति धैर्यं नीत्या राजत्वञ्चालङ्क्रियते । अत्र श्रुतादिभिरुत्कृष्टैः सह[2]चरितैः अपकृष्टानां व्यसनादीनां भिन्नत्वं विजातीयत्वं दोषमाह- अत्रेति । दोषबीजन्तु द्वयोरुपादेयत्वमनुपादेयत्वं वाऽ तो नित्यदोषः ।

प्रकाशितविरुद्धमाह- लग्नमिति । लग्नं रागावृताङ्ग्येत्यत्र पूर्वाक्ते गर्भिते 'विदितं तेऽस्त्विति लक्ष्मीवाक्ये ततः श्रीरपसरतीति विरुद्धप्रकाशनं दोष इत्यर्थः । न चेदं विरुद्धमतिकृद् शब्दार्थशक्तिमूलत्वेन भेदात् ।

विद्धययुक्तं विध्यनुवादविरुद्धम् । तदाह - प्रयत्नेति । दुर्योधनं प्रति अश्वत्थामोक्तिः । अद्य स्तुतिभिः प्रयत्नेन परिबोधितस्त्वं निशां व्याप्य सर्वां रात्रिं वा । अत्यन्तसंयोगे द्वितीया । शेषे रात्रौ सुखं स्वपिषि । अद्याकेशवमकृष्णमपाण्डवमसोमकञ्च भुवनं करिष्यामि । सोमकाः पाञ्चालाः- पाण्डवभिन्नसोमवंशो वा । अद्य बाहुशालिनां

---

१. अन्वयः-अ.।
२. सह पठितैः-अ.।

अत्र वाताहारादित्रयं व्युत्क्रमेण वाच्यम् ।

अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
सरोहंसोत्तंस प्रचलदलनीलोत्पलसखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ।। २८४ ।।

अत्र 'विरहिप्राणदमन' इति नानुवाद्यम् ।

लग्नं रागावृताङ्ग्येत्यादि ।। २८५ ।।

अत्र 'विदितं तेऽस्तु' इत्युपसंहतोऽपि तेनेत्यादिना पुनरुपात्तः ।

कमलाकरी

राज्ञामियं रणकथा समाप्यते । अत्र भुवः वैरिकाननमेव गुरु भारः अपैतु गच्छतु । अत्र वैरिनाशात् शयनं बोधनञ्च विधेयम् । तद्विरुद्धमुक्तमित्याह -अत्रेति ।

एवं शाब्दं विध्यनुवादविरोधमुक्त्वाऽर्थमाह- यथा वेति । वाताहारेति । सर्पैर्वायुभक्षकतया जगदाश्वास्य फूत्कृत्य च जगद् भक्षितम् । मेघजलबिन्दु तीव्रव्रतैर्मयूरैपि ग्रस्ताः । क्रूरमृगचर्मव्यसनैर्व्याधैस्तेमयूरा अपि क्षयं नीताः । वाताहारत्वादिव्रतं जगद्भक्षणादिकर्तुं ससर्पाद्यैः कृतमिति दम्भस्य स्फुरितं चेष्टितं जानन्नपि जाल्मो मूर्खो जनः । 'जाल्मोऽसमीक्ष्यकारी स्यात्' इत्यमरः । दाम्भिकेष्वेव गुणान् पश्यति न सत्सु । अत्राजिन-धारिवन्याहारादब्भक्ष्यस्ततो वायुभक्ष्य इत्युत्तरोत्तरं व्रतोत्कर्षादब्भक्ष्येणातारतम्यं प्रतिलोमं वक्तुमर्हमित्याह-अत्रेति ।

अत्र जगद्भक्षयितुं सर्पानशितुं मयूरान् भक्षयितुञ्चेत्युदिश्य स[१]र्पैः बर्हिभिर्व्याधैश्च वाताहारत्वं जलव्रतञ्चर्मवसनञ्चाश्रितमिति विधेयम् । तदभावाद्विध्यनुवादविरोध इत्यर्थः ।

अनुवादायोगमाह - अरे रामेति । विरहिवाक्यम् । अरे हे कान्ताकरभूषण भसला भृङ्गास्तेषां श्रेण्याः शरण रक्षक । कामलीलासु उद्दीपकत्वाल्लज्जाशमन वियोगिप्राणनाशक सरोहंसशिरोभूषण । प्रचलानि पत्राणि यस्य । हे सखे नीलोत्पल , अहं सखेदोऽस्मि । मोहं दूरे कुरु । चन्द्रमुखी क्वाऽस्तीति कथय ।

---

१. सर्व्वैः-अ.

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथास्य जायते पातो न तथा पुनरुन्नतिः ।। २८५ ।।

अत्र पुँव्यञ्जनस्यापि प्रतीतिः । यत्रैको दोषः प्रदर्शितसत्र दोषान्तराण्यपि सन्ति तथापि तेषां तथा प्रकृतत्वात् प्रकाशनं न कृतम् ।

कमलाकरी

अत्र सखे कथय क्वेन्दुवदनेत्युक्तेर्विरहिप्राणदमनाप्राप्तेस्तदनुवादो न युक्त इत्याह-अत्रेति ।

त्यक्तं पर्याप्तं पुनः स्वीकृतमुपात्तं वाक्यान्तरे, समाप्तपुनरात्तन्तु एक वाक्ये इति भेदः । तदाह-लग्नमित्यादि । पूर्वोक्ते गर्भिते 'विदितं तेऽस्तु' इत्युपसंहारेण समाप्तोऽपि तेनास्मि दत्तेति पुनः स्वीकृत इत्यर्थः । व्रीडाश्लीलमाह-हन्तुमेवेति । हन्तुं हिंसितुं जघने प्रहर्तुञ्च प्रवृत्तस्य स्तब्धस्यानम्रस्य दृढ़स्य चाविवरं दूषणं स्त्रीयोनिश्च तदिच्छोः आशु शीघ्रं यथा ऽपकर्षः रेतःपातात् सङ्कोचश्च जायते तथा पुनरुत्कर्षः दृढता च नेत्यर्थः।

अत्र पुँव्यञ्जनप्रतीतेरश्लीलत्वमाह अत्रेति । अत्र दोषोदाहरणेषु अयोगव्यवच्छेदमात्रमपेक्षितं न त्वन्ययोगव्यवच्छेद इत्याह -यद्यपीति । 'अनङ्गमङ्गलगृहेत्यादौ कार्तार्थ्यमिति श्रुतिकटुत्वमुक्तम् । स्मरमन्दिरं योनिप्रतीतेःअश्लीलत्वमप्यसिततत्सङ्करापत्तेर्नोक्तमित्यर्थः।

अथोक्तदोषाणां क्वचिददोषत्वं वक्तुमर्थदोषेष्वपुष्टार्थे[१] तदाह-कर्णावतंसेत्यादि । कर्णावतंसकर्णकुण्डलादिपदे कर्ण, भूषणेऽवतंसादिप्रयोगात् कर्णपदमपुष्टार्थम् । तत्र पादे कर्णादिध्वनेः कर्णादिशब्दस्य निर्मितिरुच्चारणं सन्निधानं स्थितिस्तद्बोधार्थम् । दूरस्थेऽप्यवतंसादिप्रयोगात् कर्णादिपदं कर्णस्थित्यैवोत्कर्षात्तद्भानार्थ-मित्याह-अवतंसादीनि इति। तदाह - अस्या इति। अस्याः कर्णावतंसेन सर्वं भूषणं जितम् । अस्याः कर्णकुण्डलं तथैव सर्वभूषणोपरि शोभते ।

शब्दान्तरेऽप्याह - अपूर्वेति । अपूर्वः उत्कृष्टः मधुरो य आमोदः सुगन्धस्तेन प्रमोदिता दिशो यैस्तैः भृङ्गैर्मुखराः शिरोभूषणशोभिनः पुरूषाः आययुः । अत्र कर्णश्रवणशिरःशब्दाः तत्सन्निधानं स्थितिस्तत्-प्रतीत्यर्थाः।

---

१. कर्णभूषणावंसादिप्रयो-अ.।

कर्णावतंसादिपदे कर्णादि-ध्वनिनिर्मिति ।

सन्निधानादिबोधार्थम्-

अवतंसादीनि कर्णाभरणान्येवोच्यन्ते, तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये । यथा-

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ।। २८७ ।।

अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः ।। २८८ ।।

अत्र कर्ण-श्रवण-शिर-शब्दाः सन्निधानप्रतीत्यर्थाः ।

विदीर्णाभिमुखारातिकराले सङ्गरान्तरे ।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव ।। २८९ ।।

अत्र धनुःशब्दः आरूढत्वावगतये । अन्यत्र तु-

ज्याबन्धनिस्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा-
प्रसादात् ।। २९० ।।

इत्यत्र केवलो ज्याशब्दः ।

कमलाकरी

अन्यत्रापि तदर्थतामाह – विदीर्णेति । हे राजन्, विक्षतसम्मुखशत्रु भीषणे युद्धमध्ये धनुर्ज्याघातचिह्नेन तव भुजेन हृषितम् ।

अत्र धनुर्ग्रहणं ज्याया आरोपितत्वार्थम् । अतो नापुष्टा[१]र्थं न वाच्यार्थमित्याह – अत्रेति । यत्र तु नारूढत्वमर्हं तत्र केवल एव ज्याशब्दो युक्त इत्याह –अन्यत्रेति । ज्याबन्धेति । यस्य कार्तवीर्यस्य बन्दीगृहे ज्याबन्धस्थिरभुजेन निःश्वासयुतमुखपङ्क्तिना रावणेन स्थितम् । अत्र भुजबन्धार्थं ह्यनारुढैव ज्या युक्तेति न धनुः शब्द इत्यर्थः ।

अन्यत्राप्याह – प्राणेश्वरेति । स्तनद्वयं कर्तृ भर्तुरालिङ्गनविलासज्ञानैः शोभना मुक्ताहारेण हसतीव ।

---

१. नापुष्टार्थेन वाच्यार्थ-अ.।

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ।। २९१ ।।

अत्र मुक्तानामन्यरत्नामिश्रितत्वबोधनाय मुक्ताशब्दः ।

सौन्दर्यसम्पत्तारुण्यं यस्यास्ते ते च विभ्रमाः ।
षट्पदान् पुष्पमालेव कान्नाकर्षति सा सखे ।। २९२ ।।

अत्रोत्कृष्टपुष्पविषये पुष्पशब्दः निरुपपदो हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते ।

स्थितेष्वेतत् समर्थनम् ।। ५८ ।।

न खलु कर्णावतंसादिवज्जघनकाञ्चीत्यादि क्रियते ।

जगाद मधुरां वाचं विशदाक्षरशालिनीम् ।। २९३ ।।

इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थप्रतीतिसिद्धौ गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं किञ्चित्प्रयोगः कार्यः इति न युक्तम् । युक्तत्वे वा-

चरणत्रपरित्राणरहिताभ्यामपि द्रुतम् ।
पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते ।। २९४ ।।

इत्युदाहार्यम् ।

कमलाकरी

अत्र माणिक्यादिरत्नान्तरव्युदासार्थं मुक्ताशब्दः । मिश्रे ह्रासायोगादित्याह-अत्रेति । अन्यत्राप्याह-सौन्दर्येति । हे सखे, यस्यास्तारुण्यमेव सौन्दर्यसम्पत् ते विभ्रमास्त एव । सा कान्ता भृङ्गान् पुष्पमालेव कर्षति । मालया पुष्पमात्रलाभेऽपि निर्गन्धैर्मृगाकर्षणायोगादुत्कृष्टपरः पुष्पशब्द इत्याह - अत्रेति । ननु रत्नमालेत्यादिप्रयोगात् पुष्पशब्दोऽन्ययोगव्यवच्छेदार्थकः कुतो नेति इत्यत आह-' निरुपपदो हीति । रत्नोपपदवशात् केवलः रत्नशब्दः रत्नमयीपरः इत्यर्थः । तत्वन्तु-'सकीचकैः' करिकलभेत्यादौ विशिष्टवाचकपदानां विशेषणपदसन्निधाने विशेष्यमात्रपरत्वं महाकविप्रयोगाज्ज्ञेयमित्याह-स्थितेष्विति । अनादिना प्रयोगाच्च नातिप्रसङ्ग इत्याह-न खल्विति ।

वामनालङ्कारमतं दूषयितुमाह -जगादेति । जगादेत्यनेन गतार्थस्यापि वाचमितिविशेष्यस्य मधुरविशदादिविशेषणदानार्थं क्वचित् प्रयोग इति यदुक्तं तन्न युक्तम् । तत्र हेतुः-क्रियेति । "जगाद्

ख्यातेऽर्थे निर्हेतोरदुष्टता ।

यथा-

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां -
प्रीतिमवाय लक्ष्मीः ।। २९५ ।।

अत्र रात्रौ पद्मस्य सङ्कोचः दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति 'न भुङ्क्ते 'इति हेतुं नापेक्षते ।

अनुकरणे तु सर्वेषाम् ।

सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणाम् । यथा -

मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम् ।
पश्यैष च गवित्याह सुत्रामाणं यजेति च ।। २९६ ।।

वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणाः क्वचित् -
क्वचिन्नोभौः ।। ५९ ।।

वक्त्रप्रतिपाद्य व्यङ्ग्य-वाच्यप्रकरणादीनां महिम्नाऽपि क्वचिद् गुणः, क्वचिन्न दोषो न गुणः । तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च रौद्रादौ च रसे व्यङ्ग्ये कष्टत्वं गुणः । क्रमेणोदाहरणम् -

कमलाकरी

मधुरं विद्वान् विशदाक्षरशालि चे" त्येवं क्रियाविशेषणत्वेऽऽपि विवक्षितार्थसिद्धेर्विशे [1] षणपददानवैयर्थ्यादित्यर्थः । विशेषणार्थं विशेष्यप्रयोगाग्रहेऽपि नेदमुदाहरणमित्याह-युक्तत्वे चेति ।

चरणेति - । चरणौ त्रायत इति चरणत्रमुपानत् तेन यद् र [2] क्षणं तद्रहिताभ्यामपि पदाभ्यां शीघ्रं दूरं मार्गं गच्छन्नपि न खिद्यते । अत्र यानादिनापि मार्गे गतिसम्भवात् पद्भ्यामित्यवश्यं वाच्यम् । तद्विशेषणार्थं चरणत्रेत्यादि वक्तव्यम् । न चात्रक्रियाविशेषणत्वसम्भवः, न च परित्राणरहितोऽपि इति कर्तृविशेषणत्वात् तत्सम्भवः- पादगतत्राणाभावस्य कर्तृगतत्वेऽर्थपोषाभावातुः तेनेदमुदाहार्यं न पूर्वमित्यर्थः ।

१. विशेषणदानवैयर्थ्या -ब।
२. द्रविणं -अ.।

दीधीङ्वेवीङ्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।
क्विप् प्रत्ययनिभः कश्चिद् यत्र सन्निहिते न ते ।। २९७ ।।
यदा त्वामहमद्राक्षं पदविद्याविशारदम् ।
उपाध्यायं तदास्मार्षं समस्प्राक्षञ्च सम्मदम् ।। २९८ ।।
अन्नप्रोतबृहत्कपालनलक-क्रूर-क्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभार-भैरव-वपुर्दर्पोद्धतं धावति ।। २९९ ।

कमलाकरी

अथः निर्हेतोरदुष्टत्वमार्यावृत्तेनाह - ख्यातेऽर्थे इति । तदाह यथेति । चन्द्रं गतेति । कुमारसम्भवे । चपला लक्ष्मीश्चन्द्रगता सती पद्मगुणान्न भुङ्क्ते पद्माश्रिता चन्द्रशोभां न भुङ्क्ते । गौरीमुखन्तु प्राप्य द्विसंस्थां प्रीतिं प्रापत् । अत्र चन्द्रगुणाभावे रात्रौ पद्मसङ्कोचो हेतुः पद्मे चन्द्रगताया अभावे दिने चन्द्रबिम्बायत्तत्वं हेतुः । असावुक्तोऽप्यदोषः लोकप्रसिद्धत्वादित्याह-अत्रेति । न भुङ्क्ते इत्यत्र भोगाभावे कुत इति हेतुर्नापेक्षते इत्यर्थः । क्वचित् सर्वेऽप्यदोष इत्याह- अनुकरणे त्विति । अदुष्टतेत्यनुषङ्गः । परशब्दानुकारे सर्वेषामदुष्टतेत्याह - श्रुतीति । मृगेति -मृगचक्षुषमद्राक्षमिति श्रुतिकटु । गौरितिवक्तव्ये गविति विभक्तिं विना च्युतसंस्कृति । सुत्रामाणमिन्द्रमित्यप्रयुक्तम् । यजेऽ हमिति वाच्ये प्रैषोऽपि च्युतसंस्कृतिरिति चत्वारोऽपि अनुकरणत्याददोषाः इति । अथ वक्तृवाच्यादिवशाद्दोषस्याप्यदोषत्वंभक्तिं[१] गुणत्वञ्चाह- वक्त्राद्यौचित्येति । क्वचिदुभौ न दोषोऽपि न गुणोऽपि नेत्यर्थः । आदिपदार्थं[२] वदन् श्लोकं व्याचष्टे-वक्त्रिति ।

वक्तुर्दोषाभावमाह - दीधीङिति । कश्चिदभाग्यः दीधीङ् दीधिदेवनयोर्वेवीङ् वेतिना तुल्यः इत्यनयोर्धात्वोः समः तुल्यः । गुणानामौदार्यादीनां वृद्धीनां समृद्धीनां भाजनं स्थानं न । तावपि हि धातू गुणस्यातदेङां वृद्धेरादेचाञ्च स्थानं न 'दीधीवेवीटाम्' (अ.१।१।६) इति निषेधात् । क्वचित् क्ङित् ककारङकारावित्संज्ञकौ यस्य सः

---

१. मुक्तं गुणत्व-अ. ।
२. शब्दार्थ - ब. ।

वाच्यवशाद्यथा-

मातङ्गा किमु वल्गितैः किमफलैराडम्बरैः जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूराः न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारे पुरः
सिन्धुध्वानिनि हुङ्कृते स्फुरति यत्तद्गर्जितं गर्जितम् ।। ३०० ।।

अत्र सिंहे वाच्ये परुषाः शब्दाः । प्रकरणवशाद्यथा-

कमलाकरी

प्रत्ययस्तत्सदृशः यत्र सन्निहिते सति ते गुणवृद्धी न स्तः । 'क्विप् प्रत्यय इति पाठेऽपि क्विपि परे, तेन गुणवृद्धी न भवतः । ' क्ङिति च' (अ.१।१।५) इति निषेधात् , क्विपः कित्वात् । यथा-' वेरपृक्तस्य' (अ.६।१।६७) इति क्विपः सर्वस्य लोपस्तथा यत्र प्रदेशे सन्निहितेन समीप[1]स्थितेन ते तव सर्वलोप इति सुबुद्धिमिश्राः ।

वैयाकरणे श्रोतरि दोषाभावमाह - पदेति । पदानां सुप्तिङन्तानां विद्याचातुरी तस्यां निपुणत्वं यदाद्राक्षं द्रष्टवानस्मि तदोपाध्याय महमस्मार्षं स्मृतवान् सम्पदं श्रियम् । सम्मदमिति पाठे हर्षञ्चास्राक्षं स्रष्टवान् प्राप्तवानित्यर्थः । यथा वा रामं प्रति भार्गवः-

"अद्राक्षं नृपवृक्षकान् परशुनाऽधाक्षं प्रतापानलैः
रक्ता क्षत्रभटास्तु पङ्किलभरैः क्षेत्रञ्च शाखीहलैः ।
आवासं बहुकीर्तिबीजमथयत्तत्रैधिता च स्तृणप्राया -
नुच्छिदितानि कीर्तिरथ मे गङ्गा-दिगन्तानपि ।।"

अत्र वैयाकरणे वीर[2]से वा न दोषः प्रत्युत गुणः ज्ञानातिशयेनातिशयहर्षात् ।

रौद्ररसे व्यङ्ग्येऽप्यदोषमाह- अन्त्रप्रोतेति । ताटका- वर्णनम् । अन्त्रैः प्रोतानि स्थूलानि बृहन्ति महान्ति च यानि कपालानि शिरोस्थीनि नलकानि जङ्घास्थीनि च कपाले नलकास्थीनि इत्यन्ये । तेषां क्रूरं कठोरं क्वणन्ति । सशब्दानि यानि कङ्कणानि वलयानि तत्प्रायाणि प्रेङ्खितानि चञ्चलानि ग्रैवेयाङ्गदादीनि तेषां रवैर्घोषैरम्बरमाकाशमाघोषयन्ती प्रतिशब्दितं कुर्वाणा । पूर्वं पीतं पश्चाच्छर्दितं वान्तं यद्रक्तं तदेव कर्दम-

---

१. समीपस्थेन-ब.।
२. वीररसवानदोषः-अ.।

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासङ्घट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ।। ३०१ ।।

अत्र शिरोधूननेन कुपितस्य वचसि ।

कमलाकरी

स्तेन घनो व्याप्तो य प्राग्भा[१]गः पूर्वकायो हृदयं तत्र घोरं भीषणमुल्ललन्तौ नृत्यन्तौ व्यालोलौ चपलौ स्तनौ तयोभरिण भैरवं वपुर्यस्या सा सगर्वं श्रीरामाभिमुखं ताटका धावतीत्यर्थः । अत्र रौद्रे श्रुतिकटुत्वं गुण इत्यर्थः ।

वाच्येऽप्यदोषमाह - मातङ्गा इति । हे गजाः बृंहितैः किम्, हे जम्बुकाः श्रृगालाः व्यर्थैः कदर्थैः किम्, हे सारङ्गा मृगा महिषश्च मदं गर्वं कि व्रजथ । शून्यस्थाने के शूरा न अपि तु सर्वे । क्रोधसम्भ्रमोच्छ्रितबहुलकेसराग्रस्येभारेः सिंहस्य समुद्रध्वानिनि सशब्दे हुङ्कारे पुरोऽग्रे स्फुरति शोभमाने सति तस्य पुरो यद्गर्जितं तदेव गर्जितं नान्यदित्यर्थः । अत्र वाच्ये पतिपाद्यार्थे सिंहे वीररसोचिताः परुषाः शब्दाः न दोषः इत्याह-अत्रेति ।

प्रकरणाददोषत्वमाह - रक्तेति । हे रक्ताशोक , सा कृशोदरी अनुक्तं जनं मां त्यक्त्वा कुत्र गता । नो दृष्टेति वायुकम्पितं शिरो वृथैव किं चालयसि । उत्कण्ठया घटमानाः संयताः ये भृङ्गाः तेषां घटा समूहः तत्सङ्घट्टो दृढ़बन्धस्तेन दष्टानि खण्डितानि पत्राणि यस्य सोऽयं भवतः पुष्पोद्गमः तत्पदाघातं विना कुतः स्यात् ।

अत्र विरहिणाः प्रकृताशोकशिरोधूननात् क्रुद्धस्योक्तौ श्रुतिकटुत्वं न दोष इत्यर्थः ।

क्वचिन्नोभाविति व्याचष्टे- क्वचिदिति । शीर्णेति । मयूरशतके सूर्यस्तुतिः । विशीर्णनासापादहस्तान् व्रणयुक्तैरपघनैरङ्गैरूपलक्षितान् । अपघनोऽङ्गमिति निपातः । घर्घरोऽप्रकटस्वरो येषां तानघौघैः पापरोगैः दीर्घाघ्रातान् दूरमाक्रान्तात् । उल्लाघयन्नरोगीकुर्वन् यः सूर्यः पुनर्घटयति समीकरोति । 'उल्लाघो निर्गतो गदादिति' विश्वः । अन्तर्मनसि द्विगुणा

---

१. प्राग्भारः-अ ।

क्वचिन्नीरसे न गुणो न दोषः । यथा-

शीर्णघ्राणांघ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोणान्
दीर्घाघ्रातानघोघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽ न्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते
र्दत्तार्धाः सिद्धसङ्घैर्विदधतु घृणयः -
शीघ्रमंहोविधातम् ।। ३०२ ।।

अप्रयुक्त-निहितार्थौ श्लेषादावदुष्टौ । यथा-

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरो हर इति स्तुत्यञ्च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ।। ३०३ ।।

कमलाकरी

घना निविडा या घृणा दया तस्याः निघ्ना अधीना । 'अधीनो निघ्न आयतः' अ. ३।१।१६) इत्यमरः । निर्विघ्ना ऽकुण्ठा वा वृत्तिर्यस्य दयापरवशस्येत्यर्थः । तस्य घर्मांशोः सूर्यस्य । सिद्धानां नारदादीनां समूहैः दत्तार्ध्याः घृणयः किरणाः शीघ्रं दुरतिनाशं कुर्वन्तु । अत्र सूर्यरतिपरे रसाभावाच्छब्दपारुष्यं न दोषो न गुण इत्यर्थः ।

श्लेष-यमकादावप्रयुक्तनिहतार्थयोरदोषत्वमाह - येनेति । सः सर्वप्रदो माधवः श्रीकान्तः उमाधवो गौरीशश्च सर्वदा वः पायात् । सःकः-अभवेन जन्मशून्येन येन बालकृष्णेन अनः शकटं ध्वस्तं पादेन क्षिप्तम् । बलिनो दैत्यान् वा जयतीदृशः कायः पुरा पूर्वं स्त्रीकृतो नारीकृतः अमृतापहारे श्रीविष्णुः स्त्रीरूपेण दैत्यानमूमुहदिति पुराणे प्रसिद्धम् । हरपक्षे-ध्वस्तकामेन येन कलिर्जितो विष्णोःकायः पूर्वं त्रिपुरदाहेऽस्त्रीकृतः शरीकृतः, यश्चोद्वृत्तभुजङ्गं कालियं हतवान् । 'इष्टेति पाठे इष्टः प्रियः । भुजङ्गहा गरुडो यस्य रवे वेणुनादे लयः प्रीतिर्यस्य यद्वा भुजङ्गस्य कालियस्य हा इति रवस्तत्र लयः प्रीतिर्यस्य । यश्चागं गिरिं गोवर्द्धनं गां पृथ्वीञ्च करेण दंष्ट्रया वाऽधारयत् । हरपक्षे-भुजङ्गा वासुक्यादयः एव हारो वलयानि यस्या शिरसा गङ्गाञ्चा धारयत् । यो बर्हिपत्रप्रिय इति पाठे मयूरपिच्छभूषणः कृष्णः । हरपक्षे बर्ही मयूरः पत्रं वाहनं यस्य सः स्कन्दः प्रियो यस्य। अमरा देवा यस्य विष्णोः स्तुत्यं

अत्र माधवपक्षे शशिमद् - अन्धकक्षयशब्दौ अप्रयुक्तनिहतार्थौ ।

अश्लीलं क्वचिद्गुणः । यथा सुरतारम्भगोष्ठ्याम् । 'द्व्यर्थै पदैः पिशुनयेच्च रहस्यवस्तु'' इति कामशास्त्रस्थितौ-

करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ।। ३०४ ।।

शमकथासु च -

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरमेः कस्य जायते ।। ३०५ ।।

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्थाः
भवन्तु कुरुराजसुताः सभृत्याः ।। ३०६ ।।

कमलाकरी

नाम । शशिनं मथ्नातीति शशिमद्राहुस्तस्य शिरोहरः शीर्षच्छेत्तेत्यर्थः । हरपक्षेऽमरा यस्य शिरः शशिमत् चन्द्रधरं हर इति स्तुत्यं नाम चाहुः । अन्धका यादवास्तेषां क्षयं निवासं द्वारकायां करोतीति सः। अत्रान्धकक्षयशब्दश्च दैत्यनाशे दृष्टाः यादवगृहे निहतार्थोऽपि श्लेषत्वाददोषः इत्याह- अत्रेति ।

सुरतेऽश्लीलं गुणमाह- यथेति । वयस्यां सखीं प्रति द्व्यर्थैः श्लिष्टैः पदैः रहस्यं वस्तु योनिलिङ्गादि पिशुनयेत् सूचयेत् । स्थितौ गुणः इत्यनुषङ्गः ' तर्जन्यनामिकायोगे त्रिकोणं करिहस्तः' । 'तर्जन्यनामिके श्लिष्टे मध्या पृष्ठस्थिता तयोः । करिहस्त इति प्रोक्तः कामशास्त्रविशारदै "रित्युक्तेः । तद्वत्सम्बाधे सङ्कुचितेऽन्तर्मध्ये विलोलिते क्लेदिते पुंसां ध्वजो मेहनदण्डः । साधनं योनिस्तन्मध्ये उपविश्योपसर्पन् निस्ससरन् शोभते । अत्र यस्य कस्य पुंसो ध्वजः केतुर्गजशुण्डाभिः [१] सङ्कटे साधनान्तः सैन्यमध्ये प्रसरन् शोभते इति श्लिष्टैः पदैर्गोपनात् अश्लीलं गुणः, सुरते तदर्थमेव प्रवृत्तेः ।

शान्तिमार्गे ऽप्यदोषमाह-शमेति । कथास्वश्लीलं गुण

---

१. सः कण्ठे-अ.।

अत्र भाव्यमङ्गलसूचकम्।

सन्दिग्धमपि वाच्यमहिम्ना क्वचिन्नियतार्थप्रतीतिकृत्वेन व्याजस्तुतिपर्यवसायित्वे गुणः । यथा-

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्।। ३०७ ।।

प्रतिपाद्यप्रतिपादकयोः ज्ञत्वे सत्यप्रतीतत्वं गुणः । यथा-

आत्मारामाविहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद् विघटिततमोग्रन्थयः सत्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्।
तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम्।। ३०८ ।।

स्वयं वा परामर्शे यथा-

षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदिविनिहितरूपः सिद्धिस्तद्विद्वां यः ।

कमलाकरी

इत्यनुषङ्गः । उत्तानेति- उत्तान ऊर्ध्वपादः उच्छूनःसशोफो यो मण्डूको भेकः तस्य पाटितं विदारितं यदुदरं तत्तुल्ये क्लेदिनि आर्दे व्रणे योनिरूपे कृमिभिन्नस्य तस्य सक्तिरासक्तो जायते । व्रणे कृमेरेव संयोगो नान्यस्य सचेतस्येत्यर्थः ।

अमङ्गलं गुणमाह - निर्वाणेति । अरीणां प्रशमात् निर्वाणः शान्तो वैरमेव दहनोऽग्निर्येषां ते पाण्डवाः श्रीकृष्णेन सह नन्दन्तु । रक्ताः प्रसाधिताः भुव यैः क्षतविग्रहा गतकलहाः सभृत्याः कौरवदुर्योधनादयश्च स्वस्थाः- निश्चिन्ताः सन्त्विति वेणीसंवरणे सूत्रधारोक्तौ रुधिराक्तभूमयो हतशरीराश्च स्वस्थाः स्वर्गस्था भवन्त्विति अमङ्गलं शत्रुपरं भावि तत्सूचकं गुण इत्याह-अत्रेति ।

सन्दिग्धं क्वचिद्गुण इत्याह - सन्दिग्धमपीति । वाच्यसामर्थ्येन नियतस्यैकार्थस्य प्रतीतिं कृत्वैव व्याजेन स्तुतौ विश्रान्तेर्गुण इत्यर्थः ।

पृथुकार्तेति । हे देव राजन् सम्प्रत्यावयोः सदनं गृहं समं, साम्यं किमैश्वर्याद्दारिद्र्याद् वेति सन्देहे राजगृहे दारिद्र्याभावाद् विप्रगृहे च ऐश्वर्याभावाच्छ्लेषेण स्वनिन्दायां राज्ञः स्तुतौ च तात्पर्यम् । पृथूनि कार्तस्वरस्य सुवर्णस्य पात्राणि यत्र । पृथुकानां बालानामार्तस्वरस्य दैन्यरोदनध्वनेः स्थानञ्च । भूषितोऽलङ्कृतो निश्शेषः सर्वः परिजनो

अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ।। ३०९ ।।

अधम प्रकृत्युक्तिषु ग्राम्यत्वं गुणः । यथा-

फुल्लुक्करं कलमकूरसिंह वहंति
जे सिंघुवारविडवा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा
दे किं च मुद्धविअइल्लपसूणपुंजा ।। ३१० ।।

अत्र कलम-भक्तमहिषीः-दधिशब्दा ग्राम्या अपि विदूषकोक्तौ । न्यूनपदं क्वचिद्गुणः ।

कमलाकरी

यत्र । पक्षे-भुवि उषितो भूशायी निश्शेषोऽप्रावृतः परिजनो परिवारो यत्र । विलसन्तः करेणवो गजाः पक्षे वबयोरभेदात् बिलेषु रन्ध्रेषु सक्ता मूशकादयो रेणवश्च तैर्गहनं व्याप्तमिति स्तुतौ विश्रान्तेर्गुणत्वमित्यर्थः । अप्रतीतत्वं वक्तृश्रोत्रोर्विज्ञत्वे गुण इत्याह - प्रतिपाद्येति । आत्मारामा इत्यादि । आत्मन्यानन्दमये आरमते हृष्यतीत्यात्मारामा । विकल्पो भेदधीस्तच्छून्ये समाधावेकात्म्यज्ञानवति योगे विहितमतयः तत्प्रवणचित्ताः । 'रतय' इतिपाठे कृतप्रीतयः । ज्ञानस्योद्रेकादाधिक्यादखण्डाकारवृत्या नाशिताऽ विद्या वासनाः । सत्वं गुणो ब्रह्म वा तत्प्रधाना योगिनस्तमसां जडानां ज्योतिषां प्रकाशादीनां सूर्यादीनां वा परस्तात् परम् । 'न तत्र सूर्यो भाति न चन्द्रतारकाः' () इति श्रुतेः । 'यस्य भासा सर्वमिदं विभाति' ()इति श्रुतेः । चायं कमपि 'यतो वाचो निवर्तन्ते' इति श्रुतेश्चानिर्वचनीयगुणग्रामं पश्यति । तं मोहान्धोऽयं दुर्योधनः पुराणं देवं जगज्जन्मस्थितिप्रलयैः क्रीडन्तम् । दिवुक्रीडायां धातुः । श्रीकृष्णं देवं वेत्ति जानातीति भगवदनयाने तद्बन्धने च दुर्योधनं श्रुत्वा कुरुषु स्वविराटरूपप्रकटने सहदेवं प्रति भीमोक्तिः ।

अत्र वक्तृश्रोत्रोर्विज्ञ[१] त्वाद्योगशास्त्रस्थाः अप्रतीता अपि शब्दा गुणा इत्यर्थः ।

विज्ञस्य स्वयं वा सानन्दानुभवेऽप्रतीतत्वं गुण इत्याह- षडधिकेति । षडधिकाः दश षोडश नाडयस्ताश्च -"इडाच पिङ्गला चैव

१. विज्ञेयत्वा-अ.।

यथा -

गाढ़ालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना
विलीना न किम् ।। ३११ ।।

कृचिन्न गुणो न दोषः । यथा-

तिष्ठेत् कोपवशातू प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनः भावार्द्रमस्याः मनः ।
तां हर्तुं विवुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ।। ३१२ ।।

कमलाकरी

सुषुम्णा परमा मता । गान्धारी हस्तिजिह्वा च पूषा च सुयशा तथा । अलम्बुषा कुहूश्चैव शङ्खिनी दशमी मता । लोलजिह्वेभजिह्वा च विजया कामदा परा । अमृता बहुला नाम नाड्यो वायुसमीरिताः ।। ” इत्युक्तास्तासां चक्रं मण्डलं तन्मध्ये स्थित आत्मा स्वरूपं यस्य । हृदयविनिहितं ज्योतिः स्वरूपं यस्य तद्विदोऽणिमादिसिद्धिविदः। अचलमनोभिः स्थिरचित्तैः साधकैर्योगिभिःदृश्यमानः शक्तिभिर्ज्ञानेच्छाक्रियाशक्तिभिः परिणद्धो व्याप्तः । शक्तीनां तासामेव नाथः प्रयोक्ता पार्वतीशो वा जयति । ‘ शक्तयोऽस्य जगत् सर्वं शक्तिमांश्च महेश्वरः’ इत्यागममात्रप्रसिद्धे ऽपि स्वयं ज्ञातत्वाद्गुणत्वमित्यर्थः ।

नीचं प्रति ग्राम्यत्वं गुण इत्याह - अधमेति । फुल्लेति । पुष्पोत्करं कलमभक्तनिभं वहन्ति ये सिन्धुवारविटया मम बल्लभास्ते । ये गालितस्य महिषीदध्नः सदृक्षास्ते च मुग्धविचकिल्लप्रसूनपुञ्जाः ।। इति संस्कृतम् ।

कर्पूरमञ्जर्यां विदूषकोक्तिः । सिन्धुवारवृक्षस्य विटपाः पल्लवाः कलमो व्रीहिस्तस्य कूर ओदनस्तत्समं पुष्पोत्करं वहन्ति ते मम प्रियाः । ये च गालितं निर्जलं महिषीदधि तत्सदृशाः । मुग्धानि सुन्दराणि विचलितप्रसूनानि मालतीपुष्पाणि तत्पुञ्जास्ते च वल्लभा इत्यर्थः । अत्र कूरादिशब्दा ओदनादौ ग्राम्या अपि नृत्ये हास्यकारीनीचपात्रविदूषकौक्तौ गुणा इत्यर्थः ।

अत्र 'पिहिता' इत्यतोऽनन्तरं 'नैतद्यतः' इत्येतैर्न्यूनैः पदैर्विशेषबुद्धेरकरणात् न गुणः उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्ति पाधते इति न दोषः । अधिकपदं क्वचिद् गुणः । यथा-

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न न विदन्ति विदन्ति किन्तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति ।। ३१३ ।।

अत्र विदन्तीति द्वितीयमन्ययोगव्यवच्छेदपरम् ।

कमलाकरी

न्यूनपदत्वं सुरते न दोषो न वा तदभावमात्रं प्रत्युत गुण इत्याह-न्यूनेति । तदाह-गाढालिङ्गनेति । विरहिवाक्यम् । गाढालिङ्गनेन वामनीकृतौ खर्वौ कुचौ यस्याः सा चासौ प्रोद्गतरोमाञ्चा सान्द्रः प्रचुरो यः स्नेहे रसः प्रीति रागस्तस्यातिशयेन विगलच्छ्रीमति नग्रत्वाद् गौरे ऽम्बरं यस्याः । हे मानद स्त्रीमानप्रद यद्वा सपत्नीसमक्षं मानदः तस्याः मानखण्डकेति वा । यद्वा मा इति मां मा पीडय अति मामलमत्यर्थंमाघातं मा कुर्विति कथने क्षामाणि मन्दाक्षराणि तदुच्चारिणी देहाद्भेदे आद्यौ तर्कौ, अभेदेऽन्त्यौ । बाह्यव्यापारोपरमादाह -सुप्तेति । विश्वासाभावादाह -मृतेति । बहिः प्रीत्याभावादाह - मनसीति । किन्त्वित्यनुषङ्गः । जतुकाष्ठवत् संश्लेषो लयः । तत्रापि[1] पृथगुपालम्भादाह - विलीनेति । क्षीरनीरवत् मिश्रत्वमात्मैक्यं वा विलयः । अत्र मा मेत्यर्धोक्तिर्मेहनाघान्तकुचमर्दनगाढालिङ्गन दन्तक्षतकुचग्रहणादि-नानानिषेध्य-व्यङ्ग्यप्रतीतेर्निषेधवेशो विधि-रेषयते ऽथवा-तवैव युक्ता खलु वाचि वक्रता । विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदा करः' (नै.च.७।५०) इति रीत्या वक्रोक्त्या 'वैयात्यं सुरतेष्विव' (शि.व.२।४४) इति च माघोक्तौ च रसमेव पुष्णातीति महान् गुण इत्यर्थः ।

क्वचिदिति -न्यूनपदमित्यनुषङ्गः तदाह-तिष्ठेत् कोपेति । उर्वशीवियोगे पुरुरवसो वाक्यम् । प्रभावेन स्वसामर्थ्येन पिहिता

---

१. तत्रेति पृथ-अ.।

यथा वा-

वद वद जितः स शत्रुर्न हतो जल्पंश्चं तव तवास्मीति ।
चित्रं चित्रमरोदीद्धाहेति परं मृते पुत्रे ।। ३१४ ।।

इत्येवमादौ हर्षभयादियुक्ते वक्तरि ।

कथितपदं क्वचिद् गुणो- लाटानुप्रासे, अर्थान्तरसङ्क्रमितवाच्ये, विहितस्यानुवाद्यत्वे च । क्रमेणोदाहरणानि-

सितकर-कररुचिरविभा विभाकराकार धरणिधर कीर्तिः ।
पौरुष कमला कमला सापि तवैवास्ति नान्यस्य ।। ३१५ ।।

ताला जाअंति गुणा जाला दे सहिअएहिं घेप्पन्ति ।
रइकिरणाणुग्गहिआइ होन्ति कमलाइँ ।। ३१६ ।।

कमलाकरी

तिरोहिता सोर्वशी कोपवशात् तिष्ठेन्नैतद्युक्तं यत् सा दीर्घकालं न कुप्यति । स्वर्गीय स्वर्गं गन्तुम् । तुमुर्थाच्च भाववचनात्' (अ. २।३।१५) इति चतुर्थी । उत्पतितोड्डीना भवेत् । पुनस्त्वर्थो अस्या मनस्तु मयि भावार्द्रं सरसं रौक्ष्याभावान्नैतदपीत्यर्थः । बलात् केनचिन्नीता चेत्तत्राह-मे पुरोवर्तिनीमपरोक्षां तां दैत्या अपि हर्तुः न शक्ताः किमुताऽन्ये । सा चात्यन्तं नेत्रयोरविषयं परोक्षतां प्राप्तेति किमिदं दैवं विलक्षणमित्यर्थः । अत्र पिहितेत्यनन्तरं 'नैतद्यत' इति पदैर्न्यूनैरपि न दोषः । प्रत्युत गुणः दीर्घकोपाभावेऽपि पुनः शब्देन च वैलक्षण्योक्तेरन्यथा तद्वैयर्थ्यादनन्वयाच्च । नाप्यनुक्तौ दोष इत्याह - उत्तरेति । दीर्घकोपाभावेनैव पिहितेत्यस्य बाधान्नैतद्यत इति पदैर्विनापि तदभावप्रतीतेर्नानुक्तौ दोषः इत्यर्थः ।

अधिकपदं क्वचिद्गुणमाह -यद्वञ्चनेति । वञ्चने कृतबुद्धिः स्वकार्यपरः खलो जनः चा[१]टु प्रियगर्भं कृत्रिमं यद्वदति साधवस्तन्न जानन्ति इति न किन्तु जानन्त्येव । किन्त्वस्य खलस्याप्रणयं प्रणयाभावं विरोधं वृथा कर्तुं न शक्नुवन्तीत्यर्थः । वृथा स्नेहक्षतिरयुक्तेति भावः। अस्य स्नेहं वृथा कर्तुं न शक्नुवन्तीत्यन्ये तन्न अर्थापुष्टेः । अत्र नञ्द्वयेनैव

१. बहुचाटु-प्रियगर्भं-अ.।

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा -
हि सम्पदः ।। ३१७।।

पतत्प्रकर्षमपि क्वचिद्गुणः । यथा उदाहृते -
प्रागप्राप्तेत्यादौ ।। ३१८ ।।

समाप्तपुनरात्तं क्वचिन्न गुणो न दोषो यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणं, अपि तु वाक्यान्तरमेव क्रियते यथा अत्रैव 'प्रागप्राप्तेत्यादौ' ।। ३१९ ।।

अपदस्थसमासं क्वचिद्गुणः । यथा उदाहृते 'रक्ताशोक' इत्यादौ ।। ३२० ।।

कमलाकरी

वेदने सिद्धे द्वितीयं विद [१] न्तिपदमधिकमपि त एव जानन्ति नान्ये इत्यन्ययोगव्यवच्छेदे ज्ञानातिशयात् तथापि क्षान्तिरित्यतिशयाच्च गुण एवेत्याह-अत्रेति ।

अन्यत्रापि गुणमाह- यथावेति । वद वदेति । भीमं प्रत्यन्योक्तिः । सः शत्रुः क[२]र्णः जितो वद वद । उत्तरं तवास्मि तवास्मीति जल्पन् हतो न । किन्तु परं केवलं मृते पुत्रे स शत्रुश्चित्रं चित्रं नानाप्रकारं हाहे त्यरोदीत् । अत्र पादचतुष्टये हर्षादौ द्विरुक्तिःर्गुण इत्याह- एवमादा विति । गुणः इत्यनुषङ्गः । तथाहि -विस्मये च विवादे च दैन्ये कोपेऽवधारणे । प्रसाधने तथा हर्षे द्विस्त्रिरुक्तं न दुष्यती" त्युक्तेः ।

कथितपदस्य त्रिषु गुणत्वमाह- कथितेति । 'शाब्दस्तु लाटानुप्रास' इति वक्ष्यमाणे, अर्थान्तरसङ्क्रमितवाच्ये ध्वनौ, पूर्ववाक्ये विधेयस्योत्तरवाक्येऽनुवादे च कथितपदं गुणः ।

आद्यमाह- सितकरेति । हे विभाकर सूर्य राजन् धरणिधर नृप सितकरश्चन्द्रस्तस्य करवद्रुचिरा विभा शोभा यस्याः सा कीर्तिः पौरुषमेव कमलमाश्रयो यस्याः सा कमला लक्ष्मीश्च तवैवास्ति, अन्यस्य नेत्यर्थः । अत्रानुप्रासार्थं कथितमपि पदं गुण इत्यर्थः ।

द्वितीयमाह - ताला इत्यादि । "तदा जायन्ते गुणाः यदा ये

---

१. वदन्ति-अ ।
२. कर्षणः -अ.

गर्भितं तथैव यथा -

हुमि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि ।
सिवाणे वि तुमम्मि मज्झे पत्तिहि भक्ति ण -
पसुमरासि ।। ३२१ ।।

अत्र प्रतीहीति मध्ये दृढ़प्रत्ययोत्पादनाय । एवमन्यदपि लक्ष्याल्लक्ष्यम् ।

व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ।। ६० ।।
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।
अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः ।। ६१ ।।

कमलाकरी

सहृदयैर्गृह्यन्ते । रविकिरणानुग्रहीतानि भवनन्ति कमलानि कमलानि ।। इति संस्कृतम् । अत्र द्वितीयकमलापदं सौरभादिमत्वे सङ्क्रान्तं वाच्यं तेन कथितपदं गुण एवेत्यर्थः ।

तृतीयमाह - जितेन्द्रियत्वमिति । जितेन्द्रियत्वं विनयस्य कारणं तेन भवतीत्यर्थः । विनयाद् गुणोत्कर्षः प्राप्यते, गुणोत्कर्षेण जनोऽनुरक्तो भवति, जनानुरागाच्च सम्पदो भवन्ति ।। अत्र पूर्ववाक्ये जितेन्द्रियत्वें विनयो विहितः स एवोत्तरवाक्ये गुणप्रकर्षार्थं निमित्तत्वेन अनूद्यते । पदान्तरोक्तौ भेदावभासे कार[१] णमालाभङ्गापत्तेः । तेन कथितपदमपि विनयादिकं गुण इत्यर्थः ।

पतत्प्रकर्षं क्वचिद्गुणमाह - पतदिति । प्रागप्राप्तेत्यत्र येनानेन जगत्स्विति चतुर्थपादे गुरुभक्तौ क्रोधाभावात् कोमलपदैर्विनयो गुण इत्यर्थः ।

समाप्तपुनरात्तस्य गुणदोषाभावत्वमाह - यत्रेति । वाक्यान्तरारम्भेण पूर्ववाक्ये विशेषणत्वाभावस्तत्र न गुणो न दोष इत्यनुषङ्गः । यथात्रैवेति । येनानेनेति वाक्यान्तरत्वान्न पूर्ववाक्ये विशेषणत्वं तेन पूर्वत्र विशेषाभावान्न गुणः बाधाभावाच्च न दोष इत्यर्थः ।

अपदस्थसमासं गुणमाह - यथेति । 'रक्ताशोक कृशोदरी'

---

१. चरणमाला-अ.।

अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः ।
अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः ।। ६२ ।।

स्वशब्दोपादानं व्यभिचारिणो यथा-

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविरमयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ।। ३२२।।

कमलाकरी

त्यत्रश्रृङ्गारे टवर्गत्वदीर्घसमासावनुचितावापि शिरोधूननेन कोपोक्तौ गुण इत्यर्थः ।

गर्भितेऽपि गुणत्वमाह-गर्भितमिति । तथैव क्वचिद्गुण इत्यर्थः । तदाह - यथेति । भवाम्यपहस्तितरेखो ऽथ विवेकरहितोऽपि । स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्ति न प्रस्मरामि ।। इति संस्कृतम् । रिहहा इति पाठे रेखा मर्यादा । भ्रान्तोऽप्यहं त्वयि भक्ति न त्यक्ष्यामीति गुरूं प्रति शिष्योक्तिः । अत्र प्रतीही वाक्यं मध्यस्थं गर्भितमपि दृढ़विश्वासोत्पादनाय गुणः । एवं यमकादावनर्थकं प्रश्नोत्तरादौ च सङ्कीर्णं न दोष इत्युदाहरणद्वयमित्याह - एवमिति । तदुक्तम्-" यत्पादपूरणाद्यर्थमनर्थकमुदाहृतम् । अदोषत्वं विजानीयात्तस्यैव यमकादिषु । पर्यायेण द्वयोर्यत्र वाक्यं प्रश्नोत्तरादिषु । सङ्कीर्णन्तु न दोषाय वाक्यं वाक्यविदो विदुः ।।" इति । आद्यं यथा-

"योषितामतितरां नखलूनं गात्रमुज्ज्वलतया न खलूनम् " इत्यत्र न खलु शब्दो यमकार्थः । अन्त्यं यथा- "बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं " इत्यादि ।

अथ साक्षाद् रसदोषानाह - व्यभिचारीति । व्यभिचारिणो भावाः व्रीडादयः, रसाः शृङ्गारादयः, स्थायिभावाः रत्यादयः तेषां सामान्यतो विशेषतो वा स्वशब्दोक्तौ त्रयो दोषाः । आद्यमाह -सव्रीडेति । भर्तुर्मुखे सलज्जाः । गजचर्मणि सदयाः सर्पे सभयाः । चन्द्रे साश्चर्या गङ्गादर्शने सपत्नीत्वात् सकोपा कपालव्याप्ते उदरे दीना दुःखिता नवरतोत्सुका गौर्य्याः दृष्टिः वः शिवाय मङ्गलार्थमस्तु ।

अत्र व्रीडादीनां स्वशब्दोक्तेरास्वादाभावाद्दोषमाह-'.अत्रेति । करुणाविस्मययोः स्थायित्वेऽपि सृष्टीरितिवत् व्यभिचारित्वोक्तिः । युक्तं

अत्र वीडादीनां-

"व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे सोत्कण्ठा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे" इत्यादि तु युक्तम् ।

रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम् । क्रमेणोदाहरणम् ।

कमलाकरी

पाठमाह- व्यानम्रेत्यादि । कार्येण व्यङ्ग्यव्रीडाविधीश्चमत्करोतीति भावः ।

सामान्योक्तं द्वितीयं दोषमाह-रसस्येति । कामजये शकुनशोभां ईषदुच्चभुजमूले कुचसन्धौ दृष्टम् । लोचनमिति युक्तः पाठः । नेत्रोच्चतया कटाक्षोऽन्यथोत्तरार्धे पौनरुक्त्यम् । तां नेत्रयोः विषये कृतवासोऽस्याविच्छिन्न आनन्दोऽभूत् । अत्र रसस्य स्वशब्दोक्तेरास्वादाभावाद् दोषः ।

विशेषोक्तौ तमाह - आलोक्येति । कोमलगल्लाभिष[1]क्तैः रोमाञ्चैर्व्यक्तोऽनुरागस्तेन युतां रम्यां कान्तामालोक्य बाल्यमतिक्रम्य वर्त[2]मानः युवा शृङ्गारसीमनि खेलनं करोति । अत्र विशेषतः शृङ्गारस्य स्वशब्दोक्तेर्दोषः ।

तृतीयमाह - स्थायिन इति । सम्प्रहारे प्रहरणैः शस्त्रैर्ये प्रहारास्तेषां श्रुतिगतैः कर्णगतैर्झणत्कारैः शब्दैस्तस्य राज्ञः कोऽप्युत्साहोऽभूत् । उत्साहो वीरस्य स्थायी तस्य स्वशब्दोक्तिं दोषमाह-अत्रेति ।

विभा[3]वानुभावस्य कष्टकल्पनां चतुर्थं दोषमाह-कर्पूरधूलीति । कर्पूरपरागवद् धवलो यस्तेजः पूरस्तेन धौतं दिङ्मण्डलं येन तादृशे चन्द्रे सति लीलया शिरोंशुकस्य निवेशविशेषस्य क्लृप्तिः करणं तया व्यक्ता स्तनोन्नतिर्यस्याः यद्वा सा व्यक्ता स्तनोच्चतैव तस्य यूनः नेत्रभूमौ नेत्रगोचराऽभूत् ।

अत्रेति - उद्दीपनं चन्द्रं आलम्बनं कान्तादयो अंशुकनिवेश-

---

१. भिषिक्तो-अ।
२. वर्तमाने-अ।
३. विभावेनानुभावस्य-ब।

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत
रसो निरन्तरः ।। ३२३ ।।

आलोक्य कोमलकपोलतलाभिषिक्त
व्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैष बाल्यमतिवृत्य विवर्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति ।। ३२४ ।।

स्थायिनो यथा-

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ।। ३२५ ।।

अत्रोत्साहस्य ।

कर्पूरधूलिधवलद्युतिपूरधौत दिङ्मण्डले
शिशिररोचिषि तस्य यूनः ।
लीलाशिरोंऽशुकनिवेशाविशेषक्लृप्ति
व्यक्तस्तनोनतिरभून्नयनावनौ सा ।। ३२६ ।।

अत्रोद्दीपनालम्बनरूपाःशृङ्गारयोग्याविभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना ।

कमलाकरी

कुचव्यक्त्याद्यनुभावेषु पर्यवस्यति नास्वादे । अंशुकनिवेशचन्द्रादेः कुचव्यक्तिहेतुत्वात् । तत्वन्तु- नेत्रभूमेरालम्बनत्वात् न पुरुषे कश्चिदनुभाव उक्तस्तेन कष्टमित्यर्थः ।

अनुभावेन विभाव्यस्य कष्टत्वमाह - परिहरतीति । प्रीतिं दूरीकरोति बुद्धि च्छिनत्ति अत्यर्थं मुह्यति बहु लुठति चेति कष्टा दशा अस्य देहमभिभवति बत । वयं किं कुर्मः । अत्र रतिच्छेदाद्यनुभावानां करुणे भयानके च सत्वात् कान्तारूपविभावकल्पनात् कष्टमित्याह-अत्रेति ।

प्रतिकूल-विभावव्यभिचारिभावसङ्ग्रहं पञ्चमं दोषमाह-प्रसादे वर्तस्वेति । हे प्रिये प्रसादे वर्तस्व तोषं प्रकटय कोपंते चचः शुष्यन्त्यङ्गानि प्रत्यमृतमिव सिञ्चन्तु । सौख्यानां निधानं मुखं क्षणं सम्मुखं कुरु । हे मुग्धे, गतः कालहरिणः कालरूपो हरिणः प्रत्यागन्तुं न प्रभवति । अत्र

परिहरति रतिं मतिं लुनीते
स्खलति भृशं परिवर्तते च भूयः ।
इति बत विषमा दशाऽस्य देहं
परिभवति प्रसभं किमत्र कुर्मः ।। ३२७ ।।

अत्र रतिपरिहारादीनामनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः ।

प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षममभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ।। ३२८ ।।

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी उपात्तः ।

णिहुअरमणम्मि लोअणपहम्मि, पडिए गुरुअणमज्झम्मि ।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू ।। ३२९ ।।

कमलाकरी

शृङ्गारे विरुद्धस्य शान्तरसस्य गतः कालो नायातीत्यनित्यतोक्तिर्विभावस्तद्व्यङ्ग्यो निर्वेदश्च विरुद्ध इत्याह-अत्रेति ।

अथ विरुद्धानुभावसङ्ग्रहमाह - णिहुअ इति । निभृतरमणे लोचनापथे पतिते गुरुजनमध्ये । सकलपरिहारहृदया वनगमनमेवेच्छति वधूः ।। इति संस्कृतम् । निभृतरमणे गुप्तकामुके जारे गुरुणां मध्ये दृष्टे सर्वत्यागे मनो यस्या सा वधूस्तेन सह रतार्थं वनं गन्तुमेवेच्छतीत्यर्थः । अत्र सर्वत्यागो वनगमनञ्च शान्तरसस्यानुभावौ तयोः शृङ्गारे निर्देशो दोष इत्याह -अत्रेति । व्याजान्तरेण गमने तु न दोष इत्याह- इन्धनेति ।

बाध्यस्याङ्गस्य पुनः पुनर्दीप्तिः पुनरुक्तिर्नैकवाक्ये इति प्रबन्धं वक्तुं रतिप्रलापे करुणस्योक्तिर्दीप्तिः । तत्वन्तु-अङ्गिनोऽपि तथात्वे दोषः नियामकाभावात् ।

अकाण्डेऽप्रस्तावे प्रथनमुपक्रमः । यथा वेणीसंवरणे नाटकेऽनेकवीरमरणे प्रकान्ते दुर्योधनस्त्रिया भानुमत्या सह तस्य स्वप्ने सम्भोगादिवर्णनम् ।

अत्र सकलपरिहारवनगमने शान्तानुभावौ इन्धनाद्यानयनव्याजेनोपभोगार्थं वनगमनञ्चेत् न दोषः ।

दीप्तिः पुनः पुनर्यथा कुमारसम्भवे रतिविलापे ।

अकाण्डे प्रथनं यथा-वेणीसंहारे द्वितीयेऽङ्केऽनेकवीरसङ्क्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम् ।

अकाण्डे छेदो यथा वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोर्धाराधिरुढे वीररसे कङ्कणमोचनाय गच्छामीति राघवस्योक्तौ ।

अङ्गस्याप्रधानस्यातिविस्तरेण वर्णनं यथा हयग्रीववधे हयग्रीवस्य ।

अङ्गिनोऽननुसन्धानं यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकायाः विस्मृतिः ।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च वीररौद्रश्शृङ्गारशान्तरसप्रधाना धीरोदात्त-धीरोद्धत-धीरप्रशान्ताः उत्तमाधममध्याश्च ।

कमलाकरी

अकाण्डे विच्छेदमाह-च्छेद इति । रामभार्गवयोर्वीररसेऽतिप्रवृद्धे सति कङ्कणमोचनाय गच्छामीति रामोक्तौ विच्छेद इत्यनुषङ्गः । रसस्येति शेषः । यद्यपि पूर्वत्र विच्छेदोऽत्र च तत्सत्वं नियतं तथापि रसाभावे पूर्वं रसे त्विदमिति भेदः । तदुक्तम्-"अकाण्ड एव विच्छित्तिरकाण्डे प्रथमं तथा" इति ।

अङ्गस्यातिविस्तृतिमाह - अङ्गस्येति । हयग्रीवस्य दैत्यस्य वधे विष्णुर्नायकः प्रधानं, तत्राप्रधानस्य दैत्यस्यापि विस्तरेण वर्णनं दोष इत्यर्थः ।

अङ्गिनोऽननुसन्धानमाह - अङ्गिन इति । अङ्गिनः प्रधानस्यानिर्देशः । बाभ्रव्यागमने सागरिकायाः रत्नावल्याः प्रधानभूताया अनिर्देशः ।

प्रकृतिविपर्ययं वक्तुं प्रकृतिभेदानाह - प्रकृतय इति । प्रकृतयो नायकस्वभावाः । दिव्या हरादयः अदिव्या मानुषा माधवादयः,

रतिहास-शोकाद्भुतानि अदिव्योत्तमप्रकृतिवद् दिव्येष्वपि किन्तु रतिः सम्भोग शृङ्गाररूपा उत्तमदेवताविषया न कर्तव्या । तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम् ।

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ।। ३३० ।।

इत्युक्तवद् भ्रुकुट्यादिविकारवर्जितः क्रोधः सद्यः फलदः स्वर्गपातालगगनसमुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वेव ।

कमलाकरी

दिव्यादिव्याः कृष्णादयः । ते प्रत्येकं चतुर्धा- वीरप्रधानो धीरोदात्तः, रौद्रप्रधानो धीरोद्धतः, शृङ्गारप्रधानो धीरललितः, शान्तप्रधानो धीरप्रशान्तः, । एते सात्वत्यारभटी-कैशिकी-भारती-वृत्तिप्रधानाः तेऽप्युत्तममध्यमाधमभेदेन प्रत्येकं त्रिधा एवं द्वादश पूर्वैस्त्रिभिर्गुणिताः षट्त्रिंशद् भेदाः । तदुक्तम् - "महासत्वोऽतिगम्भीरः क्षमावानविकत्थनः । स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रत ।।" यथा-रामः । धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः' यथा - भार्गवभीमादयः । निश्चिन्तो धीरललितः कलाढयः सुसुखी मृदुः । यथा-विक्रमोदयनादयः । 'सामान्यगुणयुक्तश्च धीरशान्तो द्विजादिकः ।' यथा माधवादयः । एवं नायकानुक्तवा रसभावव्यवस्थामाह- तत्रेति । अदिव्येषूत्तमप्रकृतिषु नायकेषु यथा रतिहासशोकाद्भुतानि तद्वद्दिव्येष्वप्युत्तमेषु तानि ज्ञेयानि न मध्यमाधमेषु । दिव्येषु विशेषमाह-किन्त्विति । अदिव्यातिदेशेऽपि उत्तमदेवतापरा सम्भोगरूपा रतिर्न वर्णनीया । कुतो नेत्याह-तद्वर्णनं हीति । यथा-

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुत-पाणिपल्लवा ।
शीतलेन निरवाप तत्क्षणं मौलिचन्द्रशकलेन शूलिनः ।।
(कु. सं.८।१८) इत्यनुचितमित्यर्थः ।

दिव्येषु कथं वर्णनीयं तदाह -क्रोधमिति । कुमारे कामदाहप्रसंगे भ्रुकुटयादिविकारवर्जितः पूतनाशोष-कालियमर्दनादि सद्यः फलदः कोपः । पारिजातहरणादौ स्वर्गवर्णनं सान्दीपनेर्गुरोर्विप्रस्य च मृतपुत्रानयनार्थं श्रीकृष्णस्य च स्वर्गपातालगमन-समुद्रोल्लङ्घनादिकं दिव्येष्वेव वर्णनीयं नादिव्येष्वित्यर्थः ।

अदिव्येषु तु यावदवदाने प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यम् । अधिकन्तु निबध्यमानमसत्यप्रतिभासे 'नायकवद्वर्तितव्यं न प्रतिनायकवद् इत्युपदेशे न पर्यवस्येत् । दिव्यादिव्येषु तूभयथाऽपि । एवमुक्तस्यौचित्यस्य दिव्यादिव्यादीनामिव धीरोदात्तादीनामप्यन्यथावर्णनं विपर्ययः ।

तत्रभवन् भगवन्नित्युत्तमेन नाधमेन मुनिप्रभृतौ न राजादौ, भट्टारकेति नोत्तमेन राजादौ प्रकृतिविपर्ययापत्तेर्वाच्यम् । एवं देशकालवयोजात्यादीनां वेषव्यवहारादिकमुचितमेवो-

कमलाकरी

अदिव्येषु कथं वाच्यमत आह - अदिव्येष्विति । 'अवदानं कर्मवृत्तम् महत्कर्म '(अ. ३।२।३) इत्यमरः । यावत् पर्याप्तं योग्यं प्रसिद्धमुचितञ्च तावदेव वाच्यम् । अधिकन्तु बाध्याद्दोष इत्याह- अधिकन्त्विति । रामादिवद् वर्तितव्यं न रावणादिवदित्युपदेशं न कुर्यात् किन्तु सत्यत्वाद् बाध[१]मित्यर्थः ।

दिव्यादिव्येष्वाह -दिव्येष्विति । उभयानुरूपं वर्णनीयमित्यर्थः । एवं नायकानां प्रकतीरुक्त्वा तद्विपर्यये दोषमाह-एवमिति । एवमामन्त्रण[२] विपर्ययेऽपि दोषमाह-तत्रेति । अत्रेयं योजना-मुनिप्रभृतौ तत्रभवन्नित्युक्ते तेन द्विजेन वाच्यं नाधमेन शूद्रादिना तथा तत्रभवन्नित्यादि मुनिप्रभृतावेव वाच्यं न राजादौ, उत्तमेन राजादौ भट्टारकेति न वाच्यं किन्तु देवेति, अधमेन तु भट्टारकेति वाच्यमेव न मुन्यादावित्यर्थः ।

एवं देशादिविपर्ययेऽप्याह - एवमिति । यथा देवाङ्गनासु मानुषीवर्णनम् , वसन्ते मेघवर्णनम्, वृद्धे यूनां यूनि वृद्धानां चेष्टेति ।

अनङ्गस्याभिधानमाह - अनङ्गस्येति । अनङ्गपदव्याख्या- रसानुपकारकस्येति यावत् । यथा कर्पूरमञ्जर्यां नायिकया स्वसम्बन्धिनो वसन्तवर्णनमनादृत्य - "देवि, यथानिवेदितं बन्दिभिरित्यादिबन्दिवर्णितस्य राज्ञा प्रशंसनम् इत्यनुचितमित्यर्थ ।

---

१. बाध्याद्दोष इत्यर्थः-ब.
२. विरोधेऽपि - अ. ।

पनिवद्धव्यम् ।

अनङ्गस्य रसानुपकारस्य वर्णनं यथा-कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य वन्दिवर्णितस्य राज्ञा प्रशंसनमितीदृशा इति नायिकापादप्रहारादिना नायक कोपादिवर्णनम् । उक्तं हि ध्वनिकृता-

"अनौचित्याद्रते नान्यद्रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा ।।" इति ।

कमलाकरी

'रसे दोषाः स्युरीदृशाः' इत्यादावीदृशा इति व्याचष्टे- ईदृशा इति यथा नायिकापादाघातान्नायकस्य कोपोक्तिरनुचितेत्यादि ।

रसभङ्गाद्दोषे [१] सम्मतिमाह-उक्तं अनौचित्यादिति- प्रसिद्धस्यौचित्यस्य बन्ध एव रसस्य परा उपनिषद् रहस्यमित्यर्थः ।

अथ व्यभिचार्यादेः रचशब्दोक्तौ त्रयो दोषाः अनुभावेन विभावस्य तेन वा तस्य कल्पनमिति ।

दोषाणामदोषत्वमाह - न दोष इति । तदाह - यथेति । औत्सुक्येनेति नवे सङ्गमे रते औत्सुक्येन कृतत्वरा सहजया लज्जया निवृत्ता । तैःतैर्बन्धुजनस्य वचनैः पुनः साम्मुख्यं नीता, अग्रे वरं शिवं दृष्ट्वा जातभया जातरोमाञ्चा च हसता हरेणालिङ्गिता गौरी शिवाय मङ्गलाय भूयादित्यर्थः । अत्रौत्सुक्यस्य स्वशब्दोक्तावपि न दोषः इत्यर्थः । ननु नेत्रविकासादिनानुभावेनौत्सुक्यधीरस्तु किं स्वशब्देनात आह -अत्रेति । इच्छा त्वरालौल्याद्यनेकानुभावान्नियता नौत्सुक्यधीः भयादिनापि तत्सम्भवादतः स्वशब्दोक्तिरित्यर्थः ।

अनेकानुभावे स्वशब्दोक्तिर्दृष्टेत्याह - अतएवेति । अतो व्यभिचारादेवेत्यर्थः व्रीडाहर्षादीनां व्यभिचारिणां येऽनुभावा नेत्रविचलनस्फारणरूपत्वबाष्पपूर्णत्वादयस्तेषां यथा व्रीडादिव्यभिचारिबोधकत्वं तथा नेत्रप्रसारणादिरूपस्यौत्सुक्यानुभावस्य तथा बोधकस्वभावादुत्सुकमिति शब्देनोक्तं न तु दूरादुत्सुकमित्यनुभावेन बोधितमित्यर्थः ।

ननु व्यभिचारिणां वाच्यत्वेऽपि कथमास्वादस्तेषां सहत्वायोगात् । अत्राहुः - त्वरादेर्भयादिसाम्येप्यौत्सुक्यहेतुकत्वरादौ न भयधीः ।

---

१. दोषसम्मति-अ.।

इदानीं क्वचिददोषा अप्येत इत्युच्यन्ते -

न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित् ।

यथा-

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैबन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायाऽस्तु वः ।। ३३१।।

अत्रौत्सुक्यशब्द इव तदनुभावो न तथा प्रतीतिकृत्, अतएव 'दूरादुत्सुकमित्यादौ व्रीडाप्रेमाद्यनुभावानां विवलितत्वादीनामिवोत्सुकत्वानुभावस्य सहसा प्रसरणादिरूपस्य तथाप्रतिपपत्तिकारित्वाभावादुत्सुकमिति कृतम् ।

कमलाकरी

तच्छब्देन बाधात् । भयादिव्यावर्तकत्वाच्च न वैयर्थ्यम् । दूरादुत्सुकमित्यादौ विशिष्टस्यैवानुभावत्वमतः शब्दादुक्तिरिति ।

सञ्चार्यादेरिति - । व्यभिचार्यादिकं प्रकृतरसविरुद्धमपि यत्र वाच्यत्वेनोच्यते तत्र बाधेन प्रकृतरसस्यैवोज्जीवनात् प्राधान्यम् । अतो न दोषः किन्तु गुण इत्यर्थः । यावत् यत् इत्यर्थः ।

यथेति - ।'स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधा' वितिन्यायेन वितर्कौत्सुक्यादेर्बाधपुरःसरं चिन्तायामेव पर्यवसानात् प्रकृतरसस्य विप्रलम्भस्य पोषः इत्यर्थः ।

ननु ध्वनिकारेण बाध्यत्वाभावेऽपि विरुद्धयोः समावेशः उक्तोऽत आह -पाण्डु क्षाममिति । हे सखि, तव मुखं पाण्डु कृशञ्च हृदयं सरसं सखेदमलसं वपुश्च हृदन्ते हृदयमध्ये क्षेत्रं शरीरं तत्र भवं सर्वशारीरपीडाहेतुं क्षेत्रियं क्षेत्रान्तरेऽप्यसाध्यं यद्वा देहमध्ये भवं गर्भरूपं रोगं निवेदयति ।

अत्र पाण्डुत्वादयो रोगचिन्ताभ्यामपि सम्भवात् करुणविप्रलम्भसाधारणाः, अतो न कार्यवैलक्षण्यरूपो विरोधः । अतो ध्वनिकारो [१] क्तमयुक्तमित्यर्थः । यश्च तेनैव[२] क्वचिद्बाध्यत्वाभावेऽपि

---

१. कारोक्तमित्युक्तमित्यर्थः-अ.।
२. तेन क्वचि-अ.।

सञ्चार्यादेर्विरुद्धस्य बाध्यत्वोक्तिर्गुणावहा ।। ६३ ।।

बाध्यत्वेनोक्तिर्न परमदोषः यावत् प्रकृतरसपरिपोषकृत् । यथा-

'क्वाऽकार्यं शशलक्ष्मणः क्व च कुलम्'' इत्यादौ ।। ३३२ ।।

अत्र वितर्कादिषु उद्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः ।

पाण्डु क्षामं वदनं सरसं हृदयं तवालसञ्च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ।। ३३३ ।।

इत्यादौ साधारणत्वं पाण्डुत्वादीनामिति न विरुद्धम् ।

सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ।। ३३४ ।।

कमलाकरी

विरोधोऽङ्गीकृतः परिहृतश्च सोऽप्ययुक्त इत्याह-सत्यमिति । यद्वा विभावबाध्यत्वेऽप्यदोषमाह . -सत्यमिति । यद्वा विभावबाध्यत्वेऽप्यदोषमाह -सत्यमिति । कान्ता मनोरमा विभूतयो रम्या इति सत्यं किन्तु जीवितं यत्तत् कान्ताकटाक्षचञ्चलम् ।

अत्र पूर्वार्धे तावन्न विरोधः । शृङ्गारः विभावस्योत्तरार्धे शान्तविभावेन बाध्यत्वोक्तेरित्याह - अत्रेति । नाप्युत्तरार्धे इत्याह- जीवितेति । जीवितार्थं हि कान्तादयस्तस्मिंश्च[1] भङ्गुरे किन्तैरुपात्तैरिति फलत्वेन शान्ते विशान्तेर्गुणत्वं प्रसिद्धं यद्भङ्गुरत्वं तेन योपमानता तया निर्दिष्टकटाक्षस्यास्थिरत्वं कर्तृ शृङ्गारबाधेन शान्तमेव पुष्णाति । न ह्यत्र शृङ्गारस्य प्राधान्येन प्रतीतिस्तदङ्गस्य जीवितस्थैर्यादेःरप्रतीते । यद्वा अस्थैर्येण बाध्यस्य कान्तादेः कृष्णलेष्ववधातवच्छंरेषु कुशवच्छृङ्गारे ऽङ्गत्वाभाव इति वयम् । अतो विरोधाभासान्न दोषः इत्यर्थः । यच्च ध्वनिकारेण -

"विनेयानुन्मुखी कर्तुं काव्यशोभार्थमेव वा ।
तद्विरुद्धरसस्पर्शस्तदङ्गानां न दुष्यति ।।" (ध्व. ३।३०)

इति गुडजिह्विकया शिष्येषु शृङ्गारं प्रदर्श्य शान्तरसोक्तिः । काव्यशोभार्थमेव वेति पक्षद्वयमुक्तं तत्राद्यो नेत्याह- यत्त्विति । विनेयाः

---

१. यस्मिंश्च-अ.।

इत्यत्राद्यमर्थं वाच्यत्वेनैवोक्तम् । जीवितादप्यधिकमपाङ्गभङ्गस्यास्तित्वमिति प्रसिद्धभङ्गुरोपमानतयोपात्तं शान्तमेव पुष्पाति न पुनः शृङ्गारस्यात्र प्रतीतिस्तदङ्गाप्रतिपत्तेः । न तु विनेयोत्मुखीकरणमत्र परिहारः शान्तशृङ्गारयोर्नैरन्तर्यस्याभावात् । नापि काव्यशोभाकरणम्, रसान्तरादनुप्रासमात्राद्वा तथाभावात् ।

आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः ।
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ।। ६४ ।।

वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः । शान्तशृङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम् । यथा-नागानन्दे शान्तस्य जीमूतवाहनस्य 'अहो गीतमहो वादित्रम्' इत्युद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः ।

कमलाकरी

शिष्यास्तेषां साम्मुख्यं विरोधे परिहारो नेत्यर्थः । हेतुमाह-शान्तेति । नैरन्तर्ये हेतुमाह-शान्तेति । नैरन्तर्ये हि शृङ्गारः शान्तार्थत्वात् स्तुत्यर्थः स्यात् । न च मध्ये, विभूतिरम्यत्वेनासन्धिताविच्छेदे तद्युक्तमित्यर्थः । द्वितीयं निराचष्टे-नापीति । हेतुमाह रसान्तरेति । शान्तरसेनानुप्रासेन वा चारुत्वासम्भवादित्यर्थः ।

रसान्तरेण रसाविरोधमाह - आश्रयेति । द्वेधा हि रसानां विरोधः आश्रयैक्यान्नैरन्तर्याद् वा । तदभावोऽ र्धाभ्यामुच्यते । आद्ये हि वीरो न भीतः भीतश्च न वीर इति विरोधः एवं करुणेऽपि । तयोरेकाश्रयत्वे हन्तृहन्यमानगतत्वेन भिन्नाश्रयत्वं ज्ञेयम् इत्याह-वीरेति । प्रतिपक्षे वीरस्य हिंस्रयस्तद्गत[1]त्वेनाविरोधो ज्ञेयः । नैरन्तर्ये त्वविरोधि रसान्तरेण मध्ये विच्छेदादविरोधः कार्यः । तदुक्तम् -

"रसान्तरान्तरितयोरेकवाक्यस्थयोरपि ।
निवर्तते हि रसयोः समावेश-विरोधिता ।।" (ध्व.३।२७)

१. तद्गतत्वेन विरोधो-अ.।

न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्तते ।

यथा-

भूरेणुदिग्धान् नवपारिजातमालारजोवासितबाहुमध्याः ।
गाढं शिवाभिः परिभ्यमाणान् -
सुराङ्गनाश्लिष्टभुजान्तरालाः ।। ३३५ ।।
सशोणितैःक्रव्यभुजांस्फुरद्भिःपक्षैः खगानामुपवीज्यमानान् ।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः -
कल्पलतादुकूलैः ।। ३३६ ।।
विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम् ।
निर्दिश्यमानान् ललनाङ्गुलीभिर्वीराः -
स्वदेहान् पतितानपश्यन् ।। ३३७ ।।

कमलाकरी

तत्रान्त्यमाह - यथे[१]ति । नागानन्दे हि नाटके- 'शिरामुखैः स्यन्दत एव रक्तमद्यापि देहेमम मांसमस्ति' (ना. ५) । इति पदार्थे देहत्यागाज्जीमूतवाहनस्य शान्तरसः मलयवतीनायिकापरः शृङ्गारश्च विरुद्धोऽपि मध्ये 'अहो गीतमहो वादित्रम्' इत्यद्भुतेन विच्छेदान्न दोष इत्यर्थः । न चायमविरोधः प्रबन्धे एव किन्त्वेकवाक्येऽपीत्याह -न परमिति । परं केवलं प्रबन्धे वाक्यसमूहे एवायं विरोधो न निर्वर्ततेयावद्यत एकवाक्येऽपि निर्वर्तत एवेत्यर्थः ।

प्रबन्धेऽप्याह - यथेति । भूरेणुदिग्धानिति- नवमन्दारमालावासितः सुगन्धिर्बाहुमध्यो हृदयं येषां देवाङ्गनालिङ्गितहृदयाःसुगन्धिभिश्चन्दनोदकसेकैः कल्पलतोत्थैर्मनोनुकूलैरमूल्यैर्दुकूलैश्च बीजिता विमानाग्रे स्थिताः वीरास्तदानीं रणे कौतुकावेशात् भूरेणुपातान् शिवाभिः शृगालीभिर्व्याप्तान् क्रव्यभुजां खगानां गृध्रादीनां सरक्तैः[२]पक्षैर्वीज्यमानान् कान्ताङ्गुलीभिरयन्ते देह इति निर्दिश्यमानान् निर्देशितान् स्वान् देहानपश्यन्नित्यर्थः ।

---

१. तथेति-अ.।
२. सरसैः -अ.।

अत्र बीभत्सशृङ्गारयोरन्तर्वीररसो निवेशितः ।

स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः ।

अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ।। ६५ ।।

यथा -

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।

नाभ्यूरुजनघनस्पर्शी नीविविस्रंसनः करः ।। ३३८ ।।

एतद् भूरिश्रवसः समरभुवि पतितं हस्तमालोक्य तद्वधूरभिदधौ । अत्र पूर्वावस्थास्मरणँ शृङ्गाराङ्गमपि करुणं परिपोषयति ।

दन्तक्षतानि करजैश्च विपटितानि

प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे ।

दत्तानि रक्तमनसामृगराजवध्वा

जातस्पृहैर्मुनिभिरप्य- वलोकितानि ।। ३३९ ।।

कमलाकरी

अत्र बीभत्स देहपातदेवाङ्गनालिङ्गनशृङ्गारयोर्मध्ये विरुद्धवीररसनिर्देशान्न विरोध इत्याह- अत्रेति । एकवाक्ये तु-

"कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।

वामाङ्गसंयुक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ।।"

(रघु. ७।५१) इति ज्ञेयम् ।

प्रकारान्तरेणाविरुद्धमाह - स्मर्यमाण इति । कश्चिद्विरुद्धोऽप्यनुभूयमानेन[१] सह स्मर्यमाणोऽङ्गत्वं प्राप्नोत्यतो न विरुद्धः । साम्येन विवक्षितोऽतो न विरुद्धः विरुद्धा वपि रसावङ्गिनि विरुद्धः । प्रधानेऽङ्गतां प्राप्तौ यौ न विरुद्धाविति त्रयमुक्तम् तत्राद्यमाह- यथेति । अयमिति । कथं शृङ्गारस्मरणमत आह- एतदिति । इदं सोऽयमितीदंशब्देन ।

अत्र शृङ्गारः स्मर्यमाणः करुणेन सह प्रतीतेर्न विरुद्ध इत्याह-अत्रेति ।

द्वितीयमाह - दन्तक्षतानीति । हे राजन्, रोमाञ्चिते तव शरीरे

---

१. प्यनुमीयमानेन-अ. ।

अत्र कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारीणि तथा जिनस्य । यथा वा परःशृङ्गारी तदवलोकनात् सस्पृहस्तद्वदेतादृशो मुनय इति साम्यविवक्षा ।

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलब्दाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकरास्त्वच्छत्रुनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरुप्युद्यद्विवाहा इव ।। ३४० ।।

अत्र चाटुके राजविषया रतिः प्रतीयते, करुण इव शृङ्गारोऽप्यङ्गमिति तयोर्न विरोधः । यथा

एहि गच्छ पत्तोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ।। ३४१ ।।

इत्यत्र एहीति क्रीडन्ति, गच्छेति क्रीडन्तीति क्रीडनापेक्षयोरागमन-गमनयोर्न विरोधः ।

कमलाकरी

रक्तमनसा मृगराजवध्वा सिंहिन्या दन्तक्षतानि दत्तानि नरवैर्विदारितानि चोत्पन्नस्पृहैर्मुनिभिर्दृष्टा नी[१]ति च ।

अत्र शृङ्गारवीरयोः साम्यान्न विरोध इत्याह –अत्रेति । जिनस्य बौद्धस्य अत्रातिक्षुधा स्वापत्यमेव भोक्तुकामायै सिंहिकायै दयया स्वदेहं प्रयच्छन्तं जिनं प्रति कस्यचिदुक्तिः । तेषां दयाशीलत्वात् शृङ्गारस्तदङ्गमिति देवनाथः ।

तृतीयमाह – क्रामन्त्य इति । हे राजन् क्षताः कोमला येऽङ्गुल्य तेभ्यो गलद् रक्तं येषान्तैर्दत्तालक्तकैरिव पादैः कुशभूमीरटन्त्यः पतद्बाष्पाम्बुप्रमुखाः भीताः कान्तघृतहस्ताः त्वद्वैरिकान्ताः पुनर्विवाहोद्यता इवेदानीं दावाग्नि परितो भ्रमन्ति । विवाहेऽपीदृगवस्थासाम्यात् करुणशृङ्गारयोर्विरुद्धयोरपि राजविषयकरतौ प्रधानभूतायामङ्गत्वान्न दोष इत्याह –अत्रेति । चाटुके प्रियवाक्ये । अन्योपकारकयोर्विरोधाभावे दृष्टान्तमाह – एहीति । धनिनो धनिकाः । आशाग्रहाभिभूतैरर्थिभिः कृत्वा आगच्छ गच्छत उत्तिष्ठ वद मौनं कुरु एवंक्रीडन्ति ।

---

१. दृष्टानि च–ब.।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवचूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः।।३४२।।

इत्यत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गं तस्य तुश्रृङ्गारस्तथापि न करुणे विशान्तिरिति तस्याङ्गतैव । अथवा प्राक् यथा कामुक आचरति स्म तथा शराग्निरिति शृङ्गारपोषितेन करुणेन मुख्य एवार्थ उपोद्बल्यते । उक्तं हि-

गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्धते ।। इति ।

कमलाकरी

अत्रेतिगमनागमनयोरुत्पतोत्थानयोर्वचनमौनयोश्च विरोधेऽपि क्रीडाङ्गत्वाद् यथा न विरोधस्तथेत्यर्थः ।

अन्याङ्गयोर्विरोधाभावेऽन्यं दृष्टान्तमाह- क्षिप्तो हस्तेत्यादि । अमरुशतके त्रिपुरदाहवर्णनम् । सबाष्पनेत्राभिः त्रिपुरस्थदैत्यकान्ताभिर्नवापराधः कामीव यः शाम्भवो बाणाग्निः हस्ते लग्नः सन् क्षिप्त तिरस्कृतः वस्त्रप्रान्तं गृह्णन् प्रसभं ताडितः केशेषु गृह्णन् अपास्तः पादपतितः सम्भ्रमेण भयेन दृष्ट आलिङ्गन् दूरे कृतः सोऽग्निर्युष्माकं दुरितं दहतु ।

अत्र शिवप्रभावातिशयो वाक्यार्थः प्रधानं, करुणोऽङ्गं तस्यापि शृङ्गारोऽङ्गम् । ननु श्रृङ्गारं प्रति करुणस्य प्राधान्यात् कथमङ्गताऽत आह- तथापीति । यागस्य स्वाङ्गं प्रति प्राधान्येऽपि स्वर्गं प्रतीव करुणस्य शृङ्गारं प्रति प्राधान्येऽपि शिवप्रभावेऽङ्गत्वमेव । न च [1]वाजपेयवद् वैरूप्यं कल्प्य[2]विधिलभ्यत्वात् प्राधान्यस्येति भावः ।

ननु करुणस्याविधेयत्वाद्वैरूप्यं स्यादेवात आह- अथवेति । परिपोषितेन सहितेन तेन करुणवच्छृङ्गारस्यापि तुल्यकक्षतया प्रभावाङ्गत्वमिति भावः । मुख्योऽर्थः प्रधानः उपोद्बल्यते प्रकृष्टः क्रियते । आद्ये पक्षे विशिष्टत्वमन्त्ये द्वयं समप्राधान्यमन्याङ्गमिति भेदः । तदेवाह

१. वाजपेयतद्वैरव-अ.।
२. कल्प्यविशेषणविधिलभ्य-ब.।

प्राक् प्रतिपादितस्य रसस्य रसान्तरेण न विरोधो नाप्यङ्गाङ्गिभावो भवतीति रसशब्देनात्र स्थायिभाव उपलक्ष्यते ।। ६ ।।

इति काव्यप्रकाशे दोषदर्शनो नाम सप्तम उल्लासः समाप्तः ।

कमलाकरी

– उक्तं हीति ।

गुण इति । गुणोऽङ्गं रसोऽन्यविशिष्टः प्राधान्यं व्यङ्ग्यं प्राप्नोति । यद्वा प्रधानाङ्गमेवेत्यर्थः ।

ननु विगलितवेद्यान्तरे रसे कथमन्यसाहित्यं वैशिष्ट्यं वा अत आह–प्रागिति । भावे गौणं रसत्वमित्यर्थः ।।

इतिजगद्गुरुश्रीनारायणभट्टसूरिसूनु–श्रीमद्रामकृष्ण भट्टात्मज–महामहोपाध्याय–श्रीमत्कमलाकरभट्ट–कृतायां काव्यप्रकाशव्याख्यायां कमलाकर्यां सप्तमोल्लासः समाप्तः ।

अथाष्टमोल्लासः

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।। ६६ ।।

आत्मनः एव हि यथा शौर्यादयो नाकारस्य तथा रसस्यैव माधुर्यादयो गुणा न वर्णानाम् । क्वचित्तु शौर्यादिसमुचितस्याकारमहत्वादेर्दर्शनात् 'आकार एवास्य शूरः' इत्यादेर्व्यवहारात्, अन्यत्राशूरेऽपि विततकृतित्वमात्रेण 'शूरः' इति, क्वापि शूरेऽपि मूर्तिलाघवमात्रेण 'अशूर' इति अविश्रान्तप्रतीतयो

कमलाकरी

गुणादेरवसरसङ्गतिमाह- एवमिति । 'तददोषाविति' (का.प्र.) काव्यलक्षणे दोषानुक्त्वा गुणालङ्कारयोरभेदशङ्कानिरासार्थं भेदमाहेत्यर्थः । विवेचको भेदस्तद्धेतुर्वैधर्म्यं लक्षणं वा । ये इति । देहे आत्मवत् काव्येऽङ्गिनःप्रधानस्य रसस्य श्रृङ्गारादेरुत्कर्षश्चमत्कारातिशयस्तस्य हेतवो अचलाः अपृग्गूभूता स्थितिर्येषाम् । तेन वामनाद्युक्तं वर्णधर्मत्वं परास्तम् । रसे तदुपकारे वा अव्यभिचारिणः इत्यर्थः । ईदृश आत्मनः शौर्यादय इव ये धर्माः माधुर्यादयस्ते गुणास्युरित्यर्थः तेनायं सरसनेत्यत्राङ्गभूते माधुर्याभावेऽपि नाव्याप्तिः । प्रधाने रसे स्थितिनियमादित्यर्थः । तेन रसोत्कर्षहेतुत्वे सति रसधर्मत्वं रसाव्यभिचारित्वं रसोपकारकत्वं वा गुणत्वमिति लक्षणत्रयं ज्ञेयम् । अलङ्कारेऽतिव्याप्तिनिरासाय सत्यन्तम् । अलङ्कारे च रसे तदुपकारेल व्यभिचाराद् वर्णधर्मत्वं वक्ष्यति ।

ननु माधुर्यादिगुणानां वर्णधर्मत्वात् कथं रसधर्मत्वमत आह-आत्मन एवेति । आकारस्य शरीरस्येदृशा न धर्मा मृतशरीरे ऽभावादिति लोके यथा प्रसिद्धं तथा माथुर्यादयो रसस्यैव धर्मा न वर्णानां नीरसे काव्यत्वाभावादित्यर्थः । कथं तर्हि नीरसकाव्यव्यवहारोऽत आह -क्वचिदिति । यथाऽविश्रान्तप्रतीतयस्तत्वनिष्ठमतिशून्याः मन्दाः शौर्यादियोग्यस्याकारः शरीरं तन्महत्वादेर्दीर्घत्वादेर्दर्शनादाकारोऽस्य शूर इति प्रयोगादशूरेऽपि दीर्घाकारमात्राच्छूर इति यथा गौण्यां व्यवहरन्ति । यथा शूरेऽपि शरीरलाघवादशूर इति व्यवहरन्ति । तद्वद् रसस्य पर्यन्तः सीमा तत्र विश्रान्ता निष्ठिता बुद्धिस्तद्धीना ।

यथा व्यवहरन्ति तद्वन्मधुरादिव्यञ्जकसुकुमारादिवर्णानां मधुरादिव्यवहारप्रवृत्तेः अमधुरादिरसाङ्गाना वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि मधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि, रसपर्यन्तप्रतीतिबन्ध्या व्यवहरन्ति । अतएव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते न तु वर्णमात्राश्रयाः । यथैषां व्यञ्जकत्वं तथोदाहरिष्यते ।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।। ६७ ।।

कमलाकरी

मधुरादिरसव्यञ्जकसुकुमारादिवर्णेषु माधुर्यादिप्रतीतेरमधुररसाङ्गेषु तद्व्यञ्जकेष्वपि तेषु वर्णेषु माधुर्यादि व्यवहरन्तीत्यग्रे वक्ष्यामः । रौद्रादिरसाङ्गानाञ्च कठोरवर्णानां सौकुमार्याभावान्मधुररसाङ्गानांमपि तेषाममाधुर्यादि मौर्ख्याद् व्यवहरन्तीत्यन्वयः । विज्ञानां तथा प्रयोगस्तु 'यजमानः प्रस्तरः' इतिवद्गौ[१]णः इति भावः ।

ननु माधुर्यादिगुणानां रसधर्मत्वे वर्णसौकुमार्यादिकं व्यर्थमत आह-अतएवेति । अतः पूर्वोक्तान्वयव्यतिरेकात् समुचितैर्योग्यै[२]रेव सुकुमारादिवर्णैर्माधुर्यादयो रसधर्माः व्यज्यन्ते । ततो रसधीः आलोकेन चक्षुःसन्निकर्षादिवद् घटादयो न तु सर्वैर्वर्णैरित्यर्थः । मात्रशब्दः साकल्यार्थः ।

ननु विनिगमकाभावाद् वर्णवृत्तित्वमेव किं न स्यात्[३] रचनावृत्तित्वस्यापत्तेः रसमात्रवृत्तित्वलाघवादनुगमाच्चेत्यर्थः । उदाहरिष्यते-' अनङ्गरङ्गप्रतिम' ( ) मित्यादि ।

अलङ्कारवैधर्म्येण लक्ष्यति । उपकुर्वन्तीति । काव्यस्याङ्गमेकदेशः । शब्दोऽर्थश्च कान्ताङ्ग कण्ठादिव तद्द्वारेण न तु साक्षाद् ये सन्तं रसं कदाचिदुपकुर्वन्ति प्रकृष्टं कुर्वन्ति तेऽनुप्रासादयश्शब्दस्योपमादयश्चार्थस्यालङ्कारा इत्यर्थः । वाच्यमर्थो वाचकः शब्दः । सन्तमिति व्याचष्टे सम्भविनमिति । तेऽलङ्कारा ज्ञेया इति शेषः ।

---

१. दगुण इति-ब.।
२. योग्यैरपि-अ.।
३. न सावृत्तित्वस्या-अ.

ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यं रसं सम्भविमुपकुर्वन्ति ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽपि उपकारका हारादय इवालङ्काराः । यत्र तु नास्ति रसस्तत्रोक्ति वैचित्र्यमात्रः पर्यचसायिनः । कृचित्तु कृन्तमपि नोपकुर्वन्ति ।

यथाक्रममुदाहरणानि -

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ।।३४३।।

इत्यादौ वाचकमुखेन -

कमलाकरी

तद्विपर्ययमाह - यत्र त्विति । उक्तिः शब्दः वैचित्र्यं श्रव्यत्वम् । यथा 'स्वच्छन्देत्यादौ' (का.प्रा.) उक्तिः काव्यम् । जातुचिदित्यस्यार्थमाह- क्वचिदिति । वैराग्ये कान्तायामित्यर्थः । तेन रसावृत्तित्वे सति रसव्यभिचारे वा सत्यन्तनियमेन रसोपकारकत्वं लक्षणमुक्तम् ।

रसोपकारकं शब्दालङ्कारमुदाहरति - यथेति । न त्विदमनन्तरोक्त-रसाभावस्योदाहरणमिति भ्रमितव्यम् ।अपसारयेति । नायिकायाः सखीं प्रति उक्तिः । घनसारं चन्दनं कर्पूरं वा । दिवानिशं सन्ततम् । अपसृतेऽपि विरहावेशाद् बाला अज्ञा वदतीत्यर्थः । वाचकमुखेन शब्दद्वाराऽलङ्कारो विप्रलम्भं शृङ्गाररसमु[१]पकुरुत इति भाविनाऽन्वयः । उपमाख्यमर्थालङ्कारमाह- मनोराग इति । लवङ्गिकां सखीं प्रति मालत्युक्तिः । कान्ते मनोरागस्तीव्रं विषमिव सन्ततं प्रसरति । यद्वा रागः कर्त्ता मनो विसर्पति आक्रामति । अस्य कर्त्तुः पादत्रयेऽप्यनुषङ्गः । प्रमाथी क्षोभकारी विधुत आध्यातो वह्निरिव रागो ज्वलति । रागः प्रत्यङ्गदित इतः सर्वतो हिनस्ति । बालायाः मौग्ध्यादिति इत्यङ्गप्रदर्शनमित्यन्ये । यद्वा इतः पूर्वोक्ताद्विषादेःमरणे हेतोस्तातः पिता त्रातुं न शक्तः । नन्दनाय प्रतिज्ञातत्वात् । अम्बा माता न अनिवारणात् न भवती सखी, अप्रयोजकत्वात् माधवसङ्गाकरणाच्च ।

वाच्यमुखेनार्थद्वारा पूर्वपद्ये (भागे) एकपदावृत्तिरनुप्रासो ऽन्त्ये पद्ये विषमादिधर्मयोगादुपमा चेति द्वावलङ्कारौ विप्रलम्भशृङ्गाररसमुपकुरुत इत्यर्थः ।

---

१. रसमुपकरोतीति भाविना -अ.।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमार्थी निर्धूमं ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभभवति न चाम्बा न भवती ।। ३४४ ।।
इत्यादौ वाच्यमुखेनालङ्कारौ रसमुपकुरुतः ।
चित्ते विहट्टदि ण टुट्टदि सा गुणेसुं
सज्जासु लोट्टादि विसट्टदि दिम्मुहेसु ।
बोलम्मि वट्टदि पवट्टदि कव्वबंधे
झाणेण टुट्टदि चिरं तरुणी तलट्टी ।। ३४५ ।।
इत्यादौ वाचकमेव -

कमलाकरी

सत्यपि रसेऽनुपकारं शब्दालङ्कारे आह- चित्ते इति । चित्ते विघटते न त्रुटयति सा गुणेषु, शय्यासु लुठति विकसति दिङ्मुखेषु । वचने वर्तते प्रवर्तते काव्यबन्धे ध्याने न त्रुटयति चिरं तरुणीं प्रगल्भा । इति संस्कृतम् । प्रगल्भनायकोक्तिः । प्रकाशितैश्वर्यादिगुणेषु न हसति । शय्यायां लुठतीव । दिक्षु सैव प्रकाशते । वचने सैवायाति । काव्यबन्धे सैव प्रवर्तते विषयीभवति । ध्याने सैव विषयीभवतीत्यर्थः। यद्वा -सख्युक्तिः नायकं प्रति । सा चित्ते विलुण्ठति तव गुणेषु न त्रुट्यति तानेव ब्रूते हृदि हृष्यतीति वा । विसर्पति आलिङ्गितुं धावति । वचने प्रलापे ध्यानं त्रुट्यति विच्छिद्यते नेत्यर्थः ।

वाचकमेवेति - शब्दमेवानुप्रासालङ्कारम् उपकरोति न रसमिति विपरिणतानुषङ्गेणान्वयः । ओजोव्यञ्जकस्य टवर्गस्य शृङ्गारेण[१] विरोधादित्याशयः ।

अर्थालङ्कारे रसानुपकारकमाह - मित्रेति । मित्रे सूर्ये सुहृदि च क्वापि गते इति सहायाभावाद् विरहाधिक्ये शब्दश्लेषमूलातिशयोक्तिः । पद्मवने बद्धानने मुद्रिते मूके च ताम्यति म्लायति । भ्रमराः षट्पदाः । भ्रमं रातीति भ्रमराः पान्था[२]श्च तेषु क्रन्दत्सु शब्दवत्सु रुदत्सु च । पुरोऽग्रे कान्तासक्तां सारसीं वीक्ष्येति

१. शृङ्गारेणाविरोधा-अ.।
२. कान्तासक्तं सारसं -अ.

मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम्।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ।। ३४६ ।।

इत्यादौ वाच्यमेव न तु रसम्। अत्र बिसलता न जीवं रोद्धुं क्षमेति प्रकृताननुगुणोमपा ।

एष एव गुणालङ्कारप्रविभागः । एवञ्च "समवायवृत्या शौर्यादयः संयोगवृत्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओज-प्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्या

कमलाकरी

कामोद्दीपनम् । चक्राह्वेन चक्रवाकेन बिसलता मृणालवल्ली आस्वादिता चर्विता न त्यक्ताऽपि न किन्तु निर्गच्छतो जिगमिषोर्जीवस्य प्राणस्यार्गला कपाटकील इव केवलं मुखे दत्तेत्यर्थः ।

वाच्यं जीवनिरोधमर्थमेवोपमालङ्कारम् उपकरोति पुष्णाति न रसमिति सर्वानुषङ्गेणान्वयः । विप्रलम्भं कुतो न पुष्णातीति अत आह-अत्रेति । जीवनिरोधस्यार्गला साध्यस्य बिसलतायामसम्भवात् प्रकृतविप्रलम्भानुपकारः । जीवनिरोधे वेदनाधिक्यात् मरणौचित्यात् प्रेमाभावापत्तेश्च । सोऽप्यनुचित इति विप्रलम्भापकर्षा[१]न्न तत्पोषः किन्तु विपर्ययेऽ र्थपोष इति भावः । तत्वन्तु-साधर्म्ये उपमा बिसलता तु जीवरोधकार्गलासादृश्याभावात् प्रकृते रसेऽनुगुणं सादृश्यं तच्छून्योपमा न युक्ता किन्तूत्प्रेक्षा । न चात्राप्ययुक्तदोषः अर्गलेव निहितेत्यर्थात् अत्र कुतो न रसपोष इति चेज्जीवनिरोधाभावेन तत्वाभावात् किन्तूक्तिवैचित्र्यमात्रमिति ध्येयम् । उक्तं गुणालङ्कारयोर्भेदमुपसंहरति एष-एवेति । रसवृत्तित्वावृत्तित्वादित्यर्थः ।

अन्यमतं निराचष्टे -एवञ्चेति । चो हेतौ । एवमुक्तरीत्या गुणालङ्काराणां भेदसत्वादेतदभिधानमसदित्यत्यन्वयः । अन्ये हि लोके शौर्यादयो गुणाः समवायाख्यवृत्या सम्बन्धेन हारादयोऽलङ्काराश्च संयोगवृत्या सन्तीत्यस्ति तेषां भेदः । काव्ये त्वोजःप्रभृतीनां

---

१. विप्रलम्भापकर्षोऽ

स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेदः" इत्यभिधानमसत्।

यदप्युक्तं "काव्यशोभायाः कर्त्तारो धर्मा गुणाः, तदतिशयहेतवस्त्वलङ्कारा" इति, तदपि न युक्तम्। यतः किं समस्तैर्गुणैः काव्यव्यवहारः, उत कतिपयैः। यदि समस्तैः तत् कथमसमस्तगुणा गौडी पाञ्चाली च रीतिः, काव्यस्यात्मा।

अथ कतिपयैः। ततः

"अद्रावत्र प्रज्वलत्यग्निमुच्चैः प्राज्यः
प्रोद्यन्नुल्लसत्येष धूमः"॥ ३४७॥

इत्यादावोजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः।

कमलाकरी

गुणानामनुप्रासोममादीनां शब्दार्थालङ्काराणाञ्चोभयेषां द्विविधानामपि समवायसम्बन्धेनैव शब्दार्थयोःस्थितिर्वृत्तिरिति भेदाभावात्। गड्डरिका मेषी तत्प्रवाहः परम्परा। निर्निमित्तं यथैका मेषीं तत्समूहोऽनुगच्छति तथा निर्निमित्तं काव्ये गुणालङ्काराणां भेदकथनम्। तत्वतो नास्त्यैवेषां भेद इत्याहुः। इदमभिधानं पूर्वरीत्या भेदोक्तेरसदशुद्धमित्यर्थः।

वामनाभिमतालङ्कारमतमाह- काव्यस्य शोभा व्यवहारस्तद्धेतवो गुणास्तदतिशयश्चमत्कारस्तद्धेतवोऽत्वङ्कारा इत्यर्थः। चमत्कारा-तिशयाभावेऽपि सगुणत्वात् काव्यमस्त्येवेत्यर्थः। दूषयति- तदपीति। सर्व गुणवत् काव्यञ्चेत् गौडीपाञ्चाल्योर्माधुर्यादिगुणाभावात् काव्यत्वं न स्यादित्यव्याप्तिरित्यर्थः। अन्त्ये आह–यथेति। ततो 'अद्रावत्रे' त्यत्र ओजःप्रसादरूपकिञ्चिद्गुणस[१]त्वात्काव्यव्यवहारः स्यादित्यति-व्याप्तिः। न चेष्टापत्तिः। उपकार्य-रसस्याभावात् काव्यव्यवहारस्तु दुष्टो हेतुरितिवद् गौणः।

नन्वत्रालङ्काराभावादेव न काव्यत्वमत आह- न हीति। शोभातिशयहेतवोऽलङ्कार इति दूषयति- कथञ्चेति।

स्वर्गप्राप्तीति। वरवर्णिनी नवधूरनेनैव मानुषेण देहेन स्वर्गप्राप्तिरूपेत्यभेदाद् विशेषोक्तिः। अस्याः रदच्छदस्याधरस्य रसःचुचूषास्वादोऽमृतरसं तिरस्करोतीत्यर्थः। एतदेहः स्वर्गप्राप्त्यभावे

१. गुणत्वात् –ब.।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्याः रदच्छदरसो न्यक्करोतितरां सुधाम् ।। ३४८ ।।

इत्यादौ विशेषोक्ति व्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारस्य प्रवर्तकौ । इदानीं गुणानां भेदमाह-

माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्नदश ।।

एषां क्रमेण लक्षणमाह-

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।। ६८ ।।

शृङ्गारे अर्थात् सम्भोगे द्रुतिर्गलिततत्वमिव । श्रव्यत्वं पुनरोजः

कमलाकरी

कारणम् । कारणसत्वेऽपि तदभावात् पूर्वार्द्धे विशेषोक्तिरन्त्यार्द्धे च 'यत्रोपमेयस्याधिक्यं व्यतिरेकः स उत्यते' इति लक्षणात् सुधाहान्या व्यतिरेकाद् गुणं विनापि रसवत्वात् काव्यत्वं न स्यादित्यर्थः । तत्वन्तु स्वर्गहेतोर्देहान्तरस्याभावेऽपि स्वर्गप्राप्तितिरिति कारणाभावे कार्योक्तिरूपविभावनैव (न) विशेषोक्तिरिति ध्येयम् ।

नन्वत्र प्रसादो गुणोऽस्येवेति कथं निर्गुणत्वम् । तत्वे वा तवापि कथं काव्यत्वं सगुणावित्युक्तेः । नैवं यत्किञ्चिद्गुणवत्वे दुष्टेऽतिप्रसङ्गात् समस्तगुणवत्वं काव्यत्वं तन्मते वैदर्भीरीतिरिव न चात्र, तत्काव्यत्वं तु रसवत्वादस्येवेत्यर्थः ।

माधुर्येति । ते गुणास्त्रय एव न तु परोक्ताः दश । एष्वेवान्तर्गतेरित्यर्थः।

आह्लादकत्वमिति । ननु तदपि सुखात्मकत्वं तद्धेतुत्वं वा । नाद्यः, रसमात्रे तत्वात् नान्त्यः, गुणान्तरेऽपि सुखहेतुत्वादतिव्याप्तेः[१] शृङ्गारेऽपि सुखात्मकत्वेन तद्धेतुत्वाभावाच्च । अत आह – द्रुतिरिति । द्रुतिर्दोषजन्यकठोरत्वाभावः सुकुमारत्वम् । नाटचे हि सामाजिकानां चित्ते नवरसेषु तिस्रो अवस्थाः जायन्ते द्रुतिर्विकासो विस्तारश्चेति । तत्र द्रुतिः कोमलत्वं, विस्तार औद्धत्यं विकासो हास्ये मुखस्याद्भुते चक्षुषोर्भयानकेऽपसरणमिति ।

ननु विप्रयोगे नेदमत आह- शृङ्गारे अर्थात् सम्भोगे इति । विप्रलम्भे त्वतिशयो वक्ष्यत इत्यर्थः । ननु द्रुतिर्द्रवत्वं द्रव्ये इष्टं न रसे अत आह-

---

१. व्याप्तिः-अ.।

प्रसादयोरपि ।

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।

अत्यन्त- द्रुतिहेतुत्वात् ।

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ।। ६९ ।।

चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः ।

बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।

वीराब्दीभत्से, ततो रौद्रे सातिशयमोजः ।

शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ।। ७० ।।

कमलाकरी

गलितत्वमिवेति । मनस इति शेषः । गलितत्वं सौम्यत्वम् । रौद्रवीरादौ हि मनो निर्दयं भवति । सम्भोगे तु विषयमहिम्ना सदयं मन इत्यर्थः । तदुक्तम् -

गलितत्वमिवाह्लादं यदव्याहतये ददत् ।

माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः ।। (भा.का.सू.)

इति । भामहेन- "श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यते" इति श्रव्यत्वं माधुर्यमुक्तम् । तन्निराचष्टे श्रव्यत्वमिति । तेन तत्रातिव्याप्तिरित्यर्थः ।

ननु मनसः सौम्यत्वं करुणादावप्यस्ति । अतः कथं सम्भोग एवात आह- करुणेति । करुणादित्रये ह्यतिशयगुणसहितं माधुर्यम् । तत्र हेतुमाह- अत्यन्तेति । उत्तरोत्तरमश्रुपातादिना सातिशयतया हेतुत्वात् तद्युक्तं सम्भोगे तु केवलमिति भेदः ।

ओजो लक्षयति - दीप्त्येति । दीप्तिरूपा याऽऽत्मनश्चित्तस्य विस्तृतिर्ज्वलिततीव्रत्वं इति यावत् । विस्ताररूपा सा दीप्तत्व मित्यभेदः । येन चेतः क्रोधज्वलितमिव भवति तदोजः इत्यर्थः । तच्च वीररसस्थिति । अत्राहुः-हास्ये माधुर्यमोजः च विकासवत्वात् प्रकृष्टं भयानकेऽद्भुते च रसस्य दीप्तत्वादोजःप्रचुरं माधुर्यमल्पं तेन त्रिषु द्वौ द्वौ गुणाविति । क्रमेण व्याचष्टे-वीरादिति ।

प्रसादं लक्षयति - शुष्केति । वीररौद्रादावग्निर्यथा शुष्कमिन्धन-तृणादि व्याप्नोति, जलं यथा स्वच्छं वस्त्रं झटिति व्याप्नोति मलिनवस्त्रे जलस्याप्रसरात् तद्वच्छृङ्गारकरुणादावन्यत् चित्तं यो गुणो झटिति

व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः।

अन्यदिति व्याप्यमिह चित्तम्। सर्वत्रेति सर्वेषु रसेषु सर्वासु रचनासु च।

गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ।। ७१ ।।

गुणवृत्त्या उपचारेण। तेषां गुणानाम्। आकारे शौर्यस्येव।

कुतस्त्रय एव न दश इत्याह-

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे स्थिताः।

अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ।। ७२ ।।

बहूनामपि पदानामेकपदवद्भासमानात्मा यः श्लेषः

कमलाकरी

व्याप्नोति सः प्रसादः स्वच्छता। व्याप्यं व्यापनीयम्। सर्वत्रेति व्याचष्टे- सर्वेष्विति। रसेष्वाधेयत्वेन रचनासु व्यञ्जकत्वेन स्थित इत्यर्थः।

ननु गुणानां रसवृत्तित्वे[१] कथं काव्यलक्षणे शब्दार्थौ सगुणावित्युक्तमत आह- गुणवृत्त्येति। आत्मगुणस्य शौर्यस्य आकारे देहे इव रसवृत्तीनां माधुर्यादिगुणानां व्यञ्जकेषु सुकुमारवर्णादिषु गौणाः प्रयोग इत्यर्थः।

ननु वामनाद्यैः -"श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः। इति वैदर्भमार्गस्य प्राणाः दश गुणाः स्मृताः।।" इति गुणानां दशत्वोक्तेः त्रयोक्तिरिति शङ्कते कुत इति। किं शब्दगुणान् दश ब्रूषेऽर्थगुणान् वा। आद्ये मूलेनोत्तरमाह- केचिदिति। ये शब्दगुणास्तेषु माधुर्यादिषु केचित्तल्लक्षण-योगादन्तर्भवन्ति। अपरेऽन्ये दोषत्यागो दोषाभावस्तद्रूपत्वात् व्यापकत्वाद् वा श्रिताः अङ्गीकृताः। यद्वा गुणं न श्रिताः प्राप्ताः। अन्ये - दोषरूपत्वाद् गुणा एव न स्वा- भावभङ्गापत्तेरित्याहुः।

तत्रान्तर्भावमाह - बहूनामित्यादितो त्यागो गुण इत्यन्तेन श्लेषसमाध्युदारताप्रसादानामोजोगुणेष्वन्तर्भावः। कथं 'नारीणामनुकूलमचरसि चेत्' (का.प्रा.९।३५२) इत्यत्र नारीणां नेति पदयोः

---

१. निष्टत्वे-अ.।

यश्चारोहावरोहक्रमरूपः समाधिः, या च विकटत्वलक्षणा, उदारता, यश्चोजोमिश्रितशैथिल्यात्मा प्रसादः तेषामोजस्यन्तर्भावः । पृथक्पदत्वरूपं माधुर्यं भङ्ग्यां साक्षादुपात्तम् । प्रसादेनार्थव्यक्तिर्गृहीता । मार्गाभेदरूपां समता क्वचिद्दोषः । तथाहि –'मातङ्गाः किमु वल्गितै(का.प्र.) इत्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः । कष्टत्व-ग्राम्यत्वयोर्दुष्टताभिधानात् तन्निराकरणेन अपारुष्यरूपं सौकुमार्यम् औज्ज्वल्यरूपा कान्तिश्च स्वीकृता । एवं न दश शब्दगुणाः ।

"पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा ।

कमलाकरी

नारीरूपैकपदभासनं श्लेषः । वर्णानां गाढबन्धः आरोहः शिथिलबन्धोऽवरोहः तयोः क्रमेण बन्धः पूर्वादन्त्योऽन्त्यात् पूर्वो वा बन्धक्रमः समाधिः । यथा-'चञ्चद्भुजे' त्यत्र चूर्णितान्तं गाढं ततोऽग्रे शिथिलम् । यथा वा-

"विहाय कमलालयं विलसिताति-विद्युन्नटी
विडम्बनपटूनि मे विहरणे विधत्तां मनः ।
कपर्द्दिनि कुमुद्वतीरमणखण्डचूडामणौ
कटीतटपटीभवत् करटिचर्मणिब्रह्मणिः ।।" इति ।

विकटाक्षरैर्नृत्यद्भिः पदैर्बन्धः उदारता । यथा-

"चटिच्चटिति चर्मणि च्छणिति चोच्छलच्छोणिते
धगिद्धगिति भेदसस्फुटरवोऽस्थिषु ष्वागिति ।
स पातु भवतो हरेरमरवेरिनाथो रसित् -
कृणत्करजपञ्जरक्रकचघर्षजन्माऽनिलः ।।" इति ।

ओजोमिश्रितं यच्छैथिल्यं कोमलाक्षरत्वं सः प्रसादः । शुद्धशैथिल्यस्य दोषत्वात् क्रमनियमाभावात् समाधेर्भेदः । यथाऽश्वत्थाम्नोक्तिः-

यो शस्त्रं विभर्त्ति स्वभुजगुरुमदात् पाण्डवीनांचमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवयाः गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः ।
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ।।"

प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ।।"

इति या प्रौढिः ओज इत्युक्तं तद्वैचित्र्यमात्रं न गुणः । तदभावेऽपि काव्यव्यवहारप्रवृत्तेः । अपुष्टार्थत्त्वाःधिकपदनवीकृतत्वाः-मङ्गलरूपाश्लीलग्राम्याणां निराकरणेन च साभिप्रायत्वमोज, अर्थवैमल्यात्मा प्रसादः उक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यम्, अग्राम्यत्वरूपा उदारता च स्वीकृतानि । अभिधास्यमान- स्वभावोक्त्यलङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपा

कमलाकरी

एषां चतुर्णां चित्त विस्तारे दीप्तिरूपे ओजोव्यञ्जके शब्देऽन्तर्भाव इत्यर्थः । पृथगिति । समासरूपवृत्यभावो हि पृथक्पदत्वं माधुर्यम् । यथा- "अनङ्गरङ्गप्रतिमं तदङ्गम्" इत्यादौ भङ्ग्या तद्व्यञ्जकवर्णेषु गौणवृत्या साक्षात् त्वयैवोक्तम् । तेन तत्राविवाद एवेत्यर्थः । तदुक्तम्- माधुर्ये व्यव्यञ्जकत्वं यदसमासस्य वर्णितम् ।

"पृथक्पदत्वं माधुर्यं तेनैवाङ्गीकृतं पुनः ।।" इति ।

अर्थव्यक्तेः स्वोक्तेः प्रसादेऽन्तर्भावमाह- प्रसादेनेति । प्रसादो ह्यर्थप्राकट्यं, गृहीता स्वीकृता तन्त्री अर्गला । तेन पौनरुक्त्यमित्यर्थः ।

समताया माधुर्यादौ दोषाभावे चान्तर्भावमाह - मार्गाभेद इति । मार्गो रीतिस्तस्याभेद ऐक्यं यया रीत्योपक्रमस्तयैवान्तर्निर्वाहः । सः कृचिद्दोषः । यथा - 'मातङ्गा किमु वल्गितैः' इत्यत्र गजानां सिंहान्यूनत्वात् कोमलवर्णैरूपक्रमो युक्तः । सिंहे तु क्रूरे तस्य दोषत्वात् तत्याग एव गुणः । मसृणः कोमलः नान्यत्रानुप्रासादौ तत्र गुण एव । यथा मयूरस्य -

"गन्धर्वैर्गद्यपद्यव्यतिकरितवचोहृद्यमातोद्यवाद्यै-
राद्यैर्यो नारदाद्यैर्मुनिभिरभिनुतो वेदवेद्यैर्विभिद्य ।
आसाद्यापद्यतेऽयं जगदपि च पुनर्यौवनं सद्य उद्य -
न्नुद्योतो द्योतितद्यौर्द्यतु दिवसकृतो साववद्यानि वोऽ श्व ।।"

तेन माधुर्यादौ दोषाभावे वान्तर्भावः इत्याशयः ।

अथ दोषान्तर्भावमाह - कष्टत्वेति । सप्तमोल्लासे हि "ग्राम्यं

अर्थव्यक्तिः, दीप्तरसत्वरूपा कान्तिश्च स्वीकृते । क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा श्लेषोऽपि विचित्रत्वमात्रम् । अर्थवैमल्यरूपा समता च दोषाभावमात्रं न पुनर्गुणः । कः खल्वनुन्मत्तोऽन्यस्य प्रस्तावेऽन्यदभिदध्यात् । अर्थस्यायोनेरन्यच्छायायोनेर्वा यदि न भवति दर्शनं तत्कथं काव्यमित्यर्थदृष्टिरूपः समाधिरपि न गुणः ।

तेन नार्थगुणाः वाच्याः

कमलाकरी

नेयार्थमथ भवेत् क्लिष्टम् (का.प्रा.७.५१) इत्यत्र कष्टत्व-ग्राम्यात्वयोर्दोषत्वमुक्तं तन्निवृत्या परुषवर्णाभावः । सौकुमार्यं ग्राम्यत्वाभावरूपोज्वलत्वरूपा कान्तिश्च दोषाभावरूपा स्वीकृतेत्यर्थः । दशानां शब्दगुणानां त्रिष्वन्तर्भावमुपसंहरति-एवमिति । अथार्थगुणानां दशत्वं दूषयति -पदार्थ इति । एकपदार्थे बहूनां पदानां वा पदार्थेषु वाक्यार्थे एकपदस्य रचना । आद्ये 'अत्रेः नयनसमुत्थं ज्योति' रत्रेति चन्द्रोक्तिः अन्त्ये'कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका' इति अभिसारिकापदेनोक्तः । व्यासः एकवाक्यार्थस्यानेकवाक्यैरुक्तिः । यथा- सत्सङ्गनिरतो वत्स भविष्यसि भविष्यसि । तदा सत्सङ्गगोष्ठीषु पतिष्यसि पतिष्यसि ।। इति ।

अनेकवाक्यानामेकेनोक्तिः समासः । यथा कुमारसम्भवे - 'ते हिमालयमामन्त्र्य (कु.सं.७) इत्येकेन । एतौ व्याससमासौ च मिलित्वा चतुष्कं प्रौढ़िरूपमोजः । तथास्य काव्यस्य साभिप्रायत्वञ्चौजः, इति यदुक्तं परैस्तद्वैचित्र्यमुक्तिचातुर्यमात्रं न गुणः । तेन गुणाभावेऽन्तर्भावः । कुतो न गुणोऽत आह-तदभावेऽपीति । 'यः कौमारहरः' (का.प्र.१।१) इत्यादौ उक्तचतुष्टयाभावेऽपि काव्यव्यवहारादित्यर्थः ।

"साभिप्रायत्वमस्य चे''ति परैरुक्तं गुणान्तरं निराचष्टे-अपुष्टेति । परोक्तं साभिप्रायत्वरूपमोजो हि सप्तमे पुष्टार्थनिरासेन स्वीकृतम् । अर्थवैमल्यरूपः प्रसादो यावदर्थपदत्वं सोऽधिकपदत्वनिरासेन स्वीकृतः । एकस्यैवार्थस्य भङ्ग्यन्तरेण कथनमुक्तिवैचित्र्यरूपं सौकुमार्यममङ्गलरूपाश्लीलनिरासेन स्वीकृतम् ।

वाच्याः वक्तव्याः ।

प्रोक्ताः शब्दगुणाश्च ये ।
वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ।। ७३ ।।

के कस्य इत्याह-

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ।। ७४ ।।

ट-ठ-ड-ढ-वर्जिताः कादयोमान्ताःशिरसि

कमलाकरी

अग्राम्यवपुरग्राम्यस्वरूपासभ्यरूपेत्यर्थः । उदारता ग्राम्याणां निरासेन स्वीकृतेति । 'नपुंसकमनपुसकेनैकवञ्चास्यान्यतरस्याम्' (अ. १।२।६९) इति स्वीकृतानीत्यस्य स्त्रीपुंन्नपुंसकैकशेषेणान्वयो ज्ञेयः । तेनोक्तानां पञ्चानामभावे ओजःप्रमुखानामन्तर्भावः इत्याशयः ।

अर्थव्यक्तिकान्त्योर्गुणयो रसेऽन्तर्भावमाह- अभिधास्यमानेति । वस्तुनः स्वभावोऽसाधारणधर्मस्तस्य स्फुटत्वं व्यक्तत्वं तद्रूपाऽर्थव्यक्तिर्यथा – "पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम" इति । यथा वा 'ग्रीवाभङ्गाभिरामम्' (शा.कु.१) इत्यादि ।

दीप्तरसत्वं झटिति प्रतीयमानरसवत्वं तद्रूपा कान्तिश्च दशमे वक्ष्यमाणेन स्वभावोक्त्यलङ्कारेण पूर्वोक्ताभ्यां ध्वनिगुणभूतव्यङ्ग्याभ्यामुत्तममध्यमकाव्याभ्यामङ्गीक्रियते । तेन तयोस्तेष्वन्तर्भाव इत्यर्थः । न हि गुणाश्रयो गुणो भवतीत्याशयः ।

श्लेषस्य गुणाभावेऽन्तर्भावमाह -क्रमेति । क्रमः क्रियाणां धारा कौटिल्यं कपटं चातुर्यम् अनुल्बणत्वमप्राकटयम् । उपपत्तिर्युक्तिस्तेषां योगः सम्बन्धस्तद्रूपा घटना रचना तद्रूपा । श्लेषो यथा-

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ।।

क्रीडा नेत्रपिधानरूपा । अपरां दृष्टवा चुम्बतीत्यन्वयः ।
अत्र दर्शनादर्शनादयःक्रियाःनेत्रपिधानं छलं पिहितनेत्रयाऽन्य-

निजवर्गान्त्ययुक्ताः तथा रेफणकारौ ह्रस्वान्तरिताविति वर्णाः समासाभावो मध्यमः समासो वेति समासः तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका । उदाहरणम् –

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि-
शान्तापरचिन्तनानि ।। ३४९ ।।

योग आद्यतृतीयाभ्यामन्त्ययोः रेणतुल्ययोः ।
टादिः षसौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ।। ७५ ।।

वर्गप्रथमतृतीयाभ्यामन्त्ययोः द्वितीयचतुर्थयोः रेफेण अध

कमलाकरी

याऽज्ञानादस्फुटत्वम् । एकासनकान्तेनान्यस्याश्चुम्बने नेत्रपिधानं युक्तिरुपपादिता । तेनात्र कवेश्चातुर्यमात्रं न गुणः रसोपकारकाभावात् । चु[१]म्बनरुपसम्भोगोपकारेऽपि छले एव चमत्कारातिशयादिति ज्ञेयम् ।

समताया अवैषम्यरूप दोषाभावेऽन्तर्भावमाह-अवैषम्येति । "उदेति सविता तामस्ताम्र एवास्मेति च । सम्पत्तौ च विपतौ च महतामेकरुपता ।।" इत्यत्र प्रभोरुदयेऽस्तोक्तौ प्रस्तावभङ्गा दर्थवैषम्यमुन्मत्तप्रलापवन्महादोषः. इत्याह-कःखल्विति । तेन प्रस्तावैक्यारूपा समता दोषाभाव एव न गुण इत्यर्थः ।

समाधेर्गुणाभावेऽन्तर्भावमाह-अर्थस्येति । अयोनिस्तन्मात्रगम्यः यथा-'सद्योमुण्डितमत्तहूणचिबुकः प्रस्पर्धि नारङ्गकम्' इति हूणो म्लेच्छः । तस्य गौरमदरक्तनिर्लोमचिबुकसाम्यं केनापि नारङ्गेनोक्तम् । यथा वा माघे- 'उदयति विततोर्ध्वरश्मिरज्जौ' (शि.व.) यथा वा किराते- 'उत्फुल्लस्थलनलिनी' (कि. ५।३९) इत्यादि ।

अन्यस्य कवेश्छाया रीतिस्तद्गम्यो यथा-
निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि ।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ।। इति

अत्र उत्पले नेत्रयोः साम्यमन्यैरप्युक्तम् । अर्थज्ञानाभावे काव्यानुत्पत्तेरर्थदृष्टिः समाधिर्न गुण इत्यर्थः ।

दशानां गुणत्वदूषणमुपसंहरति । तेनेति । तेनान्तर्भावादिदूषणेन न

---

१. बञ्चनरुप-ब.।

उपरि उभयत्र वा यस्य कस्यचित् तुल्ययोस्तेन तस्यैव सम्बन्ध टवर्गोऽर्थात् णकारवर्जः शकारषकारौ दीर्घसमासः विकटा सङ्घटना ओजसः । उदाहरणम्-यथा

मूर्ध्नामुद्वृत्तकृत्तेत्यादि ।। ३५० ।।

श्रुतिमात्रेण शब्दाततु येनार्थप्रत्ययो भवेत् ।

साधारणः समग्राणां स प्रसादो गुणो मतः ।। ७६ ।।

समग्राणां रसानां सङ्घटनानाञ्च । उदाहरणम् -

परिम्लानं पीनस्तनजघनसङ्गादुभयतः

तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।

इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः

कमलाकरी

केवलमर्थगुणाः न वाच्याः किन्तु शब्दगुणा अपीत्याह-प्रोक्ता इति । चमत्कारान्न वाच्य इत्यनुषङ्गः ।

कथं तर्हि माधुर्यादौ शब्दगुणत्वोक्तिरत आह- वर्णा इति । तेषां शब्दगुणानां वर्णादयो व्यञ्जकतां प्राप्तास्तेन तेषु माधुर्यादिकं गौणमित्यर्थः ।

वर्णादयः कस्य गुणस्य व्यञ्जकास्तदाह-मूर्ध्नीमिति । अटवर्गा णकारवर्ज्य-टवर्गरहिताः मूर्ध्नि शिरस्युपरि परसवर्णवर्गान्त्ययुक्ताः । अवृत्तिरल्पसमासयुक्ताः अनङ्गइत्यादिरूपाः । स्पर्शाः कादयो मावसानाः लघू ह्रस्ववर्णं तौरकार-णकारौ अवृत्तिः अल्पसमासः । नञीषदर्थे तेन 'वर्णाः समास' इत्यतो न विरोधः । मध्यमः समासो वा तथा मधुरवर्णपदवती रचना वा माधुर्ये गुणे व्यञ्जकतामिता इति पूर्वेणान्वयः ।

अटवर्गेति व्याचष्टे-टढेति । तथा शब्दार्थमाह-माधुर्यवतीति । च्यञ्जका इति पूर्वानुषङ्ग-उक्तः ।

अनङ्गेति । आनताङ्ग्याः रमण्याः तदनङ्गस्य रङ्गो नृत्यभूः तत्तुल्यमङ्गं भङ्गीभिः रचनाभिस्तथाङ्गीकृतं यथैता यूनां मनांसि कान्ताभिन्नार्थधीशून्यानि तन्मात्रपराणि कुर्वन्तीत्यर्थः ।

अत्र नकार-रकारादयो ह्रस्वाः सानुस्वाराश्च मधुरा इत्यर्थः ।

कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ।। ३५१ ।।

यद्यपि गुणपरतन्त्राः सङ्घटनादयस्तथापि-

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ।। ७७ ।।

कृचिद्वाच्य-प्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः । यथा-

मन्थायस्तार्णवाम्भः-प्लुत-कुहर-चलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः ।

कमलाकरी

ओजोगुणे व्यञ्जकान्याह - योग इति । वर्गाणामाद्याः ककारचकारादयः तृतीया गकारजकारादयस्तैसहाद्यस्यान्त्यः परो द्वितीय-खकारछ[१]कारादिः आद्यस्य द्वितीयेन तस्य तृतीयेन वा योगः । यथा-"गच्छ कच्छकुहरं श्रितपुच्छे' ति । तृतीयस्यान्त्य-श्चतुर्थघकारछकारादिः तेषां पूर्वैः सह रेण रकारेण सहोपर्यधः उभयत्र वा योगः । यथा- वक्त्रार्कनिद्रेति । तुल्ययोरिति व्याचष्टे-तेनेति । कस्य केन वस्य चेनेति योगः । यथा-'चञ्चद्भुजभ्रमिते'' ति । सम्बन्धः सहोच्चारणं संयोगो वा । टादिवर्गःणकारस्य माधुर्ये व्यञ्जकत्वोक्तस्तद्वर्ज्याः । वृत्तेःसमासस्य दैर्घ्यं[२]मुक्तः । विकटः कठोराक्षरो गुम्फः पदरचना च ओजसि व्यञ्जकतामिता इति पूर्वगतेन सम्बन्धः ।

एतद्व्याचष्टे- वर्गेति । वर्ण द्वितीयादेः प्रथमादिना सम्बन्धो रेफेण सम्बन्धः तुल्ययोर्वा सम्बन्धः इत्यर्थः । ओजस इति व्यञ्जकतामिता इति पूर्वेण सम्बन्धः । ' मूर्ध्नामुद्वृत्ते' ति सप्तमे वैतालिकस्य रावणवर्णनम् ।

प्रसादे गुणे व्यञ्जकान्याह -श्रुतीति । समग्राणां सर्वेषां रसानां घटना रचनाश्च तासां साधारणः समानः शब्दानां श्रुतिः श्रवणं तन्मात्रेण यत्रार्थप्रत्ययः सः प्रसाद इत्यर्थः ।

परिम्लानमिति । ऊपरि स्तनौ अधश्च जघनं तत्सङ्घर्षादुभयत

---

१. झकारादि-अ.।
२. दैर्घ्यमुच्यते-ब.।

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत् सिंहनादप्रतिरसितसखो
दन्दुभिस्ताडितोऽसौ ।। ३५२ ।।

अत्र हि न वाच्यं क्रोधादिव्यञ्जकम् । अभिनेयार्थञ्च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः । वक्ता चात्र भीमसेनः ।

कमलाकरी

उपर्यधश्च म्लानं शुष्कमन्तर्मध्ये तयो कृशस्य मध्यस्य परिमिलनं सङ्घर्षमप्राप्य हरितमार्द्रं मध्ये कृशत्वेन सङ्घर्षाभावादित्यर्थः । श्लथयोर्भुजलतयोराक्षेपोऽभिघातस्तेन चलनैः सङ्कोचैर्व्यस्तो विशीर्णो न्यासः रचना यस्येदृशं नलिनीपत्राणां शयनं कृशाङ्ग्याः सन्तापं वदतीत्यर्थः ।

वर्णरचनादीनां गुणार्थत्वस्य वक्तृवाच्यादिवशादपवादमाह – यद्यपीति । परतन्त्रा गुणाधीना । वक्ता कविः तन्निबन्धो वा वाच्यः पदार्थो वाक्यार्थो वा गुरुमते । वर्णनीयं वा प्रबन्धो ऽन्यपदयोगः । प्रकरणं नाट्यं वा तेषामौचित्यं योग्यता तद्वशादन्यथात्वं गुणाधी[१]नत्वाभावोऽप्यस्तीत्यर्थः ।

वक्त्राद्यौचित्ये गुणं विनापि रचनामाह – मन्थायस्तेति । वेण्यां भीमसेनोक्तिः । मन्थो मन्थनं तेनायस्तमुत्क्षिप्तं यदर्णवस्याम्भो जलं तेन प्लुतं व्याप्तं कुहरं तत्र रणन् प्रतिशब्दवान् मन्दरस्य शब्दस्तद्वद्द्धीरो महान् । कुहरान्तो बहुव्रीहिस्ततो मन्दरान्ते कर्मधारयो वा । कोणो वादनदण्डः । यद्वा – "भेरीशतसहस्राणि ढक्का (घा)तशतानि च । एकदा यत्र ताड्यन्ते कोणाघातः स उच्यते ।।" इति । प्रलयघनानां घटाः समूहास्तेषामन्योन्यं सङ्घट्टः सङ्घर्षस्तद्वच्चण्डो महान् । कृष्णा द्रौपदी तस्याः क्रोधस्य तत्फलस्य कौरवनाशस्याग्रदूतो निवेदकः । कुरुकुलनाशार्थमुत्पातोऽरिष्टं तस्य वातजो निर्घातशब्दो निर्घातवातः । यद्वा तद्वच्छब्दायमानः स्वसिंहनादस्य प्रतिरसितं प्रतिध्वनिस्तस्य सखा तत्समः । ताडितदन्दुभे शब्दायमानत्वात् मन्दरध्वानोपमा युक्ता ।

---

१. गुणाधीनावप्यस्तीत्यर्थः-अ.।

क्वचिद्वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः । यथा-

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरूतां कन्धरारन्ध्रभाजां
भाङ्कारै र्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ।।३५३ ।।

क्वचिद्वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव ते। तथाहि आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, कथायां रौद्रेऽपि

कमलाकरी

अत्र वक्त्रादौचित्यादेवोद्धता रचना न तु केनेति वाच्यप्रश्नानुगुणेत्याह- अत्रहीति । वाच्यप्रश्नरूपं नाटकप्रबन्धानुगुण्यमपि नेत्याह -अभिनययार्थमिति । अभिनयोऽनुकारस्तदर्थं तु काव्यं नाटकं तद्विपरीता उद्धता कठोरवर्णानां रचना । आदिपदाद्दीर्घसमासः । नाटके हि दीर्घसमासादिरचना झटित्यर्थाज्ञानादभिनयप्रदर्शनशक्तेः प्रतिकूला । धीरोद्धत भीमसेनवक्तृवशात्तदालम्बनरौद्ररसाभिव्यक्तेर्गुण एवेत्यर्थः ।

अथ[१] वाच्यवशाद् रचनाया गुणत्वमाह-क्वचिदिति । प्रौढेति रावणं प्रति वेतालिकोक्तिः । प्रौढो निकटो निष्ठुरो वा यश्छेदस्तदनुरूपमुच्छलनं सूर्यपर्यन्तमूर्द्धगमनं तस्य रयो वेगस्तेन भवन् यो राहुभक्षणग्रासस्तेनाकृष्टा अश्वा यस्येदृशास्तिर्यग्वलितो भयाद्वक्रीकृतो रविरथो येनारुणेन राहुकर्तृकस्वभक्षणभयाद् द्रश्यमानं ग्रीवारन्ध्रप्रविष्टं वातझङ्कारशब्दैः श्रीरामस्तुतिं कुर्वदिव भीमं व्योम्नःकुम्भकर्णसम्बन्ध्युत्तमाङ्गं शिरः पततीत्यर्थः । अत्र वाच्यस्य कुम्भकर्णशिरसोऽतिभीमत्वादुद्धता रचना युक्तेत्यर्थः ।

अथ वक्तृवाच्यौ विना प्रबन्धवशाद् रचनाया गुणत्वमाह-क्वचिदिति । एते रचनादयः । कथाऽन्यकर्तृकाख्यायिका तस्यां वक्तुर्वीररसप्राधान्ये तदत्यागेन शृङ्गा[२]रादेरुक्तेः कोमलवर्णाभावः । हरिवर्णानादौ हि तच्चरितधीर्वोद्य तैरुचिता नाटके चाभिनयाधी नत्वात् तद्विरुद्धा रचना नेत्यर्थः ।

---

१. अन्यवाच्यवशाद् रचनाया -अ.।
२. शृङ्गारोक्तेः-अ.।

नात्यन्यमुद्धता नाटकादौ रौद्रेऽपि दीर्घसमासादयः । एवमन्यदप्यौचित्यमनुसर्त्तव्यम् ।

इति काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो नामाष्टमोल्लासः ।।

कमलाकरी

एवं मुक्तकादौ ज्ञेयमित्याह – एवमिति । एकं पद्यं मुक्तकं, द्वे युग्मं त्रीणि विशेषकं, चत्वारि कालापकमत ऊर्ध्वं कुलकं तेषु रसानुगुण्यं तन्त्रमित्यर्थः ।

इति श्रीमन्नारायणभट्टसूनु-श्रीमद्रामकृष्णभट्टात्मज महामहोपाध्याय-
श्रीकमलाकरभट्टकृतायां काव्यप्रकाशव्याख्यायां
कमलाकर्यामष्टमोल्लासः ।

अथ नवमोल्लास

गुणविवेचने कृतेऽलङ्काराः प्राप्तावसरा इति सम्प्रति शब्दालङ्कारानाह-

यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेयां सा वक्रोक्तिस्तथा द्विधा ।।७८।।

तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । तत्र पदभङ्गश्लेषेण यथा-

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान् ।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ।। ३५२ ।।

कमलाकरी

शब्दालङ्काराणामवसरसङ्गतिमाह - गुणेति । काव्यलक्षणे शब्दस्य पूर्वोपात्तत्वादित्यर्थ । अलङ्कारसामान्यलक्षणं पूर्वमुक्तं विशेषोऽत्रेत्यर्थः ।

यदुक्तमिति-। अन्यथा ऽन्याभिप्रायेण । अन्येन श्रोत्रा तद्भिन्नार्थतया श्लेषेण काक्वा वा व्याख्यायते । अन्येनेत्युक्तेः । स्वस्वोक्तेरन्यथावर्णनेऽपह्नुतौ नातिव्याप्तिः । तथा श्लेषकाकुभ्यां द्विधेत्यर्थः । तेन वक्रोक्तिर्वक्तृश्रोतृनिरुप्यैवेत्यर्थः । श्लेषोऽनेकार्थत्वं काकुर्ध्वनिविशेषः । श्लेषो द्विधा पदभङ्गात्तदैक्याच्च । आद्यमाह -नारीणामिति । स्त्रीणां हितं करोषीति पृष्टे परस्परवैरिणां हितं नाचरसीति पदभङ्गेनार्थं गृहीत्वोत्तरम् । जानासीति वामानां वैरिणां हिता[1]करणे का स्तुतिरित्यर्थः । वामानां स्त्रीणामित्यर्थं । बध्वा पुनः प्रश्नः-हितकृदिति । हितकृत् सुखकर्त्ता । हितं कृन्ततीत्यर्थं गृहीत्वा पुनरुत्तरम् । युक्तमिति । बलाभावेऽतिबलहीनस्येत्यर्थः । परस्तु बलदैत्यनाशेन प्रसिद्धस्येन्द्रस्येत्यर्थमादायाह-सामर्थ्यमिति ।

अत्र नारीणामित्येवोदाहरणम[2]ग्रे पदभङ्गाभावात् ।

---

१. हितकरणे-क.।
२. मन्त्ये-अ.।

अभङ्गश्लेषेण । यथा-

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ।। ३५३ ।।

काक्वा यथा -

गुरुजनपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नेष्यति सखि सुरभिसमयेऽसौ ।।३५४।।

वर्णसाम्यमनुप्रासः

स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः ।

कमलाकरी

पदैक्याच्छ्लेषमाह - अहो इति । दारुणा क्रूरा काष्ठेनेत्यर्थमाह ।

वक्रोक्त्या परस्योत्तरम् । त्रिगुणा सत्त्वरजस्तमोमयीत्यर्थः ।

आसां वक्रोक्तिमाह-गुर्विति । नैष्यतीति नायि [१]कयोक्तौ नेष्यति किन्तु एष्यत्येवेति काक्वा सख्युत्तरम् ।

शब्दवृत्तिमनुप्रासमाह- वर्णेति । यमकव्यावृत्तये आह- स्वरेति । स्वरा अचः व्यज्जनानि हलः । नत्वचां यमके त्वचां हलाञ्च सादृश्यनियम इति भेदः । यथा वक्ष्यति 'वर्णानां सा पुनः श्रुतिः' इति । वर्णा हलो न त्वचः इत्याह- व्यञ्जनेति । अनुप्रासशब्दार्थमाह - रसादीति । तेन विरिञ्चिपदे चासाम्येऽपि न रसानुगुण्यं व्यञ्जनाभावादित्यर्थः । [२] वर्णविशेषाणां रसविशेषव्यञ्जकत्वं वक्ष्यति । तन्मतेनानुगतः प्रकृष्ट आसो वर्णन्यासोऽनुप्रास इत्यर्थः ।

तद्भेदावाह - छेकेति । विदग्धा अतिविज्ञा । नियता रसविशेषव्यञ्जका ये वर्णास्तन्निष्ठो व्यापारो व्यञ्जनेत्यर्थः । गत इत्यस्य विशेष्यमाह -गत इति । गतस्तदाश्रितः ।

आद्यमाह- स इति । अनेकस्य व्यञ्ज[३]नस्य सकृत साम्यम् । पूर्वः छेकानुप्रासः ।

तत इति । भारते रात्रियुद्धान्ते प्रभातवर्णनम् । अरुणः सूर्ययन्ता

---

१. नायिकयोक्ते-अ.ब.।
२. वर्णविशेषव्यञ्जकत्वं वक्ष्यति । तन्मतेनानु प्रकृष्टः व.।
३. व्यञ्जकस्य-क.,अ.।

छेकवृत्तिगतो द्विधा

छेका विदग्धाः वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः । गत इति छेकानुप्रासो वृत्त्यनुप्रासश्च ।

किं तयोः स्वरूपमित्याह-

सोऽनेकस्य सकृत्कपूर्वः

अनेकस्य अर्थाद् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः ।

उदाहरणम् -

ततोऽरुणपरिस्पन्दमन्दीकृतवपुःशशी ।

दध्रे कामपरिक्षाम-कामिनीगण्डपाण्डुताम् ।। ३५५ ।।

कमलाकरी

तस्य परिस्पन्द उदयः प्रभाते । अत्र स्यन्दमन्दीति-नकारदकारयोः कामकामिनीति-ककारमकारयोश्च द्विःसत्वादनेकवारं सादृश्यम् ।

वृत्यनुप्रासमाह- एकस्येति । एकस्य व्यञ्जनस्य सकृदावृत्तिरपि छेक एवेति पूर्वेणान्वयः । एकस्येति । एकस्यानेकव्यञ्जनस्यासकृत्साम्ये परो वृत्युनुप्रास इत्यर्थः ।

वृत्ति विभजते-तत्रेति । 'मूर्ध्नि वर्गान्त्यगाः स्पर्शा' इत्युक्तैर्माधुर्यव्यञ्जकैर्वर्णैः उपनागरिका ओजः प्रकाशकैर्वर्णैः पूर्वोक्तैः परुषेत्यर्थः । उभयत्रेति । 'अनङ्गरङ्गम् । 'मूर्धामुद्वृत्त' इत्यादि च पूर्वमुक्तमित्यर्थः ।

तृतीयामाह - कोमलेति । परैरोजोमाधुर्याव्यञ्जकैः । तामेवेति चमत्कारहेतुत्वादुत्तानार्थत्वात् सर्ववेद्यत्वं ग्राम्यत्वमित्यर्थः ।

अपसारयेति- । पूर्वं व्याख्यातम् । अत्रान्त्यार्धमुदाहरणं न पूर्वं तत्र माधुर्यव्यञ्जकरेफवत्वात् । एतासां वृत्तीनामन्यमते संज्ञान्तराण्याह केषाञ्चिदिति ।

वर्णानुप्रासमुक्त्वा शब्दानुप्रासमाह - शाब्दस्त्विति । शब्दः पदं प्रकृतिश्च । यमकेऽतिव्याप्तिरतआह-अभेदेऽपीति । मूले तात्पर्यमात्रशब्दाच्छब्दार्थयोरभेदोक्तेर्यमकेत्वर्थभेदान्नातिव्याप्तिः । अन्वयः सम्बन्धः । तन्मात्रभेदाल्लाटदेशस्थजनप्रियत्वात् तन्नाम्ना । तुर्भिन्नक्रमः । भिन्नतात्पर्यैकार्थशब्दसाम्यं लाटानुप्रास इत्यर्थः । संज्ञान्तरमाह-एष इति ।

एकस्याप्यसकृत् परः ।। ७२ ।।

एकस्य अपि शब्दादनेकस्य व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्यनुप्रासः ।

तत्र-

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।

ओजःप्रकाशकैस्तैस्तु परुषा

उभयत्रापि प्रागुदाहृतम् । 'अनङ्गरङ्ग' इत्यादि 'मूर्ध्नामुदृत्त' इत्यादि च ।

कोमला परैः ।। ८० ।।

परैः शेषैः । तामेव केचिद् ग्राम्येति वदन्ति ।

कमलाकरी

अस्य पञ्च भेदाः । पदस्यावृत्तिर्नाम्नो वा, आद्येऽपि सविभक्तिकस्यावृत्तिस्तद्धीनस्य वा । तत्राप्याद्ये बहुपदावृत्तिरेकस्य च, पदैक्यावृतावपि अभिन्नः समासो भिन्नो वा । तत्र सविभक्तिकबहुपदसाम्यादेकं भेदमाह- पदानामिति । बहूनां पदानामभेदे स लाटानुप्रासः इत्यर्थः ।

यस्येति । चस्त्वर्थे । समीपे सविधे । पूर्वार्द्धे दवदहने चन्द्रत्वं विधेयम् अन्त्येऽर्धे चन्द्रस्य दवदहनत्वमित्युद्देश्यविधेयभावभेदे तात्पर्यभेदादन्वयभेदः । तेनार्थैक्येऽपि न पौनरुक्त्यम् । यद्यपि -दावाग्निचन्द्रयोर्वाच्ययोरर्थान्तरसङ्क्रमितत्वान्नार्थ-भेदस्तथापि[१] शक्यार्थभेदमात्रादुदाहृतम् । पदान्तराण्येवोदाहरणमिति तर्कपञ्चाननः ।

एकपदावृत्या द्वितीयं भेदमाह-पदस्येति । एकस्यापि पदस्यावृत्या लाटानुप्रास इत्यर्थः । पदं समुच्चीयतेऽनुषङ्गेणान्वीयत इत्यर्थः ।

वदनमिति । 'उत्तमा वरवर्णिनीति हैमः । आद्येऽर्धे वदनस्य सुधाकरत्वं विधेयमन्त्येऽर्धे तस्यानूद्य त्यागान्मुखाधिक्यात् व्यतिरेकालङ्कारः ।

अविभक्तिकपदस्य समासासमासयोश्चावृत्तिर्नामावृत्तावेव फलतीति । नामावृत्तेस्त्रीन् भेदानाह - वृत्ताविति । तत्र वृत्तावेकस्मिन्

१. वाक्यार्थभेद-क..अ।

उदाहरणम्-

अपसारय घनसारं कुरु हारं दूरं एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ।। ३५६ ।।

केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः ।

एतास्तिस्तो वृत्तयः वामनादीनां मते वैदर्भीगौडीपाञ्चाल्या रीतयो मताः ।

शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ।। ८१ ।।

शब्दगतोऽनुप्रासः शब्दार्थयोरभेदेऽप्यन्वयमात्रभेदात् लाटजनवल्लभत्वाच्च लाटानुप्रासः । एष पदानुप्रास इत्यन्ये ।

कमलाकरी

समासेऽन्यत्रवृत्तौ भिन्ने समासे वृत्यवृत्योः समासासमासयोश्च नाम्नो विभक्तिहीनप्रकृतेः सारूप्ये आवृत्तौ । स लाटानुप्रासो ज्ञेय इत्यर्थः ।

तत्रेति व्याचष्टे- एकस्मिन्निति । अन्यत्रेति व्याचष्टे - भिन्ने इति । वृत्यवृत्योरिति व्याचष्टे समासासमासयोरिति । मूले समुच्चयबाधाच्चो वार्थे उक्तः । पदानुप्रासाद्भेदमाह-प्रातिपदिकस्येति । विभक्ति-हीनस्येत्यर्थः ।

भेदत्रयेऽप्युदाहरति - सितकरेति । भो विभाकराकार सूर्यतुल्य धरणिधर नृप । सितकरश्चन्द्रस्तस्य कराः किरणाः तद्वद्रुचिरा कान्तिर्यस्या ईदृशी ते कीर्तिः । सा प्रसिद्धा कमला च । अपिश्चार्थे । तवैवास्त्यन्यस्य नेत्यर्थः ।

अत्रैकसमासे करेतिभिन्ने समासे विभेतिसमासासमासयोः कमलेति साम्यम् । यद्यप्यन्त्यकमलाशब्दे पदसाम्यं न तु नाम्नस्तथापि **पौरुषं कमलं यस्या** इति मत्वर्थीयाच्प्रत्ययः अन्त्ये च टाप् । तेन तद्धित स्त्रीप्रत्यय-प्रत्ययप्रकृत्योः कमलभागयोर्विभक्तिहीनयोरेव साम्यान्नामानुप्रासः । नामैकदेशावृत्तावप्यं ज्ञेयः । यथा-' मधुनि मधुकरत्वं रङ्गमङ्गीकरोषी' ति । लाटानुप्रासस्य पञ्चविधत्वमुपसंहरति **तदेवमिति । यमकमाह** -अर्थे सतीति । अर्थभिन्नानां भिन्नार्थानां, वाहिताग्न्यादिष्विति पूर्वनिपातस्तेनैकार्थे लाटानुप्रासे न प्रसङ्गः । एवन्तु अर्थशून्यानां पुनः श्रुतौ यमकं न स्यादत आह-अर्थे सतीति । सा भिन्नक्रमा बर्णानां पुनः श्रुतिर्यमकमित्यर्थः । अत्र वर्णभेदेऽपि श्रुतिसाम्ये

पदानां सः

स इति लाटानुप्रासः-उदाहरणम् -

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता तदवदहनस्तुहिनदीधितिस्तस्य ।।३५७।।

पदस्यापि ।

अपिशब्देन स इति समुच्चीयते । उदाहरणम्-

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ।। ३८५ ।।

कमलाकरी

यमकं भवत्येव । यथा माघे- 'भुजलतां जड़ताबलाजनः' इति डलयोः साम्ये । तदुक्तं 'डलयोः रलयोश्चैव डरयोश्च समा श्रुतिः' इति । नन्वर्थे सतीति व्यर्थमत आह - समरेति । समरे युद्धे समो रसो यस्य सः। अत्र द्वितीयसमरपदेऽर्थाभावाद्यमकं न स्यादतोऽर्थे सतीत्युक्तम् ।[1] तेन तुल्यार्थशून्याऽनेकवर्णपुनः श्रुतिर्यमकम् । चो भिन्नार्थत्वे । मूले सेतिपदं व्यर्थमत आह -सरस इति । स नाह-पादेति ।

यमकं द्वेधा-पादावृत्तिस्तद्भागावृत्तिश्च । आद्यमेकादशधा प्रथमः पादो द्वितीयादौ द्वितीये तृतीये चतुर्थे च विकल्पेन यम्यते इत्यग्रेतनेन सम्बन्धः । एवं साम्ये मुखं सन्दंशः आवृत्तिश्चेति त्रयो भेदाः । द्वितीय-पादस्तृतीये चतुर्थे च सम सन्दंशः आवृत्तिश्चेति त्रयो भेदाः । द्वितीयः पादस्तृतीये चतुर्थे च सम इति गर्भसन्दंशौ द्वौ, तृतीयश्चतुर्थे इत्येकः पुच्छाख्यः । प्रथमः पादस्त्रिष्वपि समःइति पङ्क्त्याख्यः । यथा - 'विकाशमीयुर्जगतीशमार्गणाः' (किरा. १५.५२) इति । अत्र मुखपुच्छयोगे युग्मकम् । गर्भावृत्योर्योगे परिवृत्तिः, अर्धावृत्तिः समुद्गकम्, श्लोकावृत्तिर्महायमकम् । एवं सप्तभेदाः पादयमकस्येत्यर्थः । प्रथम इति-आद्ययोरन्त्ययोश्च पादयोः साम्ये एकः, आद्यन्तयोर्द्वितीययोश्च साम्येऽन्य इति द्वौ । तेन नव भेदाः पादयमके इत्यर्थः । अर्द्धश्लोकयोः पादरूपत्वात् पदावृत्तावन्तर्भावः । तद्भागेति मूलं व्याचष्टे-द्विधेति । श्लोकपादाश्चतुरो द्वेधा कृत्वार्धभागस्य द्वितीयादौ द्वितीयचतुर्थादौ भागे साम्यम् । एवं द्वितीयाद्यभागः तृतीयाद्ये चतुर्थाद्ये च समः इति पञ्च ।

---

१. तेनेत्यादिपङ्क्तिः कपुस्तके नास्ति ।

वृत्तावन्यत्र तत्र वा ।

नाम्नः स वृत्यवृत्योश्च-

एकस्मिन् समासे, भिन्ने वा समासे, समासासमासयोर्वा, नाम्नःप्रातिपदस्य न तु पदस्य सारूप्यम्। उदाहरणम् -

सितकर-कररुचिरविभा विभाकराकार धरणिधर कीर्तिः ।
पौरुषकमला कमला साऽपि तवैवास्ति नान्यत्र ।। ३५९ ।।

तदेवं पञ्चधा मतः ।। ८२ ।।

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।

यमकम् -

कमलाकरी

अन्तभाग इति । प्रथपादान्त्यभागो द्वितीयान्त्ये तृतीयान्त्ये चतुर्थान्त्ये च द्वितीयान्त्यस्तृतीयान्त्ये तृतीयान्त्यश्चतुर्थान्त्ये इति पञ्च । एवं भागावृत्तौ दश पूर्वाक्ताः श्लोकावृत्ति विना दशेति विंशतिरित्यर्थः ।

ननु श्लोकावृत्या सहैकविंशत्या भाव्यं कथं विंशतिभेदा इत्यत आह- श्लोकान्तरेति । भागवृत्तौहि न श्लोकावृत्तिः । द्वित्र्यक्षरावृत्तावपि व्यवधाने चमत्काराभावादित्यर्थः । पादस्य त्रेधाभागे चतुर्धाभागे वान्यभेदानाह-त्रिखण्डेति । त्रिखण्डे चतुःखण्डे इत्यत्र पादे इत्यनुषङ्गः । आद्यपादभागो द्वितीयाद्ये इति पूर्ववद्योज्यम् । अन्वर्थता यौगिकता । अनेकभेदं यमकमित्यनुषङ्गः । त्रिखण्ड-चतुःखण्डादौ यमकभेदानाह अन्तादिकमिति । प्रथमान्तस्य द्वितीयाद्यैक्येऽन्तादिकं प्रथमादेद्वितीयान्तैक्ये आद्यन्तिकं, प्रथमान्तद्वितीयान्तयोरेक्ये तत् समुच्चयः । प्रथममध्यस्य द्वितीयाद्यैक्ये मध्यादिकं, प्रथमादेर्द्वितीयमध्यसाम्ये आदिमध्यं, प्रथमान्तस्यं द्वितीयमध्येन प्रथममध्यस्य द्वितीयान्तेन साम्ये तत्संज्ञे प्रथमादिमध्यान्तानां द्वितीयाद्यादौ समुच्च्यय इत्यन्वर्थता ज्ञेया ।

एकपादेऽपि तद्भेदानाह- तथेति । आदिभागस्य मध्येऽन्तेवा नियमेन विकल्पेन संस्थितिरावृत्तिः एवं द्वितीयादिपादेष्विति प्रभूतभेदं यमकमित्यन्वयः । गडुर्ग्रन्थिः । शब्दचित्रे नाधमत्वम् । दिङ्मात्रम् मार्गमात्रम् । पूर्णे वचनाशक्तेरित्यर्थः ।

आद्यतृतीयपादसाम्ये आह- सन्नारीति । सन्ना नष्टा अरीणां गजा

'समरसमरसोऽयम्' इत्यादावेकेषामर्थसत्वेऽन्येषामनर्थकत्वे भिन्नार्थानामिति न युज्यते वक्तुमिति' अर्थे सतीत्युक्तम्। सेति 'सरो रस' इत्यादिवैलक्षण्येन तेनैवक्रमेण स्थिता ।

पादतद्भागवृत्ति तद्यात्यनेकताम् ।। ८३ ।।

प्रथमो द्वितीयादौ, द्वितीयस्तृतीयादौ, तृतीयश्चतुर्थे प्रथमादिष्वपीति सप्त । प्रथमो द्वितीयो तृतीयश्चतुर्थे, प्रथमश्चतुर्थे द्वितीयस्तृतीये इति द्वे । तथैव पादजं नवभेदम् । अर्धावृत्तिः श्लोकावृत्तिश्चेति द्वे ।

कमलाकरी

यत्रेदृशो रणो यस्य सः त्वं सतीर्नारी बिभर्त्ति पुष्णाति । योमा गौरी तां यातीति यस्तं विधुशेखरं शिवमयमकपटं यथा स्यात्तथाऽऽराध्य ततो हेतोः पृथिवीं जयेत्यर्थः ।

पादावृत्तौ युग्मकमाह – विनेति । यमरूपेण विना ऽयं महाजनः सज्जन एनोऽपराधं विना यतमानानां प्रयत्नवतामपि सादं दुःखं राति ददादीति सादरं यथा तथा यद्वायतो दीर्घो मानो येषां तेषु सादरं यथा तथा मानसाच्चित्तात् सरसश्चारमत्यर्थमदीयत अखण्डतामार्यतेत्यर्थः ।

कीदृशेन यमेन नयता स्वस्थानं प्रापयताऽसून् प्राणान् खादति तेन। यद्वा नाखण्डयतेति काकुः । यतीन् रक्षता नाप्यसून् खादतीति खादी तेन ऊनयता हानिं कुर्वता यद्वा सुखादिना ऊनयता नाशयता । अयन्ना पुमान् अखण्ड्यतेति सम्बन्धः । मह उत्सवमजति क्षिपतीति महाजनो खलस्तं नुदतीति महाजनोना पुरुषः । यद्वा 'अयः शुभविधिं विना एनः पापं जनयता महान्तमजं छागं नुदतीति ददातीति नोदी । महोक्षं वा महाजं वा श्रोत्रियायोपकल्पे' दिति श्रुतेः ।

श्लोकावृत्तिमाह-सत्वेति । स तु भरतो राजाऽवश्यं निश्चितमवलम्बितमाश्रितं तारवं तरुसमूहो येन तदारमरिसमूहं सर्वदाऽनिशं रणमनैषीत् । अलसं यथा यथा अ[1]वागच्छन् न चातवान् अगच्छन्निति वा । वागतौ । अस्थितस्य क्षिपतीत्यस्थितः । अधातोरित्युक्तेर्धातुत्वान्नोपधादीर्घः । अर्थव्यत्ययेन क्रमेण वा पुनः पाठेऽन्यश्लोकस्तदाऽयमर्थः-सर्वं दारयतीति नाशयतीति दारणः तं

---

१. अवान् गच्छन् नावान् अगच्छमिति वा- ब.।

द्विधा विभक्ते पादे प्रथमादिपादादिभागः पूर्ववत् द्वितीयादिपादादिविभागेषु, अन्तभागोऽन्तभागेष्विति विंशतिर्भेदाः। श्लोकान्तरे हि नासौ भागावृत्तिः । त्रिखण्डे त्रिंशत् चतुःखण्डे चत्वारिंशत्-

प्रथमपादादिगतान्त्यार्धादिभागो द्वितीयपादादिगते आद्यार्धादिभागे यम्यते इत्याद्यन्वर्थतानुसरणेनानेकभेदम्। अन्तादिकमाद्यन्तिकम् तत्समुच्चयः, मध्यादिकमादि- मध्यमन्तमध्यं मध्यान्तिकं तेषां समुचयः तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेषु अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम् । तदेतत्काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम् ।

दिङ्मात्रमुदाह्रियते -

कमलाकरी

मानमिच्छतीति मानैषी दवाग्नितुल्यं स्थितं यस्य सत्वेन गुणेन सामर्थ्येन वारम्भे कार्यारम्भे रतः अबलं सैन्यहीनं विततो विस्तीर्णो आरवः शब्दो यस्य तं वश्यमनैषीदिति शेषः । यद्वा अल[1]समवान् गच्छन् । अः विष्णुस्तत्र स्थितः ।

द्विखण्डे पादे भागाभ्यासात् सन्दष्टमाह- अनन्तेति । द्वाभ्यां वेधाः ब्रह्मा प्रियां न वेद । अनन्तमहिम्ना व्याप्तं विश्वं यया या च प्रणते मानवे मातेव दयां भजते तां स्मरामीत्यग्रेऽन्वयः ।

एकपादे आद्यन्तयमकमाह- यदानत इति । यस्यामानतोऽयं जनोऽयस्य शुभविधेर्दानतो हेतोर्नयस्य नीतेरत्ययं नाशं न याति न गच्छति । शिवेन रुद्रेण हिता शिवे कल्याणे हितां स्मरेण कामेनामितां व्याप्तां गौरीं स्मरामीति द्वयोरन्वयः ।

पादभेदे आद्यन्तयोस्समुच्चयमाह- सरस्वतीति । क्षेत्रं शरीरं तदेव कुरुक्षेत्र तीर्थं तत्र सरस्वति नदीरूपे सरस्वति वाग्देवि मे चित्तमेव सरस्वान् समुद्रः । 'सरस्वान् सागरोऽर्णवः' (अ.को १.१०।२) इत्यमरः । तत्र स्वति सुष्ठु सर गच्छ स्थितिं प्रसादञ्च कुर्वित्यर्थः ।।

द्वयोरर्द्धयोराद्यन्तयोः समुच्चयमाह - ससारेति । ससारसा सारसपक्षिसहिता । सरसि भवं सारसं पद्मं वा शरदृतुः कन्दर्पेण साकं

---

१. अवान् गच्छम् - अ. । विष्णुस्तत्रस्थितः- ब.।

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ।। ३६० ।।
विनायमेनो नयताऽसुखादिना विना यमेनोनयता सुखादिना ।
महजनोऽदीयत मानसादरं -
महाजनोदी यतमानसादरम् ।।३६१।।
सत्वारम्भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमन्वितः ।। ३६२ ।।
सत्वारम्भरतोऽवश्यमलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमन्वितः ।। ३६३ ।।
अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ।। ३६४ ।।
यदानतोऽयदानतो नयात्ययं न यात्ययम् ।

कमलाकरी

सह यद्वा कं ब्रह्माणं दर्पयति नाशयतीति कन्दर्पः तेन दर्पेण कृत्वा ससार प्रवृत्तेत्यर्थः। किंभूता -नवा नूतना शरं काण्डं बिभ्राणा । नवानां यूनां मनः प्राणास्तद्रूपा वीनां पक्षिणां भ्राणः शब्दः । नास्ति भ्राणो यस्यां सा बिभ्राणा साऽ नेति नाविभ्राणा । नञ्द्वयात् सशब्दा शरत् प्रवृत्तेत्यर्थः ।

चतुःखण्डे द्वितीयस्य तृतीये यमकमाह -मधुरपरेति । जगत् कर्तृ मधुपानां राज्यपङ्क्त्या पराजितं मानिनी जनयतो याभिस्ताः सुमनसः पुष्पाणि यत्र । 'स्त्रियः समुनसः पुष्प' (अ. को.) इत्यमरः । स चासौ सुरभिर्वसन्तस्तस्य श्रियं यद्वा तासां सुमनसां पुष्पाणां सुरभिः सुगन्धस्तस्य लक्ष्मीमभृत दधार । वारिजानि पद्मानि वारीणि च तज्जो विप्लवो विह्वलता यत्र यद्वा वीनां पक्षिणां प्लवो गतिर्यत्र । स्फुरितं विकसितं ताम्रं रक्तं ततं विस्तृतमाम्रवणं यत्र ।।

श्लेषमाह - वाच्येति । वाच्यो ज्ञेयोऽर्थः न तु शक्यः । 'श्वेतो धावती' त्यत्र शक्यभेदाभावान्नाव्याप्तिः । तस्यार्थस्य भेदेन भिन्नाः युगपद् भाषणमेकोच्चारणं तत्स्पृशस्तद्विषयाः शब्दा यद्यत्र श्लिष्यन्ति, भेदाग्रहद्दोषादेकीभवन्ति सः श्लेष इत्यर्थः । अगृहीतभेदोऽपि शब्दोऽर्थद्वयं सङ्केतगृहाद् बोधयत्येव । अर्थप्रतीत्यनन्तरं ज्ञातोऽपि भेदो न प्रतिबन्धकः प्रतीतेःफलस्य ज्ञातत्वादित्याशयः । ननु कथमर्थभेदे शब्दभेदो नानार्थोच्छेदापत्तेरत आह- अर्थभेदेनेति । 'त्रिधा तु भिद्यते

शिवे हितां शिवेहितां स्मरामितां स्मरामि ताम् ।। ३६५ ।।
सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति ।
सरस्वति कुरु क्षेत्र कुरुक्षेत्र सरस्वति ।। ३६६ ।।
ससार साकं दर्पेण कन्दर्पेण ससारसा ।
शरन्नवाना बिभ्राणा नाबिभ्राणा शरन्नवा ।। ३६७ ।।
मधुपराजिपराजितमानिनीजनमनःसुमनः सुरभि श्रियम् ।
अभृत वारितवारिजविप्लवं स्फुटितता म्रतताम्रवणं
जगत् ।।३६८।।
एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम् ।

कमलाकरी

शब्दो रुपतः स्वरतोऽर्थतः' इति वैयाकरणाः । ननु स्वरभेदे कथं भेदाग्रहोऽत आह- काव्यमार्गेति । काव्ये स्वरभेदेऽपि श्लेषस्य सर्वजनसिद्धत्वान्न तद्भेदगणनेत्यर्थः । वाच्यभेदेनेति-वाच्यो ज्ञेयोऽर्थः न तु शक्यः । श्वेतो धावतीत्यत्र शुक्लगुणवतः लक्ष्यस्येतः समीपे धावतीत्येकस्यापि शक्यत्वाभावाच्छ्लेषो न स्यात् । अभिधाया नियन्त्रणाभावान्न व्यञ्जना । तेन नानार्थेषु युगपत्प्रतीतौ श्लेषः । क्रमेण प्रतीतावक्षाविति द्वित्वादौ चैकशेषे द्वन्द्वापवादादावृत्तिः । एकत्रैव प्रतीतावभिधानियन्त्रणाद् व्यञ्जनेति तत्वम् ।

शिलष्यन्तीति व्याचष्टे-भिन्नेति । भेदाग्रहादेकीभवन्ति इत्यर्थः । अक्षरादिभिरिति व्याचष्टे-वर्णेति । लिङ्गं पुल्लिङ्गादिः भाषाः संस्कृतप्राकृताद्याः प्रत्ययो विभक्तिभिन्नः विभक्तिः सुप्तिङ्रूपा । प्रत्ययेन तत्सिद्धावपि चमत्कारार्थं पृथगुक्तिः । वचनमेकवचनं द्विवचनं बहुवचनञ्च । एते भङ्गश्लेषेऽष्टौ भेदाः अभङ्गश्लेषे तु "भेदाभावात् प्रकृत्यादेरिति" च वक्ष्यति ।

वर्णश्लेषमाह - अलङ्कारेति । शङ्का विचिकित्सा तत्करं नरकपालमलङ्कारः। भृङ्गीगणः परिजनः सेवकः । विधौ चन्द्रे दैवे च । वक्रे कुञ्चिते विरुद्धे च । मूर्ध्नि शिरसि सर्वोपरि च । अत्र विधुविधिशब्दयोरोकारान्तं रूपं सप्तम्यां समानं तेन इ-उवर्णयो श्लेषोऽयम् इति ।

पदश्लेषमाह- पृथुकार्तेति । पृथूनि कार्तस्वरस्य हेम्नः पात्राणि

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।

शिलष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ।। ८४ ।।

'अर्थभेदेन शब्दभेदः' इति दर्शने 'काव्यमार्गे स्वरो न गण्यते' इति च नये वाच्यभेदेन भिन्ना अपि शब्दा यद् युगपदुच्चारणेन शिलष्यन्ति भिन्नं स्वरूपमपह्नुवते सः श्लेषः । स च वर्ण-पद-प्रकृति-प्रत्यय-विभक्ति-वचनानां भेदादष्टधा ।

क्रमेणोदाहरणम् -

अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-

कमलाकरी

यत्र । पक्षे-पृथुकानां बालानामार्त्तस्वरः पात्रं स्थानम् । भूषिता अलङ्कृताः, पक्षे भुवि उषिताः शयिताः । बिलसक्ता मूषकास्तेषां रेणुः । पक्षे स्पष्टम् ।। लिङ्गस्याह - भक्तीति । वाशब्दश्चार्थे । तनुपक्षे ईहितप्राप्तये नीतेत्यन्वयः । अत्र नेत्रतन्वोर्नपुंसकस्त्रीलिङ्गरूपसाम्याल्लिङ्गयोः श्लेषः । एकवचनद्विवचनयोः शब्दस्तम्याद् वचनश्लेषोऽपीत्यर्थः ।।

प्राकृतसंस्कृतभाषयोः श्लेषमाह- महदे इति । मह्यं ददस्व रसं धर्मे तमोवशामाशां गमागमाद् हर नः । हरवधु शरणं त्वं चित्तमोहोऽपसरतु मे सहसा । इति प्राकृतेऽर्थः । सस्कृते तु-महदे उत्सवदात्रि उमे मे आगमाहरणे वेदोपादाने तं सुरसङ्गं सम्बन्धं सन्धानं भक्तिमव रक्ष । समासङ्गमासक्तिं हर अपनय । बहुसरणँ प्रसरणं यस्य तं चित्तमोहमवसरे समये उमे सहसा हरेरावृत्या योज्यम् ।

प्रकृतिश्लेषमाह - अयमिति । अयं सर्वाणि शास्त्रणि हृदि वक्ष्यति वहिष्यति स्वेषु जनेषु च वदिष्यति चेति वहिवच्योर्लृटि वक्ष्यतीति समं रूपम् । अमित्राणां सामर्थ्यं कृन्ततीति मित्राणां सामर्थ्यं करोतीति च कृन्ततिकरोत्योः- क्विप् । तेन प्रकृत्योः श्लेषः ।

प्रत्ययस्याह - रजनीति । अहं प्रमथगणमध्ये सहस्त्रं यथा तथा नन्दिताऽन्दकर्त्ता स्याम् नन्दिगणरुपत्वञ्च स्याम् । तथा सति मे सोचितरुचिः योग्या प्रीतिः स्यात् । अत्र स्यात् स्यामिति प्रथमोत्तमपुरुषैकवचनयोः प्रत्ययः श्लेषः ।।

विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ।। ३६९ ।।
पृथुकार्तस्वरपात्रं भूषितनिश्शेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ।। ३७० ।।
भक्ति प्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी ।
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माक कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ।। ३७१ ।।
महदेसुरसन्धम्मे तमवसमासङ्गमागमाहरणे ।
हरबहुसरणं तं चिन्तमोहमवसरउ मे सहसा ।। ३७२ ।।
अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।

कमलाकरी

सुप्तिङ्विभक्त्योराह- सर्वस्वमिति । ।'भो हर त्वं सर्वस्व सर्वस्वम् । भवः संसारस्तन्नाशस्तत्परः । नंयो नीतिरुपकारश्च तयोः साम्मुख्यमानुकूल्यम् । तनुः शरीरं तस्य जीवनं वर्तनञ्च यासि प्राप्नोषि । पक्षे चौरं प्रत्युक्तिः-त्वं सर्वस्य सर्वस्वं हर छेदो ग्रन्थेः भित्तेर्वा तत्परो भव । उपकाराय तुल्यन्नय त्यज । आयासि क्लेशयुक्तं वर्तनं तनु कुर्विति । तिङन्तानि क्रियापदानीति सुपां तिङाञ्च श्लेषः ।

भङ्गेन श्लेषमुक्त्वाऽभङ्गेन तमाह-भेदाभावादिति । प्रकृत्यादेः पूर्वोक्तस्य भेदाभावादभङ्गाद्यत्र पूर्वोक्तभेदकाभावेऽर्थद्वयधीः स नवमः प्रकारः श्लेषस्येस्यर्थः ।

योऽसकृदिति । विबुधा देवाः पण्डिताश्च तेषामिन्द्रः प्रभुः श्रेष्ठश्च । परगोत्राणां श्रेष्ठगिरीणां शत्रुकुलानाञ्च पक्षाः पत्राणि सुहृदश्च तद्भेदे क्षणेन क्षमः । शतकोटिना वज्रेण द्यति खण्डयति कोटिशतदाता चेत्यभङ्गश्लेषः ।

नन्वर्थान्तरं व्यङ्ग्यं किन्न स्यादत आह -अत्रेति । प्रकरणे देशकालाद्यैरभिधानियन्त्रणे हि व्यङ्ग्यार्थधीस्तदभावे क्रमप्रतीत्यभावे च श्लेषाद् युगपदर्थद्वयधीरित्यर्थः ।

अभङ्गश्लेषस्यार्थश्लेषेऽर्थालङ्कारेऽन्तर्भावात् कथं शब्दश्लेषत्वमिति शङ्कते-नन्विति । स्वरितः समाहारः स्वरः । आदिपदादुदात्तानुदात्तौ । शब्दनिष्ठानां तेषां स्वाश्रयस्य विजातीयेभ्यो

सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः ।। ३७३ ।।
रजनिरमणमौलेः पादपद्मावलोक-
क्षणसमयपराप्ता पूर्वसम्पत्सहस्रम् ।
प्रमथनिवहमध्ये जातुचित् त्वत्प्रपसादा-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे ।। ३७४ ।
सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम् ।। ३७५ ।।

भेदाभावात् प्रकृत्यादेर्भेदोऽपि नवमो भवेत् ।

नवमोऽपीति अपिः भिन्नक्रमः । उदाहरणम्-
योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ।। ३७६ ।।
अत्र प्रकरणादिनियमनाभावाद् द्वावप्यर्थौ वाच्यौ ।

कमलाकरी

भेदकत्वाद् गुणत्वम् । स्वरभेदात् प्रयत्नभेदः उच्चार्याणां तद्योग्यानामपि श्लेषभङ्गापत्तेर्नादरः । पृथुकार्त्तस्वरेत्यादौ शब्दभेदादेकवृन्ते फलद्वययोगवदर्थयोरेव श्लेषः । हीन्द्रशत्रुर्वर्द्धस्वेत्यादौ समासभेदे स्वरभेदेन प्रयत्नभेदाद् भिन्नयो शब्दयोर्जतुकाष्ठवद्योगे शब्दश्लेषः । समासाभेदेन स्वराभेदे एकप्रयत्नोच्चार्याणान्तु 'योऽसकृत्परगोत्राणाम्' (का. प्र.७।३७६) इत्यादौ शब्दभेदादेकवृन्ते फलद्वययोगवदर्थयोरेव श्लेषः । किञ्च द्विविधेऽपि शब्दश्लेषेऽलङ्कारान्तरस्यार्था-लङ्कारस्योपमा प्रतिभाज्ञानं तद्धेतुर्न तु स्वयं प्रधानम् , तेनोपमासत्वादसङ्कीर्णविषयाभावात् कथमयं शब्दालङ्कार एव नार्थालङ्कार इति शङ्काशयः । सभङ्गाभङ्गश्लेषयोः प्राधान्ये शब्दालङ्कारत्वमुपमाद्युत्थापकत्वे त्वर्थालङ्कारत्वमिति भेदात् सिद्धान्तमाह- उच्यत इति । कष्टत्वं श्रुतिकटुत्वं, गाढत्वमोजो माधुर्यं वा अनुप्रासो वर्णसाम्यमित्येते शब्दस्य दोषगुणालङ्काराः । व्यर्थत्वमपुष्टार्थत्वं प्रौढिर्व्याससमासौ ओजो वा उपमासाधर्म्यमेतेऽर्थस्य दोषगुणालङ्काराः तयोः शब्दार्थयोर्भावोऽन्वयः अभावो व्यतिरेकः । सभङ्गाभङ्गश्लेषयोः कथं शब्दनिष्ठत्वं तदाह - तथाहीति । न केवलं स्वामिना किन्तु स्वतोऽपीत्यर्थः ।

ननु स्वरितादिगुणभेदाद्भिन्नप्रयत्नोच्चार्याणां तदभावादभिन्न प्रयत्नोच्चार्याणाञ्चशब्दानांबन्धेऽलङ्कारन्तरप्रतिभोत्पत्तिहेतुः शब्द-श्लेषोऽर्थश्लेषश्चेति द्विविधोऽप्यर्थालङ्कारमध्ये परिगणितो ऽन्यैरिति कथमयं शब्दालङ्कारः ।

उच्यते - इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः सः अन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते । तथाहि-कष्टत्वादि गाढत्वाद्यनुप्रासादयः व्यर्थत्वादिप्रौढ्यादि-उपमादयः, तद्भाव-तदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते ।

स्वयञ्च पल्लवाताम्रभास्वत्करविराजिता । इत्यभङ्गः
प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा ।। ३७० ।। इति सभङ्गः

इति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नम् । न त्वाद्यस्यार्थश्लेषत्वम् । अर्थश्लेषस्य तु स विषयः यत्र शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना । यथा-

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।

कमलाकरी

स्वयञ्चेति । भास्वान् सूर्यो द्युतिमाँश्च करो हस्तो रश्मिश्च । आस्वापो निद्रा तत्फलं श्रीनाशः सुखं वा । पक्षे -अस्वादो निद्राभावस्तत्फलं स्वर्गादि स्तज्जन्येऽहितस्य हितस्य वा प्रदा ।

अर्थश्लेषस्य विविक्तं विषयमाह-अर्थेति । शब्देति । उन्नतिरुर्ध्वगतिरहङ्कारश्च । अधोगतिर्नीचगमनं पादपतनञ्च । 'स्वयञ्च पल्लवे' त्यत्र श्लेषस्योपमाहेतुत्वमाशङ्क्याह- नेति । अयं शब्दश्लेषः यद्वा-ननूपमायाः श्लेषबुद्धिस्तत्र न स्वतोऽत आह- नवेति । उपमेति बहुव्रीहिः । एवं श्लेषेत्यत्र श्लेषात् प्रागुपमात्वासिद्धेरित्यर्थः ।

ननु श्लेषो नोपमाहेतुः प्रभातसन्ध्येवेत्यादौ श्लेषादर्थयोः साधर्म्याभावादत आह- तथा हीति । मनोज्ञत्वं गुणस्य । कचति बध्नाति वशीकरोतीति क्रियाया द्वयोर्योगे तूभयोः साम्यम् ।

सकलेति - । कलकलः शब्दस्तत्सहितं सकलाः कलाः सर्वाः कलाः यत्र तादृशञ्च । अयं भावः-उपमा नामसाधर्म्यम् तच्च तथा गुणक्रियादिसाम्ये तथा शब्दवत्व-कलावत्वयोरेकशब्दवाच्यत्वेन धर्मेण साम्येऽपि स एव श्लेष इत्युपमाऽपि शब्दालङ्कार इत्यर्थः । तदेव वृद्धसम्मत्याह-तथा ह्युक्तमिति-किन्त्विति शब्दमात्रमेकशब्दवाच्यत्वं

अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ।। ३७८ ।।

न चायमुपमाप्रतिभोत्पत्तिहेतु श्लेषः, अपि तु श्लेषप्रतिभोत्पत्ति हेतुरुपमा । तथा हि- यथा 'कमलमिव मुखं मनोज्ञमेतत् कच तितराम्' इत्यादौ गुणसाम्ये तथा -' सकलकलं पुरमेतज्ञातं सम्प्रति सुधांशुबिम्बमिव' इत्यादौ शब्दमात्र-साम्येऽपि सा युक्तैव ।

तथा ह्युक्तं रुद्रटेन

"स्फुटमर्थालङ्कारावेताउपमासमुच्चयौ किन्तु ।

आश्रित्य शद्वामात्रं सामान्यमिहापि सम्भवतः ।। " इति ।

न च 'कमलमिव मुखमित्यादिः साधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तम्, पूर्णोपमाया निर्विषयत्वापत्तेः ।

देव त्वमेव पातालमाशानां त्वं निबन्धनम् ।

कमलाकरी

सामान्यं साधर्म्यमङ्गीकृत्य इहापि शब्दालङ्कारमध्येऽपि तौ सम्भवत इत्यर्थः ।

उपमाया श्लेषहेतुत्वे सर्वत्र तथात्वापत्तेरूपमा निर्विषया स्यादित्याशङ्क्यालङ्कारसर्वस्वे उक्तः साधर्म्याभाव एव तद्विषय इति तदन्यमतेन निराचष्टे - न चेति । ननु कमलमिवेत्यत्रापि मनोज्ञत्वं साधर्म्यमस्त्येव अत उक्तम्-प्रयोगेति । मनोज्ञादिपदसत्वे एव शब्दभेदाच्छब्दश्लेषः अन्यथा त्वर्थश्लेषत्वमुपमात्वे चेति शङ्कार्थः । त्वदुक्ते मनोज्ञादिसाधर्म्यप्रयोगवत्युपमा न स्यादिति दूषणमाह-पूर्णेति । पूर्णोपमायास्तथात्वादर्थालङ्कारत्वं न स्यादित्यर्थः ।

ननु श्लेषोऽपि निर्विषयः स्यादत आह- देवेति । हे देव, राजन् , त्वमेवालमत्यर्थं पाता रक्षिता अधोलोकश्च । त्वमाशानां लिप्सानां दिशाञ्च निबन्धनमाश्रयः भूलोकश्च, तत्रैव दिशां परिच्छेदात् । चामराणां मरुद्वायुस्तस्य स्थानम्, अमरा देवाः मरुद्वायुरेतेषां यथा भूमिस्तथैव द्युलोकस्थितेः । भूमिः स्वर्लोकश्चेति । चकारो भिन्नक्रमः । लोकत्रयमात्मा यस्य विष्णोस्तद्रूपः लोको भुवनं तद्रूप[१]श्चेति ।

विविक्त इति । अत्रेवशब्दाद्यभावाद् द्वयोर्वाच्यत्वे श्लेषत्वमेव इवादिशब्दसत्वे तूपमात्वमित्यर्थः । एवं द्वयोः परस्परपरिहारेण स्थितौ

१. श्चेत्यर्थः-ब.।

त्वञ्चामरमरुद्भूमिरेको लोक-त्रयात्मकः ।। ३७९ ।।

इत्यादिः श्लेषस्य चोपमाद्यलङ्कार-विविक्तोऽस्ति विषय इति द्वयोर्योगे सङ्कर एव । उपपत्तिपर्यालोचने तु उपमाया स एवायं युक्तो विषयः, अन्यथा विषयापहार एव पूर्णोपमायाः स्यात् ।

न च -

'अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका'

इत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषः अपितु श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः । न ह्यत्रार्थद्वयप्रतिपादकः शब्दश्लेषः द्वितीयार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात् । न च विरोधाभास इव विरोधः श्लेषाभासः श्लेषः । तदेवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कान्तरमेव । तथा च-

'सद्वंशमुक्तामणिः' ।। ३८० ।।

कमलाकरी

क्वचिद्योगे सङ्कर एवेत्याह-द्वयोरिति । एवमन्यमतेनेत्युक्त्वा शब्दार्थालङ्कारयोस्सङ्करापत्तेर्गुणप्राधान्यविरोधाच्च स्वमतमाह- उपपत्तीति । अयं श्लेषोपमासङ्करः । अयम्भावः-श्लेषेणैव साम्यनिर्वाहादुपमात्वं न तु तया श्लेषनिर्वाहः । श्लेषं विना साम्यासिद्ध्या उपमात्वासिद्धेः ।। "प्राधान्येन व्यपदेशा भवन्तीति" न्यायेन तया व्यपदेश इति । दोषान्तरमाह- अन्यथेति । न चेवादिशब्दे उपमा तदाभावे श्लेष इति विवेकः विरोधालङ्कारे श्लेषत्वापत्यातिप्रसङ्गादित्यर्थः ।

ननु विरोधोऽपि श्लेषार्थः । उपमावत् तस्यापि श्लेषात् प्रागसिद्धे रित्याह - न चेति । अबिन्दु इति । गलन्तस्स्रवन्तो लावण्यस्य बिन्दवो यस्य । सा बिन्दुसुन्दरी, न चेति विरोधः । अप्सु प्रतिम्बितो य इन्दुस्तद्वत्सुन्दरीति परिहारः । यथा श्लेषात् प्रागुपमासिद्धेः प्राधान्यात्तया श्लेषस्य बाधस्तथा श्लेषं विना विरोधासिद्धेः प्राधान्याद्विरोधेनापि श्लेषस्य बाधः । न च तत्रेवादिवद् व्यवस्थापकमस्तीति भावः । विरोधः प्रतिभोत्पत्तिहेतुर्यस्येति बहुव्रीहिः ।

विरोधसाध्यो न श्लेषः किन्तु श्लेषसाध्यो विरोध इत्याह- न हीति । अत्र विरोधे । अयम्भावः-समकक्षेऽर्थद्वये श्लेषो भवति-न च

नाल्पः कविरिव स्वल्पश्लोको देव महान् भवान् ।। ३८१।।

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।

अहो दैवगतिश्चित्रा तथापि न समागमः ।। ३८२ ।।

आदाय चापमचलं कृत्वाऽहीनं गुणं विषमदृष्टिः ।

यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ।। ३८३ ।।

इत्यादौ एकदेशविवर्तिरूपक-श्लेष- व्यतिरेक-समासोक्ति-विरोधत्वमुचितं, न तु श्लेषत्वम् ।

शब्दश्लेष इति चोच्यते अर्थालङ्कारमध्ये च लक्ष्यते इति कोऽयं

कमलाकरी

विरोधे, समकक्षता भावाभावयोर्विरोधात् । कथं तर्हि बाधे द्वितीयार्थधीः कथं वा तदभावे विरोधो व्याघातादतआह- प्रतिभानमात्रस्येति । उपस्थितमात्रस्य प्ररोहाभावात् क्रियान्वयाभावादित्यर्थः । क्रियान्वये हि द्वयोः प्राधान्ये विरोधो नोपस्थिमात्रे विशिष्टज्ञानमात्रोच्छेदप्रसङ्गादिति भावः ।

ननु विरोधे भावाभावयोर्विशिष्टत्वासम्भवादर्थात् श्लेष एव स्यादत आह- न चेति । विरो[1]धप्रतिभासेऽपि वस्तुतो विरोधाभावात्तद् भासोऽलङ्कारो युक्तः । न च श्लेषे एकस्य प्रतिभासः, द्वयोः प्राधान्येनान्यतरस्य बाधाभावात् । अतो यथा विरोधाभासो विरोधस्तथा श्लेषाभासो न श्लेष इत्यर्थः । तेनोपमावद्विरोधाभासाद्यलङ्कारा[2]न्तरम् श्लेषजन्यमेवेति प्राधान्यात् तदलङ्कारत्वमित्युपसंहरति-तस्मादिति । अलङ्कारान्तरमेव युक्तम । यस्मात् श्लेषप्रतिभा तदुत्पत्तिहेतुरिति योजनेत्यन्ये । यद्वा श्लेषप्रतिभाया उत्पत्तिहेतुरलङ्कारान्तरं कार्यम्, कार्यज्ञानं हि कारणाभावे हेतुरेवेति तु वयम् ।

एवमादिष्वित्युक्त्वानन्यानप्यलङ्कारानाह- तथा चेति । वंशःकुलं वेणुश्च । वंशशब्दश्लेषाद् वंश एव वंश इत्यारोपपूर्वको मणित्वारोपो हि रूपकं नाम तस्य श्लिष्टपरम्परितस्यैकदेशविवर्तीति भामहोक्ता संज्ञा । अत्रैकदेशविवर्तिरुपकत्वमुचितमिति भाविना सम्बन्धः । श्लोकः कीर्तिः पद्यञ्च । अत्र श्लेषाद् व्यतिरेकः । अनुरागो रक्तता प्रीतिश्च

१. विरोधाप्रतिभासे-ब.।
२. द्यलङ्कारान्तरे-ब.।

नयः । किञ्च 'वैचित्र्यमलङ्कार' इति य एव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रेति सैवालङ्कारभूमिः । अर्थमुखप्रेक्षित्वमेतेषां शब्दानामिति चेत् अनुप्रासादीनामपि तथैवेति तेऽप्यर्थालङ्कारा किं नोच्यन्ते । रसादिव्यञ्जकस्वरूपवाच्यविशेषसव्यपेक्षत्वेऽपि अनुप्रासादीनामलङ्कारता । शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता । अर्थगुणदोषालङ्काराणां शब्दायेक्षयैव व्यवस्थितिरिति तेऽपि शब्दगतत्वोनोच्यन्ताम् । 'विधौ वक्रे मूर्ध्नि' इत्यादौ च वर्णादिश्लेषे एकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसज्यतामित्येवमादि

कमलाकरी

दिवसः पुमान् पुरोवर्ती सम्मुखश्च । सन्ध्या स्त्री वारुणीयुता तयोर्न सङ्गः क्रमिकत्वादित्यर्थः । अत्र श्लेषादप्राकृतार्थोपस्थितिरूपा समासोक्तिः ।

आदायेति । विषमा अयुग्मा लक्ष्यच्युता च दृष्टिर्यस्य सोऽपि शिवः, अचलं मेरुगिरिं स्थिरञ्च, हीनं नीचमहीनं सर्पराजमशून्यञ्च । गुणं ज्यां कृत्वाऽच्युतो विष्णु शरो यस्य अनिर्गतशरश्च चित्रं नानाविधं लक्ष्यं वेध्यम् । त्रिपुरं शतसहस्रञ्च विव्याधेत्यर्थः । अत्र विरोधत्वं श्लेषेणैषां निर्वाहो न तु तैःश्लेषस्येत्यर्थः । त्वशब्दस्य द्वन्द्वान्ते श्रुतस्य सर्वैः सम्बन्धः ।

ननु श्लेषत्वेऽर्थयोरेवालङ्कारत्वं तदप्रतीतौ चमत्काराभावादिति पूर्वोक्तं रुद्रटमतं दूषयति- शब्देति । अर्थालङ्कारत्वे तच्छ्लेषत्वमेव वाच्यं तत्र पूर्वं निरस्तमित्यर्थः । कोऽयं नयो न्याय इत्युपहासः ।

नन्वलङ्कारत्वमर्थस्यैव शब्दवैचित्र्यात् तु शब्द श्लेषोक्तिरत आह - किञ्चेति । वैचित्र्यं विधौ वक्रे इति विधुविधिशब्दयोःश्लेषेणेत्यादौ चमत्कारकारित्वमेवालङ्कारः इत्यनेन तेन कवेः प्रतिभाऽपूर्वज्ञानं तस्य संरम्भ उदयः तद्गोचरस्तद्विषयः । नूतनस्फूर्तिविषयो य एव शब्दगतोऽर्थगतो तत्रैव शब्देऽर्थे वा विचित्रता चमत्कारितेति सैवालङ्कारस्य भूमिः स्थानं यद्गतस्यैवादौ स्फूर्तिस्तद्गतस्यैवालङ्कारो व्यपदिश्यत इति द्वैविध्यमेवार्थमित्यर्थः ।

नन्वपुष्टार्थेष्वर्थं विना चमत्काराभावादर्थस्य प्राधान्याच्च श्लेषाद्यलङ्कारोऽर्थद्वारैव शब्दवृत्तित्वं न स्वत इति शङ्कते-अर्थेति । तर्हि

स्वयं विचार्यम्'

तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।। ८५ ।।

सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग-मुरज-पद्माद्याकार मुल्लासयन्ति तच्चित्रं काव्यम् । कष्टं काव्यमेतदिति दिङ्मात्रं प्रदर्श्यते ।

(१) मारारिशक्ररामेभमुखैरासाररंहसा ।
सारारब्धस्तवा नित्यं तदार्त्तिहरणक्षमा ।। ३८४ ।
माता नतानां सङ्घट्टः श्रियां बाधितसम्भ्रमा ।

कमलाकरी

अनुप्रासादीनामर्थापेक्षत्वादर्थालङ्कारतापत्तिदूषणमाह- अनुप्रासेति । कथमनुप्रासेऽर्थापेक्षित्वं तदाह- रसादीति । रसादिव्यञ्जकं स्वरूपं यस्य तादृशो यो वाच्य-विशेषोऽर्थविशेषस्तत्सापेक्षत्वे ह्यनुप्रासोऽलङ्कारो भवति । अतोऽर्थापेक्षत्वमस्त्येवेत्यर्थः । दोषान्तरमाह-शब्दगुणेति । शब्दस्योजःसुकुमारत्वादिगुणानां श्रुतिकटुत्वादिदोषाणाञ्चार्थापेक्षयैव गुणत्वं दोषत्वञ्च ।

अर्थनिष्ठेषु वैपरीत्यमाह - अर्थगुणेति । अर्थगतानां गुणानां माधुर्यादीनां दोषाणामपुष्टार्थत्वासभ्यत्वादीनामलङ्काराणामुपमादीनाञ्च शब्दापेक्षयैव स्थितिः । शब्दार्थयोर्मिलितयोः काव्यत्वादिति हेतोस्तेऽपि अर्थश्च शब्दश्च तद्गतत्वेन शब्दगताः अर्थगतत्वेनार्थगताश्च शब्दगतत्वेनैवोच्यन्तामिति विक्लवः[1] स्यादित्यर्थः ।

अभिन्नप्रयत्नोच्चार्यत्वेऽर्थश्लेषमिति यदुक्तं तद्दूषयति-विधाविति विधिविधुशब्दयोर्भेदेऽपि इउवर्णश्लेषे सप्तम्यामोकारान्ते एकप्रयत्नोच्चार्यत्वादर्थश्लेषत्वं स्यात् । आदिशब्दाद् भेदाभावो विक्लवश्चेति दूषणं त्वयैव स्वयं विचार्य दूरं विभावनीयं मया किं वाच्यमित्यर्थः ।

चित्रालङ्कारमाह - तच्चित्रमिति । अमूर्तानां वर्णानां कथं खड्गाद्याकारताऽत आह -सन्निवेशेति । वर्णावर्णाभिव्यञ्जिका लिखितलिपिरभेदोपचारात् खड्गबन्धादिव्यञ्जका यत्रालङ्कारे इत्यर्थः ।

---

१. विक्लवः । ब.।

मान्याथ सीमा रामाणां शं मे दिश्यादुमादिमा ।। ३८५ ।।

(खड्गबन्धः)

सरला बहुलारम्भतरलालिबलारवा ।

वारलाबहुलामन्दकरलाबहुलामला ।। ३८६ ।। (मुरजबन्धः)

भासते प्रतिभासार रसाभाताहताविभा ।

भावितात्मा शुभा वादे देवाभा बत ते सभा ।। ३८७ ।।

(पद्मबन्धः)

रसासार रसा सारसायताक्ष क्षतायसा ।

कमलाकरी

यद्यपि रसानुपकारान्नालङ्कारत्वं तथापि कविनैपुण्ये विस्मयात् तत्वम् । कष्टं क्लेशसाध्यम् । दिङ्मात्रं मार्गमात्रमुदाह्रियते प्रदर्श्यते ।

तत्र खङ्गबन्धं द्वाभ्यामाह–मारारीति । मारारिः शिवः शक्रः इन्द्रः रामो भार्गवः इभमुखो गणेशः तैरासारः धारासम्पातः तद्वद्रंहसा वेगेन सारः श्रेष्ठः आरब्धः स्तवो यस्याः सा । नित्यं सदा तेषामार्तिः पीडा तस्याः नाशे क्षमा । नतानां नम्राणां माता जननी श्रियां सम्पदां सङ्घट्टः सङ्गमस्थानम् । यद्वा सङ्घट्टे युद्धे श्रीर्येषां युद्धरसिकानां बाधितसम्भ्रमा निरस्तभया रामाणां स्त्रीणामसीमा न सीमान्या यस्याः । अत्रेति पाठे स्त्रीणां मर्यादा आदिमा आदिजोमा मे शं सुखं दिश्यात् कुर्यादित्यर्थः ।

चित्ररचना त्वेवम् – माशब्दं लिखित्वा तद्वाच्ये स्ववामे तिर्यगूर्ध्वं क्रमेण रादिहकारान्ताश्चतुर्दशवर्णान् लिखेदित्येका धारा । मूर्ध्नि सेति श्लिष्टम् । तदधो ऽधःक्रमेण रादिक्षान्ताश्चतुर्दशवर्णा इत्यन्या धारा । माशब्द आद्येऽन्तर्भूतः । पुनस्तमेव माशब्दमादाय तद्दक्षिणे स्ववामे तादिट्ट इत्यन्ता वर्णाः विलोमाः तद्वामे स्वदक्षिणे श्रीकारादि भ्रकारान्ताः सप्तवर्णाः विलोमाः । माशब्दस्त्वाद्य स एव तच्छ्लेषः । पुनस्तमेव मा शब्दमादाय तदधो न्याथसीति वर्णत्रयं, तदधो मा इति विलिख्य तद्दक्षिणे रादिशमित्यन्ताश्चत्वारो वर्णाः, वामे मेदिश्यादु इति चत्वारो विलोमाः । माशब्दः स एव दिशब्दस्तदधः । माशब्दः स एवेति ।

मुरजबन्धमाह– सरलेति । शरद्वर्णनम् । सरलाऽवक्रा । शरान् लातीति शरला । बहुल आरम्भ उदयो यस्य सः तरलानां चपलानामतिबलानां द्विरेफसैन्यानाम् आरवः शब्दो यस्यां सा ।

सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ।। ३८८ ।।
(सर्वतोभद्रम्)

सम्भविनोऽप्यन्ये प्रभेदाः शक्तिमात्र-प्रकाशका न तु काव्यरूपतां दधतीति नेह प्रदर्श्यन्ते ।

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।

कमलाकरी

वारलाभिर्हंसीभिर्बहुला सङ्कुलाऽमन्दाः सोत्साहाः । करान् लान्ति ते राजानो यस्यां सा अबहुलेन शुक्लपक्षेणामला बहुले कृष्णपक्षे नक्षत्रैरमला वा ।

अत्र पादचतुष्कं पङ्क्तिचतुष्के विलिख्याद्यद्वितीयतृतीयपादेषु आद्यद्वितीयतृतीयम् चतुर्थपादे चतुर्थपञ्चमौ तृतीयद्वितीयाद्यानां षष्ठोपान्त्यवर्णैराद्यः पादः । द्वितीयाद्यमाद्याद् द्वितीयदतृतीयौ द्वितीयतृतीययोश्चतुर्थौ चतुर्थस्य तृतीयद्वितीयौ तृतीयस्याद्यवर्णैः द्वितीयः पादः । द्वितीयान्त्यमाद्यात् सप्तमषष्ठौ द्वितीयतृतीययोः पञ्चमौ चतुर्थात् षष्ठसप्तमौ तृतीयान्त्यश्चेति तृतीयःपाद । अन्त्यतृतीयद्वितीयेभ्य आद्यद्वितीयतृतीयैराद्याच्चतुर्थपञ्चमाभ्यां द्वितीयतृतीयान्त्यानां षष्ठसप्तमान्त्यैर्वर्णैश्चतुर्थः पाद इति मुरजसिद्धिः ।

पद्यबन्धमाह – भासते इति । हे प्रतिभया बुद्ध्या सार श्रेष्ठ ते तव सभा भासते शोभते । बत हर्षे । रसेनाभाता शोभिता । हता अविभा अदीप्तिर्यस्याः यद्वा अविना मेषेण भातीत्यविभो वह्निर्हतो निरस्तोऽविभो यया सा । भावितो वशीकृतः ध्यातो वा आत्मा यया सा । [१] वादे शुभा । देवाभा देवतुल्या ।।

अत्रोद्धारः – माशब्दः कर्णिकायां न्यस्याष्टदलेषु भाशब्दं विहाय द्वौ द्वौ निर्गमप्रवेशाभ्यां लिखेत् । भाशब्दो मध्यऽथो निर्गमे प्रवेशे च सर्वत्रान्वेति । दिग्दलेषु चतुर्ष आरोहावरोहाभ्यां नाभौ प्रवेशः । विदिग्दलेषु चतुर्षु सकृदवरोहेण । तेनाग्नेये ऐशाने च प्रति वतेति द्वौ द्वौ वर्णौ । नैर्ऋत्ये वायवे च दले हतात्माशु इति द्वौ द्वौ वर्णौ सिद्धौ । एवमष्टदलेषु कर्णिकायाञ्च[२] सप्तदशवर्णैर्द्वात्रिंशद्वर्णनिर्वाहादन्ते

---

१. दादेशुभा–ब.।
२. मध्यथे–ब. ।

एकार्थतेव -

भिन्नरुपसार्थकानर्थक-शब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तवदाभासः। स च -

शब्दस्य

सभङ्गाभङ्गरुपकेवलशब्दनिष्ठः ।

उदाहरणम् -

कमलाकरी

पूर्वदलान्तान्मध्ये प्रवेशात् पद्यसिद्धिः ।

सर्वतोभद्रमाह -रसेति । हे रसासार भूश्रेष्ठ सारसं जलजं पक्षिभेदो वा तद्वद्विशालनेत्रा सातं नष्टमवातमज्ञानं यस्य । वागतावित्यस्य ज्ञानार्थत्वम् । तक्षस्तनूकरणं राति प्राप्नोतीति तक्षरः स नेत्य[१]तक्षरः । अतनु अनल्पं राति ददात्यतक्षर इति वा तत्सम्बुद्धि। हे नृप रक्षतस्तव तु पुनः रसा भूमिरस्तु यद्वा तवभूरीदृशी अस्तु । कीदृशी क्षतायसा क्षतोऽयः शुभावहो विधिर्येषां तान् स्यति निरस्यति सा यद्वा क्षतमायसं शस्त्रं यस्यां युद्धाभावात् न विद्यते ता [२]समुपक्षयो यस्याः सा अतासा । अयं प्रतिलोमानुलोमपादोऽपि चतुर्णां पादानामाद्यैरत्यैश्चाद्यः पादः द्वितीयैरुपान्त्यैश्च द्वितीयः, तृतीयैः षष्ठैश्च तृतीयः तुर्यैः पञ्चमैश्चतुर्थः । अन्ताद्विपर्यस्ते वेति सर्वतोभद्रः ।

अन्ये इति "बाणबाणासनव्योमखङ्गमुद्गरशक्तयः । मृदङ्ग- पद्म शृङ्गाटदम्भोलि-मुसलाङ्कुशाः ।।" इत्यग्निपुराणोक्ताः । सङ्क्षेपे बीजमाह-न त्विति । शब्दचित्रत्वेनाधमत्वादित्यर्थः ।

पुनरुक्तवदाभासमाह - पुनरुक्तेति । विभिन्नाकारो विजातीयानुपूर्वीकः । तेन-'यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथे' त्यर्थान्तरसङ्क्रमितवाच्ये यमके चातिप्रसङ्गादाह-भिन्नेति । तच्चा[३]नुपूर्वीभेदाभावान्नातिव्याप्तिः । वस्तुतस्तु एकार्थत्वे कथमाभासोऽत उक्तमेकार्थतेवेति। एकार्थोऽवभासरूपयोग्यं शब्दवत्वे इत्यर्थः । मुखे

---

१. सनेत्यनक्षरः-ब.।
२. तास उपक्षयो-व.।
३. तन्नानुपूर्वी-ब.।

अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ।
भाति सदानत्यागः स्थिरतायामवनितलतिलकः ।। ३८९ ।।
चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ।। ३९० ।।

तथा शब्दार्थयोरयम् ।। ८६ ।।

उदाहरणम्-

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।
तेजोधाम महः पृथुमनसामिन्द्रो हरिर्जिष्णुः ।। ३९१ ।।

अत्रैकस्मिन् पदे परिवर्तिते नालङ्कार इति शब्दाश्रयः

कमलाकरी

आदावापाततो न वस्तुतः । स द्वेघा शब्दगतः शब्दार्थगतश्च । शब्दोऽपि द्विधेत्याह-सभङ्गेति ।

तत्राद्यमाह - अरिवधेति । भूतिलकः स्थिरतायां सदाभाति यद्वा स्थिरतायामगोऽचल इव सत् सु [१] आनत्या स्वानत्या भाति । अरीणां वधदा ईहा चेष्टा यस्य तादृशं शरीरं सः यद्वा अरिवधदा ईहा अरिवधदेहा यस्य तं शरीरिणमीरयति क्षिपतीति सः । सहसा बलेन शीघ्रं वा रश्मिभिः सुष्ठुऊताः सम्बद्धाः तुरङ्गाः पादाताश्च यस्य सः यद्वा सूताः बन्दिनः । सारथिबन्धादिसहितस्तदाभङ्गत्वञ्च । अनत्याऽनम्रतया अगोऽचलः तत्वतः पदभङ्गेन प्रयुक्तानां देहादिशब्दानामापाततः पौनरुक्त्यभानम् ।

अभङ्गे चाह - चकासतीति । अङ्नाभिरारभन्ते यद्वा अङ्गनेष्वजिरेषु आरामो येषान्तेऽङ्गनारामाः । कौतुकं विवाहसूत्रमानन्दश्च । सुष्ठु मनो येषान्ते यस्य वा तस्य समीपगाः विबुधाः पण्डिताः । [२] अङ्गनारामादिपदे पौनरुक्त्याभासः ।

शब्दार्थप्रभवमाह - तथेति ।

तनुवपुरिति । - तनु कृशं वपुर्यस्येति च अजघन्यञ्च श्रेष्ठं बलं यस्य । करिणः प्रशस्तशुण्डाः कुण्जराः यद्वा करिषु कुञ्जराःश्रेष्ठास्तेषां

---

१. स्वानत्या-ब.।
२. अनङ्गरामादिपदे -क.।

अपरस्मिस्तु परिवर्तितेऽपि स न हीयत इत्यर्थनिष्ठः इत्युभयालङ्कारोऽयम् ।

इति काव्यप्रकाशे शब्दार्थालङ्कारनिर्णयो नाम नवमोल्लासः समाप्तः ।।


कमलाकरी

रुधिरेणारक्ता शोणा खरास्तीव्राः नखरा खराग्राणि यस्य सः । तेजसो धाम स्थानं महसा बलेन पृथुमनसामिन्द्रः ईश्वरः श्रेष्ठः ।

अत्र तन्वादिशब्दैः शरीरादिप्रतीतैः पुनरुक्तवदाभासोऽलङ्कारः । अत्र तन्वादिपदस्थाने कृशादिपर्यायपदक्षेपे स न भासतेऽतः शब्दनिष्ठः वपुःशब्दादौ तन्वादिपर्यायपदक्षेपेऽपि पौनरुक्त्यं भासत एवेति अर्थनिष्ठोऽपीत्याह-अत्रेति । इति ।

इति श्रीमज्जगद्गुरुमीमांसकनारायणभट्ट-सूनु रामकृष्णभट्टात्मज
महामहोपाध्याय-श्रीकमलाकरभट्ट-कृतायां काव्यप्रकाशव्याख्यायां
कमलाकर्यां नवमोल्लासः ।।


खड्गबन्धः




सर्वतोभद्रबन्धः

र	सा	सा	र	र	सा	सा	र	
सा	य	ता	क्ष	क्ष	ता	य	सा	।
सा	ता	वा	त	त	वा	ता	सा	
र	क्ष	त	स्त्व	स्त्व	त	क्ष	र	॥

पद्मबन्धः



मुरजबन्धः



अथ दशमोल्लास

अर्थालङ्कारानाह -

साधर्म्यमुपमा भेदे-

उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्धः उपमा । भेदग्रहणमनन्वय-व्यवच्छेदाय ।

कमलाकरी

शब्दस्य कविकृतिगोचरत्वेन प्राधान्यात् पूर्वं शब्दालङ्कारानुक्त्वाऽन्तेऽर्थालङ्कारानाह अर्थेति । ते चैकषष्टिः । यथा-

उपमानन्वयस्तद्वदुपमेयोपमा ततः ।
उत्प्रेक्षा च ससन्देहरुपकापह्नुती तथा ।
श्लेषस्तथा समासोक्तिर्व्यतिरेको निदर्शना ।
अप्रस्तुतप्रशंसातिशयोक्ती तुल्ययोगिता ।।
प्रतिवस्तूपमा तद्वद्दृष्टान्तो दीपकं तथा
विभावना विशेषोक्तिराक्षेपस्तदनन्तरम् ।
यथासंख्यार्थान्तरन्यासश्चैव विरोधयुक् ।
स्वभावोक्तिर्व्याजस्तुति सहोक्तिश्च विनोक्तियुक् ।
तथैव परिवृत्तिश्च भाविकं काव्यलिङ्गयुक् ।
पर्यायोक्तमुदात्तश्च द्विविधश्च समुच्चयः ।।
पर्यायश्चानुमानञ्च तथा परिकरोऽपरः ।
व्याजोक्ति परिसंङ्ख्या च माला कारणपूर्विका ।
अन्योन्यमु[१]त्तरं सूक्ष्मसारासङ्गतयः क्रमात् ।
समाधियुक्तञ्च समं विषमञ्च समाधिकम् ।
प्रत्यनीकं चाकलितं क्रमादेकावलीत्यपि ।
स्मरणभ्रान्तिमन्तौ च प्रतीपञ्च विधानतः ।।
सामान्यञ्च विशेषश्च तद्गुणातग्दुणावपि ।
व्याघातञ्चैकषष्ठिश्च तैषां संसृष्टिसङ्करौ ।।" इति ।

---

१. मुक्तमं-क,अ.।

पूर्णा लुप्ता च ।

उपमानोपमेय-साधारण-धर्मोपमाप्रतिपादकामुपादाने पूर्णा । एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता ।

कमलाकरी

तत्रानेकालङ्कारमूलत्वाच्चारुत्वाच्चादौ उपमाम्प्राह - साधर्म्यमिति । साधर्म्यशब्दे तद्धितेन भावप्रत्ययेन सम्बन्धोक्तेः समानधर्मत्वं सम्बन्धो ज्ञानमुपमेति परमानन्दः । अत्र साधर्म्यपदेनैव भेदलाभात् तत्पदं व्यर्थमित्येके, आरोपितभेदवारणार्थं तत्पदमित्यन्ये ।

ननु कार्यकारणयोर्बीजाङ्कुरयोरपि सम्बन्धादतिप्रसङ्गोऽतः सम्बन्ध्यपेक्षायामाह -उपमानेति । दृष्टान्तदार्ष्टान्तिकयोरित्यर्थः । चन्द्र इव मुखमितीवादिशब्दादुभयोः समानधर्मत्वात् तुल्यत्वेऽपि प्रकरणादिवशादुपमेयत्वमिति भावः । अत्रेदं तत्वम् - यद्यपि सौर्यादिविकृतौ द्र[1]व्यदेवतादिसादृश्येनोपमानादाग्नेयादिधर्मप्राप्ति र्दृष्टा । तदुक्तं शाबरभाष्ये-"उपमितलक्षणप्रापणेन हि सौर्यादावाग्नेयादि विद्यन्त" इति । व्रीहिसोमादिसौसादृश्याच्च नीवारपूतीकादौ याग साधनत्वस्य प्राप्तिः । धूमवत्वेन यथा महानस इति सादृश्येन च पर्वते महानसादि धर्मस्य वह्निमत्वस्य प्राप्तिः । व्याप्तिविशिष्टा तद्धीर्न तन्मात्रादित्यन्यदेतत् । गोसदृशो गवय इति गवयशब्दवाच्यत्वस्य प्राप्तिरन्यत्र दृष्टा । न च तेषामलङ्कारत्त्वम् न वा प्रकृते साऽस्ति । तथापि तत्र रसोपकाराभावान्नालङ्कारत्त्वम् । अतएव वस्तुतत्वद्रव्या- दिसादृश्येऽपि नोपमात्वम् । तदुक्तं "उपमानोपमेयत्वयोग्य- योरर्थयोर्द्वयोः । हृद्यं साधर्म्यमुपमेत्युच्यते काव्यवेदिभिः ।।" इति हृद्यमास्वादयोग्यं कान्तिमत्वादिकम् । चन्द्रे हि मुखसाधर्म्यात् तत्स्मरणे कामोद्दीपनाद् रसोदयः स्पष्टम् इति चित्रमीमांसादय । अतएव गवयशब्दवाच्योऽयमिति वाच्यत्वज्ञानं तार्किको[2]क्तं नोपमितिः । तस्योपमितिफलत्व न तु तत्वम् । उपमितेः शक्तिग्राहकत्वात् सर्वत्र सौर्यनीवारादावभावात् गोसदृशो गवय इत्यतिदेशवाक्यजन्यत्वेन वृक्षोपमितिवच्छब्दानुविद्धप्रत्यक्षत्वेन मानान्तरत्वाभावाच्य, किन्तु पूर्वत्र सादृश्येन तद्धर्मत्वादिप्राप्तिरेवेति ।

---

१. द्रष्टदेवतादि-क,अ।
२. तार्किकोक्तेनोपमितिःब।

कमलाकरी

वयन्तु ब्रूमः–उपमा द्विविधा गोस्तदृशो गवय इत्येका साधर्म्योपमा, कठोरकण्टकाशी उष्ट्र इति वैधर्म्योपमा । द्विविधाऽपि शक्तिग्रहहेतुत्वेन [1]रसोद्बोधाहेतुत्वान्नालङ्कारः । सिद्धञ्च साधर्म्यमुपमा । यथाचन्द्रमुखादौ यत्र तु साध्यं यथातिदेशेन सौर्ये यथा वा [2] समानमितरस्थ्येनेति । यथा वा–'सर्वं गङ्गासमं तोयमिति' । तत्र साधर्म्यत्वस्यासिद्धत्वादुपमावशेन कल्प्यत्वाद्विधेयत्वाच्च लक्षणाभावान्नोपमात्वमिति । परमानन्दस्तु– साधर्म्यं तद्गतधर्मो गुणक्रियारूपो न जातिः, घट इव पटो द्रव्यमित्यत्रोपमापत्तेः । न चेष्टापत्तिः , उपमितेर्भेदगर्भत्वाज्जात्या तदबोधादित्याह । तर्कपञ्चाननस्तु–द्रव्यत्वेनाभेदेऽपि घटत्वादिना भेदान्न तत्र गोवद्गवयो घट इव पटो जातिमानित्यादौ चोपमास्त्येव मूले साधर्म्यस्यैव तत्वोक्तेरित्याह । तदुक्तम् –

"सामान्यानि च भूयांसि गुणावयवकर्मणाम् ।
भिन्नं प्रधानसामान्यं व्यक्तं सादृश्यमुच्यते ।।" अतएव–
"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।। इति ।

रसाव्यभिचारित्वमेवालङ्कारलक्षणमष्टमोल्लासे मूले गुणाद् भेदकमुक्तमन्यथा साङ्कर्यात् । अत्र सजातीयधर्मवत्वादुभयविशेष्यका धीर्न तु प्रकृतविशेष्यकैव । अन्यथा–" हंसीव धवलश्चन्द्रः सरांसीवामलं नभः" इत्यत्र धवलपदे पुँल्लिङ्गाद् हंस्यामसम्बन्धाच्चन्द्रमात्रान्वयाद् दोषो न स्यात् । उभयविशेष्यत्वाभावात्तु दोष एव । चन्द्रवन्मुखमाल्हादकमित्यत्र द्वयोराल्हादकत्वेऽपि 'नपुंसकमनपुंसकेन' (अष्टा. १।२।६९) इति स्मृतेराल्हादकत्वाच्चाल्हादकं चेत्येकशेषाच्चन्द्रेऽन्वयेऽपि मुखलिङ्गत्वम् यथाऽऽल्हादकश्चन्द्रस्तथा मुखमित्यध्याहारो वा प्रसिद्धिवशादिति परमानन्दः । 'वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्त" (रघु. ६।३) इति । 'छायेव तां भूपतिरन्वगच्छत्' (रघु.२।६) इति च लिङ्गसंख्याभेदेऽपि वेशानुगमान्वये भङ्गाभावादुपमा युक्तैवेति मूले एवाग्रे स्पष्टम् । ननु समानधर्मत्वस्य भेदघटितत्वान्मूले भेदग्रहणं व्यर्थमत आह– भेदग्रहणमिति ।

१. रत्योद्बोध–ब.।
२. यथा चासमान–ब.।

साऽग्रिमा ।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ।। ८७ ।।

कमलाकरी

उपमानोपमेययोरभेदेऽनन्वयोऽङ्कारो लक्ष्यते । यथा- 'रामरावणयोर्युद्धं रामरावणयोरिव ।" इति । तत्रापि व्याप्तिनिरासाय भेदोक्तिः तत्रोपमानान्तरव्यवच्छेदाभावेनोपमात्वाभावात् । न च धर्मैक्ये साधर्म्याभावादेव तत्राप्रसङ्ग इति वाच्यम् । काल्पनिकधर्मभेदस्य धर्मिभेदवत् सत्वात् । तेनात्र काल्पनिके युगभेदे उपमैव अभेदे तु अनन्बयः । यथा- 'नितम्बिनी सैव नितम्बिनीव' तन्निरासाय भेदोक्तिरित्यर्थः । अतएव-'यथा वै श्येनउपनिपत्यादत्ते" इति श्येनपक्षिविधावभेदेनैव तस्योपमायोगाद्भेदसिद्धयर्थं यागनामत्वमिति मीमांसाडिण्डिमः ।

यत्तु सुबुद्धिमिश्रास्तत्र भेदे उपमात्वे च क [१] ल्प्ये गौरवेण लाघवादुपमानत्वमेव कल्प्यते तेन भेद इति तन्न भेदाभावे उपमानत्वायोगादन्योन्याश्रयात् । यत्तु चित्रमीमांसायाप्पय्यदीक्षितैरुक्तम् - 'भुवस्तलमिव व्योम' (रघु. ४.२९) इत्युपमेयोपमायां सादृश्यसत्वादतिव्याप्तिः । तस्या लक्ष्यत्वेन सङ्ग्राह्यत्वेनान्वयेऽपि तथात्वात् काव्यप्रकाशोक्तं भेदपदं व्यर्थमिति तत्तुच्छम् । अनन्वयव्यस्योपमात्वे श्येने यागनामत्वासिद्धौ तद्व्यपदेशाधिकरणविरोधात् प्रकरणाद्यैरुपमेयनिश्चयात् पर्यायेण तत्वे रसोपकाराभावाच्च । नहि मुखमिव चन्द्र इत्यत्र शृङ्गारोदय चन्द्रे चुम्बनाद्ययोग्यत्वात् यथा गोसदृशो गवय इत्यत्र । अतएवाभेदेऽपि भेदकल्पनायामुपमैव हृद्यसादृश्यसत्वात् अभेदे तु तदभावादलङ्कारान्तरमेव । यथा हि श्लेषविरोधाभासयोः प्राधान्येन व्यपदेशाद् भेदस्तथात्रापि । यच्चोक्तम् - 'अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्" (कु.सं.१।३) इत्युपपादकोपमायामव्याप्तिः, कलङ्ककिरणानां दोषगुणविशेषणानां तत्साम्याद्भेदाभावादिति तन्न रत्नकिरणहिमकलङ्कानां विशेषणानामेवोपमाभेदात् । 'पाण्ड्योऽयमंसार्पितलम्बहारः कृताङ्गरागो हरिचन्दनेन ।' (रघु. ६।६०) इति हारनिर्झरयोर्हरिचन्दनबालातपयोरुपमया तद्विशिष्टोदयाद्

---

१. कल्प्यो-क.।

कमलाकरी

द्वयोरद्रिपाण्डचयोर्विशिष्टोपमायां हारनिर्झरयोर्गुणसाम्यमुपमापादकम् । अत्राहुर्भ्रान्ताः-उपमायां वचोभङ्गीरनेकेऽलङ्काराः सम्भवन्ति । तथाहि – चन्द्रवन्मुखमिति सादृश्योक्तिरूपमा । तत्र चन्द्र इव मुखं मुखमिव चन्द्र इति विपर्ययादुपमेयोपमा, मुखं मुखमिवेत्यभेदेनानन्वयः, मुखमिव चन्द्र इति प्रतीपम्, चन्द्रसादृश्यान्मुखस्य स्मरणं स्मरणम्, मुखमेव चन्द्र इति रूपकम् । मुखचन्द्रे तापशम इति परिणामः, मुखं वेदञ्चन्द्रो वेति सन्देहः, चन्द्रभ्रान्त्या चकोरा धावन्तीति भ्रान्तिः चन्द्रोऽयं न मुखमित्यपह्नवः, नूनं चन्द्रोऽयमित्युत्प्रेक्षा, चन्द्रोऽयमित्यतिशयोक्तिः, मुखेन चन्द्रो जित इति तुल्ययोगिता, मुखं चन्द्रश्रीकमिति निदर्शना, नि[१]शि चन्द्रो भुवि मुखमिति दृष्टान्तः, मुखं कलङ्काभावाच्चन्द्रादधिकमिति व्यतिरेकः, रात्रौ मुखेन सह चन्द्रो हृष्यतीति सहोक्तिः, तेऽत्रांकस्मितज्योत्स्नायुतं मुखमिति समासोक्तिः, अब्जेन सदृशं वक्त्रं हरिणाहितश[२]क्तिरिति श्लेषः । मुखाग्रे चन्द्रो दृष्यते निष्प्रभः इत्यप्रस्तुप्रशंसा । अत्रेवार्थबाधाद्रूपकादीनामसम्भवेऽपि किञ्चित् साम्यादुक्तिः । तेषां प्राधान्येन व्यपदेशादेव भेदः । तेन चित्रमीमांसावागाडम्बरमात्रमित्युपेक्ष्या । यच्च तत्रोपमालक्षणमुक्तम् । 'व्यापार उपमानाख्यो भवेद्यदि विवक्षितः । क्रियानिष्पत्ति-पर्यन्तमुपमालङ्कृतिस्तु सा ।।' सादृश्यवर्णनारुप- उपमानाख्यो व्यापारः । उंपमितिक्रियानिष्पत्तिपर्यन्तं यत्राभिप्रेतः सोपमा । तेनैकाधिक्ये व्यतिरेके सादृश्यसत्वेऽपि अनन्वये च स्वेन स्वस्योपमायोगादनुपमं रामरावणयुद्धमित्यर्थेनान्यस्या उपमितेरनिष्पत्तेर्नातिव्याप्तिः । "रजोभिः स्यन्दनोद्धूतैर्गजैश्च घन सन्निभैः । भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ।।" (रघु. ४.२९) इत्युपमेयोपमाप्युपमाद्वयरूपैव अतो न प्रसङ्ग पृथगुप्तिव्यङ्गचवैचित्र्यात् । एवम् –"उभौ यदि व्योम्नि पृथक्प्रवाहाकाशगङ्गापयसः पतेताम् । तेनोपमीयेततमालनीलमामुक्तमुक्तालतमस्य वक्षः ।।" (शिशु.३।८) इत्यत्र द्वयोः प्रवाह्योरसम्भवादुपमाया अनिष्पत्तेर्न सा कित्वतिशयोक्तिः । मूलेएव "यद्यर्थोक्तौ च कल्पनम्' इत्यसम्भवे तदुक्तेः। 'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलञ्चास्फुटविदुमस्थम् ।

---

१. दिविचन्द्रो-क.।
२. शक्तिनेति श्लेषः -ब.।

कमलाकंरी

ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ।।" (कु.सं.१।४४) इत्यत्र यदिशब्देऽप्युपमानस्योक्तार्थत्वेन सम्भवादुपमितेर्निष्पत्तिरस्त्येवेति नातिव्याप्तिः 'चन्द्रबिम्बादिव विषं कामिन्याः निष्ठुरं वचः' इत्यसम्भावितेनैव कवेर्विवक्षयोपमितेर्निष्पत्तिः । अवश्यं ह्यत्र विवक्षैव शरणमन्यथा चन्द्रगतकान्तेर्मुखे चन्द्रधवला कीर्तिरिति धवलत्वाभावादुपमा न स्यात् अनन्वयेऽतिशये च तथा विवक्षाभावात् यद्वा स्वनिषेधापर्यवसायि सादृश्यवर्णनमुपमेति द्वितीयं लक्षणमिति । तदेतद्विवक्षापर्यन्तधावने मूलोक्ते साधर्म्यमात्रे विश्रान्ते, कुलधर्मत्वापत्तेश्च भंभ्रमणमात्रम् (१) यच्च सरस्वतीकण्ठाभरणे उक्तम् 'प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः भूयोऽवयवसामान्ययोगः सेहोपमा मता'' (सर .) इति तत्रापि अवयवेति । गुणक्रियासादृश्योपलक्षणमन्यथा 'तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः।' इति गुणसादृश्येऽव्याप्तेः । यत्त्वलङ्कारसर्वस्वे उक्तम्-त्रिविधं साधर्म्यम् । भेदसामान्ये एकं यथा दीपकद्रष्टान्तादौ, अभेदप्राधान्ये द्वितीयं यथा रूपकादौ, भेदाभेदयोस्तुल्यत्वे तृतीयं यथा उपमायाम् । अत्र हि असाधारणधर्माभ्यां भेदः समानर्धमेणाभेदश्चेति द्वावपि तुल्यौ । न चोपमेयोपमायाम् -'भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्' (रघु.४।२९) इत्यादावव्याप्तिः । तत्रोपमाद्वये तात्पर्यादिति । तत्रापि विवक्षायां तात्पर्ये पूर्वदोष एवेति सङ्क्षेपः ।

उपमाभेदावाह-पूर्णेति । उपमा द्विधा- पूर्णा साङ्गा निरङ्गा लुप्ता चेत्यर्थं । आद्यामाहोपमानेति । उपमानं दृष्टान्तः उपमेयं दार्ष्टान्तिकं साधारणो धर्म उभ[१]यानुगतो धर्मो गुणक्रियादिः । उपमावाचका इवादयः शब्दाः । एषां चतुर्णां निर्देशे पूर्णाः । एषां मध्ये एकस्य द्वयोस्त्रयाणां वा लोपे अनुक्तौ, अनुक्तिश्च क्वचिन्न्यायात् क्वचिदनुशासनाल्लुप्तोपमेत्यर्थः । पूर्णाया षड्भेदानाह-साग्रिमेति । साग्रिमा प्रथमोपमा पूर्णवाक्ये समासे तद्धिते च श्रौती आर्थी च प्रत्येकं त्रिधा भवेदित्यर्थः । समासातिरिक्तं वाक्यं विग्रहः तद्धितो वतिप्रत्यमादि' । श्रौती शाब्दी । आक्षेपगम्याऽऽर्थी । नन्विवादिशब्दे श्रौतत्वं तुल्यवत्यादौ चार्थीत्वं वक्ष्यमाणमयुक्तं सादृश्यप्रतीतेरुभयत्र तुल्यत्वात् । अन्यथा तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् (अष्टा०

---

१. उभयानुगतो-ब.।

अग्रिमा पूर्णा यथेवादिशब्दा यत्परास्तस्यैवोपमानता प्रतीतिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा ।

कमलाकरी

३।३।७२) इत्यत्र तुल्यपदस्योपमावाचित्वाभावे तदर्थकतुल्योपमायोगे तृतीयानिषेधायोगात् उभयत्र तत्प्रतीत्यविशेषाच्चेत्याशङ्क्य वाक्ये तद्धिते च श्रौतीमाह-यथेव वेति । यथा-'यथा वै श्येनो निपत्यादत्तें 'यथा प्रह्लादनाच्चन्द्रं (रघु.४।१२) चन्द्र इव मुखमिति वाक्ये यथेव वाशब्दौ समुद्रो वा महासत्व, इति । वा विकल्पोपमानयो' इति कोशाद्वाक्ये वाशब्दः । आदिपदात्' यथा महानस्' इत्यादौ मृगो न भीमः' 'इन्द्रो न तस्थौ' इति यास्कोक्तौ नकारः चोपमानं दृष्टान्तस्तत्सम्बद्धा यद्यप्येते इवादिशब्दास्तथापि राज्ञः पुरुष इत्यत्र यथाराजपदे षष्ठीसम्बद्धस्य द्विष्ठत्वात् पुरुषनिष्ठान्तमाह तथेवादयोऽपि सम्बन्धवाचका इत्युपमेये मुखे स्वासम्ब[1]द्धेऽपि शब्दशक्त्या सम्बन्धवाचका इति । यथा श्रौतीयमुपमा तथैव " तत्र तस्येति" (अष्टा. ५।१।११६) सूत्रेणेवार्थे विहितस्य वतेस्तद्धितस्योपादानेऽपि श्रौती उपमेत्यनुषङ्गेणान्वयः । यत्पराः यत्सम्बद्धा यदुत्तरं श्रुताः तेनेवादीनां स्वभावो यत् सम्बद्धमुपमानमेव न तु कदाप्युपमेयं, तेन मुखमिव चन्द्र इत्यत्र मुखमेवोपमानं तेन प्रतीतोऽयमित्यर्थः ।

आर्थीमुपमां वाक्ये तद्धिते चाह- तेन तुल्यमिति । इवादिशब्देसमानविभक्तिकत्वाच्छाब्दोऽन्वयः । तुल्यादिशब्दे तु कथं सदृशमित्याकाङ्क्षया विभक्तिभेदाच्च कल्प्यत्वादार्थमित्यर्थः । चन्द्रेण तुल्यम् आदिपदात् सदृशं समं वा मुखमित्यत्रोपममेय एव विश्रान्तिः तथैव 'तत्र तस्येव' इत्यनेन इवार्थे विहितस्य वतेरुपादाने । "तेन तुल्यं मुखमित्यादावुपमेये एव 'तुत्तुल्यमस्य' इत्यादौचोपमाने एव 'इदञ्च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिशब्दोपादने आर्थी । तद्वत् 'तेन तुल्यं क्रिया चेद्वतिः ' अस्य

---

१. स्वासम्बन्धेऽपि-क, अ ।

तत्रैव 'तत्र तस्येव' इत्यनेन इवार्थे विहितस्य वते रूपादाने। तेन तुयं मुखंमित्यादावुपमेय एव तजुल्यमस्य इत्यादौ चोपमेवे एव इदं च तव युल्यमित्यभयत्रापिशब्द्वानां विश्वान्तिरिति-साम्वपर्याप्त लोचनया तुल्यता प्रतीतिरिति। साधर्म्यस्यार्थत्वा तुल्यादिशद्बोपादाने आर्थो तद्वत् 'तेन तुल्यं त्रियाचेत्तद्वतिः'

कमलाकरी

तुल्यं चन्द्ररूपमित्यत्रोपमाने दृष्टान्ते एव विश्रान्ति। चन्द्रो[1] मुखञ्च तुल्यमित्यत्रोभयविश्रान्तिस्तत्परत्वञ्च साम्यं साधर्म्य तस्य पर्यालोचना कल्पना तया सादृश्ययोगेऽपि उपमेयत्वं कल्प्यम्[2]।तेन वादिशब्दानामेकसम्बन्धेऽप्यन्यगतसादृश्यसम्बन्धोक्तेरुपमेयत्वं श्रौतम्। तुल्यादौ सादृश्यविशिष्ट-धर्मिवाचकत्वाद्विशेष्यलिङ्गादुपमानानियमे तत्राप्यनियमात् सादृश्यमुपमेयत्वञ्च प्रकृतत्वेन कल्प्यमित्यार्थी उपमेत्यर्थः। सादृश्यवाचित्वे हीवशब्दवत् स्वसम्बद्धस्योपमानत्वं नियतं स्यान्न तूपमानोपमेयोभयपरत्ववैषम्यादुपमानानियम इत्यर्थः। तेनात्र धर्मवाचकत्वं सादृश्यपरत्वं तात्पर्यात् कल्प्यम्। पूर्वत्र तु सादृश्यमुपमाधर्मो वाच्य एवेत्यर्थः। अत्रेदं तत्वम्-अतुलोपमाभ्यामित्यत्रोपमायोगे तृतीया निषिद्धा। 'शम्भुना स्फुटोपमम्' 'तेनोप[3]मीयेतेति च माघे उपमाशब्दयोगेऽपि तृतीयोक्ता। तेन सादृश्यरूपधर्मवाचित्वे उपमायोगेऽपि तृतीया भवत्येव। इवादयस्तस्योपमानस्य वाचकाश्चेति श्रौती। तुल्यसदृशादिवदुपमा (श्र) यद्रव्यवाचकोपमाशब्दयोगे तृतीयानिषेधः। तत्र तुल्योपमाशब्दे धर्मिवाचके सादृश्योपमानधर्मपरत्वम्। गौर्नित्य इतिवल्लक्षणाया प्रकरणादिना वा जघन्यमिति मल्लिनाथोक्त्या वयं प्रतीमः। अतएव तुल्यसदृशसमप्रतीकाशोपमाशब्दानां 'शैलोपमः शैवलमञ्जरीणाम्' इति अत्र द्रव्यवाचिनां सुबन्तत्वं 'तेनोपमीयेत' इत्यत्र च धर्मवाचिनां तिङन्तत्वमिति भेदः।

तद्धिते आर्थीमाह - तद्वदिति। तद्वद्युद्धयतीत्यत्र 'तेन तुल्यं क्रिया चेद्वतिः" (अष्टा. ४।१।११५) इति सूत्रेण क्रियासाम्ये विहितेन वतिना

---

१. चन्द्रबिम्बं मुखञ्च तुल्य-ब.।
२. कल्प्यते न चेवादि-ब.।
३. रूपधर्मिविचित्वे-क., अ.।

इत्यनेन विहितस्य वतेः स्थितौ । 'इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च'' इति नित्यसमासे इवशब्दयोगे समासगा । क्रमेणोदाहरणम् -

(१) स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ।। ३९२ ।।

(२) चकितहरिणलोललोचनायाः क्रुधि
तरुणारुणताराहारि-कान्ति ।
सरसिजमिदमाननञ्च तस्याः सममिति चेतसि
सम्मदं विधत्ते ।। ३९३ ।।

कमलाकरी

धर्मिणोः साम्यस्योपमेस्य कल्पनाच्चार्थी । द्विविधो हि वतिः । 'तत्र तस्येव' (अष्टा . ५।१।११६) इति सूत्रे तत्रेति सप्तम्यन्तात् तस्येति षष्ठ्यन्तात् सादृश्यरूपे इवार्थे विहिते श्रौती । 'तेन तुल्यमिति तुल्यार्ये विहिते आर्थीत्यर्थः ।

समासगां श्रौतीमाह- इवेनेति । पूर्वपदे प्रकृतिस्वरः । समासाभावे यः स्वरः स एव न तु समासः स्वरः । यथा-'सृण्येव चक्रवाके' चेति वेदे । 'वागर्थाविव' इति लोके च श्रौती । 'जीमूतस्येव भवति प्रतीकम् । इति याजुषाणां पदभेदादिवेन समासो नित्य एवेति तत्वम् । समासे इवार्थबोधे चन्द्रमुखीत्यार्थी । एवं षड्विधा पूर्वोक्ता ।

तत्र वाक्ये श्रौतीमाह - स्वप्नेऽपि । रे राजन् , विजयश्रीस्त्वां स्वप्नेऽपि जयस्यैवानुभवान्न मुञ्चति । स्वाधीनः पतिर्यस्या सा । प्रभावः प्रभुत्वं तपःसामर्थ्यं वा तत्प्रभवं तत्प्राप्तम् । प्रभवेति ह्रस्वपाठो युक्तः । हे प्रभो अप्रभवमसमर्थं स्त्रीजितं कान्तं यथेत्यर्थः । अत्र वाक्ये यथेत्युपमावाचकं जयश्रीरुपमेया ।।

वाक्ये आर्थीमाह - चकितेति । भीतमृगचपलनेत्रायाः क्रुधि क्रोधे तरुणारुणवत्तारा निर्मला हारिणी मनोहरा कान्तिर्यस्येदं पद्मं तस्याः मुखञ्च सममिति हेतोश्चेतसि सम्मदं हर्षं तनोति । अत्र समशब्दादार्थी उपमा ।

समासे श्रौतीमाह - अत्यायतैरिति । शौरिः कृष्णः चतुर्भिर्भुजैरिव यो राजाऽतिफलैरतिदीर्घैश्चोद्धतानां दुष्टानां शिक्षकैः प्रभाभिः सामर्थ्यैः कान्तिभिश्च दिव्यैरुत्कृष्टैश्चानपायमयैर्नाशहीनैः लक्ष्मीविलासस्थाने

(३) अत्यायतैर्नियमकारिभिरुद्धतानां
दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ।। ३९४ ।।

(४) अवितथमनोरथपथप्रथनेषु प्रगुणरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ।। ३९५ ।।

(५) गाम्भीर्यगरिमा यस्य सत्यं गङ्गाभुजङ्गवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ।। ३९६ ।।

कमलाकरी

श्चतुर्भिरुपायैः सामदानभेदनिग्रहैः सदा भुवनं बभारेत्यर्थः । अत्र भुजैरिवेति समासे श्रौती ।।

समासे आर्थीमाह- अवितथेति । हे भूपते सफलमनोरथमार्गप्रकाशकेषु प्रकृष्टगुणरिम्णा गीता श्रीर्यस्य सः कल्पतरुसदृशो दाता भवान् कस्येप्सितो नासि । अपि तु सर्वस्यासि । अत्र सदृश इति समासे आर्थी उपमा ।।

तद्धिते श्रौतीमार्थीञ्चार्द्धाभ्यामाह - गाम्भीर्येति । तस्य रा गङ्गाया भुजङ्गो विटो जारस्समुद्रः । शान्तनोरेव पतित्वात् तस्य जारत्वम् । 'भुजङ्गो विटसर्पयोः" इति विश्वः । तस्येव गाम्भीर्यं गूढार्थत्वमगाधत्वञ्च सत्यम् । स युद्धे निदाघे ग्रीष्मेऽम्बररत्नः सूर्यस्तस्य दुःखेनालोक्यत इति दुरालोकः । पूर्वार्धे 'तत्र तस्येवे' ति इवार्थे वतेः श्रौती, परार्द्धे च तुल्यार्थवतेरार्थी । यत्र तु सादृश्यसाम्यसाधर्म्यादिशब्दाः । यथा-

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ।। (रघु. १।४०) इति तत्र प्रकृत्या धर्म्युक्तावपि प्रत्ययेन धर्मोक्तेः श्रौत्येवेति ज्ञेयम् ।

ननु पञ्चमे 'अव्यङ्ग्यं चित्रम् । चित्रभेदा अलङ्कारेषु निर्णेष्यन्त, इत्युक्तम् । इह तु 'स्वप्नेऽपीत्याद्युदाहृते 'स्वाधीनपतिका यथा' इति रसादिव्यङ्ग्यं विना चित्रत्वं नैवास्ति, उक्तिवैचित्र्य ह्यलङ्कारः तच्च ध्वनिगुणीभूतव्यङ्ग्यप्रयोज्यम्, तेनात्र तत्सत्वे कथं चित्रत्वमलङ्कारता । चित्रत्वे वा कथं व्यङ्ग्यं तेन पूर्वविरोधोऽत आह - स्वाधीनेति ।

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचत्कारभूः तथा जयश्रीस्त्वदासेवनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तेर्वैचित्र्यं वैचित्र्यञ्चालङ्कारस्तथापि न ध्वनि-गुणीभूतव्यङ्ग्यव्यवहारः । न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिरपि तु वाच्यवैचित्र्यप्रतिभासादेव । रसादिस्तु व्यङ्ग्योऽर्थोऽलङ्कारान्तरञ्च

कमलाकरी

अयंभावः-स्वाधीनेत्याद्युदाहृते यद्यपि रसं विना न चित्रत्वमलङ्कारो वास्ति । तथापि न रसवशादुत्तमत्वं मध्यमत्वं वा । कुतो न तत्राह-न खल्विति । व्यङ्ग्यस्य व्यङ्ग्यस्य रसादेः संस्पर्शो वैशिष्ट्यं तस्य परार्शाद् ज्ञानात् । अत्रालङ्कारे चारुत्वधीर्न हि किन्तु यथेवादिवाच्यस्योपमादेर्वैचित्र्यज्ञानादेव चारुता, वैचित्र्यन्तु तत्र रसानु[1]वेद्यादन्यालङ्कारसत्वाच्चेत्यव्यभिचारेऽपि तद्रसादिव्यङ्ग्यमगण यित्वोपेक्ष्य विवक्षावशादुपमादय उक्ताः ।

ननु नीरसा निर्व्यङ्ग्या एवालङ्कारा किं न स्युरत आह तद्रहितत्वेनेति । व्यङ्ग्यरसरहितत्वेनोक्ता अलङ्कारा एव न स्युः रसोक्तिवैचित्र्यस्यैवालङ्कारत्वात् । तदुक्तम्-

"रसध्वनिर्यत्रास्ति तत्र वन्ध्यं विभूषणम् ।
मृतायाः मृगशावाक्ष्याः किं फलं हारसम्पदा ।।" इति । तथा
"रसभावादितात्पर्यमाश्रित्यि विनिवेशनम् ।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधकम् ।। (ध्वन्यस २।१७)
ध्वन्यात्मभूते शृङ्गारे विवक्षाविनिवेशितः ।
उपमादिरलङ्कारवर्ग एति यथार्थताम् ।।" (ध्वन्या. २।१८)

अतो विवक्षावशेन रसवत्यलङ्कारो युक्त एवेति न पूर्वापरविरोध इत्याह - इतीति । अतएव गोसदृशो गवय इति, चन्द्रवद्धवलः पटः गौरयं, स्थाणुः पुरुषो वेति नीरसे नोपमा रूपकं सन्देहोऽपह्नुतिर्वा वि[2]द्यमानालङ्कारवाच्या इत्यर्थः । अयंभावः -गोसदृशो गवय इत्यादावुपमाऽस्त्येव 'उपमानानि सामान्यवचनैः' (अष्टा. २।१।५५) इति सामान्यधर्मस्यैव तत्वात् । इवसदृशादीनामर्थशून्यत्वापत्तेश्चालङ्कार्य-रसाद्यभावात्तु तेषां नालङ्कारता । अतएव वन्ध्यं विभूषणम्' 'एति

---

१. रसानुवेधादन्या-ब.।
२. वेद्यमाना-क.।

सर्वत्राव्यभिचारीति अगणयित्वैव तदलङ्कारा उदाहृताः। तद्रहित्वेन तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम्।

तद्वद् धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः।

धर्मः साधारणः। तद्धिते कल्पबादौ त्वार्थ्यैव। तेन पञ्च उदाहरणम् -

(१) धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।
करणीयं वचनश्चेतः सत्यं तस्यामृतं यथा॥ ३९७॥

(२) आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन्।
प्रत्यार्थिसेनया दृष्टः कृतान्तेन समः प्रभुः॥ ३९८॥

कमलाकरी

यथार्थताम्' इति चोक्तम्।

एवं षड्विधां पूर्णोपमामुक्त्वा लुप्तोपमामाह-तद्वदिति। अत्रेदं तत्वम्-एकस्य द्वयोस्त्रयाणां वा लोपे लुप्तोपमा। तत्रैकलुप्ता त्रिधा-धर्मलुप्ता वाचकलुप्ता उपमानलुप्ता च। [१]'आहार्यवशाद्वितीया सप्तधा, अन्त्या द्विधा। द्विलुप्ता पञ्चधा, त्रिलुप्ता एकधेति विंशतिभेदा। तत्र पञ्चविधां धर्मलुप्तामाह-धर्मस्येति। धर्मस्य साधारणधर्मस्य लोपे तद्वत् पूर्णावत् वाक्ये समासे तद्धिते श्रौती आर्थी च धर्मलुप्ता स्यादित्यर्थः। तत्र विशेषमाह -तद्धिते तु न श्रौती किन्त्वार्थी एव। पुनस्त्वर्थे। तद्व्याचष्टे-धर्म इति। न श्रौतीत्येतद् व्याचष्टे-तद्धिते इति। 'तत्र तस्येवेति' (अ.५।१।११६) इतीवार्थे वतेः कल्पप्देश्य-देशीयरां बहुतृणमिति 'विभाषा सुपो बहुच् पुरस्तात् तु' (५।३।६८) इति बहुच् च। तद्धितस्य धर्मापेक्षत्वात् तल्लोपे साकाङ्क्षात्वान्न श्रौती किन्त्वार्थ्येव। 'तुल्यार्थेवेत्यादौ कल्पबादौ च नित्यं क्रियारूपधर्मापेक्षत्वात् तल्लोपे आर्थ्येवेत्यर्थः। तेन षटस्वेका न्यूनेति पञ्चधेत्याह-तेनेति।

तत्र वाक्ये श्रौतीं लुप्तोपमामाह-धन्यस्येति। हे चेतोऽनन्यसामान्योऽनुपमेयः सौजन्योत्कर्षस्तेन शालते शोभते इति तस्य

१. आहार्येत्यादिभागमारभ्य विंशतिभेदाः' इत्यन्तःभागो क- पुस्तके नास्ति।

(३) करवाल इवाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे ।। ३९९ ।।

उपमानानुपादाने वाक्यगाऽथ समासगा ।। ८८ ।।

सअलकरण-परवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अह व णिसम्मइ सरिसं अंसंममेत्तेण ।। ४०० ।।

'कव्वरस' इत्यत्र' कत्वसमं इति 'सरिसं' इत्यत्र णूणम्' इति पाठे एषैव समासगा ।

कमलाकरी

राज्ञोऽमृतं यथाऽमृतवन्मधुरं सत्यं वचः करणीयम् । अत्र सामान्यस्य माधुर्यधर्मस्य लोपे यथाशद्वाच्छ्रौती ।

वाक्ये आर्थीमाह - आकृष्टेति । असौ राजा सम्पराये युद्धे शत्रुसेनया विस्तारितख[१]ङ्गो भ्रमन् कृतान्तेन यमेन समो दृष्टः ।।

अत्र समत्वापादकस्य क्रौर्यादिधर्मस्याप्रयोगात् खङ्गस्य च यमायुधत्वाभावादुपमेये नृपे यमसादृश्यविश्रान्तेरार्थी लुप्तोपमा ।।

समासे श्रौतीमार्थीं तद्धिते आर्थीञ्चाह - करवाल इति । हेसखे, तस्य दुष्टस्याचारः करवाल इव घातुकः । वागमृतोपमा मिष्टा, मनो विषकल्पं तत्तुल्यम् । तदेतद्यदि जीवसि जीविष्यसि तत्त्वमेव वेत्सि ज्ञास्यसि । 'वर्तमानसामीप्ये वर्तमानवद्वा' (अष्टा. ३।१।१०) इति लट् । तत्सङ्गे जीवनमेव दुर्लभमिति भावः । 'करवाल इवाचारः'इत्यत्रेवशब्दे नित्यसमासाच्छ्रौती लुप्तोपमा । अमृतोपमेति समासे धर्मिवाचकोपमाशब्दादार्थी । विषकल्पमिति तद्धिते आर्थीति । घातुकमाधुर्यनाशकधर्मानुक्तेर्लुप्ता त्रिविधोक्ता ।

उपमानेति - । उपमानं दृष्टान्तस्तद्वाचिशब्दादेव तद्धितविधानात् तदनुपादाने तद्धितगा । सा न सम्भवत्येव तेनोपमानाभावे या लुप्तोपमा सा वाक्ये समासे चार्थ्येव द्विधेत्यर्थः ।

तत्र वाक्यगामाह - सअलेति । सकलकरणपरविश्रामश्रीवितरणं न कस्य काव्यस्य । दृश्यते ऽथवानिशम्यते सदृशंमंशांशमात्रेण ।। इति संस्कृतम् । सर्वेन्द्रियाणां परो विश्रामो सुखं तस्य श्रियाः कारकं सरसकाव्यस्य सदृशमंशांशेन लेशतोऽपि सदृशं न च श्रूयते ।

---

१. विस्तारितरवबद्धो भ्रमन् - क.।

वादेर्लोपे समासे सा कर्माधार-क्यचि क्यङि ।
कर्मकर्त्रोर्णमुलि

वाशब्दः उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे षट् । समासेन कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा, कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ।

उदाहरणम् -

कमलाकरी

ईदृशमन्यद्वस्तु नास्तीत्यर्थः ।

अत्र सदृशमित्युपमानस्य वस्तुनो भावादार्थी उपमा वाक्ये इत्यर्थः । अत्रैव काव्यसममिति पाठे समासगोपमेत्याह - कव्वस्सेति । नन्वेवं समशब्दस्य सरिसअमिति अनेन पौनरुक्त्यं स्यादत आह णूणमिति । सरिसपदस्थाने नूनपदप्रयोगात् न पौनरुक्त्यमित्यर्थः । न च चन्द्रस्य सदृशंमुखमितिवत् काव्यमेवोपमानं काव्यनिष्ठसादृश्य-प्रतियोगित्वेनान्यस्यैव प्रतीतेः । यद्यपि काव्यवदित्युक्तौ श्रौती स्यादेव तथापि प्रचुरमप्रयोगान्नेत्येके । तत्वन्तु - तद्धिते तल्लाभात्तत्सदृशमित्यनन्वितं स्यादिति दिक् ।

वाचकलुप्तायाः षड् भेदानाह - वादेर्लोप इति । समासे वा इवादेर्लोपे साऽऽर्थी उपमा भवेत् । 'उपमानादाचारे' (अष्टा. ३।१।१०) 'अधिकरणाच्च' (वा. ४३९) इति कर्माधिकरणयोर्विहिते क्यचि 'कर्तुः क्यङ् सलोपश्च' (३।१।११) इति कर्तर्युक्ते क्यङि उपमाने कर्मणि चेति चकारात् कर्तरि कर्मणि चोक्ते णमुलि चेति षट्प्रकारा चार्थी उपमा[१] भवेदित्यर्थः ।

श्लोकं व्याचष्टे षडिति । षट् समासादिर्भिर्भेदा इत्यर्थः । समासगामाह-तत इति । भारते रात्रियुद्धे चन्द्रोदयवर्णनम् । कुमुदबन्धुना कान्तागण्डवत्पाण्डुवर्णेन नेत्रयोरानन्दकर्त्रा चन्द्रेण माहेन्द्री पूर्वा दिगलङ्कृता । अत्र गण्ड इव पाण्डुरित्युपमार्थे वाशब्दलोपात् समासे आर्थी ।

उपमा त्रयाणां समासे - असितेति । असितभुजगः कृष्णसर्पस्तब्दद्भीषणमसिपत्रं खड्गविशेषो यस्य । रुहरुहिकोत्कण्ठा तया

---

१. उपमानाभावे-क.।

(१) ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ।। ४०१ ।।

तथा-

असितभुजगभीषणासिपत्रो रुहिरुहिकाहितचित्ततूर्णचारः ।
पुलकिततरुत्कपोलकान्तिः प्रतिभटविक्रमद-
र्शनेऽयमासीत् ।। ४०२ ।।

(२-४) पौरं सुतीयति जनं समारान्तरेऽसा
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणे -
रालोक्य तस्य चरितानि सपत्नसेना ।। ४०३ ।।

कमलाकरी

आहितः कृतः चित्ते तूर्णं चारः प्रसरो यस्य सः । पुलकिता रोमाञ्चयुक्ता तनुर्यस्य । उद्गता कपोलयोः कान्तिश्शोभा यस्य । एतादृश्योऽयं शत्रुविक्रमदर्शनेऽभूदित्यर्थः । अत्र कृष्णसर्प उपमानं तेन सह् वत्वर्थोपमेय-भीषणत्वधर्माणां त्रयाणां समासः, द्वन्द्वगर्भसमासत्वाद भेदो वा ।।

कर्माधिकरणयोः क्यचि कर्तरि क्यङि चार्थीमाह- पौरमिति । असौ राजा पुरोभवं पौरं जनं सुतीयति सुतमिवाचरति पुत्रवत्पालयति इत्यर्थः । 'उपमानादाचारे' (अष्टा. ३।१।१०) इति कर्मणि क्यच् । विचित्रचरित्रेण वित्त इति विचित्रचरित्रचुञ्चु । 'तेन वित्तश्चुञ्चुप् चणपौ' (अष्टा. ५।२।२६) इति चुञ्चुप्-प्रत्ययः । असौ समरान्तरे युद्धमध्येऽन्तःपुरीयति अन्तपुरे इवाचरति स्त्रीमध्य इव क्रीडतीत्यर्थः । 'अधिकरणाच्च" (वा. ४३९) इति क्यच् । शत्रुसेना खङ्गपाणेर्यस्य चरित्राणि युद्धभूमावालोक्य नारीयति नारीवाचरति स्त्रीवद्बिभेतीत्यर्थः । 'कर्तुःक्यङ् सलोपश्च' (अष्टा. ३।१।११) इति कर्तरि क्यङ् ।

कर्मणि कर्तरि णमुलार्थीमाह - मृधे इति । परे शत्रवस्तं राजानं मृधे युद्धे निदाघो ग्रीष्मस्तस्य धर्मांशुस्सूर्यस्तमिव दृष्टवा इति दर्शं पश्यन्ति । 'उदषेणं[१] पिनष्टी' तिवत् दृशेः पश्यादेशेन पुनरनुप्रयोगः । दर्शनमिति कर्मणि णमुल् । स राजा पुनः पार्थवत् सञ्चारो यस्मिन्

१. उदपेणं-क.।

(५-६) मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
सः पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ।। ४०४ ।।

एतद्द्विलोपे क्विप्समासगा ।। ८९ ।।

एतयोर्धर्मवाद्योः । उदाहरणम् -

(१) सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ।। ४०५ ।।

(२) परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
सम्परायप्रवृत्तोऽसौ राजते राजकुञ्जरः ।। ४०६ ।।

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

यथा-टुटुंण्णन्तो महिहसि कंटअकलिआइं केअइवणआइ ।
मालइकुसुमरिच्छं भमर भमंतो ण पाविहिसि ।। ४०७ ।।

क्यचि वाद्युपमेयासे-

आसे निरासे ।

कमलाकरी

कर्मणि तद्यथा तथा सञ्चरति खेलति । अत्रोपमाने कर्मणि चेति चकारात् कर्मणि णमुल् [१]कर्षादिषु यथाविद्ध्यनुप्रयोगः । क्यजादावुपमानान्विते इवादिवत् श्रौतत्वेऽपि समानधर्मा श्रुतेरार्थीत्वमिति केचित् । तन्न पुत्रमिवाचरतीति वाक्ये इवेनौपम्यस्याचरतीति च समानधर्मस्योक्तेः । देवनाथादयस्तु - क्यजादेराचारमात्रे विधानान्नौपम्ये इवादिवच्छक्तिः साधर्म्यानुक्तेः । न चाचार एव साधर्म्यम् । उपमानात् तल्लाभे आचारग्रहवैयर्थ्यात् । तेनाचारभिन्नमेव सादृश्यमौपम्यघटकं तेन लुप्तात्वम् । नहि मुखं चन्द्र इति द्वयबोधे उपमात्वमित्याहुस्तदप्युक्तदिशा परास्तम् । कोकिल इवालपतीति कोकिलालापिनीति इवार्थे णिनो लोपे सप्तमो भेद इत्यन्ये ।

द्विलुप्ता षोढ़ा । धर्मवाचकलोपे धर्मोपमानलोपे वाचकोपमेयलोपे च द्वे द्वे इति । तत्र पूर्वश्लोके शेषेणाद्यद्वैविध्यमाह-एतदिति । तद्वद्धर्मस्येत्यतो धर्मः । वादेर्लोप इत्यतो वादिश्चैतच्छब्देनोच्यते । तत्राह-

१. कषादिषु-अ.,क.।

अराति-विक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ।। ४०८ ।।
अत्रात्मा उपमेयः ।

त्रिलोपे च समासगा ।। ९० ।।

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम् -
तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ।। ४०९ ।।

अत्र 'सप्तम्युपमान' इत्यादिना यदा समासलोपौ भवतस्तदेदमुदाहरणम् ।

क्रूरस्याचारस्यायःशूलतयाऽध्यवसायात् 'अयःशूलेनान्विच्छति आयःशूलिकः' इत्यतिशयोक्तिः न तु

कमलाकरी

धर्मवाद्योरिति । एतयोर्धर्मवाद्योर्द्विलोपे क्विप्-समासगा आर्थी लुप्तेत्यर्थः ।

धर्मलोपे क्विप्याह - सवितेति । मनसि चित्ते दुःखसुखाद्याक्रान्ते सति क्रमेण सविता सूर्यो विधवति विधुश्चन्द्र इवाचरति सुखदो भवतीत्यर्थः । दुःखाक्रान्ते विधुश्चन्द्रोऽपि सवितेवाचरति सविरति दुःखप्रदत्वात् । त[१]था यामिन्यो रात्रयो दिनन्ति दिनमिचारन्ति, दिनानि च यामिनयन्ति यामिन्य इवाचरन्ति ।। अत्र "सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्य" इत्याचारे क्विप् ततो लोपः । अत्र शैत्यादिः समानो धर्मः न वाच्य इति तल्लोपः । यद्यपि क्विवाच्य आचार एव समानो धर्म इति धर्मलोपो नास्ति तथाप्याचारभिन्नशैत्यादिधर्माभावात् तल्लोप इत्येके । आचारवाचिक्विब्लोपाद्धर्मलोप इत्यपरे ।

वादिलोपे समासगामाह - परिपन्थि इत्यादि । असौ राजा कुञ्जर इवेति राजकुञ्जरः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (अ.२।१।५६) इति समासः । सम्पराये युद्धे प्रवृत्त- परिपन्थिनां शत्रूणां मनो राज्य शतैरपि दुष्प्रापः शोभते । अत्र कुञ्जर इवेति इवलोपात् समासगा ।

धर्मोपमान-द्विकलोपे द्वैविद्ध्यमाह-धर्मेति । उपमानलोपे हि तद्धिते लुप्ता न सम्भवत्येव उपमानयोगे तदुक्तेः । नापि श्रौती

---

१. यथा-क.,अ.।

क्रूराचारोपमेयतैक्ष्णत्र्यधर्मवादीनां लोपे त्रिलोपेयमुपमा ।

एवमेकोनविंशतिर्लुप्ताः पूर्णाभिः सह पञ्चविंशतिः ।

अनयेनेव राज्यश्रीर्दैन्यैनैव मनस्वित्रता ।
मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा ।। ४१० ।।

इत्यभिन्ने साधारणे धर्मे ।

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ।। ४११ ।।

इति भिन्ने च तस्मिन् एकस्यैव बहूपमानोपाने मालोपमा ।

कमलाकरी

उपमानाभावे इवाद्यप्रयोगादत आह- वृत्तौ वाक्ये चेति । वृत्तौ समासे दृश्यते आर्थीति शेषः ।

धर्मलोपे उपमानलोपे च समासगामाह -ढुंढुण्णन्त इति । "ढुण्ढुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि । मालतीकुसुमसदृशं भ्रमर भ्रमन्न प्रापयसि" इति संस्कृतम् । भ्रमरं प्रति कस्यचिदुक्तिः । ढुण्टण्णन्तो गवेषयन् । ढुण्ढुमिति पाठे भ्रमरशब्दानुकारः । कुसुमसदृशमिति समासे सौरभादिधर्मस्योपमानस्य न लोपः । इदमेव पाठान्तरे वाक्योदाहरणमाह - कुसुमेनेति ।

वाचकोपमेयद्विकलोपे एकं भेदमाह-क्यचीति । क्यजन्ते[१] वादे र्वाचकस्योपमेयस्य आसे लोपे लुप्तेत्यर्थः ।

अरातीनां शत्रूणां विक्रमस्यालोको दर्शनं तेन विकासशीले नेत्रे यस्य । वीरस्य[२] नेत्रविकासात् । कृपाणेनोदग्रो भीमो दोर्दण्डो यस्य सः राजा सहस्रारचक्रमायुधं यस्य स विष्णुः । सहस्रायुधीयतीति पाठे सहस्रमायुधानि यस्य सः कार्तवीर्यः आत्मानं सहस्रायुधमिवाचरतीति 'उपमानादाचारे' (अ.)इति क्यच् । अत्र वादेर्वाचकस्यात्मन उपमेयस्य च लोप इत्याह-अत्रेति । केचित्तु शब्दस्यात्मन उपमेयत्वायोगादाक्षेपात् स इति चोपमेयोक्तेः कथं तल्लोपः । कथं वा क्यचः सत्वे वाचकलोप इत्याहु । अन्ये तु- अशब्दस्य शाब्देऽन्वयायोगात् उपमेयलोपः । आचारश्च प्रागवन्न साधर्म्यं तल्लोपाद्वाचकलोप इत्याहुः । यद्यपि

---

१. क्यजन्तेर्वाचकस्योप-ब.।
२. तीरस्य-ब.।

यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे-

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः ।
भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव
कीर्तिरतिविमला ।। ४१२ ।।

कमलाकरी

द्विलोपेऽन्यभेदाः सम्भवन्ति उपमानोपमेययोरुपमानवाच्ययोरुपमानतद्धर्मयोर्लोपे वेति । तथापि तेषु सादृश्यनिरुपकस्योपमानस्याभावादुपमैव तद्धितवन्न सम्भवतीति नोक्ता ।

एवं हि लोपभेदानुक्त्वा उपमेयभिन्नत्रिलोपे समास एव एकामार्थी लुप्तामाह – त्रिलोपे इति । चस्त्वर्थे । त्रयाणां वादिवाचकधर्मोपमानानां लोपमाह – त्रयाणामिति ।

तरुणिमनीति । तारुण्ये कृतमवलोकनं दृक्पथो यया सा तदुन्मुखीत्यर्थः । ललितैर्विलासैर्विलब्धः स्वीकृतो विग्रहो देहो यस्याः सा ।[१] विस्तीर्णेति पाठे तेभ्यो दत्तः स्मरशराणां विसरः समूहः प्रवेशो वा तेनाचितं व्याप्तमान्तरं मनो यस्याः सा हरिणाक्षी मुनेरपि मनो हरतीत्यर्थः ।

ननु चापलसाम्येन मृगवन्नयने यस्या इति समासे मृगस्य लक्ष्यस्य तदवयवस्य नेत्रस्य वोपमानत्वात् कथं त्रिलोप इत्याह- अत्रेति । अत्र पद्ये मृगस्य नयने इव नयने यस्या इत्यर्थ 'सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च' (अ.) इति सूत्रात् समासे एकनयनशब्दस्य यदा लोपस्तदा सप्तम्यन्तमुपमानार्थञ्च यत्र पूर्वं पदं मृगनयनेति प्रथमं समासपदं तस्य[२] पदान्तरेणान्यनयनपदेन बहुब्रीहावुत्तरपदस्य नयनपदस्य लोपे नयनस्योपमानस्येव शब्दस्य विशालत्वधर्मस्य चेति त्रयाणां लोपात् त्रिलोपोदाहरणमिदम् न तु मृगस्योपमानत्वेन तदोपमानलोपभावादित्यथ। केचित्तु-अयः शूलेन सम आचारो यस्येत्यायःशूलिक इत्युपमानमात्रोपादानेऽपि क्रूराचारस्योपमेयस्य तीव्रत्वादिधर्मस्येवादेश्चाभावात् त्रिलोपेत्याहु,- तदूषयितुमाह – क्रूरस्येति । अयःशूलदण्डावृक्ठञाविति

---

१. वितीर्णेति- ब.।
२. पदान्तरेणान्यतमपद-क.

मतिरिवमूर्तिर्मधुरा मूर्तिरिवसभा प्रभावचिता ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ।। ४१३।।

कमलाकरी

तेनान्विच्छतीत्यर्थेऽन्विच्छारूपाचारस्योपमेयस्यायः शूलेनोपमानेनाध्यवसायान्निगरणदारुणाचारेऽ शूलत्वारोपादतिशयोक्तिरियम् । न तु क्रूराचाररुपोपमेय-तैक्ष्ण्यधर्मवादिलोपात् त्रिलोपेत्याहुः । तत्वे साध्यवसानातिशयोक्तेरुच्छेदापत्तेरिति भावः ।

लुप्तामुपसंहरन्नेकलोपे द्विलोपे त्रिलोपे च फलितां पूर्वं सङ्ख्यामाह-एवमिति । पूर्णा भेदैः षड्भिः सहाह-पूर्णाभिरिति । चित्रमीमासादिकृतः नव्यास्तु शब्दशास्त्रकौशलमात्रमेतदित्युक्तवन्तः । तत्वतस्तु -लुप्तानामन्यासामपि सत्वान्नेयं गणना युक्ता । तथाहि ... णिनौ लुप्ता पूर्वमुक्ता पटुसदृश इत्यर्थे ' प्रकारे गुणवचनस्य' (अष्टा.८.१।१२) इति सादृश्ये द्विर्भावोक्तेः पटुवदभिनयतीति पटुपटुर्मैत्र इति धर्मलुप्तास्ति । न चेयं वाक्यगा कर्मधारयवदुत्तरेषु इति समासे नैकपदत्वात् नापि समासगा तद्वद्भावात् 'यद्भक्तानां सुखमयः संसारोऽप्यपवर्गति । तं शम्भुमभजन्मर्त्यश्चञ्चैवं स्वहिताकृतेः ।।' इत्यत्र चातृणपुरुषः'इवे प्रतिकृतौ' (अष्टा.५।३।९६) इति कन् 'लुमनुष्ये' (५।३।७८) इति लुप् । एवञ्च तद्धितेऽपि धर्मवाचकलुप्ता ऽस्ति । काकतालीयमिति छान्ते तद्धितेऽपि वाचकोपमानलुप्ता धर्मवाचकलुप्ता धर्मोपमानलुप्ता समासे वा तेन आधिक्यात् क्यच्क्यङादेर्वाचके चान्तर्भावात् चाष्टावेव लुप्ता भेदाः । यथा-एकैकस्य वाचकस्य धर्मस्योपमानस्य च लोपे तिस्रः, द्वयोर्वाचकोपमानयोर्धर्मोप[1]मानयोर्वाचकोपमेययोर्लोपे च तिस्रः धर्मोपमानवाचकलोपेत्याहुः । 'कैलासगौरं वृषम्' (रघु.२।३५) इति वाचकलोपः 'निकुम्भतुल्यम्' (रघु. २।३५) मिति प्रभावादेर्धर्मस्य ।

"यच्चौराणामस्य च समागमो यच्च तैर्वधोऽस्य कृतः ।
उपनतमेतदकस्मादासीत् बतकाकतालीयम् ।।" इति

काकतालीयमिति काकतालनिष्ठक्रियापरयोः शब्दयोरिवार्थे सुप्सुपेति समासाच्चौरागमनचौरपातमिलनं काकतालमिलनमिवेति इवार्थे 'समासाच्च तद्विषयात्' (अ.५।३।१०६) इति छप्रत्ययः' तदुक्तं

---

१. धर्मवाचकयोर्वाचकोप-अ.।

इत्यादिका रशनोपमा च न लक्षिता । एवं विधवैचित्र्यसहस्रसम्भवात् उक्तभेदानतिक्रमाश्च ।

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।

अनन्वयः

कमलाकरी

महाभाष्ये- " द्वाविमावर्थौ काकागमनमिव तालपतनमिव काकतालं तदिव काकतालीयम् इति" कैयटोऽपि -काकागमो देवदत्तागमस्योपादानं तालपतनं चौरपातस्य तालेन काकवधो देवदत्तवधस्येति आकस्मिकत्वं समानो धर्म इति । तेनात्र उपमानलोपो वाचकोपमानलोपश्चेति द्वे । किमिव ब्रूमो वयमिति तृतीयपादपाठे धर्मोपमानलुप्ता । अन्या लुप्ताः पूर्वोक्ता एवेति सङ्क्षेपः ।

अथैकस्यानेकोपमानसत्वे मालोपमा । सा द्विधा- धर्मस्याभेदात्तद्भेदाब एकशब्दोक्तिरभेदः भिन्नशब्दोक्तिर्भेदः । आद्यामाह – अनयेनेति । कुनीत्या राज्यश्रीरिव दैन्येन धीरतेव हिमाम्भसा पद्मिनीव सा दुःखेन म्लायति स्म ।। अत्र ग्लानिरूपे धर्मेऽभिन्ने भिन्ने वैकस्य बहूपमानोक्तिर्मालोमेति भाविनाऽन्वयः ।

धर्मभेदादाह – ज्योत्स्नेति । अत्र प्रत्येकमानन्दमदादि भिन्नो धर्मः उपमानस्याप्युत्तरोरमुपमेयत्वे रशना शृङ्खला तद्वन्मालोपमावदिह यथोत्तरमिति । पूर्वमुपमेयस्य पश्चादुपमानस्योक्तावित्यर्थः । सापि समान धर्माभेदाभेदाभ्यां द्विधा । तत्राद्यामाह -अनवरतेति । सन्ततं हेमदानजलबिन्दुभिः पूर्णकरा तरङ्गवदाचरिताखेलिताऽर्थिनां ततिः समूहो येन यस्य तद् भणितिवद् बुद्धिर्बुद्धिवदाचारस्तद्वत् कीर्तिश्चातिविमला । अत्र वैमल्यं समानो धर्मः ।

धर्मभेदादाह - मतिरिवेति । तस्य राज्ञो मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावेन युता, सभेव जयश्रीः परेषां जेतुं न शक्या । अत्र माधुर्यादिभिन्नो धर्मः । ज्ञेयं मूले नोक्ता इत्याह–इत्यादिकेति ।

अनुक्तौ हेतुमाह -एवं विधेति । अयं भावः–उक्ता सर्वाप्युपमा त्रिधा । एका वैचित्र्यमात्रा । यथा- ' सच्छिन्नमूलः क्षतजेन रेणुः' (रघु. ७।४३) इति । काचित् पूर्वोपपादिका । यथा-

उपमानान्तरसम्बन्धाभावोऽनन्वयः । उदाहरणम् –

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव ।
यावद्विलासायुधलास्यभावा ते तद्विलासा इव तद्विलासाः ।। ४१४ ।।

विपर्यास उपमेयोपमा तयोः ।। ९१ ।।

कमलाकरी

'निमज्जतीन्दोःकिरणेष्विवाङ्कः' (कुमा .१।३) इति पूर्वार्धार्धा । काचिद् व्यङ्ग्यार्था । व्यङ्ग्यञ्च रसालङ्कारवस्तुरूपं त्रिविधमप्युपमाध्वनिरिति शब्दशक्त्यर्थशक्त्युभयशक्तिमूलश्चेति त्रिधा । तत्रापि वस्तुज वस्त्वलङ्कारोवा तेन वा वस्त्वलङ्कारो वा । साऽ पि शुकमुखद्युति किंशुकभावावि' इति लौकिकी । 'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम् ' इत्यलौकिकी । 'पाण्ड्योऽयमंसा ' (रघु.६.६०) इति बिम्बप्रतिबिम्बभावः 'यान्त्या मुहुर्वलितकन्धरमाननं तदावृत्तवृत्तशतपत्रनिभं वहन्त्याः' इति वलितत्वावृतत्वधर्मयोः सम्बन्धिभेदः । 'चन्द्रवन्मुखमित्येकपदत्वं 'चन्द्र इव मुखं तस्याः' इति वाक्यगतेत्यादिभेदाः त्रिलोपादिष्वन्तर्भूताः । तत्राप्युपमेयादुपमानं न्यूनत्वमुत्कृष्टं वा द्वयमपि जात्या प्रमाणतो धर्मतो वा लिङ्गभेदः संख्याभेदः असादृश्यमसंभवश्चेत्युपमादोषाः कालपुरुषालङ्कारा दिव्यत्ययाश्च दोषा मूल एव वक्ष्यते । यथा –'त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयैव' (रघु. १४।३९) इत्यत्र समुद्रनेमिमत्यजमिति योग्यं न त्यक्ष्यामीति । 'शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि' (रघु. ५.१५) इति नीवार इवेत्यत्रायोग्यं किन्त्वाभातीति । 'पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव' (रघु.५.३४) इत्यत्रान्तेऽलभतेति योग्यं न लभस्वेति । 'ग्रथ्नापि काव्यशशिनम् ' इति सादृश्यासम्भवः । 'अर्कादिव वारिधारा' इत्यर्थासम्भवः । क्वचित् कविप्रसिद्धावेषामदोषत्वम् । उपमार्थत्वे न्यूनाधिक्यं वा दोषः । यथोपमाने –'कालिकेव निविडा' बलाकिनी' (रघु. ११।१५) इत्याधिक्यं क्षपाच्छविमिति वक्तुं युक्तम् । एवं 'सद्यः परस्परतुलामधिरोहतां द्वे' (रघु. ५।६८) इत्युपमेयोपमादयोऽनन्ता भेदाः ते वक्तुमशक्यत्वाद् गौरवाच्च नोक्ता इति । न च न्यूनत्वमुक्तेष्वन्तर्भावादित्याह – उक्तभेदेष्वन्तर्भावादित्याह –उक्तभेदेति । दोषास्त्वग्रे वक्ष्यन्ते इत्यर्थः ।

तयोरुपमानोपमेययोः । परिवृत्तिः अर्थाद्वाक्यद्वये, इतरोपमानव्यवच्छेदपरा उपमेयेनोपमा इत्युपमेयोपमा । उदाहरणम् -

कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः ।
धरणीव धृति र्धृतिरिव धरणी
सततं विभाति बत यस्य तव ।। ४१५ ।।

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेनोपमानेन । उदाहरणम् -

कमलाव

इत्युपमालङ्कारः ।

अथानन्वयमाह - उपमानेति । यत्रैकस्यैव धर्मिणं न तूपमावच्छिन्न स्यैकवाक्यगे उपमानोपमेयत्वे दृष्टान्तदार्ष्टान्तिकत्वे भवतः सोऽनन्वयो ज्ञेयः । संज्ञामन्वर्थामाह - उपमानान्तरेति । अन्वयोऽ न्योपमानसम्बन्धः तदभावः स्वस्यैवोपमानतेत्यर्थः । अत्रान्यासादृश्यभावेन चित्रता तत्र तु साम्यप्रतीत्या । तदुक्तम् -

"यत्र तेनैव तस्य स्यादुपमानोपमेयता ।
असादृश्यविवक्षातस्तमेवाहुरनन्वयम् " इति ।

सः द्विधा- शाब्द आर्थश्च । तत्राद्यमाह - न केवलमिति । नितान्त कान्तिरिति सुन्दरी सा नितम्बिनी कान्तेव नितम्बिनीव न भाति किन्तु विलासायुधः कामस्तस्य लासो नृत्यं तस्य वासा वासस्थानभूताः तेनानुभूतास्तस्या विलासा अपि । यावच्छब्दो अप्यर्थे । तद्विलासा इवानुपमा भान्तीति विपरिणामः । अत्र इवशब्दसत्वाच्छाब्दोऽयम् । आर्थस्तु-' सागरः सागरोपमः' इत्यादिर्ज्ञेयः । अत्रैकस्यैव सदृशान्यवस्तुनिरासेनानिशयविवक्षया न विरोधाशङ्का ।

अथोपमेयोपमामाह -विपर्यास इति । उपमानस्य विवक्षावशेना निश्चयादाह तयोरिति । तयोरुपमानस्थयोरुपमानोपमेययोः परिवृत्तिर्विपर्ययस्तेन तदधीनगृहत्वादेकवाक्ये च तदयोगाद्भिन्नवाक्ये इयमित्याह -अर्थादिति । तेनानन्वयव्यावृत्तिः । ननु पूर्ववाक्ये उपमेयस्यान्यवाक्ये कथमुपमानत्वमेकत्र द्वयोर्विरोधादत आह- इतरेति । अयंभावः- मुखमिव चन्द्र इत्यन्योपमानव्यवच्छेदात् तत्साम्ये लोके

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दो रिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्ति प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ।। ४१६ ।।

कमलाकरी

राजसमो मन्त्री गंगासमं तोयमिति न्यूने साम्ये दर्शनान्मुखे एवातिशयः । पूर्ववाक्ये चन्द्रवन्मुखमिति चन्द्रसाम्यत्वापाद्यनिषेधार्थम् । यद्वा 'भुस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्' (रघु.४।२९) इति द्वयोरन्यव्यवच्छेदेनातिशयः फलमिति । तदुक्तम् - "अन्योन्यमेव यत्र स्यादुपमानोपमेयता । उपमेयोपमामाहुस्ताम्पक्षान्तरहानितः ।।" इति । नैषधेऽ प्युक्तम् -'यः स्पर्द्धया येन निजप्रतिष्ठां लिप्सुः स एवाह तदुन्नतत्वम्' (नै.च. १०।४०) इति ।

सा द्विधा - समानधर्मोक्त्या वस्तुप्रतिवस्तुनिर्देशाद् वा । आद्यामाह-कमलेति - । हे नृप, बताश्चर्ये यस्य तव मतिः लक्ष्मीरिव सर्वोपास्या विभाति लक्ष्मीश्च मतिरिव स्थिरा विभा कान्तिस्तनुरिव पुष्टा तनुर्विभेव मनोहरा भाति । धृतिर्धैर्यं भूरिव स्थिरा भूश्च धृतिरिव हार्या सन्ततं विभाति । अन्त्या यथा-

सच्छायाम्भोजवदना सच्छायवदनाम्बुजाः ।
बाष्पोऽङ्गना इवाभाति यत्र बाप्यः इवाङ्गनाः ।।

अथोत्प्रेक्षामाह - सम्भावनमिति । प्रकृतस्योपमेयस्य समेनोपमानेन तद्रूपतया सम्भावनमाहार्यारोपणं तत्कर्णनमिति यावत् भेदज्ञानेन सतीति ज्ञेयम् । अतो न रूपकेऽ तिव्याप्तिः । गुणक्रियादिधर्माणां सत्वासत्वाभ्यां कल्पनोत्प्रेक्षेत्यर्थः । सा चेवादिशब्दे वाच्या, मध्ये शब्दाद्यैर्यौत्या । तत्रेवादिशब्दस्यानुप्रयोगः । तदुक्तम्-'मन्ये शङ्के ध्रुवं प्रायो जाने इत्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः ।।" इति ।

सा विधिनिषेधाध्यवसायाद् द्वेधा । प्रत्येकञ्च जातिगुणक्रिया द्रव्याध्वसानाच्चतुर्धा । एवमष्टविधा प्रत्येकं गुणनिमित्ता क्रियानिमित्ता चेति षोडशधा । साऽपि प्रत्येकं निमित्तस्य शाब्दत्वाशाब्दत्वाभ्यां द्वात्रिशतं । तेऽपि प्रत्येकं हेतूत्प्रेक्षा स्वरूपोत्प्रेक्षा फलोत्प्रेक्षेति त्रिधा । इत्येवं वाच्याद्याः षण्णवतिः भेदाः एवं द्योत्याया अपि ।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।। ४१७ ।।

इत्यादौ व्यापनादि लेपनादिरूपतया सम्भावितम् ।

ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः ।। ९२ ।।

कमलाकरी

तत्र हेतूत्प्रेक्षां द्योत्यामाह –उन्मेषमिति । हे ललिततनु कान्तदेहे पद्मशोभा इतिहर्षात्ते तव पादयोर्लग्नेति मन्ये तर्कयामि । इति जाति[1]वैरी जन्मशत्रुरयं चन्द्रो निशायां ममोन्मेषं विकासं न सहते । तस्येन्दोः सौन्दर्यदर्पोऽनया इन्दीवरदलदृशा कान्तायाः वक्तृकान्त्या मुखशोभयाऽन्त्यन्तं शान्ति नीतः । रात्रौ तया तज्जयादिति बन्धुहीनाया मम साहाय्यं कृतमिति पादपतनेन द्योत्यम् । अत्र पादस्योपमेयस्योपमानपद्मात्मतासम्भावनं सौन्दर्यगुणहेतुकमुक्तम् ।

क्रियाहेतुकामाह – लिम्पतीति । विरहे रात्रौ वा तमोऽङ्गानि लिम्पतीब व्याप्नोतीव, नभोऽञ्जनं वर्षतीव नीलिम्ना भेदाग्रहात् । दृष्टिरपि प्रसराभावात् व्यर्थेत्यर्थः ।

अत्रतमोव्यापनलेपनाञ्जनवृष्ट्यादिक्रियारुपमुत्प्रेक्षितमित्याह– इत्यादाविति । आदिपदादुत्तरार्द्धे फलनिषेधोत्प्रेक्षा–"पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम्" (रघु० २।१९) इति भोजनाभावोपोषणोत्प्रेक्षा ।

ससन्देहालङ्कारमाह – ससन्देह इति । भेदः करणव्युत्पत्या व्यावर्तको धर्मः । तत्सत्वासत्वाभ्यां द्विधा । प्रकृतस्य समेन संशयः सन्देहः । परमानन्दस्तु –एकधर्मिणि भावाभावोभयकोटिकं ज्ञानं संशयः यथाऽयं चन्द्रो न वेति, अयं चन्द्र एव स्यादिति सम्भावनोत्प्रेक्षा । किं स्विदयं चन्द्र इति सन्देहोत्थापनादध्यवसायः ससन्देहयुक्तः ससन्देह इत्याह । सः वैधर्म्ये समकोटिकस्तदभावेऽनध्यवसायश्चेति द्विधेत्यर्थः । संशयश्च कविनिर्मितो न वास्तवः । स्थाणुत्वपुरुषत्वसंशयो नालङ्कारस्तेन न वैचित्र्यम् । यथा–'द्विधाकृतात्मा किमयं दिवाकरः' (शिशु. १।२) इति ।

आद्यमाह – अयमिति । हे नृप, प्रतिभटाः शत्रवस्त्वां युद्धे चिरं

---

१. जातचैरी –अ., क.।

भेदोक्तौ यथा

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ।। ४१८।।

कमलाकरी

दृष्ट्वा इति विकल्पान् संशयान् कुर्वन्ति । इति किम् - अयं मार्तण्ड सूर्यः किम् । स खलु सप्तभिस्तुरगैरितः युक्तः अयमेकाश्वत्वान्न सूर्यः । तर्हि कृशानुरग्निः किम् । एषोऽग्निः सर्वा दिशो नियतं नियमेन न प्रसरति किन्तूर्ध्वमेव ज्वलति' । अयञ्च सर्वदिक् प्रसरन् नाग्निः । तर्हि साक्षाद्यमः किन्त्वसौ यमः महिषवाहनः । अयं महिषवाहनाभावान्नापि यम इति ।

अत्र नृपे सूर्यादेः संशये सप्ता[१]श्वत्वादिवैधर्म्यैर्भेदादुत्कर्षः ।

भेदोक्ताविति । आद्यान्तयोर्यत्र संशयो मध्ये निश्चयः स निश्चयगर्भः, यत्रान्ते निश्चयधीः स निश्चयान्तः ।

तत्र निश्चयान्तमाह इन्दुरिति । हे मृगनेत्रे, एतन्मुखमिन्दुः किम् कलङ्क क्व नास्ति, तेन चन्द्रो नेत्यर्थः । तर्हि सरसिजं पद्मं किम् तर्हि अम्बु जलं कुत्र' गतम् । जलाभावान्न पद्ममित्यर्थः । ललितैः रम्यैः सविभ्रमैर्वचनैः परतः पश्चान्मुखमिति निश्चितम् । अत्रान्ते निश्चितमित्युक्तेस्तदन्तत्वम् । ननु रुद्रभट्टेनैवं विभागोक्तावप्युद्भटेना ऽयं विभागः कुतो नोक्तोऽत आह- किन्त्विति । व्यञ्जनां विना निश्चयोक्तौ चमत्काराभावादुपेक्षेत्यर्थः ।

भेदकधर्मानुक्तौ सन्देहमाह - तदनुक्ताविति । अस्या -इति । अस्या उर्वश्याः सृष्टिविधावप्राप्तारूपप्रापणे चन्द्र एव कान्तिप्रदो विधाताऽभूत । शृङ्गारैकरसस्तत्वप्रधानः स्वयमुपादानादिकं विना स्वकल्पनया मदनो नु प्रजापतिरभूत् । पुष्पाकरो मासोऽवयवाभेदाद्वसन्तो नु प्रजापतिरभूत् । तस्य कामसहायत्वात् । ब्रह्मा कुतो न सृष्टाऽत आह- वेदाभ्यासेन कान्तारूपार्थज्ञानाभावाज्जडो मूर्खो विषयात् कान्तारूपात् व्यावृत्तं निवृत्तं मनो यस्य सः पुराणो वृद्धो

---

१. सप्ताश्वत्वादिवैध-अ., सप्तादित्याश्वादि-क.।

भेदाक्तावित्यनेन न केवलमयं निश्चयगर्भो यावन्निश्चयान्तोऽपि सन्देहः स्वीकृतः । यथा -

इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं
परतः ।। ४१९ ।।

किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति उपेक्षितो भट्टोद्भटेन । तदनुक्तौ यथा -

अस्या-सर्गविधौ प्रजापतिरभूच्चन्द्रो न कान्तिप्रदः
शृङ्गारैकरसः स्वयं न मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं न विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।। ४२० ।।

तद्रूपकमभेदो य उपमानोपमेययोः
अतिसाम्यादनपह्नुतभेदयोरभेदः ।

कमलाकरी

न तु युवा मुनिस्तपस्वी ब्रह्मा इदं मनोहरं रूपं निमातुं कथं प्रभवेन्नैव प्रभवेदित्यर्थः ।

अत्र कान्तासृष्टौ चन्द्रकामवसन्तानां ब्रह्मत्वसन्देहे ब्रह्मणो जाड्येन भेदोक्तावपि तेषामन्योन्यभेदको धर्मो नोक्त इति सन्देहादेव चारुता । अन्यथैकनिश्चये कान्तत्वशृङ्गारविलासाद्यान्यतरविपर्ययापत्तेः । तेन समुदितकर्तृत्वकोटिरपीति वयम् ।

रूपकालङ्कारमाह-तद्रूपकमिति । उपमानोपमेययोस्तत्वावच्छेद-कावच्छिन्नयोः तेन मुखपस्श्चन्द्र इत्यतिशयोक्तौ न प्रसङ्गः । तत्र चन्द्रत्वस्यैवाच्छेदकत्वात् अतिसाम्याद् यो भेद अभेदारोप आहार्यस्तद् रूपकम् । यथा -गौर्वाहीकः, मुखं-[१]चन्द्र इति । अपह्नुत्यलङ्कारेऽतिव्याप्तिनिरासार्थमाह- अपह्नुतेति । गृहीतभेदयोरित्यर्थः । अत्रोपमानपदेन सादृश्यादुपमेयमेव लक्ष्यते तेनाभेद इत्येके । तदुक्तम् -

"यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् ।
उपमेये भवेद् वृत्तिस्तदा तद्रूपकं भवेत् ।। " इति ।

१. मुखे चन्द्र-अ.।

समस्तवस्तुविषयं श्रौता आरोपिता यदा ।। ९३ ।।

आरोपविषया इव आरोप्यामाणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् । आरोपिता इति बहु-वचन-मविवक्षितम् । 'यथा -

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारवकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रि-कापालिकीयम् ।
द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्रा-कपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ।। ४२१ ।।

अत्र पादत्रये अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्सङ्कराशङ्का न कार्या ।।

कमलाकरी

इयमेव सारोपा साध्यवसाना चोक्ता द्वितीये । अन्ये तु भेदग्रहेऽप्यतिसाम्यात् सम्बन्धादाहार्योऽभेदारोपो रूपकम् । अतो न भ्रान्त्यलङ्कारेऽतिव्याप्तिः । 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इत्युक्तेरित्याहुः ।

तत् त्रिविधं सावयवं निरवयवं परम्परितञ्चेति । आद्यं द्विधा । समस्तवस्तुविषयमेकदेशविवर्ति च । द्वितीयमपि शुद्धं मालरूपञ्चेति द्विधा । तृतीयमपि श्लिष्टशब्दं भिन्नशब्दञ्चेति द्विधा। तदपि प्रत्येकं द्विधा शुद्धं मालारूपञ्चेति अष्टाविधम् ।

तत्राद्यं भेदमाह - समस्तेति । आरोपिता आरोप्यमाणाः सिंहादयः आरोपाधारवद् यदा श्रौताः शब्दोपात्तास्तदा समस्तानि वस्तूनि आरोप्य माणोरोपविषयसाम्यानि शाब्दानि विषयो यस्य तद् रूपकमित्यर्थः । द्वयेकयोरपि रूपकसत्वादारोपिता इति बहुत्वमविवक्षितमित्याइ- आरोपिता इति । तेनारोप्य द्वित्वैकत्वे नाव्याप्तिरित्यर्थः ।

तदेवाह - यथेति । ज्योत्स्नेति । इयं रात्रिरेव कापालिकी योगिनी ज्योत्स्ना चन्द्रकान्तिदेव भस्म तस्य च्छुरणं लेपनं तेन धवला तारका एवास्थीनि बिभ्रती अन्तर्धानमेव व्यसनं कौतुकं तत्र रसिका तत्परा चन्द्रस्य मुद्रा मण्डलं तद्रूपे कपाले यद्वा चन्द्र एव मुद्रारूपं कापालिक चिह्नरूपं कपालं तत्र लाञ्छनस्य च्छलेन व्याजेन न्यस्तं सिद्धाञ्जनमेव परिमलं सुगन्धकल्कं दधती द्वीपाद् द्वीपं भ्रमतीत्यर्थः ।। अत्र भस्मादिकमारोप्यं ज्योत्स्नाद्यारोपविषयः सर्वं शाब्दम् लाञ्छनस्य च्छलेनेत्यन्तपादेऽपह्नुतेः सत्वात् पादत्रयमेवोदाहरणमित्याह - अत्रेति।

श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्तितत् ।।

केचिदारोप्यमाणः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेया इत्येकदेशविवर्तनात् एकदेशविवर्ति । यथा-

जस्स रणंतेउरए करे कुणंतस्स मण्डलग्ग-लअम् ।
रससंमुही वि सहसा परंमुही होइ रिउसेणा ।। ४२२ ।।

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम् । मण्डलाग्रलताया नायिकात्वं, रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसीयते इत्येकदेशे विशेषेण वर्तनादेकदेशविर्ति ।

साङ्गमेतत्

उक्तद्विभेदं सावयवम् ।

निरङ्गन्तु शुद्धम्

यथा - कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।

कमलाकरी

ननु ज्योत्स्ना भस्मेवेत्युपमितसमासोऽथवा ज्योत्स्नैव भस्मेति मयूरव्यंसकादयश्चेति समासो वेति सन्देहान्न रूपकनिश्चयोऽत आह- अन्तर्धानेति । अन्तर्धानं हि चेतनाधर्मः कापालिक्यामेव मुख्यं नाचेतनायां रात्रौ, तत्र तु गौणम् । न च वास्तवधर्माभावे उपमात्वं साधर्म्याभावादित्यर्थः । तेनोपमासन्देहाशङ्काः न कार्येत्याह-इतीति पाठान्तरे चात्र सर्वत्र रूपकमित्याह -अथवेति ।

आद्येद्वितीयं भेदमाह - श्रौता इति । यस्मिन् काव्ये ते समस्ता आरोप्यारोपविषयाः केचिच्छ्रौताः शाब्दाः केचिदार्थाः आक्षिप्तास्युस्तद्रूपकमेकदेशे वर्तते आरोपेण प्रकाशते तज्ज्ञेयम् । अतात्त्विकोऽन्यथाभावो विवर्तस्तदैकदेशे विशेषेण वर्तनं मूलोक्तमेतपरमेव । तदाह -यथेति । यस्य रणान्तपुरेः करे कुर्वतो मण्डलाग्रलताम् । रससम्मुख्यापि सहसा पराङ्मुखी भवति रिपुसेना ।। इति संस्कृतम् । मण्डलाग्रः खड्गः स एव लता तदाकारत्वात्तां कान्तामिव करे कुर्वतो धृतवतः रसे वीरे शृङ्गारे च सम्मुखी ययुत्सुः सुरतेच्छुश्च सती पराङ्मुखी युद्धादद्रुता च प्रतिकूलेत्यर्थः । सामर्थ्यादन्तःपुरोक्तया नायिकात्वं प्रतिकूलनायिकात्वञ्च सिद्ध्यति । सामर्थ्यात् अन्तःपुरे एव

अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्ययभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ।। ४२३ ।।

माला तु पूर्ववत् ।। ९४ ।।

मालोपमायामिवैकस्मिन् बहव आरोपिताः । यथा -

कमलाकरी

तत्सत्वात् इत्यारोप्यमाणमार्थ[१]र्थंन शाब्दमित्यर्थः ।

आद्यं द्विविधमुपसंहरति । साङ्गमेतदिति । एतद्व्याचष्टे-उक्तमिति । समस्तवस्तुविषयमेकदेशविवर्ति च द्विभेदं यदुक्तं तत्साङ्गं सावयवमेकरुपकेऽन्यस्य हेतुत्वादङ्गमवयवोऽन्यद् रूपकमित्यर्थः ।

भेदान्तरमाह - निरङ्गमिति । अङ्गभूतरूपकाभावे शुद्धमित्यर्थः । तदाह-कुरङ्गीति । हे सखि, इयं बाला यद्यस्माद्गीतध्वनिषु मृगीवाङ्गानि स्तिमितानि निश्चेष्टानि करोति । यच्च श्रुतमपि कान्तस्योदन्तं वृत्तान्तं सखीं पुनः प्रश्नयति प्रश्नवन्तं करोति । ' विम्मतोर्लुग्' (अष्टा. ५।३।६५) इति मतुब्लोपः । यच्च निद्राहीनं यथा तथान्तर्गृहे मध्ये स्वपिति तत्तस्मादस्याः हृदि कामोऽभिनवां प्रेमरूपां लतिकां बाललताम् । 'अल्पार्थेकन्' (अ. ५।३।८९०) सेक्तुं प्रवृत्त इति वेद्मि । कान्ते प्रीतिरुत्पन्नेत्यर्थः ।। अत्र प्रेम्णो लतारूपत्वेऽन्यदङ्गं नोक्तमिति निरवयवमिदम् । अस्य द्वितीयं भेदमाह - मालेति । एकस्मिन्नुपमेये बहूनामारोपे मालारूपकमित्यर्थः ।

सौन्दर्येति - । सा मे प्रिया सौन्दर्यस्य तरङ्गिणी नदी यौवनोत्कर्षस्य हर्षोद्रेकः । कान्तेः कार्मणकर्म वशीकरणम् । नर्मरहसामेकान्त लीलानामुल्लासनां वासभूः कल्लोलस्थानं , वक्रविधां विदग्धोक्तीनां विद्याविधेर्निस्सीमचातुर्य्यस्य स्फूर्तिः, पञ्चशिलीमुखस्य कामस्य बाणः स्त्रीणां चूडामणिरस्तीत्यर्थः । अत्रैकस्यां कान्तायां नद्यादिनानारोपान्मालारूपकमित्यर्थः ।

परम्परिते तृतीयभेदे द्वैविध्यमाह - नियतेति । यः परस्यारोपो नियतोऽन्यारोपणस्योपायो हेतुः स्यात् । एकारोपेऽन्यारोपो नियतः यत्र तत्कार्यकारणरूपकपरम्परायां परम्परितम् । तद्द्वेधा- वाचके शब्दे श्लिष्टे एकस्मिन् भेदभाजि भिन्नेवेत्यर्थः ।

आद्यमाह - विद्वन्मानसेति । विदुषां मानसं चित्तमेव मानसं सरः

---

१. मर्थं न शाब्द -अ.।

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्च शिलीमुखस्य ललनाचूडामणिः
सा प्रिया ।। ४२४ ।।

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितं श्लिष्टं वाचकं भेदजभाजि यः ।। ९५ ।।

यथा - विद्वन्मानसहंस वैरिकमलासङ्कोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्य-प्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ।। ४२५ ।।

अत्र मानसमेव मानसं, कमलाया सङ्कोच एव कमलानामसङ्कोचः दुर्गाणाममार्गणमेव दुर्गाया मार्गणं, समितां

कमलाकरी

तत्र हंसरूप तत्रास्थिततत्वात् । वैरिणं कमलायाः लक्ष्म्याः सङ्कोचः कमलानामसङ्कोचो विकासश्च । तस्य दीप्तद्युते सूर्यरूप । दुर्गाणां नगराणां यन्मार्गणं स्वीकरणं दुर्गायाः देव्या मार्गणमन्वेषणञ्च तत्र नीललोहित महेश । समितां युद्धानां समिधां काष्ठानाञ्च स्वीकारः कवलनं तत्र वह्निरूप । सत्ये वचने प्रीतिरेव सत्याः गौर्या अप्रीतिश्च तद्वि[१]धाने दक्ष चतुर दक्षप्रजापतिरूपश्च । विजयस्य प्राग्भावे प्राथम्ये विजयादर्जुनात् प्राथम्ये च भीमरूप वरश्रेष्ठ वीरशूर वरेषु वीरेति वा । वैरिञ्चं ब्राह्मं वत्सरशतमुच्चैर्महत्साम्राज्यं त्वं क्रियाः कुर्याः ।

अत्र मानसे चित्ते श्लिष्टसरस्त्वारोपो हंसत्वारोपे हेतुः, तेन शब्दस्य श्लेषोऽभेदबीजम् । एवमुत्तरत्रेत्याह- अत्रेति । तेन कार्यकारणारोपपरम्परेत्याह -एवमिति । ननु मानसादिपदे पर्यायायोगाच्छब्दश्लेषाच्छब्दालङ्कारोऽयं कथमर्थालङ्कारमध्ये उच्यतेऽत आह - यद्यपीति । उक्तं नवमे वक्ष्यतेऽत्र च तथापि कवीनामर्थालङ्कारेऽपि प्रसिद्धिरत्रोक्तेत्यर्थः ।

---

१. सत्यविधाने -क.।

स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः विजयः पराभवः एवविजयोऽर्जुनः, एव मारोपणनिमित्तो हंसादेरारोपः।

यद्यपि शब्दार्थालङ्कारोऽयमित्युक्तं वक्ष्यते च तथापि प्रसिद्ध्यनुरोधादत्रोक्तः.। एकदेशविवर्ततीदं हि अन्यैरभिधीयते। भेदभाजि यथा-

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।
सङ्ग्रामामृतसागर-प्रमथनक्रीडाविधौ मन्थरो
राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः ।। ४२६ ।।

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्य आलानत्वाद्यारोपो युज्यते।

अलौकिक महालोकप्रकाशितजगत्रयः।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान्।। ४२७ ।।

कमलाकरी

उद्भटाद्यैस्त्वेकदेशविवर्तीदमुक्तं न परम्परितमित्याह-एकदेशेति।

शब्दभेदे आह - आलानेति। हे राजन् वीर वैरिस्त्रीणां वैधव्यप्रदस्ते भुजो जय एव कुञ्जरस्तस्यालानं बन्धनम्, जयस्य भुजैकाश्रयत्वात्। विपदेव वारिधिः समुद्रस्तस्य दृषदां[1] सेतुः। करवालः खड्ग एव चण्डमहाः सूर्यस्तस्य पूर्वाद्रिः उदयाद्रिः, श्रियो लक्ष्म्याः कान्तेश्च लीलोपधानं तत्तुल्यं निवासस्थानम्। सङ्ग्राम एवामृतसागरः आनन्दहेतुत्वात् तस्य प्रमथनमेव क्रीडा तस्याः विधो मन्दराद्रिः मन्दाराचल राजते शोभते। अत्र जयकुञ्जरयोः पदभेदो न मानसादिवत् श्लिष्टस्तेन युक्तं परम्परितत्वमित्याह- अत्रेति।

श्लिष्टमालारूपकमाह - अलौकिकेति। अलौकिकस्याप्रसिद्धस्य महस उत्सवस्य यजनादेरालोको ज्ञानं तदेव महालोको महोद्योतः तेन प्रकाशितं जगत्रयं येन सः। सद्वंशस्य कुलस्य वेणोश्च मुक्तारत्नं मुक्तामणिर्भवान् कैर्न स्तूयतेऽपि तु सर्वैरित्यर्थः। अत्र कुले वेणुत्वारोपो

---

१. दृषदामुत्पलानामशीर्णसेतुःब.।

निरवधिच निराश्रयञ्च यस्य स्थितमनिवर्तित-
-कौतुकप्रपञ्चम् ।
प्रथम इह भवान् स कूर्ममूर्तिर्जयति चतुर्दशलो -
कवल्लिकन्दः ॥ ४४८ ॥

इति चामालारूपकमपि परम्परितं द्रष्टव्यम् ।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिः योषितां मदनः ॥ ४२९ ॥

इत्यादिरशनारूपकञ्च न वैचित्र्यवदिति न लक्षितम् ।

प्रकृतं प्रतिषिद्ध्यान्यत् साध्यते सा त्वपह्नुतिः ।

उपमेयमसत्यं कृत्वोपमानं सत्यतया यत स्थाप्यते सात्वपह्नुतिः ।

उदाहरणम् -

कमलाकरी

राज्ञि मुक्तात्वारोपे हेतुरिति श्लिष्टम् ।

अश्लिष्टां पदभेदे मालामाह-निरवधीति । निरवध्यनवच्छिन्नं सन्ततं निराश्रयञ्चानिवर्तितो व्यक्तः कौतुकस्य लीलाखेलस्य प्रपञ्चो विस्तरो येन यद्वाऽत्यक्तं कौतुकं येनेदृशः । प्रपञ्चः संसारः सृष्टिश्चेदृशं यस्य स्थितं सः । चतुर्दशलोकाः भूर्भुवस्वादयस्त एव वल्लयो लतास्तासां कन्द आश्रयो भवानिह जयति । प्रथमः आद्यः कूर्ममूर्तिर्विष्णुरिव जयति । आदिकूर्मस्य राज्ञश्च कन्दत्वे लोकानां वल्लीत्वं हेतुस्तत्र स्थिते निरवधित्वारोपो हेतुस्तच्च भिन्नपदे न तु श्लिष्टमित्यर्थः ।

रशनारूपकमाह - किसलयेति । मदनः[१] लतानां किसलया एव करास्तैः कामिन्यश्च कामिनश्च कामिनः । 'पुमान् स्त्रिया' (अष्टा.१।२.६७) इत्येकशेषः । तेषां करा एव कमलानि तैर्नलिनानां कमलान्येव मुखानि तैर्योषितां मुखान्येवेन्दवस्तैर्मनो जयति यद्वा कामिनां मनः इत्यावृत्या योज्यम् । अत्र किसलये करत्वं करे कमलत्वं कमले मुखत्वं मुखे चेन्दुत्वमारोप्यते इत्युत्तरोत्तरमुपमेयम् । इदं रशनारूपकं मालातः परम्परितरूपकाच्चाधिकवैचित्र्यभावात् तेनैवगतार्थत्वान्मूले नोक्तमित्याह - न वैचित्र्यवदिति ।

१. मदनो लतानां -क.।

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्त्या शेते रजनिरमणी गाढमुरसि ।। ४३० ।।

इत्थं वा- बत सखि कियदेतत् पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ।। ४३१ ।।

अत्र हि न सभृङ्गाणि सहकाराणि अपि तु सकालकूटाः शरा इति प्रतीति । एवं वा -

कमलाकरी

अपह्नुत्यलङ्कारमाह - प्रकृतमिति । प्रकृतमुपमेयं निषिद्ध्या-न्यदप्रकृतमुपमानं यत् यत्र साध्यते स्थाप्यते इत्यर्थमाह -उपमेयमिति । सा द्विविधा- शाब्दी आर्थी च । आद्ये निषेधपूर्वकआरोपस्तत्पूर्वो निषेधश्च । अन्त्ये कपटच्छलादिप्रयोगश्च ।

तत्राद्यमाह अवाप्तेति । हरवचनम् । हे शैलतनये गौरि परिणतरुचः पूर्णकान्तेश्चन्द्रस्य वपुषि देहेऽयं प्रागल्भ्यं प्रौढिं प्राप्तः कलङ्को न शोभते किन्त्वमुष्य स्रवदमृतद्रव इव शीतले उरसि हृदये इयं रतिरिव श्रान्ता रात्रिरेव रमणी स्त्री शेते इति मन्ये श्यामत्वात् । अत्र चन्द्रे कलङ्कनिषेधेन रात्रित्वोक्तेः शाब्दोऽपह्नवः ।

आर्थमाह - अथवेति । बतेति । हे सखि, प्रियविरहकृशेऽस्मिन् रागिण्यनुरक्ते लोके स्त्रीजने स्मरस्य कियदेतद्वैरं पश्य । बत खेदे । तथाहि -अनेन कामेनोपवने सहकाराणि चूतपुष्पाणि तत्रोद्भासिनोऽवस्थिता ये भृङ्गा भ्रमरास्तेषां मिषेण प्रतिबा[१]णं कालकूटं विषम् उट्टङ्कितं निहितम् । अत्र च्छलशब्दार्थमपह्नवमाह-अत्र हीति । सहकाराणि । तत्पुष्पाणि पुष्पे लुक् । प्रतीतिर्न तु नञादिवदभिधेत्यर्थः ।

आर्थमेवान्यमाह - एवं वेति । नूनं वितर्के । शर्वप्लुष्टो हरदग्धः कामो मृगदृशोऽस्मिन् प्रत्यक्षे पृष्ठकटिभागरूपे सौन्दर्यामृतसरसि निपतितः किम् । यद्यस्माद्यस्य कामस्य वाङ्गानामङ्गारास्तेषां प्रशमो

---

१. प्रतिवातं -अ.।

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ।। ४३२ ।।

अत्र न रोमावलिः धूमशिखेयमिति प्रतिपत्तिः । एवमियं भङ्ग्यन्तरैरप्यूह्या ।

श्लेषः स वाक्ये एकस्मिन् यत्रानेर्थकता भवेत् ।। ९६ ।।

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः । उदाहरणम्-

उदयमयते दिङ्मालिन्यंनिराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ।। ४३३ ।।

कमलाकरी

विलापनं तस्य पिशुनां सूचिका द्वयं नाभिगर्भे रोमावलिवपुस्तद्रूपेयं धूमस्य शिखा रेखा परिणमति विलसति ।।

अत्र प्रकृतस्य वस्त्वन्तराविधायि परिणामशब्दार्थत्वमाह - अत्रेति ।

एवं कपटादिशब्देऽपि 'इदन्ते केनोक्तम्' (का.प्र. ७।२६५) इत्यादावाह-एवमिति ।

अर्थश्लेषमाह - श्लेषः स इति । एकस्मिन् वाक्ये उच्चारणे शक्तेरसङ्कोचाद्यत्रानेकार्थधीरित्यर्थः । अर्थभेदे शब्दभेद इति मते शब्दश्लेष उक्तः इह तु शब्दैक्येऽपि नानार्थत्वेऽर्थश्लेष इति आह - एकार्थेति । उदयमिति - विभाकरः कान्तिनिधिः राजा सूर्यश्च । उदयं समृद्धिं पूर्वाचलञ्चायते प्राप्नोति । दिशामाचारमार्गाणाञ्च मालिन्यं पापं तमश्चात्यन्तं निराकुरुतेतरामू । निद्रालस्यं स्वापश्च तेन मुद्रां नेत्रनिमीलनं निधनं नाशं नयति प्रापयति । क्रियाः यागदानाद्याः प्रवर्तयति । स्वैराश्चौरजाराद्यास्तेषामाचार [१]प्रवृत्तेः कर्तनं नाशं रचयतितरां विलसत्तेजःपुञ्जो विभाति ।

१. तेषामाचारप्रकर्तनं नाशं -ब.।

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः ।

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् न तु विशेषस्य सामर्थ्यादपि यदप्रकृतार्थस्याभिधानं सा समासेन सङ्क्षेपेणार्थद्वयकथनात् समासोक्तिः । उदाहरणम् -

लहिऊण तुज्झ बाहुप्फंसं जीए स कोवि उल्लासो ।
जअलच्छी तुह विरहे ण हूज्जवला दुव्वला णं सा ।। ४३४।।

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति ।

निदर्शना ।

अभवद्वस्तुसम्बन्ध उपमापरिकल्पकः ।। ९७ ।।

कमलाकरी

अत्र प्रकरणाद्यैर्नियन्त्रणाभावादुभयधीरित्याह-अत्रेति । अतो न "भद्रात्मनः" (का.प्र. २/१२) इतिवदन्योऽर्थो व्यङ्ग्य इत्यर्थः ।

समासोक्तिमाह - परोक्तिरिति । श्लिष्टैः समानैर्भेदकैर्विशेषणैः परस्याप्रस्तुतस्योक्तिरित्यर्थमाह-प्रकृतेति । श्लिष्टविशेषणवशादेवान्यधीर्न तु विशेष्यवशात् । विशेषादन्यबोधे श्लेषे एवेत्यर्थः । योगार्थमाह-समासेनेति । तामाह लहीति । "लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः । जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ।" इति संस्कृतम् । अत्र जयलक्ष्मीशब्द एव केवलं विशेष्यो न कान्तावाची- विशेषणानि तु सर्वाणि कान्तायामपि समानानीत्याह-अत्रेति ।

पूर्वमूलैकदेशेन निदर्शनालङ्कारमाह- निदर्शनेति । उपमासाधकोऽसम्भवद्वस्तुसम्बन्धो यत्रोपमां कल्पयति सा निदर्शनेत्यर्थः । शब्दार्थमाह - निदर्शनेति । दृष्टान्तरुपनिदर्शनकरणमित्यर्थः ।

क्वेति । उडुपम् एककाष्ठनौः तया सागरतरणेच्छुरस्मि । तत्र पूर्वार्द्धं हेतुः । अत्र वाक्यार्थावनुपात्तौ उडुपेन सागरतरणमिव रघुवंशवर्णनमित्युपमायां फलत इत्याह-अत्रेति ।

निदर्शनं दृष्टान्तकरणम्। उदाहरणम् -

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ ४३५॥

अत्रोडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति। यथा वा-

उदयति विततोर्ध्वरश्मिरज्जौ अहिमरुचौ हिमधाम्नि याति चास्तम्। वहतिगिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्र-लीलाम्॥ ४३६॥

अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम्।

कमलाकरी

क्वाद्यभावे निदर्शनामाह-उदयतीति। विस्तीर्ण ऊर्ध्वरश्मिरेव रज्जुर्यस्य तस्मिन् सूर्ये उदयति चन्द्रे वाऽस्तं याति पौर्णिमायां सूर्यचन्द्रयोरुदयास्तमययोरेक[1] काल्यादयं गिरिः रैवतकः सूर्यचन्द्रयोः घण्टातुल्यत्वाद् रज्जुवद् घण्टाद्वयावृतगजशोभां वहतीति तदुपमायां विश्रान्तिरन्यलीलावहत्वात् सिद्ध्यतीत्याह- अत्रेति।

मालारूपनिदर्शनामाह - दोर्भ्यामिति। हे देव। राजन् यस्तव गुणान् वक्तुमुद्यमं करोति। एष तरङ्गवतीनां नदीनां भुजङ्गं भर्त्तारं सागरं दोर्भ्यां तर्तुमिच्छति। करे चन्द्रबिम्बं गृहीतुमिच्छति मेरुञ्च तं लङ्घयितुमिच्छतीत्यनेकोपमानयोगान्मालारूपाऽप्येषा ज्ञेयेत्याह- इत्यादाविति।

सम्भवत्सम्बन्धेऽन्यां निदर्शनामाह- स्वस्वेति। क्रिययैव श्रुतक्रियाबलादेव स्वस्य स्वहेतोश्च यः सम्बन्धः कार्यकारण-रूपस्तस्योक्तिः साऽपराऽन्या निदर्शनेत्यर्थमाह - क्रिययैवेति।

तामाह-उन्नतमिति। शैलाग्रगतो वायुकम्पितो दृषत्कणः पाषाणकणः इति लोकेषु ब्रुवन्नधः पतति। इति किम्-. लघुर्मन्दबुद्धिरल्पसारश्चोन्नतमुच्चं पदं स्थानमुपैति स ध्रुवं निश्चितं हेलयाऽनायासेन पतेत्। अत्र पतनक्रियाः[2] तां

१. रेककालत्वादयं गिरिः-क.।

२. क्रिया स्वं लघो - क.।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्ग-
मादातुमिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव,
यस्ते गुणान् गदितुमुद्यममादधाति ।। ४३७ ।।

इत्यादौ मालारूपाप्येषा द्रष्टव्या ।

स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ।

क्रिययैव स्वस्वरूप-स्वकारणयोः यदवगम्यते सा ऽ परा निदर्शना । यथा -

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ।। ४३८ ।।

अत्र पातक्रियया पतनस्य लाघवे सति उन्नतपदप्राप्तिरूपस्य च सम्बन्धः ख्याप्यते ।

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।। ९८ ।।

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ।। ९९ ।।

कमलाकरी

लघोरुन्नतपदप्राप्तिस्तद्धेतुस्तयोरन्वयो लघोरुन्नतपदप्राप्तौ पात इति व्याप्तिरूपः सम्बन्धः ध्रुवोक्त्या तत्सत्त्वं दृषत्कण इव लघुर्लोकेऽपिपततीत्युपमायां विशान्तिश्चेत्याह-अत्रेति । पातक्रियया कणः पततीत्युक्तपतनस्य लाघवस्य सम्बन्धः सिद्ध उच्यते इत्यर्थः । तदुक्तम् -

"अभवन्वस्तुसम्बन्धो भव[१]न् वा यत्र कल्पयेत् ।
उपमानोपमेयत्वं कथ्यते सा निदर्शना ।।" इति ।

अप्रस्तुतप्रशंसामाह - अप्रस्तुतेति । प्रस्तुताश्रया प्रकृतस्योपमेयस्य धीहेतुर्या अप्रस्तुतस्याप्रकृतस्य प्रशंसोपलक्षणं निन्दा च या सा

---

१. भवञ्च यत्र -क,अ.।

तदन्यस्य कारणादेः । क्रमेणोदाहरणम् -

याताः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ।। ४३९ ।।

अत्र प्रस्थानात् किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् ।

राजन् राजसुता न पाठयति मां देव्योऽपि तूर्ष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ।। ४४० ।।

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाप्य गता इति कारणे प्रस्तुते कार्यमुक्तम् -

एतत्तस्य मुखात् कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्ताफलमित्यमंस्त स जडः शृण्वन् यदस्मादपि ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तः शुचा ।। ४४१।।

कमलाकरी

सैवाप्रस्तुतप्रशंसैवेत्यर्थः । अप्रस्तुतपदार्थं वक्तुम प्राकरणिकोक्तिः । तद्भेदानाह - सा चेति । निमित्तं कारणं कार्ये प्रक्रान्ते कारणस्य वचः उक्तिः, कारणे प्रकृते कार्यस्योक्तिः, सामान्ये प्रकृते विशेष्यस्य तस्मिन् वा तस्योक्तिः तुल्यप्रकृते तदन्यस्य तुल्यस्येति पञ्चधेत्यर्थः ।

आद्यमाह - याता इति । मित्रं प्रति नायकोक्तिः । हे सुन्दरि , देशान्तरं गताः पुरुषाः पुनः किं न मिलन्ति किन्तु मिलन्त्येव । अतो मत्कृते मदर्थं त्वया चिन्ता नो कार्या । सुतरां कृशा स्वभावतोऽसि । चिन्तया त्वधिकामित्यर्थ । एवं साश्रूणि मयि कथयति सति लज्जास्तिमिततारकेण सा निपतत् स्रवत् पीतं निगीर्णमश्रु येन तेन चक्षुषा

अत्रास्थाने जडानां ममत्वसम्भावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ।

सुहृद्वधूबाष्पजलप्रमार्जनं-
करोति वैरप्रतियातनेन यः ।
स एव पूज्यः स पुमान् स नीतिमान् -
सुजीवितं तस्य स भाजनं श्रियः ।। ४४२ ।।

अत्र कृष्णं निहत्य निहत्य नरकासुवधूनां यदि दुःखं प्रशमयसि तत् त्वमेव श्लाध्य इति विशेषे प्रस्तुते सामान्यमभिहितम् ।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः, समासोक्तिः सादृश्यमात्रं वा तुल्यात् तुल्यस्य हि आक्षेपे हेतुः ।

क्रमेणोदाहरणम् -

पुँस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने न महानपि स्यात् ।

कमलाकरी

मां दृष्ट्वा तया कान्तया हसितेन भाविमरणोत्साहः सूचितः, अन्यथा तीव्रशोके हास्यायोगादित्यर्थः ।

प्रस्थाननिवृत्तिकार्ये प्रस्तुते पृष्ठे मरणेन कारणेन तदभावोक्तिरित्याह-अत्रेति ।

कारणे प्रकृते कार्योक्तिमाह-राजन्निति । हे राजन्, तव शत्रुगृहेऽध्वगैः पान्थैः पञ्जरान्मुक्तो राजशुकः शून्यबलभावुपरिगृहे सौधे चित्रस्थानं दृष्ट्वा एकैकं प्रति इत्थमाभाषते । इत्थमिति किम् - हे राजन्, राजकन्या कौतुकान्मां न पाठयति । हे देव्यः, यूयमपि तूष्णी स्थिताः न वदथ । हे कुब्जे, मां भोजय । कुमारैः सचिवैश्च अद्यापि किं कुतो न भुज्यते । तत्प्रसङ्गेन शुकभोजनादिति प्रतिव्यक्तिं वदतीत्यर्थः । अत्र तव प्रस्थाने कारणे प्रकृते सति त्वदरीणां पलायनादेवं कार्योक्तिरित्याह - अत्रेति ।

सामान्ये प्र[१]कृते विशेषोक्तिमाह - एतदिति । तस्य मूर्खस्य कियदेतज्जाड्यं नाम वाच्यं वक्तुमशक्यं यद्यस्मात् सः जडः मुखान्मित्रवचनाच्छुटण्वन् नलिनीपत्रे वारिणः कणं बिन्दुं

१. प्रस्तुते -अ.,क.।

अभ्युद्धरेत् तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ।। ४४३ ।।
येनास्यभ्युदितेन चन्द्र गमितः क्लान्ति रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्येवं जडधामता तु भवतो यद्व्योम्नि
विस्फूर्जसे ।। ४४४ ।।
आदाय वारि परतिः सरितां मुखेभ्यः
किन्तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतञ्च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितञ्च ।। ४४५ ।।

कमलाकरी

मुक्तामणिरित्यमंस्त । अस्मादन्यच्छृणु - तस्मिन् बिन्दौ मणौ शनैरादीयमाने गृह्यमाणेऽङ्गुल्यग्रस्य लघुक्रिययाऽल्पचालनेनापि प्रविल[1]यिनि नष्टे सति मम मणिः कुत्रोड्डीय गत इत्यनुदिनमन्तः शुचा शोकेन न निद्राति । अत्र जडानां सामान्यतो ममत्वे मुक्तामणित्वं विशेषोक्तिरित्याह - अत्रेति ।

विशेषे प्रकृते सामान्योक्तिमाह - सुहृदिति । नरकासुरे हते तन्मत्री तन्मित्रं प्रत्याह - यो वैरस्य प्रतियातनेनोद्धारेण सुहृद्वधूनां बाष्पजलस्य मार्जनं निरासं करोति स एव पूज्यः स पुमान् अन्यथा नपुंसकः । स एव नीतिमान्, तस्यैव सुजीवितं, स एव श्रियो भाजनं पात्रम् । अत्र नरकासुरमित्रं प्रति विशेषे प्रकृते सामान्योक्तिमाह -अत्रेति ।

पञ्चमे त्रैविध्यमाह - तुल्येति । श्लेषो विशेष्यविशेषणपदानां सर्वेषां समासोक्तिर्विशेषणमात्रं श्लेषः सादृश्यमात्रे श्लेषहीनमित्यर्थः ।

आद्यमाह - पुँस्त्वादिति । केनापि पुरुषेषूत्तमेन श्रेष्ठेन विष्णुना चेतीयमीदृशी दिक् रीतिः प्रकटिता । तामाह- यद्यपि पुँस्त्वात् पौरुषात् प्रविचलेन्नश्येत् विष्णुपक्षे ऽमृतापहारे मोहिनी स्त्रीरूपग्रहणात् पुंस्त्व नाशः । यद्यधो नीचैस्त्वं कूर्मरूपेण पातालञ्च गच्छेत् । प्रणयने याचने महान् न स्यात् । लघुर्वामनश्च यद्यपि स्यात्तदपि तथापि

---

१ प्रविलापिनि -क.।

इयञ्च काचिद्वाच्यप्रतीयमानार्थानध्यारोपेणैव भवति। यथा-

अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इहहिबहवो लङ्घनेऽपि क्षमन्ते।
आहो रिक्तः कथमपि भवेदेष देवात्तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ।। ४४६ ।।

क्वचिदध्यारोपेणैव यथा -

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेव्यते।
न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ।। ४४७ ।।

कमलाकरी

विश्वमुद्धरेदुपकारेणं रक्षेत् वराहरूपेण धराञ्चोद्धरेत्। अयं मार्गः परपश्रेष्ठस्यैवेति प्रस्तुते तेन तत्तुल्यविष्णोः प्रशंसा विशेष्ये पुरुषो, समपदेऽपि श्लेषाद् गम्यते।

विशेष्यं विना श्लेषे समासोक्तिमाह-येनेति। हे चन्द्र येनोदितेन सूर्येणं समृद्धेन च त्वं परामुत्कृष्टां क्लान्ति म्लानतां गमितोऽसि तत्र तस्मिन् रवौ ते तव प्रतिकर्तुं वैरं गृहीतुमेव युज्यते। न तु तस्यैव पादग्रहः किरणप्राप्तिः पदानतिः पुनर्युज्यते। तेजोहीनेन विपदाक्रान्तेन च यद्येत्कृतं तथापि मनाक् किं नो लज्जसे आत्मानं किं दर्शयसि। एवं लज्जाशून्यात्वमप्यस्तु तथापि भवतो व्योम्न्याकाशे यद्विर्फूर्जितं विस्फुरणं वलनञ्च जडधामतैव शीततेजस्त्वं जाड्यास्पदत्वञ्च मौर्ख्यमित्यर्थः। अत्र विशेष्यं चन्द्रं विना सर्वत्र श्लेषात् समासोक्तिः।

श्लेषं विना सादृश्यमात्रमाह- आदायेति। अनेन दुष्ट[1] समुद्रेण नदीमुखेभ्यः सर्वतो जलं धनञ्च गृहीत्वा किंमर्जितं न किमपि। वारि क्षारीकृतं वडवानले हुतं व पातालकुक्षौ निक्षिप्तञ्च। यथा दुष्टेन धनं नाश्यते इत्यन्यायकारिणि प्रस्तुते तत्सदृश-समुद्रोक्तिः।

सेयं त्रिधा वाच्यत्वानारोपात्तदारोपादंशे आरोपानारोपाभ्याञ्च। तत्रा[2]द्यामाह - अब्धेरिति। अर्णसा जलेन व्याप्तः भुवनविस्तरः पाताल

---

१. दुष्टसमुद्रेण-क.,अ.।
२. तत्राह-क.।

क्वचिदंशेष्वध्यारोपेण यथा-

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्त्वपरदिक् किं भूयसोक्तेन वा ।

कमलाकरी

मध्यश्च येन तस्य समुद्रस्येह लोके पोतनौस्तद्रूपा उपायाः यद्वा पोतोऽब्धियानमुपायो येषां ते सांयात्रिकाः बहवो लङ्घने प्रक्रमन्ते उद्युक्ताः भवन्ति । आहो इति सम्भावने । यदि दैवादेव कथमपि रिक्तो भवेत् त्तदानीमस्यावटस्यगर्त-दर्शनेऽपि को नाम कल्पः समर्थः स्यात् । महतां वरं पूर्णत्वमेव रिक्तता त्वनर्थ एवेत्यर्थः । अत्र वाच्ये समुद्रे सर्वसम्भवः ।

असम्भवादारोपमाह - कस्त्वमिति । वृक्षं प्रति उक्तिः । भो- रे कस्त्वं कः इति प्रश्नः । कथयामि दैवेन हतमभाग्यं मां शाखोटकं वृक्षं विद्धि जानीहि इति उत्तरम् । वैराग्यादेव वदसीति प्रश्नः । साधु सम्यग् विदितं ज्ञातमित्युत्तरम् । वैराग्यं कस्मादिति प्रश्नः । उत्तरम्-अत्र वामेन वामभागे वटवृक्षोऽस्ति । पान्थजनस्तमेव सर्वात्मना सदा सेवते । मार्गः सत्पथः तत्रास्थितस्यापि मे च्छायापि परोपकारकरणे समर्था न अल्पत्वाद्भूतावासत्वाच्च वामपथस्य सेवनमयुक्तमित्यर्थः । अत्राचेतने वृक्षे प्रश्नोत्तरादेश्चेतनधर्मस्यारोपः ।।

तृतीयां विधमाह - सोऽपूर्व इति । हे भ्रातर्भ्रमर गजस्य सः प्रसिद्धो रसनाया जिह्वायाः विपर्ययविधिर्वैपरीत्यप्रकारो वाक्छलपैशून्यादिश्च, कर्णयोस्तच्चापलं खेलनं कर्णजपश्च मदेन गर्वेण च विस्मृता स्वपरयोर्दिक् पक्षो यया सा मदविह्वला दृष्टिः । अथवा भूयसोक्तेन किम् । हे भ्रमर, वारणो गजो निषेधकश्चेदं सर्वं विस्मृतवानसि । अन्तःशून्यः सरन्ध्रः करः शुण्डा यस्य रिक्तहस्तश्चाद्यापि निषेव्यत इति यद् एष आग्रहः कः । दुराग्रहो न युक्त इत्यर्थः । अत्रांशेऽन्यधर्मस्य सम्भवासम्भवावाह-अत्रेति । जिह्वाविपर्ययो रिक्तहस्तत्वं चारोपेण वाच्य[१]त्वायोगान्न भ्रमरस्यासेवने वाच्ये हेतुस्तेनासम्भवी कर्णचापलत्वन्त्वनाध्यारोपितं सम्भवी हेतुः मदस्तु विपरीते भ्रमरसेवने हेतुर्विरुद्धोऽनुचित इत्यर्थः ।

अतिशयोक्तिं पञ्चधाऽह- निगीर्येति । भेदेऽभेदस्याभेदे भेदस्योक्तिः, सम्बन्धेऽसम्बन्धस्यासम्बन्धे सम्बन्धस्योक्तिः,

---

१. वाच्यत्वयोगा-क.,अ.।

सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसौ
अन्तः शून्यकरो विषेव्यत इति भ्रातः क एष ग्रहः ।। ४४८ ।।

अत्र रसनाविपर्यासः शून्यकरत्वञ्च भ्रमरस्यासेवने न हेतुः, कर्णचापलं तु हेतुः , मदः प्रत्युत सेवने निमित्तम् ।

निर्गीर्याध्यवसानन्तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ।। १०० ।।
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा ।

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा -

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ।। ४४९ ।।

अत्र मुखादि कमलादिरूपतयाऽध्यवसितम् ।

यञ्च तदेवान्यत्वेनाध्यवसीयते साऽपरा । यथा-

कमलाकरी

कार्यकारणविपर्यश्चेति । प्रकृतस्योपमेयस्य परेणोपमानेन निगीर्य कवलीकृत्याध्यवसानं तादात्म्यमभेद इत्यर्थः । प्रस्तुतस्योपमेयस्याभिन्नस्य यदन्यत्वं सा द्वितीया । यद्यर्थोक्ताविति परे द्वे । कार्येति-पञ्चम्युक्ता ।

आद्यामाह - उपमानेति । निगीर्णस्याभिन्नस्याध्यवसान-मुक्तिस्तामाह-कमलमिति । कान्तावर्णनम्-अनम्भसि निर्जले देशे कमल मुख्यरूपं कमले कुवलये नीलोत्पले नेत्ररूपे तानि कमलनीलोत्पलानि कनकलतिकायां सुतनौ सा हेमलता मृदु सुभ[१]गा इतीयं का उत्पाते परम्पराऽसम्भवपरम्परा इति यावत् । अत्र मुखादेः कमलाद्यभेदोक्तिरित्याह-अत्रेति ।

द्वितीयामाह - यच्चेति । तत्प्रस्तुतमुपमेयम् । तामाह - अलमिति । "अन्यल्लटभत्वम् अन्यैव च कापि वर्तनच्छाया । श्यामा सामान्यप्रजापते रेखैव न भवति ।। इति संस्कृतम् । श्यामा

१. सुभगे-अ.।

अण्णं लडहत्तणं विअ का वि वत्तणच्छाआ ।
सामा सामाण्ण-पणावइणो रेह च्चिअ ण होई ।। ४५० ।।

यद्यर्थस्य यदि शब्देन चेच्छब्देन वा उक्तौ यत् कल्पनम् (अर्थादसम्भविनोऽर्थस्य) सा तृतीया । यथा -

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्याः मुखं तदा साम्यपराभवमवाप्नुयात् ।। ४५१ ।।

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा -

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनाविषयं त्वया भजता ।। ४५२ ।।

प्रतिवस्तूपमा तु सा ।। १०१ ।।
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।।

साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च कथितपदस्य दुष्टतयाऽभिहितत्वात् शब्दभेदेन यदुपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा । यथा -

कमलाकरी

षोडशवार्षिकी । लटभत्वं विलासः लावण्यं वा । सामान्यब्रह्मणो नेयं सृष्टिरित्यर्थः । वर्तनं स्थितिस्तस्याः च्छाया रीतिः । अत्र भेदे ऽप्यन्यत्वेन भेदोक्तिः । तृतीयभेदम् -'अस्याः सर्गविधौ प्रजापतिरभूदि' त्यादौ ब्रह्मासम्बन्धेऽप्यसम्बन्धमुक्तम् ।

चतुर्थभेदमाह - यद्यर्थेति । यदि शब्दार्थस्यासम्भविनोऽर्थस्य यदि शब्देन न चेच्छब्देन चोक्तौ यदर्थाकल्पनं सा चतुर्थी चातिशयोक्तिरित्यर्थः ।

राकायामिति । राकायां पूर्णिमायाममृतांशोश्चन्द्रस्य कलङ्कं वपुश्चेत् स्यात्तदा तस्याः मुखं साम्यरूपं पराभवमवाप्नुयात् ।। अ[१]त्रासम्बन्धेऽपि सम्भावनया कल्पना ।

अन्त्यं भेदमाह - कारणस्येति । आदौ पूर्वं मालत्या हृदयं कामेनाधिष्ठितम् । हे रमणीवल्लभ माधव नेत्रपथं प्राप्तेन त्वया चरमं

१. अत्र सम्बन्धे-अ.।

देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ।। ४५३ ।।
यदि दहत्यनलोऽत्र किमद्भुतं यदि न गौरवमद्रिषु किम् ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव
सतामविषादिता ।। ४५४ ।।

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्यां । -

एवमन्यत्राप्यनुसर्तव्यम् ।

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ।। १०२ ।।

एतेषां साधारणधर्मादीनाम् । दृष्टोऽन्तो निश्चयो यत्र स दृष्टान्तः ।

यथा-त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ।। ४५५ ।।

कमलाकरी

पश्चादधिष्ठितम् । अत्र कान्ताधिष्ठानात् कारणात् कामाधिष्ठानं कार्यं पूर्वमुक्तम् ।

पूर्वपद्यशेषेण प्रतिवस्तूपमामाह - प्रतीति । तद् व्याचष्टे साधारणेति । 'नैकं पदं द्विःप्रयोज्यं प्रायेण' इति कथितपदस्य दुष्टत्वोक्तेः शब्दभेदेन साधारगो धर्मो यद्यत्रोपमेयवाक्ये उपमानवाक्ये चोच्यते सा वस्तूपमानं प्रति उपमा प्रतिवस्तूपमेत्यन्वयः ।

तामाह - देवीति । एषा कृताभिषेका राजस्त्री देवीभावं देवतात्वं गमिता प्रापिता परिवारपदं भोग्यत्वं कथं भजति । यतो दैवतरूपं हेमप्रतिमादिरूपमङ्कितं रत्नं श्रेष्ठं वस्तु परिभोगयोग्यं न खलु नैवेत्यर्थः ।।

अत्र परिवारत्वभोगयोग्यत्वयोरभेदेऽपि भेदोक्तिरिति केचित् । कथं भजति न खल्वित्यनयोरे [१] कार्थत्वादभेदेऽ पि भेदोक्तिरिति तत्वम् ।

अत्र मालामाह - यदीति । अनलोऽग्निर्यदि दहति । अत्र किमाश्चर्यं यदि चाद्रिषु गौरवं तत् किमद्भुतमित्यनुषङ्गः । उदधेरम्बु सदैव क्षारम् । अति विषादिता दुःखराहित्यं सतां प्रकृतिः स्वभाव एव । अत्रोत्तरार्धेऽप्यद्भुताभावसामान्यधर्मोक्तेर्मालात्वम् । एवमन्यालङ्कारेष्वपि

---

१. रेकार्थत्वादभेदोक्तिरिति तत्वम् ।-ब.

एष, साधर्म्येण । वैधर्म्येण तु -

तवाहवे साहसकर्मणः करं कृपाणान्तिकमानिनीषतः ।
भटाः परेषां विशरारुतामगु-र्दधत्यवाते स्थिरतां -
हि पांसवः ।। ४५६ ।।

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ।। १०३ ।।

प्राकरिकाप्राकरिकाणामर्थादुपमानोपमेयानां धर्मः क्रियादिः एकवारमेव यदुपादीयते तदेकस्थस्यैव समस्तवाक्यादीपनाद्दीपकम् । यथा -

किवणाणं धणं णाआणं फणमणी केसराई सीहाणम् ।
कुलबालिआणं त्थणआ कुदो छिप्पन्ति
अमुणाणम् ।। ४५७ ।।

कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम् । यथा-

कमलाकरी

ज्ञेयमित्याह - एवमिति ।

दृष्टान्तालङ्कारमाह-दृष्टान्त इति। एतत्पदार्थमाह - साधारणंति । आदिपदादुपमानोपमेययोः प्रतिबिम्बनमन्यत्रसत्वम् ।

तदाह - त्वयीति । कामतप्तं तस्या मनस्त्वयि दृष्ट एव निर्वाति शीतं भवति । हि यतः कुमुद्वत्याः कुमुदं चन्द्रस्यालोके दर्शने प्रकाशे च विकसति । अत्र विकासरूपनिर्वाणस्यान्यत्र सत्वम् । नन्वियमुपमा प्रतिवस्तूपमा वा कुतो नेति चेन्न यथेवादिशब्देष्वेव सा तदभावे तु दृष्टान्तः । तदुक्तम् -“वाक्यार्थस्य यथेवाद्यैः प्रतिबिम्बो निदर्शनम । यथेवादिपदैः शून्यो बुधैर्दृष्टान्त उच्यते ।।” इति ।

अथ साधर्म्यवैधर्म्येऽपि दृष्टान्तमाह - वैधर्म्येति । साहसकर्मणि तेन वा शर्म सुखं यस्य खड्गसमीपे करं नेतुमिच्छतस्तवाहवे परेषां शत्रूणां भटाः योद्धारः विशरारुतां विशरणं पलायनं तच्छीलतामनुगताः । हि यतो रेणवः अवाते वाताभावेऽस्थिरतां दधति न तु वाते । अतस्त्वद्रूपे त्वयि सति कथं स्थिराः स्युः । अत्र वैधर्म्ये दृष्टान्तः स्पष्टः ।

दीपकालङ्कारमाह-सकृदिति । प्रकृतमुपमेयमप्रकृतमुपमानम तद्रूपाणामर्थानां क्रियागुणादेर्धर्मस्य बहुषु सकृद्वृत्तिरुक्तिः बह्वीषु क्रियासु

खिद्यति कूणति वेल्लति विचलति निमिषति -
विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया -
वधूः शयने ।। ४५८ ।।

मालादीपकमाद्यञ्चेद्यथोत्तरगुणावहम् ।

पूर्वेण पूर्वेण वस्तुनोत्तरमुत्तरं चेदुपक्रियते तन्मालादीपकम् ।
यथा-

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते ।
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ।। ४५९ ।।

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ।। १०४ ।।

कमलाकरी

कारकस्य वा सैव सकृदुक्तिरेकेणानेकेषां प्रकाशनाद द्वेधा दीपकमित्यर्थः ।

तदेवाह-प्राकरणिकेति । अर्थादिति - एकधर्मसम्बन्धस्योपमानत्वंन व्यङ्ग्यत्वादित्यर्थः । आदिपदात् गुणः । आद्यमाह- यथेति । "कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् । कुलबालिकानां स्तनाः कुत्र स्पृश्यन्तेऽमृतानाम् ।।" इति संस्कृतम् । अमृतानां जीवतामेते स्तनादयः स्प्रष्टुमशक्या मृतानामस्तु वार्ता । अत्र स्तनाः प्रकृताः कृपणधनादय उपमानं स्पर्शक्रिया गुणः स्वातन्त्र्येण समानो धर्मः सकृदुक्त इत्यर्थः ।।

अन्त्यमाह - कारकस्येति । स्विद्यतीति । नवपरिणया नवोढा वधूः शयने कान्तसङ्गे स्विद्यति कामेन वेल्लति कंम्पते कूणति मन्दं शब्दं सीत्कारं करोति विचलत्यपसरति । विवलीतीति पाठे विमुखा भवति । विनमतीति पाठे मुञ्चेति नमस्यति । निमिषति सुखेन नेत्रे निमीलति । भर्तुर्वैमुख्यभवात् तिर्यग् विलोकयति, अन्तर्नन्दति हृष्यति

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । क्रमेणोदाहरणम् -

पाण्डुच्छायं वदनं सरसं हृदयं तवालसञ्च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ।। ४६० ।।
कुमुदकमलनीर-नीरजालिर्ललितविलासजुषो
दृशोः पुरः कः ।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ।। ४६१ ।।

कमलाकरी

तत्कार्यकुचमर्दनानुमते चुम्बने प्रवृत्तेश्चेत्यर्थः । अत्र नानाक्रियासु कर्तृकारकम् नवोढैका ।

मालादीपकमाह - मालेति । आद्यं पूर्वमुत्तरोत्तरं गुणावहमुत्कर्षहेतुश्चेन्मालादीपकमित्यर्थः । तदाह - सङ्ग्रामेति । हे राजन्, सङ्ग्रामाङ्गणं प्राप्तेन भवता चापेऽधिज्ये कृते परिपन्थिनां शत्रूणां योधनिवहे साम्मुख्यं सम्प्राप्ते सति एतत्समासादितं प्राप्तम् । शिरसा भूमण्डलं प्राप्तं तेन त्वं प्राप्तः भवता चातुला कीर्तिः प्राप्ता तया लोकत्रयं प्राप्तम् । सप्तमोक्तदोषाभावं वक्तुं पाठान्तरोक्तिः । अत्र आसादितमिति 'नपुंसकमनपुंसकेन' (अष्टा.१।२।६९) इति एकत्वं नपुंसकत्वञ्च । कोदण्डेन शराणां [१] लक्ष्यप्राप्तौ तैर्भूमण्डलेऽरिशिरसः प्राप्तौ हेतुत्वादुपका[२]रकः भूराज्येन धनत्यागात् कीर्तेरूपकारः । मालायां पूर्वपूर्वेणैव कोदण्डादिना पूर्वेणोत्तरस्योत्कर्षात् प्राप्तिक्रियैक्याच्च मालादीपकमित्यर्थः ।

तुल्ययोगितामाह - नियतानामिति । उपमानोमपेयमिश्रणे दीपकमेकैकसत्वे एको धर्मस्तुल्ययोगितेत्यर्थः । तदाह- नियतानामिति ।

प्रकृतानामेवैकधर्मयोगे तामाह - पाण्ड्वति । हे सखि, तव पाण्डु क्षामं वदनं सरसं सरागं हृदयमलसं क्रियासु शिथिलं वपुश्च हृदन्तर्हृदयमध्ये क्षेत्रियमचिकित्स्यं शरीरं विप्रलम्भरोगं वदति । अत्र मुखहृदयवपुषामुपमानोपमेदयानामेकरोगवेदनं समानो धर्मः उक्तः ।

---

१. लक्ष्यप्रतीतेर्भूमण्डले -अ.।
२. दुपकारः-ब.।

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

अन्यस्योमेयस्य । व्यतिरेकः आधिक्यम् ।

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातुं तु ।। ४६२ ।।

इत्यादावुपमानस्योपमेयादाधिक्यमिति केनचिदुक्तं तदयुक्तम् । अत्र यौवनगतास्थैर्याधिक्यं हि विवक्षितम् ।

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ।। १०५ ।।
शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत् त्रिरष्ट् तत् ।

कमलाकरी

उपमानेषु[१] तमाह - कुमुदेति तस्या ललितविभ्रमभाजोर्नेत्रयोः पुरोऽग्रे कुमुदानि श्वेतकमलानि नीलोत्पलोत्पलानि च तेषामालिः पङ्क्तिः का न कापि न गण्येत्यर्थः । तन्मुखस्य पुरोऽग्रे ऽमृतं चन्द्रः । कमलञ्चैकपदे च प्रतिहतं पराजितम् ।। अत्र कुमुदामृताद्युपमानानामेव पराजयः समानो धर्मः उक्तस्तेन तुल्ययोगितेयम् ।

व्यतिरेकालङ्कारमाह - उपमानादिति । अन्यस्योपमेयस्य व्यतिरेक आधिक्यमेव स व्यतिरेकालङ्कारः विशेषणातिरेक इति व्युत्पत्तेरित्यर्थः "ननु 'केनचिद् यत्र धर्मेण द्वयोः संसिद्धसाम्ययोः । भवत्येकतराधिक्यं व्यतिरेकः, स उच्यते ।।' इति वामनाद्यैरुपमेयादुपमानाधिक्येऽपि व्यतिरेक उक्त इति शङ्कते क्षीण इत्यादि । सत्यं निश्चयेनातिक्षीणोऽपि शशी पुनःपुनः वर्द्धते गतं यौवनन्तु पुनरनिवर्ति नायाति । अतो विरम कोपं मुञ्च प्रसीदेत्यत्रोपमाने चन्द्रे एवाधिक्यं व्यतिरेक इति केनचिदुक्तं तद्दूषयति-तदयुक्तमिति । नहि भूयोऽभिवृद्ध्या चन्द्राधिक्यमत्र विवक्षितं, कोपं मा मोचकायोगात् , किन्त्वस्थैर्येणाधिक्यं तच्च यौवन एवास्तीति भावः । यत्तु परमानन्दादयः 'हनूमदाद्यैर्यशसा मया पुनः द्विषां हसैर्दूत्यपथः सितीकृतः" इति नलस्योपमेयस्य निन्दनान्निकृष्टत्वे कथं व्यतिरेकः कथञ्च -'मयासं रामत्वं कुशलवसुता न त्वधिगता' इत्यत्र रामापेक्षया वस्तुप्राप्त्यभावात् निकृष्टे कवौ उपमेये तेन न्यूनत्वेऽपि व्यतिरेक इत्याहुः तन्न हनूमदादिभ्यो बहुभ्यो मयेत्येकत्वेन एकमयशसोः बहुहासताया आधिक्याच्च । तेनोपमेयाधिक्यमेव व्यतिरेकः इत्यर्थः ।

---

१. उपमाने युक्तमाह -क.।

व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम् उपमानगतमपकर्षकारणम् । तयोर्द्वयोरुक्तिः एकतरस्य द्वयोर्वा अनुक्तिरिति अनुक्तित्रयय् । एतद्भेदचतुष्टयम् । उपमानोपमेयभावे शब्देन प्रतिपादिते, आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः । आक्षिप्ते चौपम्ये तावन्त एव । एवं द्वादश । एते श्लेषेऽपि भवन्तीति चतुर्विशंति भेदाः

क्रमेणोदाहरणम् -

असिमात्रसहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ।। ४६३ ।।

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वाऽनुपादानेऽन्यद्भेद-त्रयम् । एवमन्येष्वपि दृष्टव्यम् ।

असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवत् सगर्वोऽयं महाधृतिः ।। ४६४ ।।

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम् ।

कमलाकरी

तद्भेदानाह - हेत्वोरिति । व्यतिरेकस्योपमेयाधिक्यस्य हेतुर्द्वेधा-उपमेयोत्कर्षे उपमानानिकृ[1]ष्टे च । तयोर्द्वयोरुक्तावेको भेदः अनुक्तौ त्रयो भेदाः द्वयोरनुक्तावेकः पूर्वस्योक्तौ परानुक्तावपरः परोक्तौ पूर्वानुक्तौ तृतीयः आद्येन सहैवं चत्वारो भेदास्ते इवादिशब्देन तुल्यादावर्थेन च साम्ये सादृश्ये निवेदिते चेति आक्षिप्ते व्यङ्ग्ये[2] जयत्यादौ च सतीत्यैकैकस्य त्रयः । एवं द्वादश । ते द्वादश तद्वच्छद्वार्थाभ्यां बोधिते श्लेषे शाब्दे आर्थे च द्वेधेति त्रिरष्ट त्रिगुणा अष्टौ इति चतुर्विंशतिधेत्यर्थः ।

हेत्वोरनुक्तावाद्यं भेदमाह - व्यतिरेकस्येति । अनुक्तीनां त्रयमाह-एकतरस्येति । पूर्वस्यानुक्तौ परस्यानुक्तौ द्वौ, द्वयोरनुक्तौ चेति त्रयः इत्यर्थः । एवं चत्वारो भेदा इत्याह -एतदिति । साम्ये इत्यत्राक्षिप्ते इत्यन्तं मूलं व्याचष्टे-उपमानेति । साम्ये उपमानोपमेयभावे शब्देनेवादिना बोधिते चत्वारः तुल्यादावर्थेन च क्रमेण । मूले द्वन्दात् साहित्येनोक्तौ

---

१. उपमानानिकर्षे च - क.।
२. व्यादौवसन्तीत्यैकैकस्य-ब.।

इयं सुनयना दासीकृततामरसश्रिया ।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ।। ४६५ ।।

अत्रेवादितुल्यादिपदविरहेण आक्षिप्तैवोपमा ।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढ़गुणस्यास्य नाब्जवद् भङ्गुरा गुणाः ।। ४६६ ।।

अत्रेवार्थे वतिः गुणशब्दः श्लिष्टः शाब्दमौपम्यम् ।

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ।। ४६७ ।।

कमलाकरी

चत्वार इत्यष्टौ । आक्षिप्ते व्यङ्ग्ये औपम्ये तावताश्चत्वारः इति द्वादश । तेषां श्लेषे सत्वासत्वाभ्यां प्रत्येकं द्वैविध्ये त्रिगुणा अष्टौ चतुर्विंशतिरित्याह-एत इति ।

तत्र[1] श्लेषासत्वे शाब्दे साम्ये द्वयोर्हेत्वोरुक्तावाह-असिमात्रेति । बहुशत्रुपराजये खङ्गमात्रसहायस्य बहुधैर्यस्यास्य राज्ञः अन्यनीच-जनस्येव विस्मयो गर्वो न । अत्रान्यजने उपमाने तुच्छत्वमपकर्षहेतुः उपमेये राज्ञि च धैर्य्यमुत्कर्षहेतुरिति हेतुद्वयोक्तिः । इवेन शाब्दं साम्यं श्लेष[2] सत्वसम्बन्धश्चेत्यर्थः ।

अत्रैव पाठान्तरे भेदत्रयमाह - अत्रैवेति । पर्यायेण व्यत्ययेन कदाचिदेकस्य हेतोरनुक्तौ द्वयोर्हेत्वोरनुक्तौ चैक इति त्रयो भेदा ज्ञेया इत्यर्थः । 'नूनमन्यजनस्येवे' तिपाठेऽन्यापकर्षहेतोरनुक्तिः । 'अन्यतुच्छजनस्येव न स्मयोऽस्यमहीपतेः' इतिपाठे उपमेयोत्कर्षहेतोरनुक्तिः । 'नूनमन्यजनस्येव न स्मयोऽस्य महीपतेः' इतिपाठे द्वयोर्हेत्वोर्युगपदनुक्तिः । इयं पर्यायेण युगपद्वाऽनुक्तिरिति । एवमग्रेऽप्यार्थे व्यङ्ग्ये च साम्ये ज्ञेयेत्याह- एवमिति ।

एते चत्वारः शब्दसाम्यभेदा इत्याह -अत्रेति । अत्रैव च पाठभेदादार्थे साम्ये हेत्वोरुक्तिमाह-असीति । अत्र 'तेन तुल्यं क्रिया चेद्वति (अष्टा. ५।१।११५) इति तुल्यार्थवतिनाऽर्थसाम्यमित्याह तुल्येति । अत्रापि प्राग्वत्तुच्छपदानुक्तावेकः धृतिपदानुक्तावन्यः उभयानुक्तावन्य इति त्रयः पूर्वश्चैक इति चत्वारो भेदा इत्यर्थः ।

---

१. अत्र-क.।
२. श्लेषासत्वञ्चेत्य-ब.।

अत्र तुल्यार्थे वतिः कलाशब्दः श्लिष्टः

मालाप्रतिवस्तूपमावत् मालाव्यतिरेकोऽपि सम्भवति, तस्यापि भेदा एवमूह्याः । दिङ्मात्रमुदाह्रियते यथा-

हरवन्न विषमदृष्टिः हरिवन्नविभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापित भूः कदाचिदसि ।। ४६८ ।।

अत्र तुल्यार्थे वतिः विषमादयश्च शब्दाः श्लिष्टाः ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वतानेन भूपेन भास्वानेष विनिर्जितः ।। ४६९ ।।

अत्र ह्याक्षिप्तैवोपमा भास्वतेति श्लिष्टः ।

यथा वा- स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम् ।। ४७० ।।

कमलाकरी

आक्षिप्ते व्यङ्ग्ये साम्ये चतुरो भेदानाह - इयमिति । इयं सुनेत्रा स्त्री दासीकृता पद्मश्रीर्येन तेनाकलङ्केन मुखेन कलङ्किनमिन्दुं जयतीत्यर्थः । इयं दासीत्यपव्याख्या । अत्रेवादितुल्यादिशब्दाभावाद् व्यङ्ग्यैवोपमेत्याह -अत्रेति । अत्राकलङ्कत्वमुत्कर्षहेतुस्तयोरुक्तावेकः आननेन मनोज्ञेन' इति पाठे उत्कर्षहेत्वनुक्तिः । 'जयत्यमृतदीधितिमिति पाठेऽपकर्षहेत्वनुक्तिः । 'मनोज्ञेन जयत्यमृतदीधितिमिति' पाठे द्वयोरनुक्तिरिति चत्वारो भेदा इत्यर्थः ।

एवमश्लेषे शाब्दान् दश भेदानुक्त्वा श्लेषे तानाह - जितेन्द्रियेति । जितमिन्द्रियं मनो येन तत्तया विद्यावृद्धाः पण्डिताः विद्या च वृद्धाश्चेति वा तदुपजीविनः अतिगाढ़ा घना गुणाश्चातुर्यादयस्तं यस्य तस्यास्य गुणाः धैर्यादयः पद्मस्येव भङ्गुरा नश्वरा न किन्तु दृढ़ा इत्यर्थः । अत्र 'तत्र तस्येव' इतीवार्थे षष्ट्यन्ताद् वतिनोपमा शाब्दीत्याह-अत्रेति । गुणशब्दे श्लेषः गाढत्वभङ्गुरत्वे उत्कर्षापकर्षहेतू शाब्दौ तयो

अत्रेवादीनां तुल्यादीनाञ्च पदानामभावेऽपि श्लिष्टविशेषणै-राक्षिप्तैवोपमा प्रतीयते । एवञ्जातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः सम्भवन्ति तेऽप्यनयैव दिशा द्रष्टव्याः ।

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।। १०६ ।।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो निषेध इव यः सः वक्ष्यमाणविषय उक्तविषयश्चेति द्विधाऽऽक्षेपः । क्रमेणोदाहरणम् -

कमलाकरी

पाठभेदादेवास्यानुक्तौ द्वयोरनुक्तौ च त्रयो ज्ञेयाः । एवं चत्वारः शाब्द इत्याह-इदमिति । आर्थे साम्ये श्लेषेऽस्याश्चतुरः प्राह - अखण्डेति -अखण्डं समृद्धं पूर्णचन्द्रमण्डलं राजचक्रं विम्बञ्च यस्य सः श्रीःसमृद्धिः शोभा च तद्वानेष राजा जातु कदापि चन्द्रवत् कलानां कौशलानामंशानाञ्च वैकल्यं नाशं नागतः न प्राप्तः ।

अत्र 'तेन तुल्यमितिवतिनार्थी उपमा । कलाशब्दे श्लेषः । कलावैकल्यतदभावौ शाब्दौ हेतू तयोरेकस्य द्वयोर्वानुक्तौ त्रयो भेदाः ज्ञेयाः । केचित्तु श्रीमत्वाद्युत्कर्षहेतुरुक्तः निकर्षहेतुर्नोक्त इत्याहुः।

द्वयोरनुक्तौ मालामाह हरवदिति । हे विभो त्वं कदापि हरवद् विषमदृष्टिरयुग्मनेत्रः क्रूरदृष्टिश्च नासि किन्तु समदृष्टिरेव । हरिव द्विधूतस्त्यक्तो विततो महान् वृषो गौर्धर्मश्च येन एवं नासि । यद्वा धर्मशील एवेत्यर्थः । सूर्यवद्दुसहाः कराः किरणाः, राजदण्डाश्च तैस्तापिताः पीडिता चमूर्येन एवं वेत्यर्थः । हरवदिति तुल्यार्थे वतिनार्थी उपमा । विषमवृषादिशब्दा श्लिष्टाः उत्कर्षापकर्षहेत्वोरनुक्तिश्च । परमानन्दस्तु-विषमदृष्टित्वाभावात् समदृष्टित्वोत्कर्षनिकर्षहेतूक्तिमाह । हेत्वोरेकाऽनुक्तौ द्वयञ्च स्वयं ज्ञेयम् ।

अस्य मालायामपि पूर्वभेदानाह-अत्रेति । आक्षेपे श्लेषे द्वयोर्हेत्वो रुक्तौ चाह -नित्येति । नित्योदितः प्रतापो यस्य कर्मधारयो वा तेनानेन भास्वता दीप्तिमता भूपेन त्रियामा रात्रिस्तत्र गतप्रभ एष भास्वान् सूर्यो

ए एहि किंपि तीए वि करएण णिक्किअ भणामि अलमह वा ।
अविचारिणकज्जारंभआरिणि मरउ ण भणिस्सम् ।। ४७१ ।।
ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।

कमलाकरी

जितः । अत्रेवतुल्याद्यभावादुपमा व्यङ्ग्या भास्वत्त्वं श्लिष्टं नित्योदितत्वं रात्रौ गतप्रभत्वञ्चोत्कर्षापकर्षहेतू उक्तौ ।

आक्षेपे हेतोरनुक्तावाह - यथा वेति । स्वच्छात्मेति - । यत्र पुरे रात्रिषु पिबतां या तृष्णा चुम्बताञ्च यूनां मधु तृष्णां जहार । अङ्गनाना माननं न । मधुनि तृष्णा गता न त्वानने इत्यर्थः । कीदृशं द्वयम् -स्वच्छात्मत्वेन गुणेन समुल्लसितं प्रतिबिम्बितमिन्दुबिम्बं यत्र । मुखेऽपि कपोले चन्द्रप्रतिबिम्बादेवंविधत्वम् । यद्वा स्वच्छत्वगुणेन विकसितेन्दुबिम्बरूपमिति रूपकम् । बिम्बप्रभां धारयतीति धरं द्वयोः सममिदम् । यद्वा बिम्बप्रभोऽधरो यत्र । अकृत्रिमः सहजो हृद्यो मनो हरो गन्धो यस्य द्वयमपि । अत्रोपमाक्षेपः कथमत आह-अत्रेति । इव तुल्याद्यभावाच्छ्लेषैरुपमाक्षेपः इत्यर्थः । अत्र तृष्णाहरणाहरणयोर्हेतू नोक्ताविति चतुर्थोभेदः । एतेषु श्लिष्टेषु द्वादशभेदेषु श्लेषपदस्य प्रथगुक्तावन्ये द्वादश भेदा ज्ञेया इत्याह -एवमिति । यथा[1] रात्रावौशिरी श्रीः तपसा मासेनेकेनैव विश्रुता तपसा ताम सुदीर्घेण दूराद्विधातिमधः । श्लिष्टं तपःपदं भिन्नम् । एवं हेत्वोरुक्त्यादौ ज्ञेयाः ।

आक्षेपालङ्कारमाह - निषेध इति । विशेषाभिधानेच्छया वक्तमिष्टस्य प्रकृतस्य वक्ष्यमाणविषय उक्तविषयो वा द्विविधो यो निषेधः स आक्षेप इत्यर्थः । एतद् व्याचष्टे-विवक्षितस्येति । तस्याप्यर्थोऽनुपेति । प्रकृतत्वात् प्रधानस्येत्यर्थः । वक्ष्यमाणेऽतिप्रसिद्धत्वं विशेषं वक्तुं द्वयोर्निषेध इत्यर्थः ।

वक्ष्यमाणस्याह - ए एहीति । ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथवा । अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि । इति संस्कृतम् । नायिकां प्रति सामर्षसख्युक्तिः । ए एहि इदानीमप्यागच्छ । कस्याप्यर्थे निर्दयं कठोरं न वदामि । त्वां प्रति तु

---

१. यत्रौशिरी श्रीस्तपसा मासेनैव विश्रुः तपसा तां सुदीर्घेण दूराद् विदधतीत्यन्वयः ब.,स.।

अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ।। ४७२ ।।

क्रियायाःप्रतिषेधेऽपि फलव्यक्तिर्विभावना ।। १०७ ।।

हेतुरूपक्रियायाः निषेधेऽपि तत्फलप्रकाशनं बिभावना ।

यथा-

कमलाकरी

हितत्वाद् वदामि अथवा कठोरवचसाऽप्यलम् । अविचारितकार्यकर्त्री म्रियतां न किमपि वदिष्यामि-अग्रे दुर्दशा स्वयमेव ज्ञेयेति भावः । यद्वा नायकं प्रति दूत्यक्तिः, अविचारितेति । तव प्रेम्णः स्थयमविदित्वैव प्रवृत्तेत्यर्थः ।। अत्र भाविमरणस्यालमिति निषेधः ।

उक्तविषयमाह - ज्योत्स्नेति । नायकं प्रति दूत्युक्तिः । आँ इति खेदे । तस्याः अन्तर्मानसं मनसि प्रभवता समर्थेन कामेन मनसि व्याप्तेन वा [1] त्वया च कृत्वा चन्द्रकान्तिर्मुक्ताहारश्चन्दनलेपश्चन्द्रकान्तमणिजलं कर्पूरःकदलीदलं मृणालकङ्कणानि कमलिनीपत्राणि च । स्फुलिङ्गा अग्निकणा सत्समूहस्य व्यापारो दाहस्तदर्थमेव । यद्वा अन्तर्मानसं मनो मध्ये दाहाय भवति । हन्त खेदे । अनेनोक्तेन किं ब्रूमहे । अत्र न ब्रूमहे इत्युक्तनिषेधोऽनुपमे विरहदाहे इत्यर्थः ।

अथ विभावनामाह-क्रियाया इति । क्रिया कारणं तदभावे फलव्यक्तिः कार्योत्पत्तिः स्वभावस्य हेत्वन्तरस्य वा तर्कणाद्विभावनेत्याह-हेतुरूपेति ।

कुसुमितेति - । सा नलिनी तद्रूपा कान्ता सा पुष्पलताभिरहताऽपि रुजं पीडामधत्त । अलिकुलैरदष्टाऽपि परिवर्तते स्म चमत्कुरुते स्म । लहरीभिस्तरङ्गैरचालिताऽपि अघूर्णत लुटति स्म । अत्र कारणाभावेऽपि रुगादिकार्योत्पत्तिः कामादिहेतुकत्वं गमयतीत्यर्थः ।

अथ विशेषोक्तिमाह - विशेषेति । अखण्डत्वं व्याचष्टे मिलितेष्विति । सामग्रीसत्वे फलावचः कार्याभावोक्तिस्तां त्रिविधामाह - अनुक्तेति । आद्यामाह-निद्रेति । निद्रानाशोऽपि द्युरत्ने सूर्ये उदितेऽपि सखीजने द्वारासक्ते भुजङ्गे जारे त्यक्तालिङ्गनसुखेऽपि । अशेषरसे इति वा पाठः । साऽङ्गनाऽऽलिङ्गनतो न विरराम । अत्र निद्रानाशादौ कारणे

---

१. तया च-क.।

कुसुमितलताभिरहताप्यधत्तरुजमलिकुलैरदष्टाऽपि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताऽ
प्यघूर्णत सा ।। ४७३ ।।

विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः । नुक्तनिमित्ताउक्तनिमित्ताअचिन्त्यनिमित्ता च । क्रमेणोदाहरणम् -

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल -
नालिङ्गनतोऽङ्गना सा ।। ४७४ ।।
कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ।। ४७५ ।।

कमलाकरी

सत्यालिङ्गनत्यागरुपकार्याभावोक्तिः सम्भोगेच्छारुपनि-मित्तानुक्तिश्चेत्यर्थः ।

उक्तनिमित्तामाह - कर्पूरेति । यः कामः कर्पूर इव दग्धोऽपि जने जने शक्तिः सामर्थ्यं तद्वान् अकुण्ठशक्तये तस्मै कामाय नमोऽस्तु । दाहमात्रे कर्पूरो दृष्टान्तः न शक्तिमत्वे इत्येके । ईषद्दग्धे सौगन्ध्यातिशयात्तत्रापीत्यन्ये । कर्पूरः रसकर्पूरः पारदः इत्यन्ये । अत्र कारणे दाहे सत्यप्यशक्तेः कार्यस्याभाव अवार्यवीर्यं निमित्तञ्चोक्तम् ।।

अचिन्त्यनिमित्तामाह - स इति । स एकः कामस्त्रीणि जगन्ति जयति । तस्य तनुं दहताऽपि शम्भुना बलं न हृतम् । तनुंनाशे कारणेऽपि बलनाशकार्याभावः तत्राचिन्त्यनिमित्तमीश्वरेच्छैवेत्यर्थः ।

अर्थान्तरन्यासालङ्कारमाह - सामान्यमिति । यत्र सामान्यं विशेषेण विशेषो वा सामान्येन धर्मेण वैधर्म्येण वा समर्थ्यतेऽनुपपन्नः सम्भाव्यते यत्र सः चतुर्थेत्यर्थः ।

विशेषेण सामान्यस्य पोषणं साधर्म्येणाह-निजेति । निजदोषाक्रान्तचेतसां सुन्दरमेव सुन्दरमपि विपरीतं भाति ।

स एकस्त्रीपि जयति जयन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न बलं हृतम् ।। ४७६ ।।

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ।। १०८ ।।

यथा - एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषाञ्च विदुषाञ्च मृगीदृशाञ्च ।
तापञ्च सम्मदरसञ्च रतिञ्च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च ।। ४७७ ।।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ।। १०९ ।।

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते, विशेषो वा सामान्येन सोऽर्थान्तरन्यासः । क्रमेणोदाहरणम् -

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ।। ४७८ ।।
सुसितवसनालङ्काराणां कदाचन कौमुदी
महसि सुदृभि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।

कमलाकरी

पित्तदुष्टश्चन्द्रशुभ्रमपि शङ्खं पीतं पश्यति । अत्र दोषा [१]वृतत्वं सामान्यपित्तेन विशेषेण पोष्यते विशेषपरं क्रियते इत्यर्थः ।

द्वितीयमाह - सुसितेति । चन्द्रकान्त्यां श्वेतवस्त्रालङ्कारायां सुदृशि कामिन्यां शनैर्यान्त्यां सत्यां चन्द्रोऽस्तङ्गतोऽभूत । ततस्तव कीर्तिःकेनाप्यगीयत । येन यशःप्रकाशेन त्यक्ताशङ्कं सा गृहमागताऽतस्त्वं क्व शुभप्रदो नासि किन्तु सर्वत्र । अत्राभिसारिकारुपो विशेषः क्वेति सामान्येन धर्मेण [२]पोष्यते

वैधर्म्येणाद्यमाह - गुणानामिति । धुर्यः श्रेष्ठः गुणानां दौरात्म्यात् गुणरुपदोषादेव धुरि कार्यभारे नियोज्यते आज्ञाप्यते । कार्याक्षमस्य नियोगायोगात् अजातकिणः स्कन्धो यस्य स गली कुत्सितगलः गौर्वृषः गलिर्गङ्गान् वा वृषः । सुखं स्वपिति निद्राति न तु युगं वहतीत्यर्थः ।

---

१. दोषावृत्तित्वं-क.।
२. साधर्म्येण पोष्यते-ब.।

तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्वनासि शुभप्रदः ।। ४७९ ।।
गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ।। ४८० ।।
अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये -
क्षयं गताः ।। ४८१ ।।

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिदधानं स विरोधः ।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभिः ।। ११० ।।
क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश ।

क्रमेणोदाहरणम् -

अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशिः ।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियो
गपविघाते ।। ४८२ ।।

कमलाकरी

अत्र गलीति वैधर्म्येण धूर्वहनं सामान्येन पोष्यते ।

द्वितीयं वैधर्म्येणाह-अहो इति । अप्रियं वदन् कश्चिदाह - हि निश्चितं मे आयुषा बहु अपराद्धम् । कुतो यद्यस्मादिदमीदृशमप्रियं परुषं मया वाच्यम् । परुषोक्तिरेवायुषोऽपराधः । ये सुहृदो जगति पराभवमदृष्ट्वैव नाशं गतास्ते धन्याः । अत्र सुहृदि परुषोक्तिर्विशेषस्ते धन्या इति सामान्येन स्वस्यापि ग्रहणात् सामान्योक्तिः । अहमधन्य इति वैधर्म्येण पोष्यते ।

विरोधालङ्कारमाह - विरोध इति । शब्दस्यान्यत्र तात्पर्यात् तत्वतो विरोधाभावेऽपि तद्भानं विरोधाभास इत्यर्थमाह-वस्त्विति । दश तद्भेदानाह-जातिरिति । जातेर्जातिगुणक्रियाद्रव्यैः सह चत्वारो विरोधाः । गुणस्य गुणाद्यैस्त्रिभिः, क्रियायाः क्रियाद्रव्याभ्यां द्वौ, द्रव्यस्य द्रव्येणैक इत्यर्थः । गुणादेर्जात्यादियोगस्तु पूर्वेष्वेवान्तर्गत इत्यर्थः ।

जातेर्जात्याह - अभिनवेति । हे सुभग, अस्या मृगाक्ष्या दैववशात् त्वद्वियोगे वज्रपाते सति नवपद्मिनीपत्रं बिसवलयम् आदिपदाच्चन्द्रा

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विश्वम्भराप्यतिलघुर्नरनाथ तवान्तिके नियतम् ।। ४८३ ।।

येषां कण्ठपरिग्रहप्रणयितां सम्प्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च ।
तेषां सङ्गरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वत्यते कौतुकम् ।। ४८४ ।।

सृजति च जगदिदमवति च संहरति च हेलयैव यो नित्यम् ।
अवरखशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ।। ४८५ ।।

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः
सरोजसुकुमाराः ।। ४८६ ।।

पेशलमपि खलवचनं दहतिरां मानसं सतत्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ।। ४८७ ।।

कमलाकरी

[१]द्यावाग्निराशिस्तद्रूप इत्यर्थ । पद्मपत्रादिजातेर्दावानलजात्या गुण-विरोधाद् विरोधाभासेऽ पि विरहाद्गौणेन तद्रूपत्वेनाविरोधः ।

जातेर्गुणविरोधमाह – गिरय इति । हे नरनाथ, तवान्तिके समीपे नियतं गिरयोऽपि खर्वाः, मरुद्वायुरप्यचलः, अब्धयः समुद्राः अप्युत्तानाः, भूरप्यति लघुः । सर्वो जनोऽ ल्पार्थस्तेन गुणविरोधः । अत्र गिर्यादीनां खर्वादिगुणविरोधभाने ऽपि राज्ञो महाप्रभावात्तदभावः भूमेरेकत्वाज्जात्यभावेऽपि सृष्टिभेदे तद्भेदान्मण्डलभेदात् वा जातित्वं ज्ञेयम् ।

जातेः क्रियाविरोधमाह – येषामिति । हे भूपते, सतीक्ष्णो धाराधरः खड्गोऽपि येषां वैरिणां कण्ठपरिग्रहप्रणयिताम् आलिङ्गनप्रेमवतां प्राप्यानुरज्यते रक्तैः शोणो भवति तुष्यति च कमपि स्नेहं चिक्वणतां सौहार्दञ्च प्राप्नोति । युद्धासक्तियुक्तमनसां तेषां त्वया धूलीनां समूहैः कोऽप्यपूर्वः प्रसाधनविधिर्नत्या भूलोठनेनालङ्कारविधिःक्रियते । इदमाश्चर्यम् । अत्र खड्गजात्यानुरञ्जनक्रियायाः पांसुजात्या च मण्डनक्रियायाः विरोधः, विजयाच्च तदभावः ।

---

१. चन्द्रादिदावाग्निराशिस्तद्रूपः–क.।

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणानर्गलशातपाते ।
अभूनवाम्भोजदलाभिजातः स भार्गवः
सत्यमपूर्वसर्गः ।। ४८८ ।।
परिच्छेदातीतः सकलविषयाणामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ।। ४८९ ।।

कमलाकरी

जातेर्द्रव्यविरोधमाह –सृजतीति । य इदं जगल्लीलयैव सृजति रक्षति हिंसति च सोऽपि जनार्दनः कालवशाच्छफरो मस्त्यो जात इदं चित्रम् । अत्र मीनत्वजातेरीश्वरात्मना द्रव्येण सह विरोधो जगद्रक्षणादिकार्यवशात् परिहारः ।

गुणस्य गुणविरोधमाह – सततमिति । हे राजन्, भवति त्वयि नृपतौ पालके सति द्विजानां पत्न्यो यज्ञकर्त्र्यः । 'पत्युर्नो यज्ञसंयोगे' (अष्टा. ४।१।३३) इति स्मृतेः । तासां 'हविष्कृदेही' त्याहूतानां पद्मवत्सुकुमाराः सर्वदा यागाङ्गावघाते लोके दासीभिः तत्सम्भवात् । मुसलासक्ताः द्विजभोजनादौ बहुगृहकार्यरचनया कठिना भवन्ति । त्वद्दानमहिम्ना यज्ञ- यज्ञदानाद्याचरन्तीत्यर्थः । अत्र सौकुमार्यकाठिन्ययोर्विरोधः राजौदार्यात्तदभावः ।

गुणस्य क्रियाविरोधमाह – पेशलमिति । कोमलमपि दुष्टवचनं तत्वंसतत्वंपर्याया इत्युक्तम् । संविद्भिश्चेतिसतत्वेन (का.प्र.४) इत्यत्र सतत्वविदां तत्वज्ञानाम् । आन्तरं मानसमतिशयेन दहति । 'तिङश्चे (अष्टा ५।३।५६) ति तरप् । सुजनवाक्यं कठोरमपि चन्दनद्रवं वन्मो[१]हयति । 'गुणो रागे द्रवे रसे' इति कोशः । अत्र कोमलत्वगुणदाहक्रिययोः पारुष्यप्रमोदयोश्च विरोधः । खलोक्तेर्दुःसहत्वात् सुतनोक्तेर्हद्यात्वाच्च तदभावः ।

गुणस्य द्रव्यविरोधमाह – क्रौञ्चेति । यस्य बाणानामनर्गले ऽप्रतिबन्धे शाते तीक्ष्णे पाते सति । शातं वज्रमित्येके ।

---

१. द्रववत् प्रमोहयति–ब.।

अयं वारामेको निलय इति रत्नाकर इति ।
श्रितोऽस्माभिस्तृष्णातरलितमनोभिः जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ।। ४९० ।।
समदमतङ्गजमदजलनिस्स्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शङ्करचूडापगापि
कालिन्दी ।। ४९१ ।।

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारुपवर्णनम् ।। १११ ।।

स्वयोस्तदेकाश्रययोः रूपं वर्णः संस्थानञ्च । उदाहरणम् -
पश्चादङ्घ्रि प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः
क्ष्मां खुरेण ।। ४९२ ।।

कमलाकरी

निरवधिपाषाणवज्रोऽप्यसौ क्रौञ्चाद्रिर्नवपद्मपत्रपुञ्च इवाभूत् स भार्गवो रामोऽपूर्वसर्गः । इदं सत्यमिति प्राञ्चः तत्र परशुरामे क्रौञ्चभेदाप्रसिद्धेः । कुमारः क्रौञ्चदारणः (अ.को.) इति कोशात् स्कन्दे एव सः प्रसिद्धो न भवति । तेन भर्गस्यापत्यं भार्गः स्कन्दस्तत्रवसतीति वः, असंतत्वेऽपि धातुत्वान्नोपधादीर्धः। स्कन्धस्थोऽयमपूर्वः सर्ग इति वयम् । अत्र पद्मपत्रसौकुमार्यगुणस्य पर्वतद्रव्ये विरोधेऽपि स्कन्दप्रभावात्तदभावः ।

क्रियाविरुद्धं क्रियामाह - परिच्छेदेति । इयत्तारहितः सर्ववागगोचरः पुनरन्यस्मिन् वा जन्मनि योऽनुभवमार्गं न प्राप्तो विवेकनाशाद् वृद्धाज्ञानेन घनः कोऽपि कामविकारोऽ न्तर्मनो जडयति तापं च करोति । अत्र जाडयतापयोर्विरोधः औत्सुक्यात्तदभावः ।

क्रियाद्रव्ययोर्विरोधमाह -अयमिति । पान्थोक्तिः । तृष्णाक्रान्तचित्तैरस्माभिरयं जलनिधिर्वारामपां निलयं स्थानं रत्नाकर इति आश्रित सेवितः । निजचुलु [१] ककरगर्तगतं ताम्यन्तौ मूर्छन्ता तिमयो

१. निजकरकञ्चुलगतं -क., करकञ्चुलकान्तर्गतं -अ.।

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढ़िरन्यथा ।
व्याजरूपा व्याजेन वा स्तुतिः-

क्रमेणोदाहरणम् -

हित्वा त्वामुरोधवन्ध्यमनसां मन्ये न मौलि परः
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव
यस्याः स्थितिः ।। ४९३ ।।

कमलाकरी

मीना मकराश्च यस्मिन् तमेनं मुनिरगस्त्यः क्षणादासमन्तात् सर्वं पास्यतीत्येवं को जानीते । अत्र सर्वसमुद्रद्रव्यस्य पानक्रियाविरोधः अगस्त्यप्रभावात्तदभावः ।

द्रव्यस्य द्रव्यविरोधमाह - समदेति । हे क्षितितिलक तृप त्वयि तटजुषि गङ्गातीरगते सति शिवचूडागताऽऽपगा नदीं गङ्गा विमत्तगजमद जलप्रवाहनदीसम्बन्धात् कालिन्दी यमुनारूपा भवति । अत्र गङ्गायमुनात्वे विरोधः गजमदनीलिम्नः कृष्णत्वेन गौणत्वात्तदभावः ।

स्वभावोक्तिमाह - स्वभावोक्तिरिति । डिम्भादेः बालादेः स्वयोः स्वाभाविकयोः तज्जातिमात्रवृत्योः क्रिया चेष्टारूपं धर्मस्तयोरुक्तिः । तेन गोरपत्यमित्यत्र तज्जात्यानियमान्नातिव्याप्तिः । स्वशब्द-[1]वैयर्थ्यमाशङ्क्याह- स्वयोरिति । तज्जातिनियतयोरित्यर्थः ।

रूपं धर्मं द्विधाह-वर्ण इति । वर्णो नीलपीतादिः संस्थानमवयसंयोगः । पश्चादिति । शयनादुत्थितोऽश्वः- पश्चादङ्घ्री पश्चिमपादौ प्रसार्य । त्रिकं पृष्ठवंशस्तस्य नतिर्नम्रता तया विततं विस्तृतमङ्गं देहमुच्चैरत्यर्थं द्राघयित्वा दीर्घीकृत्याभुग्नग्रीवो वक्रग्रीवः सन्नुरसि मुखमासज्य संयोज्य धूलिधूम्राः सटां विधूय घासग्रासवाञ्छया सन्ततचञ्चले प्रोथाग्रे ओष्ठाग्रे यस्य मदं स्फूरशब्दयुक्तः सन् क्षुरेण क्ष्मां भुवं लिखति घट्टयति । अत्राङ्गदीर्घत्वादयः संस्थानोक्तयः धूलिधूम्रत्वं वर्णोक्तिश्चलत्प्रोथत्वं भूलेखादिः क्रियोक्तिः ।

व्याजस्तुतिमाह -व्याजेति । मुखे प्रारम्भे निन्दा स्तुतिर्वाऽन्यथा

---

१. स्वशब्दे वैय-ब.।

हे हेलाजितबोधिसत्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकार-घटनावैमुख्यलब्धायशो
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः ।। ४९४ ।।

सा सहोक्ति-सहार्थस्य बलादेकं द्विवाचकम् ।। ११२ ।।

एकार्थाभिधायकमपि सहार्थबलाद्यदुभयस्याप्यवगमकं सा सहोक्तिः ।

यथा - सह दिअहणिसाहिं दीहरा सासदंडा
सह मणिवलएहिं बाप्पधारा गलंति ।
तुह सुहअ विओए तीअ उव्विगिरिए
सह अतणुलदाए दुब्बला जीविदासा ।। ४९५ ।।

श्वासदण्डादिगतं दीर्घत्वादि शाब्दं दिवसनिशादिगतं तु

कमलाकरी

तद्विपरीता स्तुतिर्वा निन्दा वा । रुढिः प्रसिद्धिस्तात्पर्यमित्यर्थः । स्तुतिः प्रतीता बाधिता सती निन्दायां निन्दा वा स्तुतौ पर्यवसन्ना व्याजरूपा तेन वा स्तुतिरित्यर्थः ।

आद्यामाह - हित्वेति । हे नृप, उपरोधोऽनुरोधः सङ्कोचस्तेन बन्ध्यं हीनं मनो येषां मौलिः मूर्धन्यस्त्वां हित्वा विहाय परोऽन्यो न त्वां विनाऽन्यो निश्शङ्को नेत्यर्थः । रमां लक्ष्मीमन्तरेण विनाऽ न्यत्र लज्ञावर्जनं निर्लज्ञत्वं न दृश्यते । कथम् - यो भवान् मुखशतैर्मूर्द्धादिप्रकारशतैरेत्यागत्य श्रितायाः श्रियस्त्यागं तनुते । यस्याः श्रियस्त्यागजन्यापमानं प्राप्यापि त्वय्येव स्थितिः स्थिरता ।

स्तुतिमुखां निन्दामाह - हे हेलेति । हे हेलया लीलया जितो बोधिसत्वो बुद्धो येन तस्मादपि परमकारुणिक ईदृश हे तोयधे समुद्र, वचसां विस्तरैः किम् । परेषां हितस्याधाने करणे गृहीतव्रतः त्वत्सदृशः परोऽन्यो नास्ति । त्वमेव परोपकारशीलः । यद्यस्मात् तृष्यत् पिपासुः यः पान्थजनस्तस्य जलदानेन योपकारस्य घटना रचना तस्याः वैमुख्यमभावस्तेन लब्धमयशस्तस्य भारस्य प्रोद्वहने मरोर्निर्जलदेशस्य[१] कृपया साहाय्यकं करोषि । मरुदेशेन हि एकाकिना निर्जलत्वात्

---

१. पान्थोपकराभावः-क.।

सहार्थसामर्थ्यात् प्रतीयते ।

विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः ।

क्वचिदशोभनः क्वचिच्छोभनः । क्रमेणोदाहरणम् -

अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति
कामिनोः ।। ४९६ ।।

मृगलोचनया विना विचित्रव्यवहार-प्रतिभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना
नरेन्द्रसूनुः ।। ४९७ ।।

परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः ।। ११३ ।।

परिवृत्तिरलङ्कारः । उदाहरणम् -

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम् ।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ।। ४९८ ।।

कमलाकरी

पान्थोपकाराभावभारो गृहीतस्त्वया क्षारजलत्वात् तं भारं गृह्णता तस्य सहायकेनोपकारः कृतः । द्वयोरप्ययशोर्भारस्तुल्य इत्यर्थः ।

सहोक्तिमाह - सेति । सहार्थस्य सहशब्दपर्यायस्य सार्धसमादिशब्दस्य बलात् सामर्थ्यादेकमेकवाचकमेव द्विवाचकं द्विबोधकं शक्त्या गौण्या वा यत्र सा सहोक्तिरित्यर्थः । एतदेवाह एकार्थेति । अर्थोऽन्वयः एकान्वयबोधकमपि सहाद्यव्ययवशादुभयान्वयस्यबोधकं तेनोभयोर्गुणत्वप्राधान्येनैकक्रियान्वये सहोक्तिः द्वयोः प्राधान्ये समुच्चय इति ध्येयम् ।

सहेति - । "सह दिवसनिशाभिः दीर्घा श्वासदण्डाः, सह मणिवलयैर्बाष्पधाराः गलन्ति । वियोगे तस्या उद्विग्नायाः, सह च तनुलतया दुर्बला जीविताशा ।।" इति संस्कृतम् । हे सुभग, उद्विग्नायास्तस्यास्तव वियोगे श्वासदण्डाः दण्डाकारा श्वासाः दिवसनिशाभिः सह दीर्घाः । बाष्पो नेत्राम्बु तस्य धाराः मणिवलयैः सह पतन्ति । तनुलतया सह जीविताशा च दुर्बला जातेत्यर्थः ।

अत्र प्रथमेऽर्धे समेन समस्य द्वितीये उत्तमेन न्यूनस्य ।

नानाविधप्रहरणैर्नृप सम्प्रहारे स्वीकृत्य
दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं
निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ।। ४९९ ।।

अत्र न्यूनेनोत्तमस्य ।

प्रत्यक्षा इव यद्भावा क्रियन्ते भूतभाविनः ।
तद्भाविकम् -

कमलाकरी

अत्रेति - श्वासदण्डादेः प्राधान्यात् शाब्दो दीर्घत्वाद्यन्वयः दिवसनिशादौ तु सहयोगेन सह शाखया प्रस्तारं प्रहरति । 'त्वष्टा सोमं पिबस्वाहे' तिवत् सहयोगे गुणत्वादार्थम् । 'सह युक्तेऽप्रधाने' (अष्टा.) इति स्मृतेरित्यर्थः । औपम्याभावे तु सहोक्तावपि नायमलङ्कारः । यथा'अनेन सार्धं विहराम्बुराशेः' (रघु. ६।६७) इत्यत्र । अस्या माला यथा-

"उत्क्षिप्तं सह कौशिकस्य पुलकै सार्द्धं मुखं [१] नामितं
भूपानां जनकस्य संशयधिया साकं समास्फालितम् ।
वैदेह्याः मनसा समं तदधुना कृष्टं ततो भार्गव-
प्रौढाहङ्कृतिकन्दलेन च समं भग्नं तदैशं धनुः ।। "

विनोक्तिमाह - विनोक्तिरिति । यत्रान्येन विनाऽन्यः सन् शोभते न किन्त्वशोभनः । इतरोऽसन् अशोभनो वा न भवति किन्तु शोभनः । येन विना यस्या शोभनत्वं वागम्यमित्यत्यर्थः ।

आद्यमाह - अरुचिरिति । निशया रात्र्या विना शशी अरुचिरशोभनः । चन्द्रेण विना सा महत्तमस्तमोरुपा रात्रिरप्यरुचिः । उभयेन रात्र्या चन्द्रेण च विना कामिनोर्मनोभवस्फुरितं कामचेष्टितं नैव शोभते ।

अन्त्यमाह - मृगेति । अयं राजसूनुस्तया स्त्रिया विना विचित्राः व्यवहारा क्रमादयः प्रतिभाज्ञानानि प्रभा कान्तिश्च ताभिः प्रगल्भश्चतुरः ।

---

१. मुखैर्नामितं-क.।

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् ।

उदाहरणम् - आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिम् ।। ५०० ।।

आद्ये भूतस्य द्वितीये भाविनो दर्शनम् ।

काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।। ११४ ।।

वाक्यार्थता यथा -

वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणवान् ।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ।। ५०१ ।।

अनेकपदार्थता यथा -

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषुपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्ड यमदण्ड इवैष भुजः ।। ५०२ ।।

कमलाकरी

पूर्वं स्त्रीमोहितः मूर्ख आसीद् इदानीं तया रहितश्शोभनो जातः । अयं तेन दुष्टेन सुहृदा मित्रेण विना चन्द्रवत्स्वच्छाशयः शोभनो जातः संसर्गदोषो गतः तेनाशोभनस्य शोभनत्वं विनोक्तिरित्यर्थः ।

परिवृत्तिमाह - परिवृत्तिरिति । अर्थानां समैरसमैश्च वस्तुभिर्यौ विनिमयो व्यत्यासः परिवृत्तिसंज्ञः सोऽलङ्कार इत्यर्थः । असमं द्विविधं - न्यूनमधिकञ्च तेनाऽयं त्रिधा । तत्र समस्य न्यूनत्वस्य चाह - लतानामिति । अयं मरुद्वायुरुदितपुष्पाणामेतासां लता नामलं सम्मतं लास्यं नृत्यं कृत्वा असममधिकमामोदं श्रयति स्वीकरोति । लतास्तु अध्वन्यानां पान्थानां दृशं दृष्टि सहसा झटिति आदाय हत्वाऽधिव्याधि भ्रमिरोदनमोहसम्पर्कं ददतीत्यनौचित्यादहहेति खेदः । अत्र प्रकारद्वयमाह -अत्रेति । लास्येन समेन समस्य गन्धस्यादानं पूर्वार्धेत्येतत्तूत्तमया दृशा न्यूनस्य व्याध्यादेः परिवृत्तिः ।

एकपदार्थता यथा -

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम् ।
अद्याराधन-तोषितेन विभुना युष्मत्सपर्यासुखा-
ल्लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ।। ५०३ ।।

एषु अपराधद्वये पूर्वापरजन्मनोरनमनं, भुजपाते शस्त्राक्षेपः, महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः ।

पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचक-भावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनं तत् पर्यायेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् । उदाहरणम्

कमलाकरी

तृतीयमाह - नानेति । हे नृप, नानाशस्त्रैः सम्प्रहारे युद्धे दृप्तशत्रुसमूहेन दारुणान्निनादवतश्च प्रहारान् स्वीकृत्य निर्विप्रलम्भो विरहहीनः परिरम्भविधिर्यस्या ईदृशी भूस्तुभ्यं वितीर्णा दत्ता यथा त्वां न मुञ्चति यथा तथा दत्तेत्यर्थः । अत्र न्यूनेन प्रहारेणोत्तमायाः भूमेर्विपरिवृत्तिरित्याह - अत्रेति । उत्तमस्य विपरिवृत्तिरित्यनुषङ्गः ।

भाविकमाह - प्रत्यक्षा इति । यत्र भूताः ध्वस्ताः भाविनः प्रागभावावच्छिन्नाश्च भावा अर्थाः प्रत्यक्षा इव तत्तुल्या कविना क्रियन्ते विवक्ष्यन्त तद्भावोऽभिप्रायः तन्मूलं भाविकमित्यर्थः । कर्मधारये समासे विरोधादाह - भूताश्चेति ।

अवयवार्थमाह - भाव इति । द्वयोराह -आसीदिति । हे कान्ते, अत्र तव नेत्रेऽञ्जनमासीदित्यतीताञ्जनयुक्ते पश्यामीत्यर्थः । तवाकृतिं भाव्यलङ्कारयुक्तां भूषणाभावेऽपि तद्युतां जानामीत्यर्थः । विशेष्यसत्वेऽप्यर्धयोर्भूतभाविनोर्विशेषणयोरसतोः सत्वेन भानाद्वैचित्र्यमाह - अत्रेति ।

काव्यलिङ्गमाह - काव्येति । हेतोर्वाक्यार्थता पदार्थता चेत्यर्थः । अन्त्योऽप्येकानेकपदार्थत्वेन द्विधा । एवं त्रिविधम् ।

आद्यमाह - वपुरिति । हे पुरारे, प्रायोऽहं पुरा पूर्वजन्मनि क्षणमपि भवन्तं त्वां न प्रणतवान् क्वचित् कस्मिश्चिदपि जन्मनि वेदं वपुःप्रादुर्भावाच्छारीरोत्पत्या मयानुमितम् । तत्र नतौ सत्यां शरीरोत्पत्तिरेव

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ।। ५०४ ।।

अत्र ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते तेन 'यदेवोच्यते तदेव व्यङ्ग्यं यथा तु व्यङ्ग्यं न तथोच्यते' । यथा गवि शुक्ले चलति दृष्टे "गौः शुक्लश्चलतीति विकल्पः । यदेव दृष्टं तदेव विकल्पयति न तु यथा दृष्टं तथा । यतोऽभिन्नासंसृष्टत्वेन दृष्टं भेदसंसर्गाभ्यां विकल्पयति ।

कमलाकरी

न स्यात् तेन पूर्वजन्मनि नत्यपराधादेकोऽपपराधः । सम्प्रतीदानीं नमन्मुक्तः तेनातनुः शरीरहीनोऽहमग्रे भविष्यत्कालेऽपि नतिहीन इति द्वितीयोऽपराधः । हे महेश महाप्रभो, तदिदमपराधद्वयमपि क्षन्तव्यम् । अत्र तदिदमिति । 'तस्मिन् सीद' इतिवत् पूर्वापेक्ष[१] नत्यभावद्वयस्य बाधीयं हेतुत्वमित्यर्थः । हेतोरनेकपदार्थस्य वाक्यार्थत्वेऽपि पूर्वमहावाक्यार्थत्वमत्रत्ववान्तरवाक्यार्थतेत्याह –अनेकेति ।

तामाह – प्रणयेति । मालतीं घ्नन्तमघोरघण्टं प्रति माधवोक्तिः । हे दुष्ट, प्रणयिनी प्रीतिमती या सखी तस्यः सविभ्रमोऽयं परिहासः तस्य रसेन पूरेण प्राप्तैः सुन्दरशिरीषपुष्पताडनैरपि यद्वपुस्ताम्यति म्लायति तत्र मालतीशरीरे शस्त्रमुद्यच्छतस्तव शिरस्यकाण्ड यमदण्ड इवैष मदीयो भुजः पततु । अत्र भुजपाते शस्त्रक्षेपो हेतुः ।

अन्त्यमाह – भस्मेति । शिवे प्रसन्ने तत्वज्ञस्य वचनमिदम् । हे भस्मोद्धूलन भवते भद्रमस्तु । हे रुद्राक्षमाले, ते शुभमस्तु । गिरिसुताकान्तः शिवस्तस्यालयः प्रासादस्तस्यालङ्कृतिरुपां सोपानपरम्परां निःश्रेणिततिम् । तमिह धिक् । 'अभितः परितः' (अ.वा. ५४४) इति हायोगे द्वितीया । साऽपि परित्यक्तेत्यर्थः । अद्याराधनतोषितेन विभुना शिवेन युष्माभिः सपर्या पूजा तया च यत् सुखं तदेवालोक उद्योतस्तदुच्छेदके तन्नाशके मोक्षसंज्ञके महामोहे तमोरूपे वयं निधीयामहे । सिद्धस्य शिवसेवादिसुखस्य नाशो मोक्षस्य महामोहत्वे हेतुस्तत्पदगम्यः । उक्तोदाहरणेषु त्रिष्वपि हेतूक्तेरुक्तं

१. पूर्वोक्तं नत्यभाव-ब.।

उदात्तं वस्तुनः सम्पत्

सम्पत् समृद्धियोगः यथा -

मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जिनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम् ।। ५०५ ।।

कमलाकरी

विवेकमाह-एष्विति । अत्र कारकहेतोरुक्तिः अनुमानालङ्कारे तु ज्ञापकस्येति भेदः ।

पर्यायोक्तिमाह - पर्यायेति । वाच्यत्वेन वाचकत्वेन विना तस्माद्भिन्नेन व्यापारेण वाच्यस्यैव यद्वचोबोधनात् तेन ध्वनौ न प्रसङ्गःतत्र वाच्यत्वाभावात् तत्पर्यायोक्तम् । तदाह-वाच्यस्येति । विविक्तेन भिन्नेन व्यापारेणावगमनं वाच्यस्यैव व्यञ्जनं भङ्ग्यन्तरं व्यञ्जनीयमिति ।

यमिति - । यं रावणं प्रेक्ष्य चिररूढा चिरसञ्चिताऽपि मदेनैरावणमुखे प्रीतिरुज्झिता त्यक्ता । मानेन हरेरिन्द्रस्य हृदये प्रीतिस्त्यक्ता । अत्र भङ्ग्यन्तरेण रावणप्रताप एव निवासप्रीतिरुज्झितेति वाच्यवत् प्रतीयते । ननु व्यङ्ग्यस्य कथं शब्देनोक्तिः, अत आह-तेनेति । मदमानत्यागशब्दार्थ एव रावणप्रतापत्वेन व्यङ्ग्योऽपीत्यर्थः । न च पौनरुक्त्यं वैफल्यं वेत्याह -यथात्विति । व्यङ्ग्यमवाच्यमेन यथा तथात्र न किन्तु वाच्यमपीत्यर्थः ।

एकस्योभयरूपत्वेन बोधे दृष्टान्तमाह -यथेति । गवि गोव्यक्तौ शुक्ले गुणे चलति चलनधात्वर्थे दृ[१] ष्टे निर्विकल्पकगोचरे गौः शुक्लश्चल इति विकल्पो विशिष्टप्रत्ययः । यदेव दृष्टं निर्विकल्पके ज्ञातं व्यक्तिगुणादि तदेव विकल्पयति विषयीकरोति, न तु यथादृष्टं यादृशं पूर्वज्ञाने विषयीकृतं तादृ[२] शमुत्तरज्ञानेन विषयीकरोतीत्यनुषङ्ग । किन्तु-विशिष्टत्वेन विलक्षणम् । कीदृशं तर्हि सविकल्पे विषयोऽत आह - अभिन्नेति । भेदसंसर्गौ त्रना निर्विकल्पे भानं वस्तु मेदसंसर्गाभ्यां

---

१. द्रष्टो -क.।
२. तथा सादृश्यमुत्तर-अ.।

महताञ्चोपलक्षणम् ।। ११५ ।।

उपलक्षणमङ्गभावः अर्थादुपलक्षणीयेऽर्थे । उदाहरणम् -

तदिदमरण्यं यस्मिन् दशरथवचनानुपालयन् व्यसनी ।
निवसन् बाहुसहायः चकार रक्षःक्षयं रामः ।। ५०६ ।।

न चात्र वीररसः, तस्येहाङ्गत्वात् ।

कमलाकरी

विकल्पयति विशिष्टीकरोति । मतभेदेनैतत् । अगोव्यावृत्तिरेव गोत्वमित्यपोहवादिबौद्धमते भेद एव विशेषणम् । गोत्वजातेर्विशेषणत्वे तत्सम्बन्धभानम् । असंसृष्टत्वेनासम्बन्धेन । कृदन्तभावप्रत्ययेन सम्बन्धोक्तेः, तेन निर्विकल्पके ज्ञान[१]स्यैव सविकल्पके यथा विशिष्टरूपेण भानात् प्रकारभेदस्तथात्र वाच्यस्यापि व्यङ्ग्यत्वेन भाने प्रकारभेदान्न पौनरुक्त्यं वैफल्यञ्चेत्यर्थः ।

उदात्तालङ्कारमाह - उदात्तमिति । सम्पदातिशय इत्याह - समृद्धीति । वर्णनोद्रेक इत्यर्थः । मुक्ता इति । दूराद्दाडिमबीजशङ्कितधियः केलिशुकाः विद्वद्भवनेषु पण्डितगृहेषु केलिषु रतेषु विसूत्रास्त्रुटिताः ये हारास्तेभ्यो गलिताः प्रातः अङ्गणप्रान्ते सम्मार्जनीभिर्हृता अपसारिता मन्दं चलन्त्यो या बालास्तरुण्यस्तासामङ्घ्रिषु पादेषु लाक्षालक्तकं तेनारुणाः मुक्ताः कर्मीभूताः । शुकान् इतिपाठे मुक्ताः कर्त्र्यः । यत्कर्षन्ति तद्भोजनृपतेस्त्यागस्य क्रीडित[२]मित्यर्थः । अत्रोद्भटदानवर्णनम् ।

अथान्त्यं भेदमाह - महतामिति । वर्णनीयेऽर्थे महतां पुंसां रामादीना मुपलक्षणमङ्गत्वञ्चोदात्तमित्यनुषङ्गः । कुत्राङ्गत्वमत आह- अर्थादिति । तदाह - तदिदमिति । पुष्पकस्थस्य लक्ष्मणस्याङ्गदं प्रत्युक्तिः । इदं तद्दण्डकमरण्यं यस्मिन् निवसन् दशरथस्य वचनमाज्ञा तस्यानुपालने रक्षणे व्यसनमाग्रहो यस्य स रामो बाहुसहाय एकाकी रक्षसां खरादीनां क्षयञ्चकार । अत्रारण्ये रामोऽङ्गमित्यर्थः । न तु गुणीभूते रसेऽलङ्कारत्वं दृष्टमत्र तु वीररसप्राधान्यात् कथं तदत आह- न चेति । वीररसाश्रयस्य रामस्याङ्गत्वे रसस्य सुतरामङ्गत्वात्तत्वं युक्तमित्यर्थः । न च रसवदलङ्कारेण सिद्धिः विशेषसंज्ञया तद्बाधात् । यथा वा -

---

१. ज्ञातस्यैव -क. ।
२. क्रीडितस्येत्यर्थः-अ.।

तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत् ।

समुच्चयोऽसौ -

तस्य प्रस्तुतस्य कार्यस्य एकस्मिन् साधके स्थिते साधकान्तराणि यत्र सम्भवन्ति सः समुच्चयः । उदाहरणम् -

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽ क्षमो
नो सख्यश्चतुराः कथन्नु विरहः सोढ़व्य इत्थं शठः ।। ५०७ ।।

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति तदुपरि प्रियातमदूरस्थित्यादि उपात्तम् । एष एव समुच्चयः सद्योगे, असद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते तथाहि -

कमलाकरी

" इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनः शिखरिपत्रिणः शेरते ।
इतश्च वडवानलः सह समस्तसंवर्त्तकै-
रहो विततमूर्जितं भरसहञ्च सिन्धोर्वपुः ।।" इति ।

समुच्चयमाह - तत्सिद्धीति । तस्य कार्यस्य सिद्धिरुत्पत्तिः तद्धतौ साधके सति यत्रान्यत्तत्वेनोच्यते इत्यर्थमाह - तस्येति ।

दुर्वारा इति । कामबाणाः अनावराः । कान्तो दूरे प्रवासी, मनोऽधीरं प्रेम गाढं घनं, वयो नवं यौवनं प्राणाः कठिनाः अनश्वराः कुलं निर्मलम् अतो न स्वाच्छन्द्यं शक्यम् । स्त्रीत्वं धैर्यविरोधि तेन धैर्यमशक्यम् । काले वसन्तो मन्मथस्य शत्रोः सुहृत् पीडाप्रदः कृतान्तो यमो विधाता वाऽक्षमो मारणेऽशक्तः । तेन मृत्युनापि निस्तारो नेत्यर्थः सख्यो नो चतुराः प्रियानयने इत्यर्थः । इत्थं[१] सति शठो दुष्टो घातुको विरहः कथन्नु सोढव्यः ।

अत्र कामबाणानां तापकत्वेऽन्ये प्रियप्रवासादयो हेतव उक्ताः । यत्वन्यैः सद्योगेऽसद्योगे सदसद्योगे वास्य भिन्नानि लक्षणान्युक्तानि तान्यत्रैवान्तर्गतैरप्युक्तानीत्याह-एष एवेति ।

१. एवं सति -अ.।

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावाः अमीभिरयं जनः
व्रजति सुतरां दर्पं राजन् त एव तवाङ्कुशाः ॥ ५०८ ॥

अत्र सतां योगाः । उक्तोदाहरणे त्वसतां योगः ।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतौ सज्जनः
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ५०९ ॥

अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः ।

कम्लाकरी

सद्योगे आह – कुलमिति । हे राजन् अमलिनं निर्दोषं कुलं, भद्रा रम्या मूतिर्देहो बुद्धिर्विद्या रम्या भुजयोर्बलमत्यर्थंस्फीता विस्तृता श्रीः प्रभुत्वमकुण्ठम् । एते हि स्वभावसुन्दरा भावाः । अमीभिर्भावैरयं लोकः सुतरां गर्वं प्राप्नोति । तव तु त एवाङ्कुशाः अपथप्रवृत्तिरोधकाः । अत्र निर्दोषकुलादेः शोभनस्यान्यैः शोभनैर्भद्रमूर्त्याद्यैर्योगात् सहोक्तिरित्याह अत्रेति । असद्योगो दुर्वार इत्युक्त इत्याह –उक्तेति । असतां दुःसहानां समरबाणादीनां सहोक्तिः ।

सदसद्योगमाह – शशीति । दिवसे धूसरो निस्तेजाः शशी चन्द्रः कान्ता नष्टयौवना, सरः पद्महीनं, स्वाकृते सुन्दरमुखं विद्याहीनं, प्रभुर्धन-परायणः कृपणः सज्जनः सदा दरिद्रः नृपाग्रे सूचकश्चैतानि सप्त मे मनसि शल्यानीत्यर्थः । अत्र चन्द्रादेर्शोभनस्याशोभनैर्धूसरत्वाद्यैर्योगः । एवं नृपाङ्गणगतस्य सतः खलेनासतां योगः । तत्वन्तु खलस्य दुःखहेतुत्वा दसत्वं चन्द्रादेस्तदभावात् सत्वमित्यर्थः । न च 'दुर्वाराः' इत्यादौ स्मरबाणादेश्चन्द्रादिवच्छोभनत्वं प्रसिद्धमित्यर्थः । चन्द्रे शोभने धूसरे शल्येऽसह्ये उक्ते शल्यान्तरणि खलादीन्यशोभनान्युक्तानीत्यर्थः ।

समुच्चयस्यान्त्यं भेदमाह –विदलितेति । हे नृप, तव नाशित-सर्वशत्रुकुलमिदं बलमाशु विमलञ्च भवत्तानि प्रकृष्टखलानां दुष्टानां

स त्वन्यो युगपद् या गुणक्रिया ।। ११६ ।।

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम् –

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलञ्च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ।। ५१० ।।

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यञ्च
निरातपत्वरम्यैः ।। ५११ ।।

अत्र क्रमेणेति समुच्चय व्यावर्तनाय ।

कलुषञ्च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितञ्च महीमहेन्द्र तेषां वपुषि प्रस्फुटमापदां
कटाक्षैः ।। ५१२ ।।

"धुनोति चासिं तनुते च कीर्तिम्" इत्यादे –

कमलाकरी

मुखानि मलिनानि च जातानि । अत्र वैमल्यमालिन्यगुणयोश्चकाराभ्यां समुच्चयः ।

क्रिययोराह – अयमिति । एकपदे एककालेऽकाण्डे वा एतया प्रिययाऽयं सुदुःस्सहो वियोगश्चोपनतः प्राप्तः । नवमेघोदयादहोभिश्च निरातपत्वमातपशून्यत्वम् । निरातपत्रेति पाठे छत्रं विनैव रम्यैर्भवितव्यं भूतञ्च । अत्र प्राप्तिभवनक्रिययोः समुच्चयः ।

गुणक्रिययोराह–कलुषमिति । हे नृपेन्द्र, श्वेतपद्मसोदरा श्रीर्यस्य तत्त[1]व वक्षः अहितेषु शत्रुष्वकस्मात् कलुषञ्च । तेषां वपुषि आपदाङ्कटाक्षैः कर्तृभिः पतितञ्च । अत्र कलुषगुणपातक्रिययोः समुच्चयः । अत्र देशभेदेऽपि कालभेदाद् व्यधिकरणयोरेव समानाधिकरणयोरेव वा समुच्चय इति केचित् तद्दूषयति–धुनोतीति । राजा खड्गं कम्पयति कीर्तिञ्च करोतीत्यत्रैकाधिकरणे समुच्च्ययदर्शनाद व्यधिकरणे इति न वाच्यम् । रणभूमौ भवान् खड्गहस्तश्च स्वर्गे देवा साधुवादयुताश्चेत्यत्र देशभेदेऽपि समुच्चयदर्शनादेकस्मिन् देशे समुच्चय इति च न वाच्यमित्यन्वयः । किन्तु व्यधिकरणसमानाधिकरण-योश्चेत्यनियम इत्यर्थः । तदुक्तं रुद्रटेन –

---

१. तव वक्तुरभिहितेषु–अ.।

"कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये ।" इत्यादेश्च दर्शनात् व्यधिकरणे इति एकस्मिन् देशे इति च वाच्यम् ।

एकं क्रमेणानेकस्मिन् पर्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा सः पर्यायः । क्रमेणोदाहरणम् -

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ।। ५१३ ।।

यथा वा -

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेष्वेव मृगशावाक्षि लक्ष्यते ।। ५१४ ।।

रागस्य वस्तुतो भेदेऽप्येकतया ध्यवसितत्वादेकत्वमविरुद्धम् ।

तं ताण सिरिसहोअर रअणाहरणंमि हिअअमेकरसम् ।
बिंबाहरे पिआणं णिवेसिअं कुसुमबाणेण ।। ५१५ ।।

कमलाकरी

यधिकरणे वा यस्मिन् गुणक्रिये चैककालमेकस्मिन् ।
उपजायत देशेऽसौ समुच्चयः स्यात्तदन्योऽसाविति ।।

पर्यायमाह - एकमिति । एकं वस्त्वनेकस्मिन् क्रमेण कालभेदेनेति समुच्चयनिरासः । यद्यत्र स्वतः सिद्धं भवति कविना प्रयोजकेन क्रियते निष्पाद्यते वा सः पर्याय इत्यर्थमाह- एकमिति अनेकत्रभवनमाह-श्रेणीति प्रकृतपर्यायासङ्गतेश्च ।मुख्यमनेकत्र भवनमेकस्याह - नन्विति । ननु रे कालकूट, उत्तरोत्तरं विशिष्टमुच्चं पदं यस्यां साऽऽश्रयाणां स्थिति रीतिरियं वक्ष्यमाणां तव केनोपदिष्टा । प्राक् प्रथममर्णवस्य हृदये मध्ये वससि अथ वृषलक्ष्मणस्य हरस्य कण्ठे वससि । अधुना खलानां वाचि मुखे वससि ।

अत्र हृदयकण्ठमुखानां पूर्वस्मादुच्चत्वं विषयस्यानेकत्रभवनञ्च स्वतः सिद्धमित्यर्थः ।

अन्यस्ततोऽन्यथा

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽ न्यः ।

क्रमेणोदाहरणम् -

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं
विषं तदेव ।। ५१६ ।।

तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभाः घटाः ।
स क्षुद्रो मुसलध्वनिः कलमिदं सङ्गीतकं योषिता-
माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ।। ५१७ ।।

अत्रैकस्यैव हानोपादानयोरविवक्षितत्वान्न परिवृत्तिः ।

अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ।। ११७ ।।

पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम् । धर्मिणि अयोगव्यवच्छेदो व्यापकस्य साध्यत्वम् । यथा -

कमलाकरी

कविना कृतामेकस्यानेकत्र निष्पत्तिमाह-बिम्बोष्ठ इति । हे तन्वि, पूर्वं ते बिम्बोष्ठ एव रागोऽदृश्यत । हे मृगनेत्रे, अधुना एष रागस्तव हृदयेऽपि दृश्यते । रागो रक्तता प्रीतिश्चोष्ठे हृदये च कविना निवेशिता ।

ननु रागशब्दे लौहित्यप्रीत्योरर्थयोर्भेदात् कथमेकस्यानेकत्र वृत्तिरत आह-रागस्येति । कविना श्लेषेणैक्यकल्पनादेकत्वमित्यर्थः ।

अस्मादेवास्वरसादुदाहरणान्तरमाह - तं ताण इति । "तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् । बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ।।" इति संस्कृतम् । तेषां दैत्यानां श्रीसहोदररत्नं कौस्तुभाभरणं यस्य तस्मिन् श्रीकृष्णे एकरसमेकतानं हृदयं कामेन कान्तानां बिम्बोष्ठे निवेशितमित्येकस्य हृदयस्य कृष्णकान्तौष्ठयोर्वृत्तिः कामकृता चोक्ता ।

अस्यान्यं भेदमाह-अन्य इति । ततः पूर्वस्मादन्यथा वैपरीत्येऽन्यःपर्याय इत्यर्थः । वैपरीत्यमेवाह-अनेकमिति । भवति स्वतः क्रियते वाऽन्येन यद्यत्र ।

आद्यमाह - मधुरिमेति । खलानां मधुरिमा माधुर्येण रुचिरं वचः

यत्रैताः लहरी चलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः ।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ।। ५१८ ।।

कमलाकरी

पूर्वं पृथु अमृतं व्यनक्ति । अथ मोहहेतुस्तदेवान्तर्गतं हालाहलं विषमिव कथयति । अत्रामृतं विषं वाऽनेकस्मिन् खलवचने सिद्धम् ।

द्वितीयमाह – तद्गेहमिति । पूर्वं नतभित्ति खर्वकुड्यं तद्गेहं दिवः स्वर्गात् लब्धावकाशमिदं मन्दिरं राजगृहं जातम् । सा जरती वृद्धा गौ र्धेनुर्दोग्ध्री । एताः करिणां घनाभा घटा नन्दन्ति । स क्षुद्रो मुसले ध्वनिरिदानीमिदं योषितां कलं सङ्गीतकं जातम् । अयं द्विजः सुदामा दिवसैरियतीं परां भूमिं पदवीं काष्ठां प्रापिता इत्याश्चर्यम् । अत्रैकद्विजौ[१] दिवसैरनेकं गृहादिकृतम् । न चेयं परिवृत्तिरित्याह – अत्रेति । एककर्तृकहानोपादानायोरुक्तौ हि परिवृत्तिः, न त्वत्र तथेत्यर्थः ।

अनुमानालङ्कारमाह – अनुमानमिति । साध्यसाधनोभयाभिधानमित्यर्थः । साधनपदार्थमाह – पक्षेति । पक्षधर्मत्वं व्याप्यस्य पक्षवृत्तित्वम् अन्वयः सपक्षे सत्वम् व्यतिरेको विपक्षासत्वम् । इत्थं त्रिरूपो हेतुः साधनामित्यर्थः । अबाधितविषयत्वस्याप्यत्रैवान्तर्भावात् । साध्यपदार्थमाह – धर्मिणीति । धर्मिणी हेतुमिति पक्षे व्यापकस्य साधनवन्निष्ठात्यन्ताभावाप्रतियोगिना वह्नेः अयोगस्यासम्बन्धस्य व्यवच्छेदोऽभावो नियतसम्बन्धः साधनवद्वृत्तित्वं साध्यमित्यर्थः । यत्रेति- । एताः लहरीवच्चलाचला अतिचपला दृशो यासाचलयति । पदे द्विर्भावः । चलाञ्चलेति पाठे चलोऽञ्चलः प्रान्तो यासा मितिबहुब्रीहिगर्भो बहुव्रीहिः । ता कान्ता यत्र पुंसि भ्रुवं व्यापारयन्ति वक्रयन्ति तत्रैव पुंसि सततं मर्मस्पृशो इति प्रथमान्तं षष्ठ्यन्तं वा कामं, परममी मार्गणा यद्यतस्तत्रैव पतन्ति तस्माच्चक्रीकृतं मण्डलीकृतं चापं यत्र तद्यथा तथा अञ्चिते संहिते शरे प्रेङ्खन्तौ खेलन्तौ [२] करौ यस्य स क्रोधनः क्रूरोऽ पि स्मरः आसां स्त्रीणां शासनधर आज्ञाकारी अग्रत एव धावतीति सत्यम् ।

---

१. द्विजे-ब.।
२. स्खलन्तौ -क.।

साध्यसाधनयोः पौर्वापर्यविकल्पे न किञ्चिद्वैचित्र्यमिति न तथा दर्शितम् ।

विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद्विशेष्यस्य उदाहरणम् -

महौजसो मानधनाः धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि
वाञ्छन्त्यसुभिः समीहितुम् ।। ५१९ ।।

कमलाकरी

अत्र बाणपातो भ्रूव्यापारो वा साधनं, स्मरस्याज्ञाकारित्वं साध्यं, तदयं कामिन्यां पक्षेऽस्ति । तेन यत्र तत्रेति पदाभ्यां यो धूमवानिति वह्यत्र भ्रूव्यापारस्तत्र स्मरशरपात इति व्याप्तिः । तेन कान्ताः पुरोवर्तिस्मराः बाणपातनियतभ्रूव्यापारवत्वादिति प्रयोगः । अत्र वस्तुतः व्याप्त्यभावेऽपि कविनिर्माणात् तथा । तेन धूमेन वह्न्यनुमानेनालङ्कारत्वम् । ननु सर्वत्र साध्यं पूर्वं निर्दिश्य पश्चाद्धेतुरुच्यते तत्कथमत्र पूर्वार्धे साध्यात् पूर्वे साधनोक्तिरत आह-साध्यस्येति । अन्यत्र तथात्वे[1]ऽपि काव्ये तद्भानेऽपि वैचित्र्यात्तदादर इति भावः ।

परिकरालङ्कारमाह - विशेषणैरिति । साकूतैः साभिप्रायैरुक्तिः पुष्टिर्विशेषणप्रतियोगिनो विशेष्यस्येत्याह-अर्थादिति । महौजस इति ।महौजसो महाप्रभावाः मानिनः सम्प्रति सङ्ग्रामे प्राप्तकीर्तयोऽपकर्तुं मिलिताः न तु भेदवृत्तयः भेदशून्याः एकमन्येन तस्य दुर्योधनस्यासुभिः प्राणैरपि प्रियाणि कर्तुमीहन्ते । अत्रोत्कृष्टानामपि राज्ञां तदपकारासामर्थ्यात्तस्य विशे[2]ष्यस्य ततोऽप्युत्कर्षः सूच्यते । नन्वपुष्टार्थस्य दोषत्वात्तदभावरूपं पुष्टार्थत्वं नालङ्कारोऽत आह - यद्यपीति । अपुष्टार्थत्वाभावः पुष्टार्थत्वं निर्विशेषणे केवलेऽप्यस्ति विशेषणसत्वे तु परिकरइत्यर्थः ।

व्याजोक्तिमाह - व्याजोक्तिरिति । छद्मेन कपटेन ज्ञातस्यापि वस्तुनो गोपनं व्याजोक्तिरित्यर्थः । व्यपदेशेन व्याजेन । न चापह्नुतावन्तर्भाव इत्याह-न चेति । प्रकृतं प्रस्तुतमप्रस्तुतमुभयञ्च

---

१. सत्वेऽपि काव्ये-क, अ. ।
२. विशेषस्य-क.।

यद्यप्यपुष्टार्थस्यदोषताभिधानात्तन्निराकरणेन पुष्टार्थ-स्वीकारः कृतः तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः ।

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।। ११८ ।।

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः । न चैषापह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासम्भवात् ।

उदाहरणम् -

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्-
रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः ।। ५२० ।।

कमलाकरी

तन्निष्ठसामान्यभावात् । तंन्वन्तु अपह्नुतिरुपमेयनिषेधगर्भा, न चात्र तथेति स्पष्टो भेदः ।

शैलेन्द्रेति - शैलेन्द्रेण हिमाद्रिणा दीयमाना या गिरिजा गौरी तस्याः हस्तस्योपगूढं सम्बन्धस्तेनोत्पन्नं यद् रोमाञ्चस्वेदकम्पादिस्तेन विसंष्ठुलो विशकलितो यो विधिः प्रकारस्तत्र यो व्यासङ्गस्तात्पर्यं तस्य भङ्गेन व्याकुलःकामोद्रेकाद् व्यग्रचित्तः । व्यासेधेतिपाठे निषेधस्तस्य भङ्गो रचना तयाऽकुलो व्यग्रः । हा आश्चर्यं हिमाचलस्य करयोः शैत्यं, तेन कम्पः इत्युक्तवान् । शैलस्यान्तःपुरं स्त्रीजनो मातुर्गौर्याः मण्डलं सखीजनो गणाश्च नन्द्यादयस्तैः कामचेष्टां ज्ञात्वा सस्मितं दृष्टः शिवो वो युष्माकमवताद् रक्षतु ।

व्याजोक्तिमाह - अत्रेति । सात्विकं रूपं गौर्या रत्याख्यो भावस्तद्रूपतया तज्जन्यतया प्रसृतावुत्पन्नौ रोमाञ्चकम्पौ । शैत्यकारणतयेति-बहुव्रीहिर्हिमवत्करशैत्यत्वेनोक्तेरपलपितावपह्नतौ व्याजोक्ति फलतो नापह्नुतिं भावजत्वनिषेधाभावादित्यर्थः ।

परिसंख्यामाह - किञ्चिदिति । किञ्चिद्वस्तु पृष्टमपृष्टं वा कथितं तादृगन्यव्यावृत्तये यद् कल्प्यते सा परिसंख्येत्यन्वयः । ननु शब्देन स्वार्थोक्त्या कथमन्यव्यावृत्तिरत आह - प्रमाणान्तरेति ।

अत्र पुलकवेपथू सात्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ।

किञ्चित्पृष्टमपृष्टं व कथितं यत् प्रकल्प्यते ।
तादृगन्यच्व्यपोहाय परिसंख्या तु सा स्मृता ।। ११९ ।।

प्रमाणान्तरादवगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा भवेत् परिसंख्या । अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम् । तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः । क्रमेणोदाहरणम् -

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ।। ५२१ ।।

कमलाकरी

मानान्तरप्राप्तस्यानुवादो व्यर्थः सन् परिशेषादन्यव्यावृत्तिं फलतीत्यर्थः । पृष्टमपृष्टं व्याचष्टे -अत्र चेति । तदन्यथा प्रश्नाभावपूर्वं द्वयोर्व्यावर्त्यं वाच्यं-वेत्याह तथेति । प्रतीयमानता व्यङ्ग्यता ।

प्रश्नपूर्वे व्यङ्ग्यं वर्ज्यमाह - किमासेव्यमिति । पुंसामासेव्यं किमिति प्रश्नः द्युसरितो गङ्गायाः अनवद्यं निर्दोषं सविधं समीपं तटमिति मानान्तरसिद्धयोक्त्या न कान्तसविधमिति वर्ज्यं व्यङ्ग्यम् । एकान्ते किं ध्येयमिति प्रश्नः विष्णोः पादयुगलं नाङ्गनेति । आराध्यं किम्-पुण्यं न पापमिति । अभिलषणीयं किम् । करुणा दया न हिंसेति वर्ज्यानि व्यङ्ग्यानि । येषु गङ्गादिष्वासक्त्या सेवया चेतो निस्सीमं मुक्त्यै समर्थं भवति ।

प्रश्नपूर्वं वर्ज्यं शाब्दमाह - किं भूषणमिति । अत्र संसारे सुदृढ मविनाशि भूषणं किम् - यशः एव रत्नं न । कार्यं किम् सुष्ठु कृतमार्यचरितं दोषो न । अप्रतिहतमविनाशि चक्षुः किम् -धिषणा बुद्धिः एव न नेत्रम् । त्वदपरस्त्वदन्यः कः सदसद्विवेकं जानाति, न कोऽपीत्यर्थः अत्र न रत्नमित्यादि निषेध्यम् ।

शाब्दं प्रश्नं विना वर्ज्यं व्यङ्ग्यमाह कौटिल्यमिति । ते केशपाशे

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहलं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ।। ५२२ ।।
कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वससि ।। ५२३ ।।
भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ।। ५२४ ।।

यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता ।
तदा कारणमाला स्यात् -

कमलाकरी

कौटिल्यं वक्रता वसति न हृदये इति वर्ज्यं व्यङ्ग्यम् । करपादौष्ठ-पल्लवेषु रागः वसति न परपुरुषे । ते कुचयुगे काठिन्यं वसति न मानसे । नेत्रयोश्चञ्चलत्वं वसति न मनसि तनौ चेति वर्ज्यं व्यङ्ग्यम् ।

प्रश्नं विना वर्ज्यं शाब्दमाह- भक्तिरिति । प्रायो बहुधा महतां भवे शम्भौ भक्तिर्विभवे न भक्तिः रचना । शास्त्रे व्यसनमासक्तिः युवतिरेव कामास्त्रं मदनशस्त्रं तत्र न । यशसि चिन्ता वपुषि नेति । अत्र विभवादिकं वर्ज्यं शाब्दम् ।

कारणमालामाह - यथोत्तरमिति । यथाशब्दो वीप्सार्थः । उत्तरोत्तरकार्यं प्रति पूर्वस्य हेतोः पूर्वार्थो हेतुश्चेदित्यर्थः ।

जितेन्द्रियत्वमिति- । अत्र जितेन्द्रियत्वाद्विनयस्तस्माद्गुणप्रकर्ष-स्तस्माज्जनानुरागयगस्तस्मात् सम्पदः इति कारणमाला । अत्र गौणे सारोपाध्यावसाने रूपकातिशयोक्ती कार्यकारणयोरभेदोक्तिस्तु सारोपाध्यवसाने शुद्धभेदौ । हेत्वलङ्कारः कुतो नोक्त इति रुद्रटादिमतमाशङ्क्याह-हेतुमतेति । 'आयुर्घृतम्' इत्यादौ हेतुमता कार्येण सह हेतोरभेदेनोक्तौ हि शब्देन हेतोः स्फुटप्रतीतेर्गौणत्वं विना वैचित्र्यभावान्नालङ्कारतेत्यर्थः ।

नन्वविरलेत्यादौ हेत्वलङ्कारप्रतीतेः का गतिरत आह - अविरलेति । अविरलो घनः पद्मविकासो यत्र सकलः सम्पूर्णोऽलीनां मदो यत्र कोकिलानामानन्दो यत्र सोऽयं लोकानामुत्कण्ठा कान्तेबा

उत्तरमुत्तरम्प्रति यथोत्तरम् । उदाहरणम् -

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा
हि सम्पदः ।। ५२५ ।।

'हेतुमता सह हेतोरभिधानमभेदतो हेतुः' इति हेत्वलङ्कारो न लक्षितः । 'आयुर्घृत' मित्यादिरुपो ह्येष न भूषणतां कदाचिदर्हति वैचित्र्याभावात् ।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः ।। ५२६ ।।

इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुर्न पुनर्हेत्वलङ्कारकल्पनयेति पूर्वोक्तकाव्यलिङ्गमेव हेतुः ।

क्रियया तु परस्परम् ।। १२० ।।

वस्तुनोर्जननेऽन्योन्यम् -

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यनामालङ्कारः ।

कमलाकरी

तत्करः कालो वसन्त एति । इत्यत्र केवलानुप्रासवशादेव काव्यत्वं समाम्नासिषु रुचिरे कवयः इति । शेष हेतोः पूर्वोक्तं काव्यलिङ्गमेव हेतुर्नाम नान्यः इत्यर्थः । कामोद्दीपकः कालोऽस्तीति पर्यायोक्तिर्वेत्यर्थः ।

अन्योन्यालङ्कारमाह - क्रिययेति । एकया क्रियया वस्तुनोः परस्परं जनने एकस्य पौर्वापर्यविरोधादेकजातीयक्रियया ज्ञेयेति व्याचष्टे-अर्थयोरिति । मिथः सजातीयक्रियाजनकत्वमन्योन्यालङ्कार इत्यर्थः ।

हंसाणमिति । हंसानां सरोभिः श्रीः सार्यते अथ सरसां हंसैः । अन्योन्यमेव एते आत्मनं केवलं गरयन्ति ।। इति संस्कृतम् । सार्यते क्रियते । ननु हंससरसोः पूर्वासिद्धत्वात् कथमन्योन्यजनकत्वमत आह-अत्रेति । केवलयोः सिद्धत्वेऽपि श्रीविशिष्टत्वेन जन्यत्वं 'रक्तः पटः क्रियताम्' इतिवदित्यर्थः ।

उत्तरालङ्कारमाह - उत्तरेति । उत्तरे श्रुते यत्र प्रश्नकल्पनमसकृदसम्भाव्यं क्रियते स एकस्तत्र प्रश्ने सति वा यद्यत्रासम्भाव्यमसदुत्तरं

उदाहरणम् -

हंसाणं सरेहिं सिरी सारिज्जइ अह सराणं हंसेहिं ।
अण्णोण्णं वि एए अप्पाणं णवर गरुअंति ।। ५२७ ।।

अत्रोभयेषामपि परस्परंजनकता मिथःश्रीसारता-सम्पादनद्वारेण ।

उत्तरश्रुतिमात्रतः ।
प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ।। १२१ ।।
असकृद्यदसम्भाव्यमुत्तरं स्यात्तदुत्तरम् ।

प्रतिबलोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते तदेकं तावदुत्तरम् ।

उदाहरणम् -

वाणिअअ हत्थिदंता कुत्तो अम्हाणं वग्घकित्ती अ ।
जावलुलिआणवमुही घंरमि परिसक्कए सोण्ह ।। ५२८ ।।

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी ताः मूल्येन प्रयच्छेति क्रेतुर्वचनममुना वाक्येन समुन्नीयते। न चैत्तत् काव्यलिङ्गम् उत्तरस्य ताद्रूप्यानुपपत्तेः । नहि प्रश्नस्य प्रतिवचनं जनको हेतुः

कमलाकरी

स्याद् इति द्विविधमुत्तरं तन्नामालङ्कार इत्यन्वयः ।

आद्यमाह-प्रतीति । पूर्ववाक्यं प्रश्नवाक्यम् । वाणिजअ इति । वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च । यावल्लुलितालक-मुखी गृहे परिषक्कते स्नुषा ।। इति संस्कृतम् । वृद्धं व्याधं प्रति वणिजा गजदन्तं व्याघ्रचर्म वास्ति तन्मूल्येन प्रयच्छेत्युक्तो व्याधस्येदमुत्तरम् । कान्तासक्तो मे पुत्रो क्षी[१]णो मृगयां न करोतीति व्यङ्ग्यमाह - हस्तिदन्तेति उत्तर वाक्येन प्रश्नस्य हेतोः कल्पना । काव्यलिङ्गेऽन्तर्भावमाशङ्क्याह - न चेति । ताद्रूप्येति उत्तरस्य प्रश्नं प्रति कारणत्वाभावादित्यर्थः । तदेवाह-न हीति । न ह्युत्तरं प्रश्नजनकं ज्ञापकत्वादित्यर्थः । नन्वेवमनुमानाऽलङ्कारेऽन्तर्भावः स्यादत आह - नापीति । एकोधर्मः पक्षस्तन्निष्ठत्वेनानुक्तेरित्यर्थः । तत्र वा सतीति मूलं व्याचष्टे-

१. तीक्ष्णो- क.।

नापीदमनुमानम्, एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः ।

प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यदसम्भाव्यरूपं प्रतिवचनं स्यात्तदपरमुत्तरम् । अनयोश्च सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम् । उदाहरणम् -

का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।
किं सोख्खं सुकलत्तं किं दुख्खं जं खलो लोओ ।। ५२९ ।।

प्रश्नपरिसंख्यायामन्यव्यपोहे एव तात्पर्यम् । इह तु वाच्ये एव विश्रान्तिरित्यनयोर्विवेकः ।

कमलाकरी

प्रश्नादिति । असम्भाव्यं व्याचष्टे-लोकेति । अप्रसिद्धमित्यर्थः । प्रश्नपरिसंख्यायान्तु लोकसिद्धोत्तरं वैयर्थ्यादन्यव्यावृत्त्य[१]र्थमिति भेदः । असकृदिति व्याचष्टे- अनयोरिति उत्तरालङ्कारयोरित्यर्थः । सकृदुक्तौ न चारुत्वं तस्यैवालङ्कारप्रयोजकत्वादित्यर्थः ।

क्केति । का विषमा दैवगतिः किं लब्धव्यं यज्जनो गुणग्राही । किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ।।"इति संस्कृतम् । दुग्गेज्ञमिति पाठे किं दुग्राह्र्यमित्यर्थः । ननु प्रश्नपरिसंख्येयं स्यादत आह - प्रश्नेति । विश्रान्तिरिति-दैवगत्यादेर्विषममात्रे तात्पर्यादित्यर्थः ।

सूक्ष्मालङ्कारमाह - कुतोऽपीति । ज्ञातोऽप्यर्थः केनापि स्मारकेण धर्मेण कुतोऽप्याकारात् संस्थानादिङ्गितान्नेत्रभङ्ग्या विचेष्टया वा सूक्ष्मोऽर्थः प्रकाश्यते तत् सूक्ष्ममित्यर्थः ।

सूक्ष्मपदार्थमाह - तीक्ष्णेति । वक्त्रेति । कापि वयस्या सखी तन्व्याः मुखे स्यन्दिनो ये स्वेदबिन्दवस्तेषां प्रबन्धैः प्रवाहैः कण्ठभिन्न सङ्क्रातं कुङ्कमं दृष्ट्वा पुंस्त्वं पुरुषायितं व्यञ्जयन्ती सती हसित्वा तस्याः करे खड्गलेखां लिलेख । विपरीतसुरते श्रमाधिक्यात् स्वेदेन कुङ्कमस्त्रावं दृष्ट्वा ज्ञातं पुरुषायितं पाणौ खड्गलिखनव्याजेन प्रकाशितं, पुंसामेव खड्गयोग्यत्वात् अनुमानं त्वङ्गमित्याह - अत्रेति । न च खड्गस्य पुरुषव्याप्यत्वादनुमानं तदाकारलेखायास्तदव्याप्यत्वात् । सा

---

१. व्यावृत्त्यर्थम् - क.।

कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥१२२॥
धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते ।

कुतोऽप्याकारादिङ्गिताद्वा, सूक्ष्मस्तीव्रमतिसंवेद्यः उदाहरणम्

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा-
भिन्नं कुङ्कमं क्वापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या-
स्मित्वा पाणौ खड्लेखां लिलेख ॥ ५३० ॥

अत्राकृतिमवलोक्य कयापि वितर्कितं पुरुषायित-मसिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम् पुंसामेव कृपाणपाणि योग्यत्वात्। यथा वा-

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ ५३१ ॥

कमलाकरी

परम्परासम्बन्धेन स्मारकात् साक्षादित्यन्यदेतत् रेखयैवान्वय-चमत्कार इत्यर्थः ।

इङ्गितेन प्रकाशनमाह - सङ्केतेति । कयापि विदग्धया विकसन्नेत्राभ्यामर्पितं दत्तमाकूतं येन यत्र वा सङ्केतकालं ज्ञातुं मनो यस्य तं विटं जारं ज्ञात्वां क्रीडापद्मं निमीलिनं, तेन रात्रौ पद्मसङ्कोचनात् स एव काल उक्त इत्याह -अत्रेति ।

सारालङ्कारमाह - उत्तरेति । परोऽन्योऽवधिर्यस्य[१] सः पूर्वापिक्षयोत्तरस्योत्कर्षः सारसंज्ञ इत्यर्थमाह - पर इति । परः पर्यन्तो भागो देशो यस्यान्त्य इत्यर्थः । धारेति । धारया सातत्येनोत्तरोत्तरमधि रोहतेऽधिको भवत्युत्कर्षः सः धाराधिरोही तत्तथेत्यर्थः । राज्ये इति राज्यं जनसमूहः, तल्पं शय्या । अत्रान्ये वराङ्गनायामुत्कर्षोऽधिकं इत्यर्थः । अनङ्गसर्वस्वेति पाठेऽनङ्गस्य सर्वस्वं भगरूपं यस्यां सा तस्यास्तेनैवोत्कर्षात् । 'भगसद्वीर्या हि पत्नयः' इति श्रुतेः । तदुक्तं 'निर्लोमा योनिरापा चेत् सैव मुक्तिर्नं संशयः ।' हसत्या गोपयन्त्यास्तां

१. परोऽन्त्योऽवधि - ब०

अत्र जिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः ।। १२३ ।।

परः पर्यन्तभागोऽवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः । उदाहरणम् -

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ।। ५३२ ।।

भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ।। १२४ ।।

इह यद्देशं कारणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टं यथा धूमादि, यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनं सा तयोः स्वभावोत्पन्न-परस्परसङ्गतित्वादसङ्गतिः । उदाहरणम् -

जस्सेअ व्वणो तस्सेअ वेअणां भणइ तं जणो अलिअम् ।
दन्तक्खअं कवोले बहुए वेअणा सवत्तीणम् ।। ५३३ ।।

कमलाकरी

तर्जयन्त्या कुचोद्गमे' इति । अत्र कथितपदत्वान्न दोषः अन्यपदोक्तैः[१] प्रतीतिप्रतिबन्धात् ।

असङ्गत्यलङ्कारमाह - भिन्नेति । कार्यकारणभूतयोर्धर्मयोर्विरोधे ययोर्यत्रात्यन्तं भिन्नदेशतया युगपत् ख्यातिरुक्तिः प्रतीतिरस-ङ्गतिरित्यर्थः । एतद्व्याचष्टे -इहेति । अतिशयोक्तौ कार्यकारणयोः पौर्वापर्यविपर्ययः अत्र तु वैयधिकरण्यमिति भेदः । केनापीति - । चमत्कारेण हेतुना । पर्यायोक्तिनिरासाय-युगपदिति । स्वभावे त्यर्थनिरुक्तिः ।

जस्सेति - । "यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम् । दन्तक्षतं कपोले वध्वाः वेदना सपत्नीनाम् ।।" इति संस्कृतम् । व्रणो हि वेदनायां हेतुर्भिन्नदेशोऽवगतः सुरतस्मरणादीर्ष्या[२] श्लाघां चमत्कारश्च

१. प्रतीतिबन्धात् -अ.,क.।
२. दीर्घाश्लाघां -क.।

एषा च विरोधबाधनी न विरोधः, भिन्नाधारतयैव द्वयोरिह विरोधिताया प्रतिभासात् । विरोधे तु विरोधित्वमेकाश्रय निष्ठमनुक्तमपि पर्यवसितम् । अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः । तथा चैवं निदर्शितम् ।

समाधिः सुकरं कार्यं-कारणान्तरयोगतः ।

साधनान्तरोपकृतेन कर्त्रा यदक्लेशेन कार्यमारब्धं समाधीयते स समाधिर्नाम । उदाहरणम् -

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ।। ५३४ ।।

समं योग्यतया योगो यदि सम्भावितः क्वचित् ।।१२५।।

इदमनयोः श्लाध्यमिति योग्यतया सम्बन्धस्य नियतविषयमध्यवसानं चेत्तदा समम् । तत्सद्योगेऽसद्योगे च । उदाहरणम् -

कमलाकरी

करोतीत्यर्थः । न चायं हेतुफलयोर्देशभेदाद्विरोध इत्याह - एषा चेति । हेतुमाह - भिन्नेति । वैयधिकरण्यादसङ्गतिस्ततो विरोधधीर्न तु सैव विरोधः । विरोधविशेषेण सामान्यविरोधस्य बाध इत्यर्थः । ननु फलीभूतो विरोध एवालङ्कारोऽस्तु किमसङ्गत्याऽत आह - विरोधे त्विति । भिन्नदेश[1] योरेकाश्रयत्वं विरोधसामान्येन प्राप्तं कार्यकारणयोर्भिन्नदेशत्वेन विरोध विशेषेणासङ्गत्या बाधते, तेन सामान्यमेतद् भिन्नदेशैकाश्रयत्वविरोधपरमित्यर्थः । अपवादो विशेषः उत्सर्गस्य सामान्य[2]स्य तद्भिन्नपरत्वादित्यर्थः ।

उपसंहरति । तथा चेति । 'तेनैवमसङ्गतेर्भिन्नालङ्कारत्वं निदर्शितमुक्तमित्यर्थः । तत्वं तु-असङ्गतिः सङ्गतिग्रहपूर्विका अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वात् । अतो न पूर्वविरोधधीर्विरोधेत तु पूर्वं तद्धीः, तेन स्पष्टं चमत्कारवैचित्र्य पुरःस्फूर्त्या च निर्णय इति वयम् । अत्र व्रणक्षतपदयोः प्रक्रमभङ्गाद् दन्तव्रणः कपोले इति पाठो ज्ञेयः ।

समाध्यलङ्कारमाह - समाधिरिति । हेत्वन्तरयोगात् कार्यं यत्र

---

१. देशादेरेकाश्रय-क.।
२. सामान्यमेतद्भिन्नपर-ब.।

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।
जातं दैवात् सदृशमनयोः सङ्गतं यत्तदेतत्
शृङ्गारस्योपनतमधुना राज्यमेकापतपत्रम् ।। ५३५ ।।
चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रम्
जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ।। ५३६ ।।

क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ।। १२६ ।।

कमलाकरी

सुलभमभीष्टं स समाधिरित्यर्थमाह - साधनान्तरेति । समुच्चये द्वयोस्तुल्यकक्षत्वमतो भेदः ।

मानमिति । यद् दिष्टया भाग्येन घनगर्जितमुत्पन्नं तेनैव कान्ताया माननियसात् पमोपकारः इत्यर्थः ।

समालङ्कारमाह - सममिति- । सम्बन्धिनोर्योग्यतया औचित्येन क्वचिद्वस्तुविशेषे यदि योगस्तुल्यत्वात् सताऽसता वा सम्बन्धः सम्भाविनो लोकासम्मतः सः समसंज्ञ इत्यर्थमाह - इदमिति । इदं युगस्वरूपं श्लाघ्यमुचितमित्यर्थः । तद्योग्यत्वमुत्कर्षेण निकर्षेण च द्विविधम् - उत्तमं विषमञ्च ।

आद्यमाह - धातुरिति । एषा मृगाक्षी धातुः शिल्पं कौशलं तदुत्कर्षस्य निकषस्थानं परीक्षोपलरूपा । अयं देवो स्मरस्य विरुद्धः । चतुर्थ्यर्थे षष्ठी । रूपे सौन्दर्य स्मराय दत्तं पत्रं पत्रावलम्बनं येन । स्मरस्य रूपे दत्तपत्र इति वाऽन्वयः । यदनयोर्दैवात् सङ्गतं जातं तदेतत् शृङ्गाररसस्यैकच्छत्रमद्वितीयं राज्यमुपनतं प्राप्तमित्यर्थः ।

द्वितीयमाह - चित्रमिति । बत बत अहोऽहो इत्युपहासः । विधाता दैवादुचितायाः रचनायाः संविधाता कर्त्ता जातः । यन्निम्बानां पक्वफलानां स्फीतिः रसधारा । स्फीतिरिति पाठे समूहः आस्वादनीया । इदं चित्रं चित्रमिति विस्मये वीप्सा । यच्चैतस्याः भक्षणस्य कलासु कौशलं तत्र कोविदः पण्डितः काकरूपो लोकः । एतन्महच्चित्रम् । अत्र

गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ।। १२७ ।।

द्वयोरत्यन्तविलक्षणतया यदनुपपद्यमानतयैव योगः प्रतीयते, यच्च किञ्चि दारभमाणः कर्त्ता क्रियायाः प्रणाशान्न केवलमभीष्टं यत्फलं न लभेत यावदप्रार्थितमप्यनर्थं विषयमासादयेत् तथा सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर्गुणौ क्रिये च परस्परं विरुद्धतां व्रजतः स समविपर्ययात्मा चतूरूपो विषमः । क्रमेणोदाहरणम् -

शिरीषादपि मृद्वङ्गी केयमायतलोचना ।
अयं क्व च कुसूलाग्निकर्कशो मदनानलः ।। ४३७ ।।
सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ।। ५३८ ।।

कमलाकरी

निम्बानां योगस्य योग्यत्वम् ।

विषमालङ्कारं चतुर्द्धा द्वाभ्यामाह - क्वचिदिति । यद्यत्र सम्बन्धिन्तो रतिवैलक्षण्यात् श्लेषः सम्बन्धः क्वचिदपि घटनां निष्पत्तिं न प्राप्नुयात् । एष एको विषमः । कर्तुः क्रियासत्वेऽपि फलप्राप्तिरनर्थप्राप्तिश्चेति द्वितीयः । कार्यस्य गुणक्रियाभ्यां सह क्रमेण कारणस्य गुणः क्रिया वा विरुद्धाकारणं गुणक्रियानुगुण्यं न तत्र द्वावित्येवं चतुर्द्धा विषम इत्यर्थः ।

आद्यमाह - द्वयोरिति । विरुद्धयोरनुपन्न एव यत्र सम्बन्धः प्रतीयत इत्यर्थः । कर्तुरिति द्वितीयमाह-यच्चेति । यावच्छब्दं किन्त्वर्थे । गुणेत्वा दिना द्वावाह-तथेति । तथा शब्दः किञ्चेत्यर्थे कारणस्य रूपं गुणक्रिये तदनुकारे तदनुसारे कार्यस्य सर्वत्र सिद्धे सत्यपि यद्यत्र तयोः कार्यकारणयोर्गुणौ क्रिये चान्योन्यं गुणो गुणेन क्रिया क्रियया च विरोधं गच्छतस्तौ द्वाविति चतुर्विधः साम्याभावाद्विषम इत्यर्थः । गुणक्रियया विरोधस्तु सर्वत्र सत्वान्न विषमः ।

आद्यमाह - शिरीषादिति । शिरीषपुष्पादपि कोमलाङ्गीयं विशालनेत्रा क्व । कुसूलं पुटपाकघटी । कुकूलेति पाठे करीषाग्निरिति कश्चित् । कुम्भकारस्य पाक इति परमानन्दः । शङ्कुपूर्णो गर्त इति

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं
प्रसूते ।। ५३९ ।।

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ।। ५४० ।।

अत्रानन्ददानं शरीरतापेन विरुद्धयते । एवं-

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया -
दृशा ।। ५४१ ।।

कमलाकरी

देवनाथः । 'कुकूलं शङ्कुभिःपूर्णे श्वभ्रे ना तु तुषानले (अ. ३।३।२०३) इत्यमरः । तदग्निसदृशो मदनाग्निः क्व । द्वौ क्वशब्दौ महदन्तरं ब्रूतः । योगोऽनुचितो व्यङ्ग्यः ।

द्वितीयमाह-सिंहिकेति । सिंहिका सिंही तत्सुतः सिंहशावकस्तस्माद्भीतः शशो रक्षणार्थं चन्द्रं गतः । अन्यः सिंहिकायाः सिंह्याः राक्षस्याश्च सुतो राहुस्तत्र साश्रयं सचन्द्रं तं शशं जग्रसेऽभक्षयत् । अत्र चन्द्रगमनान्न केवलमात्मरक्षणाभावः किन्त्वा-श्रयनाशरूपानर्थप्राप्तिरपीत्यर्थः ।

गुणे विरोधात्तृतीयामाह - सद्य इति । यस्य राज्ञः तमालनीलापि खङ्गधारा रणे करस्पर्शं प्राप्य तन्मात्रेण किम्पुनर्युद्धेन शरदिन्दुवत्पाण्डु त्रिलोकाभरणं यशो जनयति । अत्र नीलाद्धेतोः शुक्लं कार्यगुणविरोधः ।

क्रियाविरोधाच्चतुर्थमाह - आनन्दमिति । हे पद्मपत्रनेत्रे, त्वं नित्यं निस्सीमानन्दं ददासि । त्वयैव कृतो विरहो मे देहमत्यन्तं तापयतीति कान्ताविरहयोः कारणकार्ययोः सुखदान -तापन क्रिययोर्विरोध इत्याह -अत्रेति । अत्र विरुद्धगुणक्रियायोगाच्चमत्कारः तेन विरोधस्याङ्गत्वान्न तेन गतत्वम् कर्तृकर्मयोग्येऽप्ययोग्यतायां विषमान्तरमूह्यमित्याह एवमिति ।

विपुलेति । यस्य सागरशयस्य कृष्णस्य सागरादपि विपलेन महता कुक्षिणा युगक्षये प्रलये चतुर्दश भुवनानि पपिरे जग्रसिरे । एकभुवनस्य समुद्राणां वा का गणना । स पुनः किल श्रीकृष्णस्य एकतमया पुरस्त्रिया

इत्यादावापि विषमत्वं यथायोगमवगन्तव्यम् ।

महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्याधिकन्तु तत् ।। १२८ ।।

आश्रितमाधेयम् आश्रयस्तदाधारः । तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यद् अधिकतरतां व्रजतः तदिदं द्विविधमधिकं नाम । क्रमेणोदाहरणम् -

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ।। ५४२ ।।

कमलाकरी

एकया मदेन विभ्रमो यस्यां सा वासावसकला कटाक्षरूपा तया दृशा पपे पीतः सादरं दृष्टः । अत्र पानपदार्थभेदेऽप्यभेदारोपेण श्लेषादेवमुक्तम् कुक्षेः सागरभुवनयोर्लघुगुरुपरिमाणयोरेकस्त्रियाऽ तिसूक्ष्मैकदृष्टित्रिभागेन विश्वात्मकस्य हरेः पाने परिमितत्वापरिमितत्वयोश्च गुणयोः क्रिययोश्च स्वरूपायोग्यत्वाद्यथायोगं यथायथं महद्वैषम्यं ज्ञेयमित्यर्थः । एवं कुक्षिणा[१]वयवेन सागरभुवनपानाच्छरीरस्यावयविनः सागरान्तर्गत्या गुणयोः क्रिययोः कार्यकारणयोर्वैषम्यं तन्माला चेति दिक् ।

अधिकालङ्कारमाह - महतोरिति । महतोराश्रिताश्रययो-राधेयाधारयोः क्रमेणाश्रयाश्रयिणौ आधाराधेयौ तनूत्पत्तावपि महीयांसावधिकौ यद्यत्रोच्यते तद् द्विविधमधिकमित्यर्थमाह- आश्रितमिति । विषये स्थलविशेषे महाधेयापेक्षया तनौ रथ्याधारस्य यत्र महत्वं यद्वा महाधारापेक्षया तनोरप्याधेयस्येति द्विविधमित्यर्थः । प्रस्तुतेति - आधेयापेक्षयाऽ ऽधारस्य तदपेक्षया वा तस्याधेयस्याधिक्ये विवक्षिते इत्यर्थः ।

आद्यमाह - अहो इति । भूपाल, भुवनत्रयमध्ये अहो आश्चर्यरूप भूप विशालं यतो यस्मादत्र मातुमशक्योऽपि ते यशोराशिर्माति । अत्राधेयस्य यशोराशेः क्वाचित्कत्वात् तनोरप्याधारः भुवनापेक्षया मातुमशक्यत्वे इति महत्वेऽपि मातीत्याश्रयस्य महत्वम् ।

द्वितीयमाह - युगान्त इति । युगक्षयकाले प्रतिसंहृत आत्मा

---

१. कुक्षिणावयवसागर-क.।

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भ -
मुदः ।। ५४३ ।।

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य यत्स्तुत्यै प्रत्यनीकं तदुच्यते ।। १२९ ।।

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत् तमेवप्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणम्, तदलीकप्रतिनिधितुल्यत्वात् प्रत्यनीकमभिधीयते । यथाऽ नीके भियोज्ये तत्प्रतिनिधिभूतमपरं मूढ़तया केनचिदभियुज्यते तथेह

कमलाकरी

प्रपञ्चरूपो येन, प्रपञ्चस्य तदात्मकत्वात् यद्वा प्रतिसंहृतः सूक्ष्मीकृत आत्मा शरीरं येन, बालरूपस्येत्यर्थः । यस्य कैटभद्विषः हरेर्यस्यां तनौ जगन्ति सावकाशं स्थितानि तत्र तनौ तपोधनो नारदस्तदागमजन्मा मुदः सन्तोषाः न ममुः । अत्राधेये मुदामाधिक्यम् ।

प्रत्यनीकमाह - प्रतिपक्षेति । प्रतिपक्षं शत्रुं बाधितुमशक्येन तत्स्तुत्यै शत्रोरुत्कर्षाय तदीयस्य वस्तुनो या तिरस्क्रिया बाधा सा प्रतिसैन्यमिव प्रत्यनीकमित्यर्थमाह - न्यक्कृतीति । पराभवपरमपि शत्रुं जेतुं तदुत्कर्षफलकं तदीयस्य बाधनमित्यर्थः । अवयवार्थमाह - यथेति तदीयत्वं साक्षात् परम्परया वा ।

आद्यमाह -त्वमिति । हे सुन्दर, त्वं जितकामसौन्दर्यः सा च कान्ता भवति त्वय्येवानुरक्ता, न कामे तेन कामोऽनुशयोद्वेषादिव पञ्चभिरपि बाणैर्युगपदेव तां तापयति । अत्र तां जेतुमशक्यस्तेन सौन्दर्योत्कर्षं वक्तुं तदीयकान्ताबाधोक्ता ।

द्वितीयमाह - यस्येति । अमृतहरणे कायस्य शरीरस्य निग्रहः शिरच्छेदस्तेन गृहीतो धृतो विग्रहो विरोधो येन सः कृती कुशलो यस्य विष्णोः किञ्चिदपकर्तुमसमर्थो राहुः कान्तं रम्यं मुखं तत्सदृशाकृति चन्द्रमद्यापि पीडयतीत्यर्थः । इन्दोः कथं विष्णुसम्बन्धित्वमत आह - इन्दोरिति । विष्णोरवयवो मुखं सम्बन्धि तेनेन्दोः सादृश्यसम्बन्धात् परम्परया तदीयतेत्यर्थः ।

मीलितालङ्कारमाह - समेनेति । निजेन स्वाभाविकेनागन्तुना

प्रतियोगिनि विजेये तदीयोऽन्यो विजीयत इत्यर्थः । उदाहरण्गम् -

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव
कामः ।। ५४४ ।।

यथा वा-

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि
बाधते ।। ४४५ ।।

इन्दोरत्र तदीयता सम्बन्धिसम्बन्धात् ।

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ।। १३० ।।

सहजमागन्तुकं वा किमपि साधारणं यल्लक्षणं तद्वारेण यत् किञ्चित् केनचिद्वस्तुना वस्तुस्थित्यैव बलीयस्तया तिरोधीयते तन्मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम् -

कमलाकरी

औपाधिकेन वा समेन तुल्येन लक्ष्मणा धर्मेण वस्तुना वस्तुगत्या यन्निगूह्यतेऽभिभूयते तन्मीलितमित्यर्थमाह-सहजमिति । निजपदार्थः सहजत्वं लणं धर्मो वस्तुनेत्यस्यार्थमाह - वस्तुस्थित्येति । बलवत्सजातीयग्रहणकृतमग्रहणमभिभवः तेन व्याजोक्तौ गृहीतस्य गोपनाद् अपह्नुतौ चोपमानसत्वान्नातिव्याप्तित्याह- बलीयस्तयेति ।

आद्यमाह - अपाङ्गेति । नेत्रप्रान्तचपले गिरो मधराः कोमलाः वक्राः सरसा वर्णा यासु ता गतिः क्रीडाभरमन्दा मुखञ्चातिरम्यम् । इतीदं मृगदृशामङ्गके कृशेऽङ्गे । अल्पार्थे कन् । लीलया स्वतःस्फुरितं प्रबल[१]मस्ति तत्तेऽनात्र तरुण्यां कृतपदः सञ्जातोऽपि मदाङ्कुरो न ज्ञायते ।

अत्र नेत्र-चाञ्चल्यादिना सहजेन धर्मेण मदतुल्येन मदस्याभिभव इत्याह -अत्रेति ।

औपाधिकधर्मेणाह - ये इति । हे नृप, तव ये शत्रवः त्वत्तः पातो

१. प्रबल-ब.।

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ।। ५४६ ।।

अत्र दृक्तरलादिकमङ्गस्य लिङ्गं स्वाभाविकं साधारणञ्च मदोदयेन, तत्राप्येतस्य दर्शनात् ।

ये कन्दरासु निवसन्ति सदा हिमाद्रेः -
त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं -
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ।। ५४७ ।।

अत्र तु सामर्थ्यादवसितस्य शैत्यस्यागन्तुकत्वात् तत्प्रभवयोरपि कम्पपुलकयोः ताद्रूप्यं समानता च भयेष्वपि तयोरूपलक्षितत्वात् ।

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ।। १३१ ।।

कमलाकरी

नाशस्तेन शङ्कितधियो भीताः विह्वलकाः सन्तो हिमाद्रिगुहासु निवसन्ति । अहो आश्चर्यं सरोमाञ्चं सकम्पमङ्गं देहमुद्वहतामपि तेषां याः भीतयस्तासां बुधः पण्डितोऽपि नाभिज्ञः । अत्र भयजययोः कम्परोमाञ्चयोर्हिमशैत्येन तज्ञाभ्याम्कम्परोमाञ्चाभ्यां वा तयोरभिभव इत्याह -अत्रेति । सामर्थ्याद्धिमाचलवासलिङ्गान्निश्चितस्य शैत्यस्यागन्तुकत्वात् तज्जन्ययोः कम्पपुलकयोस्ताद्रूप्यामागुन्तुकत्वं साम्यञ्चोभयेऽपि तेन भीतेस्तज्जयो स्तयोर्वातिरोधानमित्यर्थः ।

एकावलीमाह - स्थाप्यते इति । परं परं वस्तु यथापूर्वं पूर्वं प्रति विशेषणतया यत्र वीप्सया पुनः पुनः स्थाप्यते निधीयतेऽपोह्यते निषिध्यते वा सैकावलीत्यर्थमाह - पूर्वमिति ।

लोहितोष्णीषा इतिवद्विशेषणे विधिमाह - पुराणीति । यस्यां भूमौ पुराणि वराङ्गनासहितानि सन्ति । वराङ्गनाः कान्तारूपेण पुरस्कृतमग्र्यमङ्गं देहो यासां ताः, समुन्मीलिता उत्फुल्ला सद्विलासा

पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषेधो वा सम्भवति सा द्विधा बुधैरेकावली भण्यते । क्रमेणोदाहरणम् –

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्गयः ।
रूपं समुन्मीलितसद्विलासम् अस्त्रं विलासाः
कुसुमायुधस्य ।। ५४८ ।।

न तज्जलं यन्न सुचारूपङ्क्रजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितौ न यो न गुञ्जितं तन्न
जहार यन्मनः ।। ५४९ ।।

पूर्वत्र पुराणां वराङ्गनाः, तासामङ्गविशेषणमुखेन रूपं, तस्य विलासाः तेषामप्यस्त्रम्, इत्यमुना क्रमेण विशेषणं विधीयते । उत्तरस्त्र प्रतिषेधेऽप्येवं योज्यम् ।

यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।
स्मरणम्

यः पदार्थः केनचिदाकारेण नियतः यदा कदाचिदनुभूतोऽभूत्, सः कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्यते तद्भवेत् स्मरणम् । उदाहरणम् –

कमलाकरी

यस्मिस्तद्रूपा विलासा कामस्यास्त्रम् ।

निषेधमङ्गमाह – न तज्जलमिति । यत् सुचारुपङ्कजं न तज्जलमेव न, यदलीनः अस्थिरः । अलीलेतिपाठे लीलाहीनः । षट्पदो भ्रमरो यत्र न तत्पद्मम् । यः कलं मञ्जुलं गुञ्जितं यस्य तादृशो न षट्पदो न यद्वा यः कलं यथा तथा न जुगुञ्ज शब्दं न चक्रे असौ षटपदो न । यन्मनो न जहार तद् गुञ्जितं नेति ।

पूर्वश्लोकेऽत्र च विधिं निषेधञ्चाङ्गमाह-पूर्वत्रेति । पुराणां वराङ्गना विशेषणं तासामङ्गद्वारा रूपं विशेषणं रूपस्य विलासाः विशेषणं तेषामस्त्रं विशेषणं लोहितोष्णीषवद् विधीयते प्रशस्तं विवक्ष्यत इत्यन्वयः । उत्तरश्लोके विशेषणनिषेधादप्राशस्त्यं विवक्षितमित्याह – उत्तरत्रेति ।

स्मरणालङ्कारमाह – यथेति । यथानुभूते तत्सदृशे दृष्टे सत्यर्थस्य

निम्ननाभिकुहरेषु यदम्भः प्लावितं तलदृशां लहरीभिः ।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः
सुरतकण्ठरुतानाम् ।। ५५० ।।

यथा वा -

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्य ।
संभरिअपंचजण्णस्स णमह कण्हस्स रोमांचम् ।। ५५१ ।।

भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने ।। १३२ ।।

तदित्यन्यदप्राकरणिकं निर्दिश्यते तेन समानमर्थादिह प्राकरणिकम् आश्रीयते । तस्य तथाविधस्य दृष्टौ सत्यां यदप्राकरणिकतया संवेदनं स भ्रान्तिमान् । न चैव रूपकं प्रथमातिशयोक्तिर्वा, तत्र वस्तुतो भ्रमस्याभावात् इह चार्थानुगमनेन संज्ञायाः प्रवृत्तेः , तस्य स्पष्टमेव प्रतिपन्नत्वात ।

उदाहरणम् -

कपाले मार्जरः पपय इति करान् लेढि शशिनः
तरुच्छिद्रप्रोतान् बिसमिति करी सङ्कलयति ।

कमलाकरी

या स्मृतिस्तत्स्मरणं नामेत्यन्वयः एतद्व्याचष्टे -य इति । सदृशदर्शनात् संस्कारोद्बोधमाह-स्मृतिप्रबोधेति । स्मृतेः करणव्युत्पत्या संस्कारस्योब्दोध[१]स्तदाधायिनि तद्धेतौ । सा स्मृतिर्द्वेधा-एतज्ञन्मानुभूतस्य जन्मान्तरीयस्य वा ।

आद्यमाह-निम्नेति । चलदृशां निम्नेषु गभीरेषु नाभिकुहरेषु लहरी भिस्तरङ्गैर्यदम्भो जलम्प्लावितमुच्चालितं तद्भवैः कुह इति शब्दैः कर्तृभिः सुराङ्गनाः सुरते कण्ठरुतान्यालिङ्गनकूजितानीति केचित् । तत्वन्तु-निम्ननाभिच्छिद्रसाम्यात् सुरतस्य कण्ठे गर्ते योनिरूपे कण्ठावरश्वभ्रगर्ताविति कोशात्, अश्लीलत्वात् साक्षादुक्तिः । रुतानि योनिक्लेदशब्दितानि । अधीगर्थदयेषाम् (अष्टा. २।३।५२) इति कर्मणि षष्ठी । तानि स्मारितास्तेन चमत्कारः ।

द्वितीयमाह-करेति । करयुगृहीतयशोदास्तनमुखविनिवेशिता-

१. स्तदभिधायिनि-क.।

कमलाकरी

धरपुटस्य । संस्मृत पाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ।। इति संस्कृतम् । हस्तद्वयेन मातुःस्तनंधृत्वा मुखेनपानसादृस्याद् युद्धे शङ्खनादस्मरणाद् वीरस्य रोमाञ्च इत्यर्थः ।

भ्रान्तिमदलङ्कारमाह - भ्रान्तिमानिति तत्तुल्यस्याप्राकृतसदृशस्य प्राकृतस्य दर्शने चाक्षुषज्ञाने[१]न संस्कारोद्बोधात् स्मृत्योपनीता प्राकृतरूपत्वेन प्राकृतस्यान्यथाज्ञाने इत्यर्थमाह - तदिति । अतो न सर्वत्र भ्रमोऽलङ्कार इत्यर्थः । ननु रूपकादावतिव्याप्तिरत आह-न चेति । तत्राहार्यभ्रमत्वादत्र च विशेषादर्शनजन्यभ्रमस्यानाहार्यस्यैव भ्रमशब्दार्थत्वात् विस्पष्टो भेद इत्यर्थः ।

कपाले इति । कपाले शिरसि निपतितान् शशिनः करान् यो दुग्धमिति बुद्धया लेढि भक्षयति । करी गजः वृक्षच्छिद्रस्थान् श्वेतकरान् बिसं मृणालमिति बुद्धया सङ्कलयति गृह्णाति । रतान्ते नग्ना वनिता तल्पस्थान् करान् स्वीयं वस्त्रमिति बुद्धया हरति गृहीतुं धावति । अहो आश्चर्ये, प्रभया कान्तया मतः चन्द्रः इदं जगद् भ्रान्तं करोति । अत्र प्रकृतशशिकरेषु दुग्धादिधीः भ्रान्तिः ।

प्रतीपालङ्कारमाह - आक्षेप इति । उपमानस्याक्षेपस्तिरस्कार एकं प्रतीपम् । यदि वा तस्योपमानस्यैवोपमानान्तरेण तिरस्कारादुपमेयतेति द्वेधा प्रतीपमित्यर्थमाह - अस्येति । अवयवार्थमाह-प्रतिकूलेति ।

आद्यमाह -लावण्येति । हे देव, वेधसा लावण्यस्य गृहभूते प्रतापस्य गरिम्णा गुरुत्वेन सहिते त्यागिनां दातृणामग्रेसरेऽवनीभरे क्षमौ भुजौ यस्य तादृशे त्वयि सृ[२]ष्टे सति इन्द्रश्चन्द्रः किं किमर्थं घटितः, एष पूषा सूर्यः किं कुतो विहितः, चिन्तारत्नं किमर्थमुत्पादितम् । चिन्तामणिर्वृथेत्यर्थः । अभी कुलक्ष्माभृताः कुलाचलाः मुदैव किं सृष्टाः । अत्र राज्ञोपमेयेन रूपाद्यैरिन्द्रादीनामुपमानां वैयर्थ्यात्तिरस्कारः ।।

द्वितीयमाह - ए एहीति । अयि एहि तावत् सुन्दरि कर्णं दत्वा श्रुणुष्व वचनीयम् । तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन । इति । संस्कृतम् । वचनीयमिदम् । अत्र चन्द्रस्योपमानस्योपमेयत्कल्पनमपकर्षः । न चेयमुपमेयोपमा सादृश्याप्रतीतेः, नापि व्यतिरेकः अत्रोपमितेः अनिष्पत्तेः ।

---

१. चाक्षुषुज्ञानं-क.।
२. दृष्टे-क.।

रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ।। ५५२ ।।

आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम् ।। १३३ ।।

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यदुपमानमाक्षिप्यते, यद्यपि तस्यैवोपमानतया प्रसिद्धस्य उपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते तदुपमेयस्योपमानप्रतिकूलवर्तित्वादुभयरूपं प्रतीपम् । क्रमेणोदाहरणम् -

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेषः विहितः एषा किमुत्पादितं
चिन्तारत्नमदो मुधैव किममी सृष्टाः
कुलक्ष्माभृतः ।। ५५३ ।।

ए एहि दाव सुंदरि कण्णं दाऊण सुणसु वअणिज्जम् ।
तुज्झ मुहेण किसोअरि चंदो उअमिज्जइ जणेण ।। ५५४ ।।

कमलाकरी

क्वचिदुपमितिनिष्पत्याऽनादरमाह - क्वचिदिति । गर्वमिति । हे मुग्धेऽसंवाह्यमपरिमितमिमं गर्वं नेत्रयुगलेन किं वहसि । दिशि दिशि सरस्सु ईदृशानि नीलनलिनानि सन्ति ननु । अत्रोत्पलानामुपमेयत्वमेव तिरस्कार इत्याह - इहेति । यथा वा नैषधे -

"इहेदृशाः सन्ति कतीति दुष्टैर्दृष्टान्तितालीकनलावलीनैः ।
आत्मापकर्षे सति मत्सराणां द्विषः परस्पर्द्धनया समाधिः।।" (नै.च.)

एवमसाधारणगुणयोगादुपमानायोग्यं तव मुखसदृशश्चन्द्रो न किन्त्वपकृष्टः । तेनोपमितिरेवायोग्येत्याह-अत्रेति-यत्तुअत्रतत्वं[१] नोच्यतेतत्रापि प्रतीपमित्याह-अनयेनैवेति । रीतिः प्रकारः ।

---

१. यत्वनेनोच्यते -क.।

अत्र मुखोनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्या 'वअणिज्जम्' इति वचनीयपदाभिव्यङ्ग्यस्तिरस्कारः

क्वचित्तु निष्पन्नैवोपमितिक्रियानादरनिबन्धनम्। यथा -

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे।
सन्तीदृशानि दिशि दिशि सरःसु ननु
नीलनलिनानि ।। ५५५ ।।

इहोपमेयीकरणमेवोत्पलानामनादरः।

अनयैव रीत्या यदसामान्यगुणयोगान्नोपमानभावमपि अनुभूतपूर्वि तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम्। यथा -

अहमेव गुरु सुदारुणानामिति हालाहल तात मा स्म दृप्यः।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि
दुर्जनानाम् ।। ५५६ ।।

कमलाकरी

अहमेवेति - । हे तातेत्युपहासः हे हलाहल विष सुदारुणानां मध्येऽहमेव गुरु श्रेष्ठः इति त्वं मा स्म दृप्यो गर्वितो मा भूः। ननु अस्मिन् भुवने लोके दुर्जनानां वचनानि भवादृशानि भूयः पुनः बहूनि वा सन्ति। अत्र दुष्टवचने विषादप्यधिकदुःखहेतुत्वेनोपमित्यनिष्पत्य विषयं प्रत्युपमानयोग्यत्वेऽपि तत्सदृशत्वमपि नेति गुरुत्वं गतम्। तेन तिरस्कारार्थं तदुक्तिरित्याह-अत्रेति। हालाहलस्येति षष्ठीव्यधिकरणात् तं प्रतीत्यर्थः।

सामान्यालङ्कारमाह - प्रस्तुतस्येति। प्रकृतस्यान्येनाप्रकृतेन गुणसाम्याभावेऽपि तद्वक्तुं [१] योगात् सम्बन्धादैकात्म्यमभेदो बध्यते वर्ण्यते इत्यर्थमाह - अतादृशमिति गुणसाम्याभावेऽपि तद्विवक्षया यत्राव्यक्तनिजगुणमिति भ्रमात् वक्ष्यमाणतद्गुणाद्गुणा[२]द्भेदः। तत्र स्वगुणत्यागेनान्यगुणग्रहात् एकात्म्यतयेति मीलिताद् भेदः तत्र पृथग्ग्रहणात्, अत्रापृथग्गृहणात् चेति।

---

१. तद्वक्तुर्योगात् -क.।
२. तद्गुणाच्च भेदः-क.।

अत्र हालाहलस्योपमानत्वमसम्भाव्यमेवोपनिबद्धम् ।

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात् तत्सामान्यमिति स्मृतम् ।।१३४।।

अतादृशमपि तादृशतया विवक्षितुं यदप्रस्तुतार्थेन सम्पृक्तपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत्समानगुणनिबन्धनात् सामान्यम् ।

उदाहरणम् -

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्र-कृतवक्तृरुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽ
भिसारिकाः ।। ५५७ ।।

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः । एतएव पृथक्भावेन न तयोरुपलक्षणम् । यथा वा -

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सहेलं यदि नापतिष्यन् कोऽवेदयिष्यन्नव-
चम्पकानि ।। ५५८ ।।

अत्र निमित्तान्तरजनिताऽपि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीतत्वात् तस्य प्रतीतेश्च बाधायोगात् ।

कमलाकरी

मलयजेति - । चन्दनलिप्ताङ्गा नवहारलतालङ्कृता सिततराणि श्वेतानि दन्तत्राणि दन्तकृतताटङ्काणि तैः कृतमुखकान्तयो रम्यधवलवस्त्राः चन्द्रे विकीर्णतेजसि धरां भुवं धवलयति सत्यविभाव्यतां तदैक्याददृश्यतां गताः । अतएवाऽभिसारिकाः कान्तार्थिन्यः सुखमेव भर्तृगृहं गच्छन्ति । अत्र नारीचन्द्रिकयोश्चन्दनादेश्च शौक्ल्याादभेद इत्याह- अत्रेति । अविभाव्यतामाह- अतएवेतिं ।

वेत्रेति - । भृङ्गा सखेदं यदि गण्डेषु नाऽपतिष्यन्न पतेयुस्तदा

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
एकात्मा युगपद्वृत्तितरेकस्यानेकगोचरा ।। १३५ ।।
अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणञ्चेति विशेषस्त्रिविधः स्मृतः ।। १३६ ।।

प्रसिद्धाधारपरिहारेण यदाधेयस्य विशिष्टा स्थितिरभिधीयते सः प्रथमो विशेषः । यथा -

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ।। ५५९ ।।

एकमपि वस्तु यदेकेनैव स्वभावेन युगपदनेकत्र वर्तते स द्वितीयः यथा-

सा वसइ तुज्झ हिअए सा च्चिअ अच्छीसु सा अ वअणेसु ।
अम्हारिसाण सुंदर ओआसो कत्थ पावाणम् ।। ५६० ।।

यद्यपि किञ्चिद् रभसेन आरभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते सोऽपरो विशेषः । उदाहरणम् -

कमलाकरी

वेत्रत्वचा तुल्यकान्तीनां वधूनां कर्णाग्रे गण्डतलस्थानि अवतंसरूपाणि नवचम्पकानि कोऽवेदयिष्यन्न कोऽपीत्यर्थः ।

अत्र गण्डचम्पकयोर्गौरत्वादभेदः । ननु सभृङ्गतया चम्पकानां भेदात् कथमैक्यमत आह - अत्रेति । निमित्तान्तरं भृङ्गपातः तज्जन्यानुमितितया भेदधीः प्रत्यक्षज्ञानं न बाधते पूर्वभावित्वादुपजीव्यत्वाद् दिङ्मोहादौ सूर्योदयेन प्राच्या अनुमानेन भ्रमानिवृत्तेरित्याशयः । न च रूपकातिशयोक्त्योः प्रसङ्गस्तत्राहार्यारोपादत्र चानाहार्यत्वात् नापि भ्रान्तिमिति अत्र गृह्यमाणारोपस्य स्मर्यमाणारोपात् भेदात् ।

विशेषालङ्कारमाह - विनेति । आधारं विनाऽधेयस्य स्थितिरेकः, एकस्य वस्तुनो युगपदने[१]कत्रैकस्वभावाद् वृत्तिर्द्वितीयः, अन्यत्कार्यजनकस्य पुंसोऽन्यत्रासक्तावपि तज्जनकत्वं तृतीय इत्यर्थः । आद्यमाह- प्रसिद्धेति ।

दिवमिति ।· स्वर्गं गतानामपि येषां कवीनामनल्पगुणां गिरः

---

१. युगपदनेकत्वैकत्वभावावृत्ति- क.

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता -
बृहस्पतिश्च ।। ५६१ ।।

कमलाकरी

आकल्पं जगति रमयन्ति । इह लोके कवयः कथं वन्द्या नेति । अत्र कविरूपाधाराभावेऽपि आधेयगिरां स्थितिरुक्ता । द्वितीयं विशेषमाह - सेति । सपत्नीसक्तं कान्तं प्रति काचिदाह- सा वसति तव हृदये सैवाक्षिषु सा च वचनेषु । अस्मादृशानां सुन्दर अवकाशः कुत्र पापानाम् ।। इति संस्कृतम् । न च पर्याय[१] प्रसङ्गः तत्र च क्रमेणात्र च युगपदनेकसम्बन्धात् तृतीयमन्यदिति द्वितीयश्लोकव्याख्ययाऽह- यदपीति ।

स्फुरदिति । उदितमद्भुतं रूपं यस्य तमुद्गतप्रतापानलं शुद्धविद्यं त्वां सृजता विधिना भुविः नवः कामः सूर्यो बृहस्पतिश्च ससृजे । त्वद्यत्नेनानुषङ्गिकास्ते सृष्टा इत्यर्थः । समुच्चयेऽनेकेषामेककार्येऽन्वयः अत्र त्वेकस्यानेककार्ये इति भेदः ।

संहारोदाहरणमाह - गृहिणीति । रघुवंशे अजस्य शोकः । हे इन्दुमति, त्वं मे गृहिणी, सचिवः हितोपदेशान्मन्त्री, मिथः रहसि सखी । 'मिथोऽन्योन्ये रहस्यपि (अ.) इत्यमरः । ललिते कलाविधौ प्रियशिष्या च । बत खेदे । त्वां तां हरता निर्दयेन मृत्युना मे किन्न हृतमपि तु एकयत्नेन सर्वमनेकं हृतमित्यर्थः ।

ननु सर्वत्रालङ्कारेषु चमत्कारसाम्यात् कथं भेदोऽत आह - सर्वत्रेति । अतिशयस्य चमत्कारस्योक्तिः प्रमाणत्वेन जीव्यत्वेन तिष्ठति तां विना चमत्कारोक्तिं विना तामतिशयोक्ति विना इति व्याख्या त्वयुक्तैव सर्वत्र तदभावात् तदेवाह-सैषेति । वक्रोक्तिश्चमत्कारोक्तिस्तत्साम्येऽप्युक्तिप्रकारभेदाद् भेद इत्यर्थः । विभाव्यते विचित्रो भाव्यते ज्ञायते इत्यर्थः ।

तद्गुणालङ्कारमाह - स्वमिति । यन्न्यूनं वस्तु स्वं गुणमुत्सृज्य त्यक्त्वा अत्युज्ज्वला उत्कृष्टा गुणाः यस्य[२] तस्य वस्तुनो योगात् सम्बद्धात् तद्गुणतां तद्गुणवैशिष्ट्यमेति । तद्वान[२] मत्रेत्यर्थमाह - वस्त्विति । त्यक्तनिजगुणं वस्तु केनापि कृत्वा स्वगुणोपरक्तं यद्वा[३] सते इत्यर्थः ।

---

१. पर्याये प्रस-क.।
२. तद्वाने यत्रेत्यर्थ-क.।
३. यद्वरान्तमित्यर्थः-क.अ.,।

यथा वा-

गृहिणीसचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां बत किं न
मे हतम् ।। ५६२ ।।

सर्वत्र एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते तां विना प्रायेणालङ्कारत्वायोगात् । अतएवोक्तम् -

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।" इति ।।

स्वमुत्सृत्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ।। १३७ ।।

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसम्पदोपरक्तं तत्प्रतिभासमेव यत् समासादयति स तद्गुणः । तस्याप्रकृतस्य गुणोऽस्तीति । उदाहरणम्

कमलाकरी

विभिन्नेति - । यत्र रैवतकेऽद्रौ गरुडाग्रजेन विभिन्नवर्णा निरस्तरूपाः सूर्यस्य रथ्या अश्वाः वंशाङ्कुरवन्नीलैः रत्नैः परतिः स्फुरन्त्या स्वीयरुचा नीलकान्त्या स्वां निजां रुचं कान्ति पुनरानिन्यिरे प्रापिताः ।।

अत्र सूर्याश्वानामरुणदीप्त्या निजरूपलोपः तस्य नीलमणिकान्त्या पुनः प्राप्तिरित्याह-अत्रेति । मीलिते तु प्रकृतस्याग्रहो न त्वत्रेति भेदः । सामान्ये धर्मिणः एवाग्रहात्ततोऽपि भेदः ।

अतद्गुणालङ्कारमाह - तद्रूपेति । अस्य न्यूनस्य चेत्तदा तदीयस्योत्कृष्टरूपस्याननुहारोऽस्वीकारः इत्यर्थमाह - यदित्विति ।

धवलोऽसीति ।" धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम् । रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ।। इति संस्कृतम् । अत्र रक्तमनोयोगात्तद्योग्यत्वेऽपि नानुराग इत्याह- अत्रेति । अतद्गुणमेव विधान्तरेणाह-किञ्चेति । मूले तदिदं पदाभ्यामप्रकृतं प्रकृतञ्चोच्यते इत्यर्थः ।

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे
वंशकरीरनीलैः ।। ५६३ ।।

अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुणवर्णना ।

तद्रूपाननुहारश्चेदस्य तत् स्यादतद्गुणः ।

यदि तु तदीयं वर्णं सम्भवन्त्यामपि योग्यतायामिदं न्यूनगुणं न गृह्णीयात् तदा भवेतद्गुणो नाम । उदाहरणम् -

धवलोसि जह वि सुंदर तह वि तुए मज्झ रञ्जिअं हिअअम् ।
राअभरिए वि हिअए सुहव णिहित्तो ण रत्तोसि ।। ५६४ ।।

अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः । किञ्च तदिति अप्रकृतमस्येति च प्रकृतमत्र निर्दिश्यते, तेन यदप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तान्नानुविधीयते सोऽप्यतद्गुण इत्यपि प्रतिपत्तव्यम् । यथा -

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ।। ५६५ ।।

कमलाकरी

प्रकृतस्याप्रकृतरूपां प्राप्तिमाह - गाङ्गमिति । गाङ्गं जलं शुक्लं यामुनं जलं कज्जलाभम् । हे राजहंस, तत्तुल्यसत्पुरुष, उभयत्र मज्जतस्तव सैव शुभ्रता न चीयते, वर्द्धते न चाप्यपचीयते ह्रसतीत्यर्थः ।। अत्र प्रकृतहंसस्य शुक्लता गाङ्गयामुनौ गुणौ न प्राप्नोतीत्यर्थः

व्याघातालङ्कारमाह - यद्यथेति । केनचित् कर्त्रा यद्वस्तु यथा येनोपायेन यादृशं साधितं कृतं तदन्येन, तथैव तेनैवोपायेन यदन्यथा क्रियते न व्याघात इत्यर्थमाह - केनेति । शब्दार्थमाह-साधितेति ।

दृशेति । दृशा दग्धं कामं दृशैव या जीवयन्ति, शम्भोरपि जयिनी स्ताः वामानि वक्राणि रम्याणि वा नेत्राणि यासां ताः स्तौमि । अत्र दृशैव कामस्य दाहो जीवनञ्चेति व्याघातः । शम्भुरामादृशोर्भेदेऽपि एकजातीयत्वादैक्यम् । एकजातीयाद्विजातीयकार्यायोगाद्वेत्यर्थः ।

एवं नवमदशमयोः शुद्धान् शब्दार्थालङ्कारानुक्त्वोभयेषां सङ्कीर्णभेदमाह - सेष्टेति । अनन्तरमुल्लासद्वये उक्तानां

यद्यथा साधितं केनाप्यपरेण तदन्यथा ।। १३८ ।।

तथैव यद्विधीयेत सः व्याघात इति स्मृतः ।

येनोपायेन यदेकेनोपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यद्यन्यथाकरणं स साधितवस्तुव्याहतिहेतुत्वाद् व्याघातः । उदाहरणम् -

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिन्तीस्ताः स्तुवे वामलोचनाः ।। ५६६ ।।

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ।। १३९ ।।

एतेषां समनन्तरमेवोक्तस्वरूपाणां यथासम्भवमन्योन्य-निरपेक्षतया यदेकत्र शब्दभागे एव, अर्थविषये एव, उभयत्रापि वाऽवस्थानं सा एकार्थसमवायस्वभावा संसृष्टिः ।

तत्र शब्दालङ्कारसंसृष्टिर्यथा-

वदनसौरभलोभपरिभ्रमद् भ्रमरसम्भ्रमतसम्भृशोभया ।
चलितयाविदधे कलमेखलाकलकलोऽलकलोल
दृशाऽन्यथा ।। ५६७ ।।

कमलाकरी

शब्दार्थालङ्काराणामिह एककाव्ये सूत्रप्रोतमणिवद् भेदेना [१] भेदेन च प्रतीति, साङ्कर्ये चमत्कारातिशयादलङ्कारान्तरमेवेदमिति परमानन्दादयः । तत्वं तु -भिन्नचित्रवत्संसृष्टेरलङ्कारान्तरत्वे मानाभावाद् गुणदोषसङ्करेऽपि गुणदोषान्तरत्वा [२] पन्नत्वं न विधान्तरं किन्तु वैचित्र्यमात्रमिति वयम् । भेदपदार्थमाह - अन्योन्येति । उक्तानां शब्दार्थलङ्काराणां यथासम्भवं शाब्दयोरार्थयोरुभयोर्वेत्यर्थः ।

संसृष्टिपदार्थमाह - एकार्थतेति । काव्यरूपैकार्थ-सम्बन्धरूपेत्यर्थः । शाब्दयोराह-वदनेति । माघे कान्ताप्रस्थानम् । मुख-सौगन्ध्यलोभेन भ्रमन्तो ये भृङ्गास्तेषां सम्भ्रमो भ्रमणं तेन सञ्चिता शोभा यस्याः अलकाश्चूर्णकुन्तलास्तैर्लोले चपले दृशौ यस्यास्तयाऽन्यया

---

१. भेदेन च प्रतीतिः-ब.।
२. गुणदोषान्तरत्वापत्तेर्न विधा-ब.।

अर्थालङ्कारसंसृष्टिसु –

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।। ५६८ ।।

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टि प्रयोजयतः उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे । शब्दार्थालङ्कारयोः संसृष्टिर्यथा –

सो णत्थि एत्थ गामे जो एअं महमहंतलावण्णम् ।
तरुणाणं हिअअलूडिं परिसक्कन्तीं णिवारेइ ।। ५६९ ।।

अत्रानुप्रासो रूपकञ्चान्योन्यापेक्षे । संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः ।

एते एव यत्रात्मनि अनासादित स्वतन्त्रभावाः परस्परमनुग्राह्यानुग्राहकतां दधति स एषां सङ्कीर्णमानस्वरूपत्वात् सङ्करः । उदाहरणम् –

कमलाकरी

कलमेखलायाः कलकलः शब्दो विदधेऽकारि । अत्रार्द्धयोरनुप्रासयमके ।

अर्थयोः संसृष्टिमाह – लिम्पतीति । तमोऽङ्गानि लिम्पतीव, नभ आकाशमञ्जनं वर्षतीव । दृष्टिः कुपुरुषसेवेव निष्फला जाता, विषयाग्रहादिति रात्रिवर्णनम् । अत्र पूर्वार्धे उत्प्रेक्षा अन्त्येऽर्धे उपमा । श्लोकद्वये विवेकमाह – पूर्वत्रेति । पूर्वत्र पूर्वश्लोके यमकानुप्रासौ शाब्दौ व्यत्ययेन संसृष्टिङ्कुरुतः । अन्त्ये तूपमोत्प्रेक्षे आर्थौ संसृष्टि इत्यनुषङ्गः ।

शब्दार्थयोः संसृष्टिमाह – सो णत्थीति । "सः नास्त्यत्र ग्रामे य एनां महमहन्तलावण्याम् । तरुणानां हृदयलुण्ठाकीं परिष्वक्कमानां निवारयति ।।" इति संस्कृतम् । मूलिमिति पाठे हृदयोल्मिकां तद्ग्राहिकामित्यर्थः । भागेनान्येतो निरुणद्धीत्यर्थः । अत्र णत्थि एत्थेत्यनुप्रासः शाब्दः लुण्ठाकीमिति रूपकमार्थः । तयोः संसृष्टिरित्याह–अत्रेति/। अनपेक्षौ संसृष्टि प्रयोजयतः इत्यनुषङ्गः । ननु भिन्नार्थनिष्ठयोःकथं संसृष्टिः अत्र आह – संसर्गश्चेति । श्लोकश्छन्दोवाक्ययोरैक्यप्रतीतिरिति ध्येयम् । यद्यपि वर्णानुपूर्वी रूपे

आत्ते सीमान्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं विम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जफलानां स्रज इति शबराः नैव -
हारं हरन्ति ।। ५७० ।।

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतं तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः । यथा वा

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः ।
परिप्रेङ्खत्तारापरिकरकपालाङ्कितलले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ।। ५७१ ।।

उपमा रूपकमुत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र पूर्ववदङ्गाङ्गितया प्रतीयन्ते । 'कलङ्कएवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे

कमलाकरी

छन्दस्य[1]र्थालङ्कारबाधान्नैकार्थवृत्तिस्तथाप्येकार्थके तस्मिन् वाक्ये च तद्वृत्तिर्ज्ञेया । भिन्नार्थयोश्छन्दोवाक्ययोरे[2]क्यप्रतीतिरिति ध्येयम् । यत्वेकरसोपकारादेकार्थवृत्तित्वमिति तन्न गुणदोषाभावादपि संसृष्ट्यापत्तेः । शब्दार्थवृत्यालङ्कारेष्वेव रसोपकारकत्वं प्रतीतिसिद्धं न गुणादिष्विति चेत्तर्हि शब्दार्थात्मककाव्यवृत्तितैवास्त्विति दिक ।

अथ सङ्करमाह - अविश्रान्तीति । एतेऽलङ्काराः आत्मनि स्वस्वरूपे प्रधाने सत्यविश्रान्तिश्चमत्काराभावस्तद्वन्तो यत्राङ्गाङ्गिभावं भजन्ते इत्यर्थमाह - एत एवेति । अनासादितेति - अप्राप्तप्राधान्या इत्यर्थः ।

अनुग्राह्येति - तत्र चारुत्त्वार्थमेवाङ्गाङ्गित्वमित्यर्थः ।

आत्तेति - । हे राजन्, अरण्ये इत्वरीणां धावतीनां त्वदरीणां मृगदृशः कान्तास्तासां सीमन्तचिह्ने शिरोभूषणे शबरैर्हृते मरकतमणियुक्ते हेम्नस्ताटङ्कपत्रे कर्णभूषणे हृते मेखलायां काञ्च्यां छिन्नायां मणीनां तुला कोटिर्नूपुरः तस्य युग्मे गृहीते सति बिम्बौष्ठकान्त्या शोणं रक्तं हारं

---

१. छन्दस्यलङ्कार-क ।
२. रेक्यप्रतीति-क ।

तिरोहितकलङ्करूपमक्षवलयमेव मुख्यतयाऽ वगम्यते, तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः । श्लेषच्छायया तु कलङ्कस्यकरधारणम सदेव प्रत्यासत्या उपचर्य योज्यतेशशाङ्केन केवलं कलङ्कस्य मूर्त्यैव उद्वहनात्। कलङ्को'ऽक्षवलयमिव' इति तु उपमायां कलङ्कस्योत्कटतया प्रतिपत्तिः । न चास्य करधृतत्वं तत्वतोऽस्तीतिमुख्ये ऽप्युपचार एव शरणं स्यात् ।

एवंरूपश्च सङ्करः शब्दालङ्कारयोरपि परिदृश्यते । यथा -

राजति तटीयमभिहतदानवरासातिपातिसारावनदा ।
गजता च यूथमविरतदानवरा सातिपाति
सारा वनदा ।। ५७२ ।।

कमलाकरी

गुञ्जाफलानां स्रज इति बुद्ध्या शबरा न हरन्तीत्यर्थः । अत्र हारे बिम्बौष्ठगुणयोगाद् गुञ्जाफले भ्रान्तिमदुपकारेणैव तद्गुणालङ्कारस्य चारुत्वमित्याह - अत्रेति । चतुर्णां सङ्करमाह - जटेति । जटाभाभिर्जटातुल्याभिर्भाभिः दीप्तिभिरुपलक्षितः, करेण किरणेन हस्तेन वा धृतं कलङ्क एवाक्षवलयं रुद्राक्षमाला येन सः वियोगिनो विरहिणः विशेषण योजयन्ति ते विषयाश्च तेषां व्यापत्तिर्मारणं नाशश्च तेनैव कलङ्कितं स्वीकृतं वैराग्यम्, रागो रक्तता तदभावो निरीहता च तेन विशदः शुल्को निर्मलश्च । परिप्रेङ्खन्त्यः दीप्ताः स्फुरन्त्यः यास्तारा नक्षत्राणि तारां परिकरः समूहः स एव कपालानि शिरोऽस्थीनि तैरङ्कितं तलं प्रदेशो यस्य तस्मिन् व्योम्नि, भस्मवत्तेन चापाण्डुः शशी पितृवने स्मशान इव चरति क्रीडति ।

अत्र जटाभाभिः पितृवने इत्युपमा वियोगिव्यापत्तेरित्युत्प्रेक्षा च[१] करवैराग्ये रक्तश्लेषाङ्गभूते तस्याप्यङ्गं कलङ्काक्षवलय इति रूपकं स एव पितृवन इवेत्युपमाङ्गमित्याह- उपमेति । पूर्ववदन्योन्यं वैराग्यश्लेषादेव जटाक्षमालाधारणं घटते । तारासु कपालारोपरुपकाच्च पितृवनसादृश्यं चन्द्रगताविरक्तवृत्तान्तप्रतीतेः समासोक्तिः ।

ननु कलङ्कोऽक्षवलय इवेत्युपमितसमासोऽयं व्याघ्रादित्वात् । न त्विदं रूपकमत आह - कलङ्क एवेति । उपमायां हि कलङ्कस्योपमेयस्य

१. करे वैराग्ये -क.,अ.।

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे ।

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ।। १४० ।।

द्वयोर्बहूनां वाऽलङ्काराणामेकत्र समावेशेऽपि विरोधान्न यत्र युगपदवस्थानं न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति येनैकतर एव परिगृह्येत, स निश्चयाभावरूपो द्वितीयः सङ्करः समुच्चयेन सङ्करस्यैवाक्षेपात् । उदाहरणम् -

जह गहिरो जह रअणणिब्भरा जहअ णिम्मलच्छाओ ।
तह किं विहिणा एसो सरसबाणीओ जलणिही
ण किओ ।। ५७३ ।।

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः, किमब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेरियमप्रस्तुप्रशंसा इति सन्देहः । यथा वा -

कमलाकरी

प्राधान्यान्न करधृतत्वं घटते । रूपके त्वक्षवलयस्य प्राधान्यात् तस्य करधृतत्वं घटत इत्याह -अस्य हीति । तिरोहितमङ्गं कलङ्करूपं यस्य तदक्षवलयमेव मुख्यं प्रधानं गम्य[१]ते ।

प्राधान्ये हेतुमाह -तस्यैवेति । चो ह्यर्थे । अक्षवलयस्यैव बहिःकरग्रहणं प्रसिद्धं न कलङ्कस्येत्यर्थः । ननु तवापि कलङ्के करधृतत्वाभावेन सादृश्याभावात् कथं तद्घटितं रूपकम् । तेन कराणां रश्मीनां कलङ्कस्य च चन्द्रे सत्वा[२]च्छ्लेषेण कलङ्के करधृतत्वं तवापि स्वीकार्यमेवात आह-श्लेषच्छाययेति । छायाप्रतीतिः रश्मीनां कलङ्कस्य च चन्द्रे सत्वादेकाश्रयत्वसम्बन्धेन करधृतत्वोपचार इत्यर्थः । करधारणस्यासत्वे हेतुमाह- शशाङ्केनेति । चन्द्रेण स्वरूपेणैव कलङ्को धार्यते न तु करेणेत्यर्थः । यद्यपि कलङ्के रश्मिधृतत्वमक्षवलये च हस्तधृतत्वमस्तीति तत्साम्यं तेन रूपकायोगः, तथापि करशब्दवाच्यधृतत्वं साम्यं ज्ञेयम् । नन्वसतः करधृतत्वस्य द्वयोः साम्ये कलङ्क एवासतः उपचारादुपमास्त्वत आह - कलङ्केति ।

१. ध्वन्यते-क.।
२. सत्वेन श्लेषे क.।

कमलाकरी

कलङ्कस्योपमेयत्वादुत्कटतया प्राधान्येन धीः । न च प्रधाने उपचारो युक्तः, किन्त्वङ्गे इत्याह- न चेति । मुख्ये प्रधाने कलङ्के करधृतत्वस्यासत्वादुपचारः स्यात्, स चायुक्तः । अतो नोपमितसमासः किन्तु कर्मधारयेणोत्प्रेक्षैवेयमित्यर्थः । अत्रालङ्कारसर्वस्वे उक्तम् - शब्दवच्छब्दालङ्कारयोर्नाङ्गाङ्गित्वम् । अतोऽत्र न संकरः किन्तु संसृष्टिरेवेति । तद्दूषणार्थ तयोःसङ्करमाह-एवंरूपं इति । एवंरूपोऽङ्गाङ्गिरूपः । तमाह-राजति तटीति । इयं तटी-राजति शोभते। किम्भूता-अभिहतो दानवानां रांवःशब्दोः यस्यां सा, अतिपाती शीघ्रगः सारावः सशब्दो नदो ह्रदो यस्यां सा गजता गजयूथमतिशयेन पाति रक्षति । किम्भूता -अविरलेन सन्ततेन दानेन मदेन वरा श्रेष्ठा सारा स्थिरा वनं द्यति खण्डयति सा वनदा । अत्र द्वितीयचतुर्थपादयोर्यमकं दानवेत्यादिरनुलोमप्रतिलोमश्चित्रसंज्ञोऽलङ्कारश्च परस्परापेक्षौ स्तः । 'नपुंसकमनपुंसकेने (अष्टा. १।२।६९) त्येकशेषो विकल्पेनैकवद्भावात् द्वित्वम् । चित्रवशादेव यमकनिष्पत्तेरङ्गाङ्गित्वमित्यर्थः । तत्वन्तु-यमकचित्रयोरन्योन्यं हेतुत्वायोगादेकश्लोकाश्रयानुप्रवेशादेव सङ्करः ।

अस्यैव सङ्करस्यान्यभेदमाह -एकस्येति । चोऽस्त्वर्थे । एकस्यैकतरस्य ग्रहे स्वीकारे न्यायः साधकमात्रं दोषो बाधकमात्रं तयोरभावात् तुल्यकोटिकः संशयः एवानिश्चयः सन्देहरूपः सङ्करः इत्यर्थः । सङ्कर इत्यर्थमाह - द्वयोरिति । एकत्र काव्ये समावेशसत्वे विरोधात् तात्पर्याभावात् । न्यायदोषाभावादित्यस्यार्थमाह - न चेति । एकस्य साधकेऽन्यस्य बाधके वैक एव स्यान्न सन्देहो नापि द्वावित्याह येनेति । साधकबाधकप्रमाणाभावे संशयस्य न्यायप्राप्तत्वादनिश्चयः । सन्देहमाह- स इति स तुल्यकोटिको द्वितीयोऽन्य इत्यर्थ । ननु द्वयोर्बोधे समुच्चयान्मूले चकाराच्च कथं संशयत्वात् सङ्करोऽत आह-समुच्चयेनेति । समुच्चयेन मूले तद्वाचकशब्दप्रयोगेनेति प्राञ्चः । आक्षेपाद्बोधात् वयं तु ब्रूमः-द्वयोर्बोधः किमङ्गाङ्गिभावेन समप्राधान्येन वेति सन्देहात् सङ्कर एव फलितो भवतीति भावंब्रूमः ।

जहेति - यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः । तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृतः ।।" इति संस्कृतम् । अत्र द्वयोः साम्यात् समासोक्तिरब्धिसादम्यादप्रस्तुतेन मुखेन

नयनानन्ददायीन्दोः बिम्बमेतत् प्रसीदति ।
अधुनापि निरुद्धाशमविशीर्णमिदं तमः ।। ५७४ ।।

अत्र किं कामस्योद्दीपकः कालो वर्तत इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम् उत वदनस्येन्दु-बिम्बतयाऽध्यवसानादतिशयोक्तिः, किं वा एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशाद् रूपकम् । अथ वा तयोः समुच्चयविवक्षायां दीपकम् अथवा तुल्ययोगिता, किमु प्रदोषसमये विशेषणसाम्यात् आननस्यावगतौ समासोक्तिः, आहोस्वित् मुखनैर्मल्य-प्रस्तावादप्रस्तुतप्रशंसा चेति बहूनां सन्देहादयमेव सङ्करः ।

कमलाकरी

महापुरुषप्रशंसा वेति सन्देहमाह – अत्रेति ।

द्वयोः सङ्करमुक्त्वा बहूनां तमाह – नयनेति । नयनयोरानन्दं ददातीति दायी इन्दोरेतद् बिम्बं प्रसीदति द्योतते । अधुना रात्रावपीदं निरुद्धा आशा दिशो येन तत्तमो विशीर्णं नष्टम् ।

अथ बहूनामलङ्काराणां सङ्करमाह–अत्रेति । भङ्ग्यन्तरेण पर्यायेण प्रकारान्तरेणोक्तमित्यर्थः । उक्तेति – एतदिति प्रस्तुतमुखस्येन्दु बिम्बत्वाध्यवसायादतिशयोक्तिः । किन्त्विति–मुखे चन्द्रा[१]भेदाद् रूपकम् अथवेति । एतन्मुखं प्रसीदतीन्दुबिम्बं प्रसीदतीति द्वयोः क्रियायोगे समुच्चयः । इन्दुमुखयोरेकस्य प्रस्तुतत्वेऽन्यस्याप्रस्तुतत्वे दीपकम्, द्वयोः प्रकृतत्वेऽप्रकृतत्वे वा तुल्ययोगितापदेन क्रियासमुच्चयो ज्ञेय इति परमानन्दः । किंस्विदिति । आनन्दकत्वसाम्यात् मुखबोधे समासोक्तिः । आहोस्विदिति – मुखनैर्मल्ये प्रस्तुते चन्द्रस्याप्रस्तुतप्रशंसा वेति बहूनामलङ्काराणां सन्देहादयमेव सङ्करः इत्यर्थः । एतस्य व्यतिरेकमाह यत्र त्विति । न्यायदोषशब्दयोरर्थमाह–न्यायश्चेति । अनुकूलता प्रतिकूलता च प्राधान्यबोधात् तदभावौ । तत्रोपमायां रूपके वा प्रत्येकं चत्वारो दोषाः । उपमायाः साधने रूपके तस्य वा साधनमुपमायां तटस्थं न तु दोषः इति द्वौ, उपमादोषो रुपके तद्दोषो वोपमायां तटस्थ इति द्वौ ।

आद्यमाह – तत्रेति । हासद्युतिर्मुखे चन्द्रस्य सौभाग्यं महिमानं

---

१. चन्द्रारोपात् –क.।

यत्र तु न्यायदोषयोरन्यतरस्यावतारः तत्रैकतरस्य निश्चयान्न संशयः । न्यायश्च साधकत्वमनुकूलता, दोषोऽपि बाधकत्वं प्रतिकूलता । तत्र -

सौभाग्यं वितनेति वक्त्रशशिनो -

ज्योत्स्नेव हासद्युतिः ।। ५७५ ।।

इत्यत्र मुख्यतयाऽवगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजते इत्युपमायाः साधकम् । शशिना तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता ।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ।। ५७६ ।।

इत्यत्रापरत्वमिन्दोरनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते न तूपमाया बाधकताम् ।

कमलाकरी

करोतीत्यत्र वक्त्रं शशीवेत्युपमा वा वक्त्रमेव शशीति रूपकं वेति सन्देहे हासद्युतिर्मुख्यतया प्रधानतया बुद्धा, वक्त्रे एव तत्सम्भवाच्छशिनोऽङ्गत्वादुपमा साधका रूपके तटस्थे तत्सङ्कर इत्यर्थः । ननु चन्द्रे हासाभावाद् रूपके प्रातिकूल्यमेव न ताटस्थ्यमत आह - शशिनीति । तथा मुख्यतया हासस्य धीर्न हासेन विकासे लक्ष्ये रूपकसत्वान्न रूपकस्य बाधिका साधिका चेत्यर्थः । इदञ्च द्युतिपदस्य शोभार्थत्वे तस्य दीप्तिपरत्वे तु हास एव द्युतिरिति रूपकं वक्त्रमेव शशीति रूपकस्यापि साधकमिति सन्देहः स्यादेव ।

द्वितीयमाह -वक्त्रेन्दाविति । तव वक्त्रेन्दौऽन्यः शीतांशुर्यदभ्युद्यतः इदमाश्चर्यमित्यत्रेन्दोरपरत्वम् अपरस्य पूर्वापेक्षत्वात् पूर्वस्य वक्त्रस्येन्दुत्वेऽनुगुणं न प्रतिकूलं मुखेन्दौ सति किमन्येनेति प्रतीते रूपके नोपमायां बाधकम्, इन्दुसदृशे मुखे सतीति किं चन्द्रेणेति (च) प्रतीतौ बाधकाभावादित्यर्थः । तेनात्र तुल्यकोटिकः संशय इत्यर्थः ।

अथ बाधकं तृतीयं भेदमाह - राजनारायणमिति । हे नृप, लक्ष्मी, राजैव नारायणस्तं त्वां निर्भरमत्यर्थमालिङ्गतीत्यत्र श्रिय आलिङ्गनं राजा नारायण इवेत्युपमाया बाधकम् । कुतः-विष्णुसदृशे तद्भिन्ने कुलवधूप्रयुक्तालिङ्गनस्यानौचित्यादित्याह -सदृशमिति ।

रूपकबाधकं चतुर्थं भेदमाह - पादेति । मञ्जु सुन्दरं यन्मञ्जीरस्य

राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।। ५७७ ।।

इत्यत्र पुनरालिङ्गनमुपमा निरस्यति । सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासम्भवात् ।

पादाम्बुजं भवतु नो विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ।। ५७८ ।।

इत्यत्र मञ्जीरशिञ्जितमम्बुजे प्रतिकूलम्, असम्भवादिति रूपकस्य बाधकं न तु पादेऽनुकूलमित्युपमायाः साधकमभिधीयते विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः, एवमन्यत्रापि सुधीभिः परीक्ष्यम् . ।

स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम् ।
व्यवस्थितञ्च -

अभिन्ने एव पदे स्फुटतया यदुभावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः सोऽप्यपरः सङ्करः । उदाहरणम् -

कमलाकरी

नूपुरस्य सिञ्जितं शब्दितं येन रम्यमम्बिकायाः पादाम्बुजं वो विजयाय भवत्वित्यत्र पाद एवाम्बुजमिति रूपके पद्मे नूपुरसिञ्जिताभावाद् रूपकस्य बाधकम् । पादेऽनुकूलमित्युपमासाधकत्वेन नोच्यते किन्तु रूपकबाधकत्वेनैवेत्यर्थः । ननूपमासाधकत्वं विहाय रूपकबाधकतैव कथमुच्यतेऽत आह - विधीति । विधिः साधकः । विध्युपमर्दिनः साधका भावबोधकस्याबाधकस्य विरोधिकोटेरभाव-निश्चायकस्य तदपेक्षया साधकापेक्षया उत्कटत्वेन बलवत्वेन प्रतिपत्तेर्ज्ञानात् सन्देहाभाव इति शेषः । उपमाहेतुमात्रसत्वे हि रूपकस्यापि हेतुः कश्चित् स्यादिति हेतुसन्देहाहितसन्देहः स्यात् । बाधकस्य सत्वे तु तदभावनिश्च[१]यान्न सन्देहः । तेन परेणापि मञ्जीरेण पूर्वस्य साधकस्य बाधात् प्रतिहर्तुरपच्छेदन्यायेन परस्यैव प्राबल्यात् तेनैव व्यपदेशः । प्राधान्येन व्यपदेशा भवन्तीति न्यायात् तदुक्तं भाट्टपादैः-

"पूर्वबाधे[२] तदोत्पत्तिरुत्तरस्य हि सिध्यति ।।" इति भावं वयं

१. निश्चयासन्देह-क.।
२. पूर्वबाधेन चोत्पत्ति-क.।

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलि सञ्चुकोच ।। ५७९ ।।

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ ।
तेनासौ त्रिरूपः परिकीर्तितः ।। १४१ ।।

तदयमनुग्राह्यानुग्राहकतया सन्देहेन एकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकार एव सङ्करो व्याकृतः । प्रकारान्तरेण तु न शक्यो व्याकर्तुमानन्त्यात् तत्प्रभेदानामिति ।

प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः ।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभातिशयहेतुत्वे कश्चिदलङ्कारशब्दस्य, कश्चिदर्थस्य कश्चिच्चोभयस्येति चेन्न । उक्तमत्र यथा काव्ये दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः निमित्तान्तरस्याभावात् ततश्च योऽलङ्कारो यदीयान्वयव्यतिरेकावनुविधत्ते स तदलङ्कारो व्यवस्थाप्यते इति ।

कमलाकरी

प्रतीमः । एवं सर्वत्रालङ्कारेषु पौर्वापर्ये पूर्वबाधो ज्ञेयः इत्याह एवमिति । परीक्ष्यन्तेऽलङ्कारा इति शेषः ।

सङ्करस्यैव विधान्तरमाह – स्फुटमिति । एकत्रविषये एकपदे स्फुटं स्पष्टं व्यवस्थितं यदलङ्कारद्वयं तच्च सङ्कर इति शेषः । व्यवस्था स्थितिः 'यः कौमारहरः' (का.प्र.१) इत्यत्र विभावनाविशेषोक्त्योः अस्फुटत्वान्न संकरः इति वक्तुं स्फुटोक्तिः । एतदाह –अभिन्न इति ।

स्पष्टेति । अथानन्तरं दिवस एवारविन्दं पद्मं सञ्चुकोच सङ्कुचितमासीत् । कीदृशम् । स्पष्टमुल्लसन्तो दीप्यन्तो विशीर्णा वा ये किरणास्त एव केसराणि यस्य तादृशं सूर्यबिम्बमेव विस्तीर्णकर्णिका यस्य । तथाश्लिष्टाः संसक्ता अष्टौ दिश एव दलानि पत्राणि तेषां कलापे समूहे सुखेनावतार उत्पत्तिर्यस्य सुखस्यावतारो यत्रेति वा । स बद्धो गाढोऽन्धकार एव भ्रमरपङ्क्तिर्यत्र । मुखेति पाठे कलापस्य मुखेऽग्रेऽवतारो यस्य । उषेति पाठे श्लिष्टः। अष्टदिग्दलानां कलापो

एवञ्च यथा पुनरुक्तवदाभासः परम्परितरूपकञ्चोभयोर्भावानुविधायितया उभयालङ्कारौ तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽपि द्रष्टव्याः । अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रतिभासते इति वाच्यालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः ।

योऽलङ्कारो यदाश्रितः स तदलङ्कार इत्यपि कल्पनायां अन्वयव्यतिरेकावेव समाश्रयितव्यौ तदाश्रयमन्तरेण विशिष्टस्याश्रयाश्रयिभावस्याभावात् । इत्यलङ्काराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान् ।

एषां दोषा यथायोगं सम्भवन्तोऽपि केचन ।
उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ।। १४२ ।।

कमलाकरी

यत्रेति भिन्नं पदम् । उषा रात्रिस्तस्या अवतार आरम्भस्तत्र बद्धः सम्बन्धोऽन्धकार एव मधुपावलिर्यत्रेत्यर्थः । 'उषा रात्रिर्निशीथिनीति' हेमकोशः ।

अत्रेति - । श्लिष्टाष्टेत्यत्रानुप्रासः, दिशां दलत्वेति रूपकञ्च , उषावतारेत्यत्रानुप्रासो रूपकञ्चेत्यर्थः । शब्दार्थेत्युपलक्षणम् . तेन 'मदकलो ऽलकलोलदृशे' त्यत्रानुप्रासयमकयोः शब्दालङ्कारयोरपि सङ्करो ज्ञेयः ।

सङ्करस्योक्तं त्रैविध्यमुपसंहरति - तेनेति । एतद्व्याचष्टे -तदयमिति । सर्वालङ्काराणां सङ्करस्त्वशक्य एव वक्तुमित्याह - प्रकारान्तरेणेति । व्याकर्तुं दर्शयितुं हेतुमाह - आनन्त्यादिति । शब्दार्थालङ्कारादवान्तरभेदपरस्पराङ्गाङ्गित्वसन्देहैकपदानुप्रवेशैः सङ्करप्रभेदातामानन्त्यादित्यर्थः ।

एवं प्रथमोल्लासे काव्यलक्षणे सालङ्कारौ शब्दार्थौ काव्यमिति प्रक्रान्ताः शब्दगतार्थगतोभयगताश्चालङ्कारा नवमदशमोल्लासद्वये उक्ता इत्याह-इतीति । त्रैविध्यजुषो त्रैविध्यवन्तः ।

ननु शब्दार्थयोः काव्यत्वादर्थे शब्दस्य तत्रैवार्थस्य नैयत्यात् कथमलङ्कारवैचित्र्यमिति शङ्कते-कुत इति । अत्रान्वयव्यतिरेकाभ्यां प्राधान्येन तत्र व्यपदेश इति नवमोल्लासे श्लेषप्रस्तावे उत्तरमुक्तमिति

तथाहि-अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयो दोषास्ते प्रसिद्धिविरुद्धताम्, अपुष्टार्थत्वं प्रतिकूलवर्णताञ्च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात्। क्रमेणोदाहरणम् -

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर्मूर्धजाग्रान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः।
रंह सङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचे -
सोऽवतात्स्यन्दनो वः ।। ५८० ।।

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः अनुप्रासानुरोधेनैव कृता न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः।

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि
यदि सल्लीलोल्लापिनि गच्छसि तत्
किंत्वदीयम्मे ।। ५८१ ।।

कमलाकरी

समाधत्ते। उक्तमत्रेति। न केवलमलङ्कारेष्वेवायं नियमः किन्तु दोषगुणयोरपीति वक्तुं दोषगुणोक्तिः।शब्दगतत्वेनार्थगतत्वेनो-भयगतत्वेन वेत्यर्थः।

तदेवाह - एवञ्चेति। पुनरुक्तवदाभासः परम्परितरूपकञ्चञ्च यथोपमा लङ्कारौ तथा 'क्षणदा सावक्षणदा' इति शाब्देऽपि विरोधाङ्गेऽर्थान्तरन्यासे 'सकलकलं पुरमेतद्' इति शब्दसाम्योपमायां नो[१]भयालङ्काररत्वमेवेत्यर्थः। नन्वेषामुभयालङ्काररत्वे कथमर्थालङ्कारेषूक्तिरत आह-अर्थस्य त्विति। तत्रैवार्थान्तरन्यासादावुभयालङ्कारेत्यर्थस्य वैचित्र्यचमत्कारित्वमुत्कट मधिकमिति हेतोर्वस्तुस्थितिं वस्तुगतिमुभयालङ्काररत्वमविवक्षितत्वाद् वाच्यालङ्कारमध्येऽर्थालङ्कारमध्ये उक्तास्तत्वतस्तूभयालङ्कारा एवेत्यर्थः। यत्तु अलङ्कारसर्वस्वे उक्तम्-'यो यदाश्रितः स तदीयोऽलङ्कारः' तेनाश्रयाश्रयिभाव एव शब्दार्थोभयालङ्कारव्यवस्थायां बीजं नान्वयव्यतिरेकाविति तद्दूषयति-योऽलङ्कार इति। आश्रयाश्रयिभावे किं नियामकम् -अव्यभिचारश्चेत् सोऽन्वयव्यतिरेकरूप एवेत्यर्थः।

---

१. वोभया-क.।

अनणुरणन्मणिमेखलमविरतशिन्जानमञ्जुमञ्जीरम् ।

परिसरणमरुणचरणे रणरणकमकारणं कुरुते ।। ५८२ ।।

अत्र वाच्यस्य विचिन्त्यमानं न किञ्चिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् ।

'अकुण्ठोत्कण्ठया' इत्यत्र शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यत इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः ।

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वदोषः । यथा -

भुजङ्गमस्येव मणिः सदम्भा ग्राहावतीर्णेव नदी सदम्भाः ।

दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः

प्रसभं सदम्भाः ।। ५८३ ।।

उपमायामुपमानस्य जातिप्रमाणगतन्यूनत्वमधिकता वा तादृशी अनुचितार्थत्वं दोषः । धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वञ्च न व्यभिचरतः । क्रमेणोदाहरणम् -

कमलाकरी

हेतुमाह - तदाश्रयणमिति । अन्वयव्यतिरेकाश्रयणं विना विशिष्टस्य व्यवस्थितस्य नियतस्याश्रयाश्रयिभावस्याभावादार्थ-शब्दयोर्व्यत्ययापत्तेश्चेत्यर्थः । फलितमाह-इतीति यथोक्तमन्वयव्यति-रेकौ निमित्तं यस्य स एवान्योन्यमेषां व्यतिरेको भेदो युक्त इत्यर्थः ।

अथान्यैः पृथगुक्तानलङ्कारदोषानुक्तदोषेष्वन्तर्भावयति- एषामिति । तत्र शब्दालङ्कारेषु अनुप्रासदोषाणामुक्तेष्वन्तर्भावमाह-अनुप्रासस्येति । प्रसिध्यभावोऽप्रतीतं वैफल्यं चमत्काराभावोऽपुष्टार्थत्वं वृत्तेरूपनागरिकायाः 'विरोधो वर्णप्रतिकूल्यञ्च कर्मीभूतं नातिक्रामति नातिरिक्तं करोति, किन्तु तत्रैवान्तर्भूतमित्यर्थः । माधुर्ये टवर्गस्य ओजसि तूद्धतगुम्फस्योक्तेस्तद्भिन्नवृत्ताविदं ज्ञेयम् ।

हेतुमाह - तदिति । प्रसिद्ध्यभावादेरप्रसिद्धिरूपत्वादित्यर्थः । आद्यमाह- चक्रीति । मयूरशतके सूर्यरथवर्णनम् । जगतामुपकृतये उपकाराय नित्यं युक्तस्य व्यासक्तस्य सदागत्या कदापि मोचनाभावात् यस्य सूर्यस्थस्य चक्रस्याराः कीलकाः अग्राणि च तेषां पङ्क्तिम् । चक्री विष्णुः स्तौति धूर्जटिः शिवो धूर्युगः ध्वजस्य तद्वस्त्रस्यान्तान् स्तौति ।

चण्डालैरिव युष्माभिः साहसं परमं कृतम् ।। ५८४ ।।
बह्निस्फुलिङ्ग इव भानुरयं चकास्ति ।। ५८५ ।।
अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ।। ५८६ ।।
पातालमिव ते नाभि स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः ।। ५८७ ।।

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता ।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ।। ५८८ ।।

कमलाकरी

नक्षत्रनाथश्चन्द्रौ यस्याक्षयुगं चक्रमध्यं वा स्तौति । वरुणो देवोऽरुणं सारथिं स्तौति । कुवेरः कूबरं युगबन्धस्तस्याग्रं स्तौति । 'कुबेरं युगबन्धने' (1) इति कोशः । सुराणां सङ्घ समूहः रंहो वेगं स्तौति । सः अहिमरुचेः सूर्यस्य प्रीत्या प्रसन्नः स्यन्दनो रथः अन्वहं प्रतिदिनं वो युष्मानवतात् रक्षतु । अत्र चक्रारपङ्क्तिमेव स्तौति नान्यदिति कर्मप्रतिनियमेन या स्तुतिः साऽनुप्रासादेवोक्ता न पुराणादिप्रसिद्धिवशादिति प्रसिद्धिविरोधोऽ प्रसिद्धत्वं दोष इत्यर्थः ।

अपुष्टार्थं द्वाभ्यामाह-भणेति । हे आनन्दं स्यन्दत स्रवतीति स्यन्दी सः सुन्दरश्चासाविन्दुश्च तद्वन्मुखं यस्या एवम्भूते । आनन्दस्यन्दीति मन्दिरविशेषणं भिन्नं वा सती लीलाः उल्लासयति प्रकटयति । उल्लापिनीति पाठे सतीभिर्लीलाभिरुल्लसितुं वदितुं शीलं यस्याः । ताच्छील्ये णिनिः । एवम्भूतेऽरुणचरणे हे तरुणि, यदि मे रमणं सुरतं रन्तव्यम् । 'रमणं क्रीडा' इति कोश (१) तस्य मन्दिरं गृहं यदि गच्छसि तत्तदा अनुणुर्महती रणती मणीनां मेखला यत्र । तथाऽविरतं सन्ततं सिञ्जातं स्वशब्दं मञ्जु सुन्दरं मञ्जीरं नूपुरं यत्र तादृशं परिसरणं गमनं कर्तृ अकारणं मदीयं रणरणकमुत्कण्ठां किमिति कुरुते इति भण वदेत्यन्वयः । मम गृहं गच्छसि चेत्तदा निष्कारणं चिन्ता किमर्थेति काञ्चित् प्रति जारोक्तिः ।।

अत्रार्थे वैचित्र्याभावात् अर्थपोषाभावादनुप्रासो व्यर्थ इत्याह

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् -

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः
सशिनेव मेघः ।। ५८९ ।।

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम् ।

लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात् तदा एकतरस्यैव तद्धर्मसमन्वयाबगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरुपत्वम् । यथा -

कमलाकरी

-अत्रेति । तेन शाब्देऽप्यर्थद्वारा रसोपकारादेवालङ्कारत्वं प्राधान्यात्तु तद्व्यपदेशः । तेन 'कृष्णलेष्ववघातस्येव' अर्थोपकारकाभावान्नालङ्कार-त्वमिति भावः ।

वृत्तिविरोधस्यान्तर्भावमाह -अकुण्ठेति । 'अकुण्ठोत्कण्ठया' (का...) इत्यादौ 'कटवर्णा रणौ लघू' इत्युक्तेः परुषवर्णत्वं श्रृङ्गारे उपनागरिकावृत्तिविरोध उक्तः सः प्रतिकूलवर्णतैवेत्यर्थः ।

यमकदोषस्याप्रयुक्तेऽन्तर्भावमाह - यमकस्येति । एकस्मिन् द्वयोश्चतुर्षु वा पादेषु यमकं कविप्रयोगे दृष्टन्न तु पादत्रये तेन पादत्रये यमकमप्रयुक्तदोष एवेत्यर्थः ।

तदाह - भुजङ्गमस्येति । दम्भः कपटं तत्सहिताः सदम्भाः खलाः । 'कपटोऽस्त्री व्याजदम्भौ' (अ.१।७।३०) इत्यमरः । दुरन्ततां दुष्टफलतां निर्णयतो निश्चिन्वन्तोऽपि मनः कमीभूतं प्रमुखे प्रथमं कर्षति मोहयति । निर्णयतोऽपि निश्चयेनैव दुरन्ततां प्रति चेतः कर्षन्ति नयन्ति । 'नीह्रीकृषवहाम्' (सिकौ.कारक.) इति कृषे द्विकर्मकत्वमिति वयम् ।

तत्र दृष्टान्त- सत अम्भः मणि कान्तिः पानीयसंज्ञा यस्य सः । भुजङ्गमस्य मणिरिव । कुतः क इव-ग्राहैनैक्रैरवकीर्णा व्याप्ता सत अम्भोजं कमलं यस्याः सा सदम्भा नदीव । तदुक्तम्- 'ह्रदः प्रसन्ना इव

कमलाकरी

गूढनक्राः' इति । अत्र पादत्रये यमकम् अप्रयुक्तं दोषः ।

अथ लिङ्गवचनभेदाद् वामनोक्तान् उपमादोषानपि प्रसङ्गादाह उपमायाञ्चेति । वाशब्दोऽप्यर्थे । जातिः ब्राह्मणत्वादिः प्रमाणं परिमाणम् उपमायामुपमानस्य जातिगता परिमाणगता वा न्यूनत्वमधिकता वाऽतादृशी उपमेयासंदृशी सोऽनुचितार्थमेव नान्यः इत्यर्थः ।

उपमानोपमेययोः समानधर्माश्रितदोषानप्युक्तदोषेष्वाह – धर्माश्रयेत्विति । तुरप्यर्थो व्यवहितो योज्यः । धर्मः समानो धर्मः आश्रयः ययोस्ते तदाश्रिते तद्गते न्यूनाधिकत्वे अपि क्रमेण न्यूनपदत्वमधिकपदत्वञ्च दोषं न व्यभिचरतः न त्यजतः किन्तु न्यूनधर्मत्वं न्यूनपदेऽधिकधर्मत्वमधिकपदेऽन्तर्भूतं न तु पृथग्दोषावित्यर्थः ।

जातिन्यूनमाह – चण्डालैरिति । द्रोणे हते पाण्डवान् प्रति तत्पुत्रवाक्यम् । चण्डालैरिति–जातिन्यूनमुपमानम् वह्नीति–परिमाणन्यूनम् । अयं पद्मेति– देवत्वजात्याधिकम् । पातालमिवेति । परिमाणाधिक्यश्चानुचितार्थतैवेत्याह – अत्रेति । प्रस्तुतः उपमेयः कदर्थितो विरसीकृतः ।

अत्रान्ते निम्नत्वकाठिन्यमात्रेणोपमानं न दोषः, तेनाद्यन्तयोरप्रयुक्तत्वं दोष इति ज्ञेयम् । यद्यपि चण्डालाद्यैर्न्यूनैरुपमेयस्य निन्दनेऽपि ब्रह्माद्यैराधिक्ये न तथा । तथाप्यपकृष्टस्योत्कृष्टेनोपमानम् उपहासायैव इति दोष एवेत्यर्थः ।

न्यूनधर्मत्वमाह – स मुनिरिति । अंशुमान् सूर्यः । अत्रोपमाने सूर्ये मौञ्जीतुल्यतडितोऽनुक्तेर्न्यूनपदत्वेऽन्तर्भावमाह–अत्रेति । अधिकधर्मत्वमाह–स पीतवासा इति । सः कृष्णः मनोज्ञं रम्यमपि वपुर्भीमं प्राप । निशायां रात्रौ शतह्रदा विद्युदिन्द्रायुधमिन्द्रधनुश्च तद्वान् शशिना चन्द्रेण युक्तो मेघ इवेत्यत्र पीतवस्त्रशार्ङ्गयोर्विद्युदिन्द्रायुधाभ्यां कृष्णस्य च मेघेनोपमानेऽपि कृष्णे शङ्खधारणानुक्तेर्मेघे शशिनो ग्रहणं धारणमधिकधर्मत्वमधिकप्रदेऽन्तर्भूतमित्याह – अत्रेति । अत्र चोपमानवदुपमेयेऽपि न्यूनाधिकधर्मत्वं ज्ञेयम् ।

उपमानोपमेययोर्लिङ्गिवचनभेदोऽपि भग्नप्रक्रमेऽन्तर्भूतमित्याह– लिङ्गेति । द्वयोः स्त्रीपुन्नपुंसकलिङ्गानां भेदः एकवचनद्विवचनादिभेदश्च, द्वयोः समानत्वे विवक्षितं धर्ममसाधारणं कुर्यात् । तेन ' चन्द्र इव मुखं

चिन्तारत्नमिव च्युतोऽसि करतो धिङ्
मन्दभाग्यस्य मे ।। ५९० ।।

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिछायी पदं स्वरूपभेदं नापद्यते, न तत्रैतद्दूषणावतारः । उभयथापि अस्यानुगमक्षमस्वभावत्वात् । यथा-

गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ।। ५९२ ।।

तद्वेषोऽसदृशोन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ।। ५९३ ।।

कमलाकरी

मनोज्ञ' मिति लिङ्गभेदेऽपि मनोज्ञत्वस्य प्रत्यक्षेण साम्यावगतेर्न दोष इति ज्ञेयम् ।

तदेति - लिङ्गाद्यन्वितस्यैव धर्मसम्बन्धादित्यर्थः । ननु लिङ्गादिभेदेऽपि सामान्यधर्मेणैवोपमा स्यादत आह- सविशेषणस्येति । प्रतीतेनापि सामान्यधर्मेण लिङ्गादिविशेषणविशिष्टस्यैवोपमानत्वमुपमेयत्वं वा स्यान्न शुद्धस्य, लिङ्गेन धर्मसङ्कोचात् । तेन प्रक्रान्तस्योपमार्थस्य बाधात् प्रक्रमभङ्गः इत्यर्थः ।

लिङ्गवचनभेदमाह - सक्तवः इति । अत्र शुद्धा इति बहुत्वमुपमेय सक्तुष्वन्वितं नोपमाने । वध्वामिति विशिष्टस्य धर्मान्वयाभावात् प्रक्रमभङ्ग । अत्र लिङ्गभेदादप्युपमायोगः ।

क्वचिल्लिङ्गवचनभेदेऽपि अदोषमाह - अयं त्विति । यत्र लिङ्गयोर्वचनयोर्वा भेदेऽपि सामान्यधर्मवाचकं पदस्वरूपस्य शब्दस्वरूपस्य भेदे[1] भङ्गमन्यथात्वं न प्राप्नोति । स्वरूपाभेदमिति पाठे शब्दस्वरूपस्याभेदमभङ्गं वा प्राप्नोति तत्र न दोषः ।

हेतुमाह - उभयेति । विलिङ्गे विसंख्येऽपि यथाश्रुतस्यार्थान्वयसम्भवादित्यर्थः । गुणैरिति - स राजाऽनर्घ्यैः पूज्यैर्गुणैः प्रथितो बहुमूल्यै रत्नैर्महार्णव इव प्रथितोऽभूद । इत्यत्र गुणरत्नयोर्लिङ्गभेदेऽपि अनर्घ्यैरिति सामान्यधर्मस्याभङ्गेनोभयान्वयान्न दोषः ।

वचनभेदेऽदोषमाह - तद्वेष इति । अन्याभिः

---

१. भेजभङ्ग-क.।

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः यथा -

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ।। ५९४ ।।

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिर-स्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटप्रभवा लतेव ।। ५९५ ।।

अत्र लता विभ्राजते न तु विभ्राजसे इति सम्बोध्यमाननिष्ठस्य परभागस्य असम्बोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

कमलाकरी

स्त्रीभिरसदृशोऽसमानः । कञ् प्रत्ययः । मधुरतया भृतो युक्तः पूर्णो वा तस्याः वेषस्तदीया विभ्रमा इव परां शोभां दधते स्म धारयामासुः । दध् धारण इत्यात्मनेपदैकवचनम् । विभ्रमा अप्यन्याभिरसदृशः असम्यञ्चः मधुरतां बिभ्रति ते भृतः । उभयत्र क्विबन्तं बहुवचनम् । तेऽपि परां शोभां दधते स्म धारते स्म धारयामासुरिति दधातर्बहुवचनम् । अत्र वेषविभ्रमयोरुपमानोपमेययोरेकवचनबहुवचनभेदेऽप्यसदृशः भृतो दधत इति समानधर्मवाचकानि श्लेषादभङ्गेनान्वितानीत्यदोषः । श्लेषस्योपमाङ्गत्वेन प्रागप्रतीतेः न तेनान्यथासिद्धिः । 'येन ध्वस्तमनोभवेन' इत्यादावुपमाभावे तु श्लेषः प्रधानमिति भावः । अतएव श्लेषेऽप्रयुक्तनिहतार्थौ न दोषावित्युक्तम् ।

अथोपमायां कालादिभेदाख्यातदोषाणां प्रक्रमभङ्गत्वमाह कालेति । कालोऽतीतादिः पुरुषः प्रथममध्यमोत्तमरुपः, विधिः प्रवर्तनम् आदि पदान्निवृत्तिः, तथाप्रतीतिरुपमाधीः । विश्रान्तिं चमत्कारम् । असौ कालादिभेदोऽपि भग्नप्रक्रमतया व्याप्त आक्रान्तः न तु पृथगित्यर्थः ।

कालभेदमाह - अतिथिमिति । कुमुद्वती कुमुदनागकन्या काकुत्स्थयात् कुशादतिथिं नाम पुत्रं प्राप । चेतना धीरन्त्याद् वा रात्रिप्रहरात् प्रसादं यथा प्राप्नोति इत्यतीतकालायोगाद्दोषमाह - अत्रेति ।

पुरुषभेदमाह - प्रत्यग्रेति । प्रत्यग्रं नूतनं मज्जनं स्नानं तेन

गङ्गेव प्रवहतु ते सदैव कीर्तिः ।। ५९६ ।।

इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु इत्यप्रवृत्तप्रवर्तनात्मनो विधेः ।

एवं जातीयकस्यान्यास्यार्थस्य उपमानगतस्यासम्भवाद्विध्यादिभेदः ।

ननु समानमुच्चारितं प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायामुपमायामुपमेयस्य प्रकृतधर्माभिसम्बन्धान्न कश्चित् कालादिभेदोऽस्ति । यत्राप्युपात्तेनैवं सामान्यधर्मेण उपमाऽवगम्यते

कमलाकरी

विशेषेणातिशयेन विविक्ता शुद्धा मूर्तिर्देहो यस्याः सा । कुसुम्भेन रक्तं कौसुम्भम् । 'तेन रक्तं रागात्' (अ.४।२।१) इत्यण् । तस्य रागेणारुणेन स्फुरन्नंशुकस्य वस्त्रस्यान्तो यस्याः यद्वा स्फुरन्तो येंऽशवस्तैः कान्ता रम्याः । कामं वर्धयन्ती त्वं नवपल्लवो विटपी वृक्षस्तज्जा लतेव विभाजसे शोभसे । इत्यत्र कान्तायाः सम्बोध्यत्वात् तद्गतस्य मध्यमपुरुषोक्तपरभागस्य गुणोत्कर्षस्याचेतनलताविषयत्वाद्विभ्राजत इति प्रथमपुरुषार्थस्य व्यत्यासाद्विपर्ययात् पुरुषभेदो भग्नप्रक्रम इत्याह- अत्रेति ।

विधिभेदमाह - गङ्गेवेति । विधेरित्यन्ते व्यत्यासादित्यनुषङ्गः । व्यत्यासाद् विध्यादिभेदो भग्नप्रक्रमतया व्याप्त इति पूर्वेणान्वयः 'आशिषि लिङ्लोटौ' (अष्टा. ३।३।१७३) इत्याशिषि लोटोऽसिद्धेष्वकीर्तिपरत्वात् सिद्धे गङ्गावहने बाधाद् विधिभेदो इत्यर्थः ।

ननु वहनस्य सिद्धत्वेऽपि क्वचिदसिद्धो गङ्गाधर्मो विधिविषयः स्यादत आह - एवं जातीयकस्येति । प्रवहनस्य प्रकृत्यर्थस्य गङ्गायामेव सम्भवादन्यस्य प्रकृत्यर्थत्वाभावेन विध्यन्वयायोगादित्यर्थः । उपमानं गङ्गां । विध्यादेर्भेदो व्यत्यासः । एवं "पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीडयं भवतः पितेव" (रघु.५।३४) एवम् 'अविघ्नमस्तु ते भूयाः पितेव धुरि पुत्रिणाम्' (रघु. १।९१) इत्यत्र पिता भवन्तं यथा लेभे यथा धुरि अभूदिति विधेर्व्यत्यासं प्रागवोचाम । नतूक्तधर्म-वैषम्यादिकं न दोषस्तत्वे काव्यमात्रोच्छेदापत्तेरिति शङ्कते ।

नन्विति । उच्चरितं शाब्दं प्रतीयमानमार्थं वा समानं धर्मान्तरंमादाय

यथा ' युधिष्ठिर इवायं सत्यं वदति' इति तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । 'सत्यवादी सत्यं वदतीति च न पौनक्त्यमाशङ्कनीयम् । 'रैपोषं पुष्णातीतिवत् युधिष्ठिरसत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् । सत्यमेतत् किन्तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यम् । प्रस्तुतवस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् ।

असादृश्यासम्भवावप्युपमायामनुचितार्थतायामेव पर्यवस्यः।

यथा -

'ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।। ५९७ ।।

अत्र काव्यस्य शशिना अर्थानाञ्च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम् ।

कमलाकरी

'काम इवायं राजा भवति' इत्यार्थेन सौन्दर्यधर्मेणोपमायां समाप्तायां पश्चा[१]द्धातोः भानक्रियामात्रे यथोचितं वर्तमानकालान्वयात्[२] कामासम्बन्धेऽपि न दोषः । न ह्युपमायां सर्वधर्मान्वयः कस्यापीष्ट तथात्वे 'चन्द्र इव मुखम् ' इत्यत्र मुखो लाच्छनस्य चन्द्रे वदनादेश्च भावादुपमा न स्यादिति भावः । उपमेयस्य राज्ञः प्रकृतो धर्मः वर्तमानकालीन-भानम् ।

ननु यत्र कालविशिष्टेनैव समानधर्मेणोपमा तत्र का गतिरत्राह- यत्रापीति । अत्र सत्यवादित्वं शाब्दमपि साधर्म्यं वस्तुतो भिन्नकालमेवेत्यर्थः । उपात्तेन कालविशिष्टेन श्रुतेन धर्मेणेत्यर्थः । दृष्टान्तमाह - यथेति । वर्तमानेनैव सत्यवदनेन युधिष्ठिरसाम्यं यत्रेत्यन्वयः । उत्तरमाह - तत्रेति । तत्र युधिष्ठिर इव सत्यवचनशीलोऽयमिति । तच्छीलस्यातीतादिकालेष्वपि साम्यादुपमा । ननु वर्तमानेन सत्यवदनेन योगाद्येनातीते युधिष्ठिरे तद्बाधात् कालभेदः स्यादित्यर्थः ।

ननु सत्यवादित्वमात्रेणोपमायां सत्यं वदतीति पुनरुक्तं स्यादत आह-सत्येति । रैपोषमिति। यद्यपि राया धनेन पोषयित्वा इति रैपोषं

---

१. पश्चादा राज्ञो -ब.।
२. कामसम्बन्धे-क.।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा -
दिनार्धभाजः परिवेषिणोऽर्कान् ।। ५९८ ।।

अत्रापि ज्वलन्त्यो सूर्यमण्डलान्निष्पतन्त्यो न सम्भवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

उत्प्रेक्षायामापि सम्भावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते न यथाशब्दोऽपि । केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात् । तस्य चास्यामविवक्षित्वादिति तत्राशक्तिरवाचकत्वं दोषः । यथा -

उद्ययौ दीर्घिकागर्भात् मुकुलं मेचकोत्पलम् ।
नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ।। ५९९ ।।

कमलाकरी

यथा स्यात्तथा पुष्णातीति अनुप्रयोगादनुशासनान्न पौनरुक्त्यम् । प्रकृते च तदभावात् पौनरुक्त्यमेव तथापि घटेन घटवद् भूतलमितिवत् सत्यवदनेनायं सत्यवादीति न पौनरुक्त्यमिति ध्येयम् । तत्र पोषणवदत्र सत्यवदनमात्रेणोपमा । तेन कालादिभेदो न दोष इति महाशङ्कार्थः ।

उत्तरमाह - सत्यमिति । सिद्धेषु कविप्रयोगेषु समर्थनं ग[१]तिमात्रमिदं क्रियते न तु सर्वथा निर्दोषम् । सत्यं वदतीति वाक्ये णिनेरश्रवणादध्याहारे च मानाभावात् तादृशबोधासिद्धेरित्यर्थ । कुतो निर्दोषं न तत्राह - प्रस्तुतेति । काव्ये सत्यवदनेन सत्यवादीति कथितपदत्वापुष्टार्थत्वानर्थकत्वादिदोषापत्तेः । श्रुतकालादिविशिष्टसादृश्याभावेनोपमाभङ्गः सरसपुरुषवेद्य एव न तु त्वादृशपशुवेद्य इति भावः । सचेतसो विज्ञाः ।

असादृश्यासम्भवयोरुपमादोषयोरनुचितेऽर्थेऽन्तर्भावमाह-असादृश्येति । आद्यमाह - ग्रथ्नामीति । न प्रतीतमित्यप्रतीताप्रयुक्तयोरन्तर्भावः कथञ्चित् कष्टेऽन्तर्भावश्चेत्यर्थः । नवार्थाः रश्मय इव प्रीतिदा इत्युपमायाः काव्यशशिनोरपि तत्सिद्धिरन्योन्याश्रयात् ।

असम्भवमाह - निपेतुरिति । अर्काद्

१. समर्थनमर्थावगतिमात्र-क.।

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वात् निरूपाख्यप्रख्यं, तत्समर्थनाय यदर्थान्तरन्यासोपादानं तदालेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति, निर्विषयत्वमेतस्यानुचितार्थतैव दोषः । यथा -

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव ।। ६०० ।।

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न सम्भवतीति कुत एव तत् प्रयोजितमद्रिणा परित्राणम् । सम्भावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः ।

कमलाकरी

वारिधारासम्भवादुपमायोगादनुचितार्थत्वादिदोषा इत्याह - अत्रेति । उत्प्रेक्षादोषस्याशक्तशब्दत्वस्यावाचकेऽन्तर्भावमाह-उत्प्रेक्षेति । मन्ये शङ्के ध्रुवेवादय एव शब्दाः सम्भावनां वदन्ति न तु यथाशब्दः । केवलस्यासमस्तस्य साधर्म्यमात्रपरत्वात् समासे यथायोग्यं यथार्थमित्यादौ चानतिक्रमोऽर्थः । न सम्भावनं वाच्यमितिशेषः । तत्र सम्भ[१]वते इव शब्दो हि साधर्म्यं सम्भावनाञ्च ब्रूते, यथाशब्दस्तु साधर्म्यमेव ब्रूते न सम्भावनामित्यर्थः ।

उद्ययाविति-वापीरूपा कान्ता तस्याः मध्यान्मेचकं नीलोत्पलरूपं मुकलं स्तनरूपमुदभूत् । नारीलोचनयोश्चातुर्यं कटाक्षस्तस्य विशालत्वात् तर्जनशङ्कया सङ्कुचितं ध्रुवं न विस्तीर्णमिति वाच्ये यथा शब्दोऽत्य[२]र्थ इत्यर्थः ।

उत्प्रेक्षामूलेऽर्थान्तरन्यासेऽप्युपमादोषमाह- उत्प्रेक्षितमिति । असद् रूपं हि निरूपाख्यप्रख्यमलीकतुल्यं तत्समर्थनायोत्प्रेक्षितार्थसाधनायार्थान्तरन्यासोऽप्यभित्तिचित्र- वदर्थाभावादनुचितार्थतेत्यर्थः । दिवाकरादिति । दिने सूर्याद्भीतमिव गुहासु यो हिमाद्रिरन्धकारं रक्षति । उत्तरार्धेऽर्थान्तरन्यासः उच्चैः शिरसां महतां नीचेऽपि शरणागते ममत्वम् । अत्रासम्भावनामाह - अत्रेति तत्सत्वेऽनुचितार्थान्तरन्यास

---

१. सम्भावने - क. । व्यर्थ-क.।
२. व्यर्थ-क.।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयत्वं यत यत् अपुष्टार्थत्वं पुनरुक्तत्वं वा दोषः यथा-

स्पृशतितिग्मरुचौ ककुभःकरैःदयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि
दिनश्रिया ।। ६०१ ।।

अत्र तिग्मरुचेः ककुभाञ्च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिस्तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति शब्दोपादानेन ।

कमलाकरी

इत्याह-सम्भावितेनेति । विशेषदर्शनकाले आहार्यारोपरूपेण बुद्धस्यास्य तमसो भयस्याहार्यस्य नोपपादकार्थान्तरन्यासापेक्षा, तेनार्थान्तरन्यास एवानुचितार्थो दुष्टो नोत्प्रेक्षेति परमानन्दादयः, साऽपि दुष्टेति सरस्वतीतीर्थ-देवनाथादयः ।

अथ समासोक्तावुपमानविशेषोपादानं दोषोऽपुष्टार्थत्वे पुनरुक्तत्वे वाऽन्तर्भूत इत्याह -साधारणेति । तुल्यैर्विशेषणैरेवोपमानविशेषप्रतीतौ सत्यां पुनरुपमानवाचकं पदमपुष्टार्थं पुनरुक्तञ्चेत्यर्थः ।

तदाह - स्पृशतीति - तिग्मरुचौ सूर्ये नायके च करैरंशुभिर्हस्तैश्च ककुभो दिशः कान्ताश्च स्पृशति सति विजृम्भितः प्रवृद्धस्तापः सन्ताप उष्णता च यस्यास्तया चिरयापि चिरकालं यद्दिनं तस्य श्रिया । चिरयापीति पाठे चिरं दीर्घकालं यापयति प्रापयतीति प्राप्नोतीति चिरयापि । दिनं ग्रीष्मदिनं तस्य श्रिया रुचिरया दयितया सपत्न्या च । अतनु दीर्घं मानं परिमाणमभिमानश्च तस्य स्वीकरो यस्यस्तादृश्या स्थितमित्यन्वयः ।

अत्र तुल्यैर्विशेषणैर्व्यक्तिलिङ्गतद्विशेषेण सूर्ये पुंल्लिङ्गं दिक्षु स्त्रीलिङ्गं तेन च सूर्यस्य नायकत्वेन दिशाञ्च नायिकात्वेन यथा व्यक्तिरभिव्यक्तिस्तथा विशेषणैः स्त्रीलिङ्गाच्च दिनश्रियः प्रतिनायिकात्वं सिद्धमिति दयितयेति स्वस्योपमानस्य शब्दस्तस्योच्चारेण किम्, न किमपीत्यर्थः । तेनापुष्टार्थं पुनरुक्तञ्चेत्यर्थः ।

श्लेषोपमायास्तु स विषयः यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीति। यथा -

स्वयञ्च पल्लवाताम्रभास्वत्करविराजिता।
प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा॥ ६०२॥

अप्रस्तुतप्रशंसायामपि उपमेयमनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम्। यथा -

कमलाकरी

ननु रवेः करैर्दिशां संस्पर्शे श्लेषेण सपत्नीतापार्थं सा दयितयेति सार्थकमेवोपमानपदमत आह - श्लेषेति। उपमाने स्वपदोक्तेऽपि यत्र समासोक्तेर्न तथा स्फुटा प्रतीतिः तत्र तदुक्तिः श्लेषोपमा च। यत्र तु तत्वेऽपि समासोक्तेरभङ्गस्तत्र तदुक्तिर्दोष एवेत्यर्थः।

समासोक्त्यभावे श्लेषोयमामाह स्वयञ्चेति। पल्लववदाताम्रौ भास्वन्तौ करौ इस्तौ। भास्वतः सूर्यस्य कराः किरणाश्च। सुखेनामुं शक्यं न स्वापं दुर्लभं यत् फलं सुरतं तत्र लुब्धानामीहितं वाञ्चितं प्रददातीति। सन्ध्यापक्षे - आस्वापो निद्रा तस्याः फलं सुखं तत्र लुब्धा। निद्रालौ अहितस्य दात्री अनिष्टस्य दात्री। सन्ध्यायां निद्रानिषेधात्।

अत्र विशेषणैः सन्ध्यानवगतेः समासोक्त्यभावात् उपमान सन्ध्योक्तिर्न दोष इत्यर्थः।

अप्रस्तुतप्रशंसायामुपमेयस्य तुल्यैर्विशेषणैः प्रतीतौ स्वशब्दोक्तिरपुष्टार्थत्वमेवेत्याह -अप्रस्तुतेति। अनया रीत्या विशेषणसाम्येन प्रतीतं पुनः शब्दप्रयोगेण न कदर्थतां नेयमपुष्टं कर्तव्यम्। तेन स एव दोष इत्यर्थस्तदाह आहूतेष्विति। अविवेकिनो निन्देयम् - राजादिभिराहूतेषु आनीतेषु विहङ्गमेषु पक्षिषु पूरोऽग्रे आयन् मशको न वार्यते निषिद्ध्यते। सोऽप्यायातु न तु पक्षिमध्ये गण्यते इत्यर्थः। तृणमणिः नीचमणिः काचादिः, प्रवालमित्यन्ये। मणीनां मध्येऽग्रेऽन्तिके वसन्नपि। मध्येवारिधीति पाठे वारिर्मध्ये सः वसन्नपि काचादिमणिर्वा वसन्नपि मणीनां रत्नानां रुचं कान्ति न धत्ते। मणीनां मध्येन गण्यत इत्यर्थः। खद्योतोऽपि तेजस्विनामग्निसूर्यादीनां मध्ये। अपि शब्दादग्रे प्रचलितुं न कल्पते न समर्थो भवति। क्लृपि सामर्थ्ये क्लृप्तं सामर्थ्यम् कम्पते इति पाठे बिभेति। मध्येऽग्रे वा गच्छतु न तु तन्मध्ये गण्यते। तत्वं स्वरूपं तस्यान्तरं भेदः। अनामृष्टमज्ञातं तत्वान्तरं

आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते
मध्येवारिधि व वसंस्तृणमणिर्धत्ते मणीनां रुचम् ।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतनं ऽभुमिवानामृष्टतत्वान्तरम् ।। ६०३ ।।

अत्राचेतनस्य प्रभोरप्रस्तुतर्विशिष्टसामान्यद्वारेणाभिव्यक्तौ न युक्तमेव पुनः कथनम् ।

तदेतेऽलङ्कारदोषाः यथासम्भविनोऽन्येप्येवं जातीयकाः पुर्वोक्तयैव दोष जात्या अन्तर्भाविता न पुथक् प्रतिपादनमर्हन्तीति सम्पूर्णमिदं काव्यलक्षणम् । इति ।

कमलाकरी

स्वरूपभेदो , येन तमचेतनमज्ञं प्रभुमिव सामान्यं पक्षि-मशक-काच-रत्न- खद्योत -रूपेषु समानदर्शिनं धिक् ।

अत्रेति - । विशिष्टसामान्याविवेकि मूर्खत्वसामान्यं तद्वारा मूर्खप्रभोरभिव्यक्तेर्ज्ञानात् तच्छब्देन पुनः कथनमपुष्टार्थं पुनरुक्तञ्चेत्यर्थः ।

अलङ्कारदोषानुपसंहरति । तदिति । अन्येप्येतत्तुल्याः रुद्रटाद्यैरुक्ताः । एकत्र विरुद्धद्वये विरोधालङ्कारः, आश्रयभेदे तद्दोष इत्यादयः सप्तमोक्तदोषजात्या क्रोडीकृताः इति नोच्यन्ते । सम्पूर्णमिति- प्रथमोल्लासे तत्प्रक्रमेण दोषगुणादेः प्रक्रमादित्यर्थः ।

ननु पूर्वग्रन्थेषु सत्सु किमनेनात आह - इत्येषमार्गो विदुषामिति- विदुषां ध्वनिकृद्वामनादीनां भिन्नोऽपि मार्गः अविरोधेन यत् सङ्गृहीतः यत् प्रतिभासते तत्र चित्रम् । यद्यस्मादमुत्र ग्रन्थे सङ्घटना सङ्गृहेण सन्दर्भ एव हेतुः कृतः । यतः सर्वसङ्ग्रहार्थोऽयं ग्रन्थोऽतो न तैः सिद्धिरित्यर्थः ।

गुणिनोऽनन्तपुत्रस्य विनोदाय सतां मुदे ।
कमलाकरसंज्ञेन श्रम एष विनिर्मितः ।। १ ।।
तर्के दुस्त[१]र्क्यमेधः फणिपतिभणितौ पाणिनीये प्रपञ्चे
न्याये न्यायप्रगल्भः प्रकटितपटिमा भाट्टशास्त्रप्रघट्टे ।
प्राभः प्राभाकरीये पथि मथितदुरुहान्तवेदान्तसिन्धुः
श्रौते साहित्यशास्त्रे प्रखरतरगतिर्धर्मशास्त्रेषु यस्य ।। २ ।।

१. तर्कमेघ. - क.।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता सङ्घटनैव हेतुः ।। १ ।।

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशमोल्लासः
समाप्तश्चायं काव्यप्रकाशः

कमलाकरी

येनाकारि प्रोद्भटा वार्तिकस्य
टीका चान्या विंशतिर्ग्रन्थमाला ।
श्रीरामाङ्घ्र्योरर्पिता निर्णयेषु
सिन्धुः शास्त्रे तत्वकौतूहले च ।। ३ ।।
श्रीमन्नारायणाख्यात् समजनि बिबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्वविद्याम्बुधिनिजचुलुकीकारतः कुम्भजन्मा ।
टीकां काव्यप्रकाशे कमलपदकरस्त्वाकरोऽरीरचद्यः
श्रीपित्रोः पादपद्मे रघुपतिपदयोः स्वं श्रमं प्रार्पयच्च ।। ४ ।।
रामकृष्णतनूजेन कमलाकरशर्मणा ।
योऽत्र श्रमः कृतस्तेन प्रीयतां रावणान्तकः ।। ५ ।।

"इति श्रीमत्पदवाक्यप्रमाणपारावारीण-जगद्गुरु-श्रीमद्रामेश्वरभट्टसूरि-सूनुनारायणभट्ट-सुतविद्वन्मुकुटहीराङ्कुर-श्री रामकृष्णभट्टसुत-महामहोपाध्याय-श्रीमत्कमलाकरभट्टकृतायां काव्यप्रकाशकमलाकरी-व्याख्यायाम् अर्थालङ्कारनिर्णयनाम्मा दशमोल्लास समाप्तः सम्पूर्णश्चायं काव्यप्रकाशग्रन्थः ।।"

काव्यप्रकाश-कारिकाणामकाराद्यानुक्रमणिका

काव्य-प्रकाशस्योदाहरण-पद्यानामनुक्रमणिका

कमलाकरीव्याख्यायां समुद्धृताना ग्रन्थकाराणां ग्रन्थानाञ्चानुक्रमणिका

(क) ग्रन्थाः

(ख) ग्रन्थकाराः

कमलाकरी-व्याख्यायां समुद्धृतपद्यानामनुक्रमणिका

ACHARYA BABULAL SHUKLA, SHASTRI, is a well-known Sanskrit scholar belonging to the Shishya-Paramِpara of Pt. Damodar Lal Goswami of Varanasi. He has done a great and highly valuable work of editing great Sanskrit Manuscripts and getting them published. His contribution in making Sanskrit classics available to common man is remarkable.

Born in March 1927, Acharya Shukla taught Sanskrit in various Government colleges of Madhya Pradesh and retired as Professor of Sanskrit in 1987.

He has guided a number of Sanskrit scholars for their Doctorate in Sanskrit. Besides many scholarly works Acharya Shukla edited Madhyabharati (Jabalpur) - a Journal of higher research. He has been awarded by M.P. and U.P. Governments. The M.P. Sahitya Parishad honoured him by Tamrapatra and a cash award. He has edited more than 40 manuscripts. Presently he is residing at 48, Saket Nagar, Indore Road, Ujjain.